TRIVANDRUM SANSKRIT SERIES,
No. XLIII.

THE
NÂMALINGÂNUSÂSANA
OF
AMARASIMHA

With the two commentaries, **Amarakosodghâtana** of

KSHÎRASVÂMIN

and **Tîkâsarvasva** of

VANDYAGHATÎYA-SARVÂNANDA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit manuscripts, Trivandrum.

Part II.—2nd Kanda, 1—3 Vargas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM
PRINTED AT THE TRAVANCORE GOVERNMENT PRESS
1915.

All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४२.

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनं

क्षीरस्वामिप्रणीतया अमरकोशोद्घाटनाख्यया व्याख्यया

वन्द्यघटीयश्रीसर्वानन्दप्रणीतया टीकासर्वस्वाख्यया

व्याख्यया च समेतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितम् ।

द्वितीयः सम्पुटः — द्वितीयकाण्डे १—६ वर्गाः ।

तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

कोल्लम्वाब्दः १०९०, क्रैस्ताब्दः १९१५.

PREFACE.

This is the second part of the Nâmalingânusâsana and its commentary Tikâsarvasva, containing the second Kânda up to the end of Manushya-Varga. In the third part will be published the remaining vargas of the second Kânda beginning with Brahma-Varga. In the second Kânda is also added another commentary called Amarakosodghâtana by Kshirasvamin, which, it is hoped, will prove more useful than the former in the elucidation of Vanaushadhi-Varga. Regarding Kshîrasvâmin, mention is already made in the introduction of Daiva with Purushakâra (Trivandrum Sanskrit Series No. 1.)

The edition of the commentary of Kshîrasvâmin is based on the following five palm-leaf manuscripts, in Malayalam character, about three centuries old:—

1. ക Belonging to the Palace Library, Trivandrum.
2. ഖ Lent by Mr. Subrahmanya Raja of Idappalli.
3. ഗ Obtained from the Panthalam Kottaram.
4. ഘ Obtained from the Ananthapuram Palace, Harippad.
5. ങ Lent by Mr. Karunakara Pisharodi Vennimalai.

Trivandrum,
22-7-1915.

T. GANAPATI SÂSTRÎ.

निवेदना ।

एष **सटीकासर्वस्वो नामलिङ्गानुशासनस्य** द्वितीयो भागः । अत्र द्वितीयकाण्डो मनुष्यवर्गान्तः प्रकाशितः, तृतीये भागे **ब्रह्मवर्गादिः** प्रकाशयिष्यते । **क्षीरस्वामि**प्रणीतम् **अमरकोशोद्घाटना**भिधं व्याख्यानमपि द्वितीयकाण्डे योजितं, यतस्तद् वनौषधिवर्गार्थप्रतिपत्तौ **टीकासर्वस्वा**पेक्षयाधिकमुपकारमाधातुं क्षमम् । **क्षीरस्वामिनो** जीवितसमयादिकम् **अनन्तशयनसंस्कृतग्रन्थावली**प्रथमाङ्कस्योपोद्घाते निवेदितम् ।

क्षीरस्वामीयस्य व्याख्यानस्य संशोधनाधारभूता ग्रन्थास्त्वेते —

१. राजकीयग्रन्थशालीयोऽसमग्रः क. संज्ञः.
२. इडप्पळ्ळिसुब्रह्मण्यराजस्वामिकः ख. संज्ञः.
३. पन्तळराजस्वामिकः ग. संज्ञः.
४. हरिप्पाडु अनन्तपुरराजस्वामिकः घ. संज्ञः.
५. वेन्निमल करुणाकरपिषारोटिस्वामिकः ङ. संज्ञः.

सर्व एते ग्रन्थास्तालपत्रात्मकाः केरललिपयोऽनतिशुद्धा उपत्रिंशतवर्षवृद्धाश्च ।

अनन्तशयनम्.
१९१९. ७. २२

त. गणपतिशास्त्री.

॥ श्रीः ॥

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनं

क्षीरस्वामिप्रणीतया अमरकोशोद्घाटनाख्यया व्याख्यया

वन्द्यघटीयश्रीसर्वानन्दप्रणीतया टीकासर्वस्वाख्यया

व्याख्यया च समेतम् ।

द्वितीयं काण्डम् ।

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
तृब्रह्मक्षत्रविट्छूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

(क्षीरस्वामीयम्)

अथ द्वितीयकाण्डे वर्गान् सङ्गृह्णीते—

अङ्गैर्मृगादिभिः उपाङ्गैश्च खिलादिभिः सह वर्तमानैः पृथ्व्यादिभिः सम्पादितवर्गा इह वक्ष्यमाणे काण्डे वदितुमारब्धा उदिताः । 'आदिकर्मणि–'(३. ४. ७१), 'आशंसायां भूतवच्च' (३. ३. १३२) इति वा क्तः ॥

(टीकासर्वस्वम्)

'वर्गाः पृथ्वी'त्यादिसङ्ग्रहश्लोकः सुखग्रहणार्थः । इह भूकाण्डे पृथ्वीप्रभृतिभिः साङ्गोपाङ्गैरङ्गप्रत्यङ्गसहितैर्दशभिर्वर्गा उदिता वक्तुमाशंसिताः । 'आशंसायां भूतवच्च' (३. ३. १३२) इति भूतवद्भावात् क्तः । मृगादिशब्देन सिंह उच्यते । मृगानत्तुं शीलमस्येति णिनिः । तत्र भूमेरङ्गानि मृत्तिकादीनि । उपाङ्गान्यध्वादीनि ॥

भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणिः क्षोणी ज्या काश्यपी क्षितिः ॥ २ ॥

सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥ ३ ॥

क्षीर०— भवत्यस्यां सर्वं भूः । रेफान्तस्त्वव्ययम् । यथा भूर्भुवः स्वः । रसाः सन्त्यस्यां, रस्यते वा रसा । विश्वं बिभर्ति विश्वम्भरा । 'संज्ञायां भृतृ —' (३. २. ४६) खच् । क्षौति रूपं क्षोणी । 'टुक्षु शब्दे' । जिनाति सर्वं ज्या । इज्येति मूर्खव्याख्या । यच्छाश्वतः — 'ज्या मौर्वी ज्या वसुन्धरे'ति । ज्येति निघण्टुः । कश्यपस्येयं काश्यपी । भार्गवेण जित्वास्मै दत्ता । क्षियन्ति तां क्षितिः । 'क्षि निवासे' । वसु धनं धत्ते वसुधा । उर्वी विस्तीर्णत्वात् । वसु धारयतीति वसुन्धरा । गोत्राः शैलाः सन्त्यस्यां गोत्रा । गाः त्रायते वा । कायति कूयते वा कुः । प्रथते, पृथुना चरिता वा पृथिवी । 'प्रथेः षिवन् सम्प्रसारणं च' (उ० १. १४९) इति षिवन् सम्प्रसारणं किच्च । पृथ्वीति । 'वोतो गुणवचनात्' (४. १. ४४) इति ङीष् । क्षमते भारं क्षमा । अवति प्रजाः अव्यते नृपैर्वा अवनिः । दैत्यमेदोयोगाद् मेदिनी । महती मही ।

"भूतधात्री रत्नगर्भा विपुला सागराम्बरा"

इति च रत्नवतीति च भागुरिः । क्षमा इला च नानार्थे ॥

टीका०— तत्र भूरादयः सप्तविंशतिर्भूमौ । भवन्त्यस्यामिति भूः । अधिकरणे सम्पदादित्वात् क्विप् । 'भुवः कित्' (उ० ४. ४६) इति मिः । भूमिः । न चलतीत्यचला । पचादिः । नास्त्यन्तोऽस्या इत्यनन्ता । रसाः अस्यां सन्तीति रसा । अर्शआद्यच् । विश्वम्भरो विष्णावुक्तः । ततष्टाप् । स्थिरेति । 'अजिरशिशिरशिथिलस्थिरास्फिरस्थविरखदिराः' (उ० १. ९६) इति स्थिरो निपातितः । ततष्टाप् । धरतीति धरा । पचादिः । धरित्रीति । 'धृञ् धारणे' । 'अशित्रादिभ्य

---

१. 'नावतारि' ख. पाठः. २. 'त्री धृ' ङ. छ. झ. पाठः.

इत्रोत्रौ' (उ० ४. १७४) इत्यत्र अश्यादिपाठाद् इत्रप्रत्ययः । पिप्पल्यादिङीष् । तरणिवद् धरणिः । 'टुक्षु शब्दे' । *'वहिश्रिश्रुक्षु—' (उ० ४. ५२) इत्यादिना निन् । क्षोणिः । ङीपि क्षोणी च । ज्येति । 'ज्या वयोहानौ' । 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इत्युपसङ्ख्यानात् कः । कित्त्वाद् आकारलोपः । टाप् । काश्यपीति । 'तस्येदम्' (४. ३. १२०) इत्यण् । तथा च —

"त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां ततः ।
दक्षिणामश्वमेधान्ते काश्यपायाददात् प्रभुः ॥"

निवसन्त्यस्यामिति क्षितिः । 'क्षि निवासगत्योः' । बाहुलकोऽधिकरणे क्तिन् । सर्वंसहेति । 'पृसर्वयोर्दारिसहोः' (३. २. ४१) इति खच् । वसु धनं, तद्योगाद् वसुमती । मतुप् । वसून्येव दधातीति वसुधा । 'आतोऽनुपसर्गे कः' (३. २. ३) । महत्त्वयोगादुर्वी पृथ्वी च । 'ऊर्णुञ् आच्छादने' । 'महति ह्रस्वश्च' (उ० १. ३२) इति महत्यर्थे गम्यमाने ऊर्णोतेः कुप्रत्ययः । (ण ? णु)लोपः ह्रस्वश्च । उरु महत् । 'प्रथ प्रख्याने' । 'प्रथिभ्रादि —' (उ० १. २८) इत्यादिना कुप्रत्ययः सम्प्रसारणं च । पृथु विस्तीर्णं, तत उभयत्र 'वोतो गुणवचनात्' (४. १. ४४) ङीप् । वसु धारयतीति वसुन्धरा । 'संज्ञायां भृतृवृजिधारिसहितपिदमः' (३. २. ४६) इति खच् । 'खचि ह्रस्वः' (६. ४. ९४) इत्युपधाह्रस्वत्वम् । गौः त्रायत इति गोत्रा । 'त्रैङ् पालने' । वसुधावत् कः । कायतेर्बाहुलकात् कुप्रत्ययेन कुः । पृथिवीति । 'प्रथ प्रख्याने । 'प्रथेः पिवन् सम्प्रसारणं च' (उ० १. १५६) इति पिवन्प्रत्ययः । पित्त्वान्ङीप् । 'पृथिविशचिविपूचिरि'ति ह्रस्वान्ते रामदासः । क्ष्मेति । क्षमेः पचाद्यच् । नैरुक्त उपधालोपो वैकल्पिकः । तेन क्षमेत्यपि । अवनिरिति । अवतेस्तरणिवदनिः । मधुकैटभयोर्मेदस्संयोगाद् मेदिनी । नैरुक्तस्ततो मत्वर्थीय इनिः । तेन —

---

१. 'प्' ङ. छ. ञ. पाठः. २. 'त्रिस' ज. पाठः. ३. 'गां' क. ख. घ. ज. ञ. पाठः.

---

* 'वहिश्रिश्रुयु' इति मुद्रितोणादिपाठः ।

"मधुकैटभयोस्त्वं(?) यन्मेदसा सम्परिप्लुता ।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः ॥"

महीति । 'मह पूजायाम्' । पचादिगौरादी । 'शुषिं च चुल्लिं महिपाल्लिवल्लीः' इति तु रामदासः ॥

मृन्मृत्तिका

क्षीर०—मृद्यते मृत् । 'मृदस्तिकन्' (५. ४. ३७) स्वार्थे ॥

टीका०—मृद्वयं मृत्तिकायाम् । 'मृद क्षोदे' सम्पदादिपाठात् कर्मणि क्विप् । साहचर्यात् स्त्रीत्वम् । मृत्तिकेति । 'मृदस्तिकन्' (५. ४. ३९) इति तिकन् ॥

प्रशस्ता तु मृत्स्ना मृत्सा च मृत्तिका ।

क्षीर०—'सस्नौ प्रशंसायाम्' (५. ४. ४०) ।

"कृष्णभूमः कृष्णमृत् स्यादुदग्भूम उदङ्मृदि ।
पाण्डुभूमः पाण्डुमृच्च कृष्णोदक्पाण्डुभूमिषु ॥
कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः ॥"

टीका०—मृत्स्नाद्वयं प्रशस्तमृत्तिकायाम् । 'सस्नौ प्रशंसायाम्' (५. ४. ४०) इति मृच्छब्दात् सस्नौ प्रत्ययौ भवतः ॥

उर्वरा सर्वसस्याढ्या

क्षीर०—उर्वति क्षुधम्, उरु इयर्ति वा उर्वरा ॥

टीका०—सर्वसस्योत्पत्तिभूमिः अतिसारा उर्वरा । उरुं महान्तं वृणातीत्युर्वरा । पृषोदरादिः ।

"उर्वरा सर्वसस्याढ्यवसुधायां क्षितावपि"

इति ह्रस्वोकारादावजयः ॥

स्यादूषः क्षारमृत्तिका ॥ ४ ॥

---

१. 'नव मे' ध. पाठः. २. 'वि' ङ. छ. ज. पाठः.

क्षीर० — **'ऊष रुजायाम्'** ॥

टीका० — **क्षारमृत्तिकायाम्**[1] ऊषद्वयम्। 'ऊष रुजायाम्'। दीर्घादिः। इगुपधलक्षणः कः। क्षारमृत्तिकेति कर्मधारयः ॥

ऊषवानूषरो द्वावप्यन्यलिङ्गौ

क्षीर० — **'ऊषसुषि—'** (५. २. १०७) **इति रः** ॥

टीका० — ऊषवद्वयं **क्षारमृत्तिकायुक्तभूभागे**। ऊषवान् मत्वन्तः। 'झयः' (८. २. १०) इति वत्वम्। ऊषर इति। मत्वर्थे ऊषसुषिमुष्कमधो रः' (५. २. १०७) इति रप्रत्ययः। अन्यलिङ्गौ वाच्यलिङ्गौ। 'अम्बुदस्य परिहार्यमूषरम्' (स० १४. श्लो० ४६) इति माघः ॥

स्थलं स्थली।

क्षीर० — **स्थलति स्थली अकृत्रिमा चेत्। 'जानपदकुण्ड —'** (४. १. ४२) **इति ङीष्। कृत्रिमा तु स्थला** ॥

टीका० — स्थलद्वयं **जलशून्याकृत्रिमभूभागे**[2]। 'स्थल स्थाने'। पचादिः। स्थलम्। स्थलीति। 'जानपदकुण्ड —' (४. १. ४२) इत्यादिना अकृत्रिमायां ङीष्। कृत्रिमायां तु स्थला ॥

समानौ मरुधन्वानौ

क्षीर० — **म्रियन्ते तृषास्मिन्निति मरुः। दधति**[3]**धनति (?)‡ वा धन्वा** ॥

टीका० — मरुद्वयं **निर्जले देशे**। म्रियतेः 'भृमृ —' (उ० १. ७) इत्यादिना उः। धन्वन्निति। धन्व इति सौत्रो धातुः। 'कनिन् युवृषितक्षिराजिधन्वद्युप्रतिदिवः' (उ० १. १६२) इति कनिन् ॥

द्वे खिलाप्रहते समे ॥ ५ ॥

---

१. 'यां लवणमृत्तिकायाम् ऊ' क. ख. ङ. छ. ज. झ. पाठः. २. 'मभा' ङ. छ. पाठः. ३. 'धनन्ति' इति ङ. पाठः.

---

‡ 'दधनति' इति पाठ्यं भाति।

त्रिषु

क्षीर०— खं शून्यं लाति खिलम्। न प्रहन्यते हलादिभिः अप्रहतम्। अकृष्टः क्षेत्रादिः॥

टीका०— खिलद्वयभवटभूभागे। हलेन अलिखितमिति खिलम्। 'लिख अक्षरविन्यासे'। कर्मणि घञर्थे कः। पृषोदरादित्वाद् वर्णव्यत्यासः। हलेनैव न प्रहतम् अप्रहतम्। समे इति क्लीबनिर्देशः। अप्रहतं खिलमित्युक्तमिति नानुशासने क्लीबकाण्डे पाठात्। मतभेदेन त्रिष्वित्युक्तम्॥

अथो जगती लोको विष्टपं भुवनं जगत्।

क्षीर०— 'वर्तमाने पृषद्—' (उ० २. ८५) इति साधुः। शतृवत्त्वाद् ङीप्। विशन्त्यस्मिन् विष्टपं विष्टपते। 'ष्टप स्तप प्रतीघाते' (?)॥

टीका०— जगतीपञ्चकं भुवने। 'द्युतिगमिजुहोतीनां द्वे च' (वा० ३. २. १७८) इति क्विप्। 'गमः क्वौ' (६. ४. ४०) इत्यनुनासिकलोपः। ततो धातुसंज्ञायां शतरि जगत्। स्त्रियाम् 'उगितश्च' (४. १. ६) इति ङीप्। जगती। 'लोकृ दर्शने'। 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ्। लोकः। *'विटपविष्टपमण्टप—' (उ० ३. १४५) इत्यादिना औणादिकः पः। आदिवत्त्वं तुडागमश्च निपात्यते। रत्नकोशे तु 'विष्टपः पुमान्' इत्युक्तम्। भवन्त्यत्रेति भुवनम्। 'भूसूधूभ्रस्जिभ्यश्छन्दसि' (उ० २. ८२) इति बहुलवचनाद् भाषायामपि क्युन्॥

लोकोऽयं भारतं वर्षं

क्षीर०— अयं जम्बूद्वीपनवमांशः। भरतस्य क्षत्रियस्येदं भारतं नाम वर्षं भूम्येकदेशः। वृष्यते सिच्यते वर्षम्। तथा च—

---

१. 'प' घ. ङ. छ. झ. पाठः.

---

* 'विटपंपष्टपंविष्टपोलपाः' इति मुद्रितोणादिपाठः।

"हिमवान् हेमकूटश्च निषधो मेरुरन्तरे।
नीलः श्वेतश्च शृङ्गीवान् गन्धमादनमष्टमम् ॥"

इति सीमावच्छिन्नान्यन्यानीलावृतादीन्यष्टौ वर्षाणि ॥

टीका० — भुवो जम्बुद्वीपादिनवखण्डानि गिरिभिरवच्छिन्नानि वर्षाण्युच्यन्ते। तथा च विष्णुपुराणं —

"जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज!।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव[1] सप्तमः ॥
एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम् ॥
जम्बुद्वीपः समस्तानामेतेषां मध्यमास्थितः
तस्यापि[2] मेरुर्मैत्रेय! मध्ये कनकपर्वतः ॥
हिमवान् हेमकूटश्च निषधस्तस्य दक्षिणे।
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥
भारतं प्रथमं वर्षं ततः किम्पुरुषं स्मृतम्।
हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विज! ॥
रम्यकं चोत्तरं वर्ष तस्यैवानु हिरण्मयम्।
उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥
नवसाहस्रमेकैकमेतेषां द्विजसत्तम!।
इलावृतं तु तन्मध्ये सौवर्णो मेरुरुच्छ्रितः ॥
मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम्।
इलावृतं महाभाग! चत्वारश्चात्र पर्वताः ॥"
"मेरोः पूर्वेण भद्राश्वं केतुमालं च पश्चिमे"

इति। तत्रायं लोकः समुद्रस्योत्तरे कूले हिमालयस्य दक्षिणे भारतं वर्षम्। भरतस्येदं भारतम्। 'तस्येदम्' (४. ३. १२०) इत्यण्। तथा च —

---

१. 'श्वेति स' क. ख. पाठः. २. 'त्रा' ख. पाठः.

"ततस्तु भारतं वर्षमेतल्लोकेषु गीयते ।
भरताय यतो दत्तं पित्रा प्रव्रजता वनम् ॥"
"लोकोऽयं भारतो वर्षो देवाजीवश्च देवलः ।"

इति पुंस्काण्डेऽमरमाला ।

"व्यासर्षिभाषिते ग्रन्थे जम्बूद्वीपे च भारतम्"

इति रुद्रः ॥

शरावत्यास्तु योऽवधेः ॥ ६ ॥

देशः प्राग्दक्षिणः प्राच्यः

क्षीर०— शरावत्या नद्या मर्यादायाः प्राक् सहचरितो दक्षिणो देशः प्राच्यः ॥

टीका०— एतस्मिंश्च भारते वर्षे शरावती नाम नदी ऐशान्या दिशः सकाशात् पश्चिमसमुद्रगामिनी वहति । तस्या अवधेर्यः प्राग्दक्षिणो देशः, स प्राच्यः ॥

उदीच्यः पश्चिमोत्तरः ।

क्षीर०— शरावत्या अवधेः पश्चिमेन सहचरित उत्तरतो देश उदीच्यः । यदाह—

"प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥"

टीका०— यश्च पश्चिमोत्तरः स उदीच्यः । प्राक्सहचरितो दक्षिणः प्राग्दक्षिणः । एवं पश्चिमोत्तरः । प्राच्योदीच्ययोः 'द्युप्रागपागुदक्प्रतीचो यत्' (४. २. १०१) इति यत् । 'अचः' (६. ४. १३८) इत्यञ्चतेरकारलोपः । 'चौ' (६. ३. १३८) इत्युपसर्गस्य दीर्घः । 'उद ईत्' (६. ४. १३९) इतीत्त्वेनोदीच्यः । शरावत्या इति । 'अन्यारादितरर्ते—' (२. ३. २९) इत्यादिना पञ्चमी । प्रागुदक्छब्दौ च दक्षिणपश्चिमयोरपि यथाक्रमं सामीप्यादुपचारे वर्तेते ॥

---

१. 'र' क. ख. ङ. ज. ञ. पाठः. २. 'घर्त्वम् । उ' ङ. छ. पाठः.

प्रत्यन्तो म्लेच्छदेशः स्याद्

क्षीर० — प्रतिगतोऽन्तं मुक्तावधिर्भूमिप्रदेशः प्रत्यन्तः ॥

टीका० — भारतवर्षस्यान्तदेशः शिष्टाचाररहितः कामरूपादिः म्लेच्छदेशः । तथा च —

"चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ।
म्लेच्छदेशः स विज्ञेय आर्यावर्तस्ततः परम् ॥"

मध्यदेशस्तु मध्यमः ॥ ७ ॥

क्षीर० — यन्मनुः —

"हिमवद्विन्ध्ययोरन्तर्यत् प्राग् विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥"

टीका० — मध्यो देशो मध्यमाख्यः । 'मध्यान्मः' (४. ३. ८) इति मः । तथा च —

"हिमवद्विन्ध्ययोर्मध्ये यत् प्राग् विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः स उच्यते ॥"

इति मनुः ॥

आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः ।

क्षीर० — आर्या आवर्तन्तेऽस्मिन् आर्यावर्तः । यन्मनुः —

"आ समुद्रात् तु वै पूर्वादा समुद्रात् तु पश्चिमात् ।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥"

टीका० — आर्यावर्तद्वयं विन्ध्यहिमागयोर्मध्यदेशे । आर्याः धार्मिकाः अत्र वर्तन्त इत्यार्यावर्तः । 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ् । 'अन्येषामपि —' (६. ३. १३७) इति दीर्घत्वम् । पुण्यभूमिरिति कर्मधारयः । 'पुंवत् कर्मधारये —' (६. ३. ४२) इति पुंवद्भावः । तदुक्तं मनुना —

---

१. 'लयो' क. ख. ङ. छ. पाठः. २. 'यादिना पुं' ङ. छ. पाठः.

"आ समुद्राच्च वै पूर्वादा समुद्राच्च पश्चिमात् ।
हिमवद्विन्ध्ययोर्मध्यमार्यावर्तं विदुर्बुधाः ॥"

इति ॥

नीवृज्जनपदः

क्षीर० — **नियतं वर्तन्ते अस्मिन् नीवृत् । 'नहिवृतिवृषि—' (६. ३. ११६) इति दीर्घः । जनानां पदं जनपदः । पुंस्त्वं लोकात् । जनैर्भास्यमानो राष्ट्राख्योऽयम् ॥**

टीका० — नीवृद्वयं **ग्रामसमूहे**, यस्य पाञ्चालादीनि विशेषनामानि । नियमेनावश्यमत्र वर्तन्ते जनाः इति नीवृत् । निपूर्वाद् वृतेः 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इत्यपिशब्दादधिकरणे क्विप् । संपदादित्वाद् वाधिकरणे क्विप् । 'नहिवृतिवृषि—' (६. ३. ११६) इत्यादिना पूर्वपददीर्घः । साहचर्यात् पुंस्त्वम् । जनाः पद्यन्ते अत्रेति जनपदः । 'खनो घ च' (३. ३. १२५) इत्यधिकरणे घ(च्?ः) । एतत् तु घित्करणसामर्थ्यादन्यत्रापि भवति । अधिकरणे घञर्थे क-प्रत्ययो वा । पुंसि संज्ञायां घो वा ॥

देशविषयौ तूपवर्तनम् ॥ ८ ॥

क्षीर० — **दिश्यते देशः स्थानमात्रम् । विषिणोति[1] विषयः । 'उपवर्तन्ते अस्मिन् उपवर्तनमि'ति कात्यः । पञ्चैकार्थानाहुः ॥**

टीका० — देशत्रयं **जनपदसमुदाये** । तथाहि मालवविषयः चोलविषय इति जनपदसमूह एव विषयशब्दप्रवृत्तिः । 'दिश अतिसर्जने' । 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ् । देशः । 'षिञ् बन्धने' । पचादिः । 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' (८. ३. ७०) इति षत्वम् । विषयः । उपवर्तनमिति । ल्युट् । अनुवर्तः अनुपवर्तनम्* ॥

---

१. 'थे । मा' ज. पाठः.

---

† अत्र षत्वं चिन्त्यम् । * एवन्तु 'देशो विषयोऽनूपवर्तनम्' इति मूलं पाठ्यम् ।

त्रिष्वा गोष्ठाद्

क्षीर० — गोष्ठसंशब्दनात् प्राग् वाच्यलिङ्गाः ॥

टीका० — इतः प्रभृति गोष्ठपर्यन्तं विशेषविधिं त्यक्त्वा त्रिषु ॥

नडप्राये नड्वान् नड्वल इत्यपि ।

क्षीर० — 'तदस्मिन्नस्तीति देशे तन्नाम्नि' (४. २. ६७)। 'कुमुद-नडवेतसेभ्यो ड्मतुप्' (४. २. ८७) । 'नडशादाद् वलच्' (४. २. ८८)॥

टीका० — नड्वद्वयं नडबहुले देशे । प्रायशब्दो बाहुल्ये । नडोऽस्त्य-स्मिन्नित्यर्थे 'कुमुदनडवेतसेभ्यो ड्मतुप्' (४. २. ८७) । 'झयः' (८. २. १०) इति वत्वम्। 'नडशादाद् वलच्' (४. २. ८८) नड्वलः । स्त्रियां नड्वली नड्वला च॥

कुमुद्वान् कुमुदप्राये वेतस्वान् बहुवेतसे ॥ ९ ॥

शाद्वलः शादहरिते

क्षीर० — शादेन शष्पेण नीलः । यच्छाश्वतः — 'शष्पकर्दमयोः शादः' । शीयन्ते अस्मिन् शादः । शादोऽस्त्यस्मिन् शाद्वलः देशः । वलच् । यथा —

"रूपमेव तवाचष्टे भगवन्! वीतरागताम् ।
न हि कोटरसंस्थेऽग्नौ तरुर्भवति शाद्वलः ॥"

शाद्वलं दूर्वेति च नीलत्वोपचारात् ॥

टीका० — कुमुदबहुले कुमुद्वान् । मत्वन्तः । वेतसबहुले देशे वेत-स्वान् । पूर्ववद् मतुप् । टिलोपः । 'मादुपधायाश्च —' (८. २. ९) इति वत्वम् । शादो नवतृणं, तेन हरिते देशे शाद्वलः । नड्वलवद् वलच् । 'शादो जम्बा-लशष्पयोः' । 'पङ्कवाचिनः शादशब्दाद् वलज् न भवति, अनभिधानात् । शष्पवाचिन एव भवति' इति भागवृत्तिः ॥

सजम्बाले तु पङ्किलः ।

क्षीर० — पिच्छादित्वाद् इलच् ॥

टीका० — सजम्बाले सपङ्के पङ्किलः । पिच्छादित्वाद् मत्वर्थे इलच् ॥

जलप्रायमनूपं स्यात्

क्षीर०— अनुगताः आपोऽस्मिन् अनुगतमपो वा अनूपम् । 'ऊदनोर्देशे' (६. ३. ९८) ॥

टीका० — जलप्राये जलबहुले देशे अनूपम् । अनुगताः आपः अस्मिन् इत्यनूपम् । 'ऊदनोर्देशे' (६. ३. ९८) इत्यूकारः । 'ऋक्पूरब्धूःपथामानक्षे' (५. ४. ७४) इति समासान्तोऽच् । जलप्रायमिति नामेति केचित् ॥

पुंसि कच्छस्तथाविधः ॥ १० ॥

क्षीर० — कषन्त्यापो यं स कच्छः । तथाविधः अनूपप्रायः । कच्छमिति माला ॥

टीका० — सिन्धूनां सरसां च प्रान्तभागे कच्छः । कं पानीयं (छा ? छय)तीति कच्छः । 'छो छेदने' । 'आतोऽनुपसर्गे कः' (३. २. ३) । तथाविध इति । यथाविधः अनूपो जलप्रायः तथाविधोऽयमिति । पुंसीति 'त्रिष्वा गोष्ठादि'त्यस्य बाधकम् । 'पुंस्येवान्धुः प्रहिः' इत्येवकारः क्वचिल्लिङ्गव्यभिचारार्थः । तेन क्लीबेऽपि । तथा चामरमाला —

"कच्छं क्लीबेऽनूपदेशे नाकुर्वल्मीक इत्यपि" ॥

स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।

क्षीर० — 'देशे लुबिलचौ च' (५. २. १०५) । 'सिकताशर्कराभ्यां च' (५. २. १०४) इत्यण्मतुपावत्र सार्वत्रिकौ । तदाह—

टीका०— शर्कराचतुष्कं शर्करावति देशे । 'शृ हिंसायाम्' । *'शिरः करन्' (उ० ४. ३) शर्करा घटादेरणीयान् भागः । ताः सन्त्यस्मिन् देश इत्यर्थे

---

१. 'तुबर्थे' ङ. छ. पाठः.

---

* 'श्रः करन्' इति मुद्रितोणादिपाठः ।

अण्। सिकताशर्कराभ्याम् इत्यनुवृत्तौ देशे लुबिलचौ च' (५. २. १०५) इत्यनेन देशे गम्यमाने लुप् इलच्प्रत्ययः। अतो यथाक्रमं शर्कराशर्करिलौ। चकारादण्मतुपौ च। 'तेन शार्करशर्करावन्तौ। तत्र विशेषानुपादानाद् मतुबादीनामन्यतमस्य लुप्पक्षे 'लुपि युक्तवद् व्यक्तिवचने' (१. २. ५१) इति प्रकृतिलिङ्गं स्त्रीत्वम्॥

देश एवादिमौ

क्षीर०—'मध्यान्मः' (४. ३. ८)। 'आदे'रित्युपसङ्ख्यानादादिमौ शर्कराशर्करिलौ देशे नियमात्। शर्कराश्मप्राया मृत्॥

टीका०—तत्र चतुर्णां मध्ये आदिमौ शर्कराशर्करिलौ शब्दौ देश एव वाच्ये भवतः, देश एव लुबिलचोर्विधानात्। शार्करशर्करावन्तौ च शब्दौ देशे चान्यत्र च। तथा च शार्करो देशः, शार्कर ओदन इत्युपपन्नं भवति, अण्मतुपोः सामान्येन विधानात्। आदिमाविति शैषिकेऽर्थे 'आदेश्चेति वक्तव्यम्' इति मः॥

एवमुन्नेयाः सिकतावति॥ ११॥

क्षीर०—देशे सिकतासिकतिलौ सैकतः सिकतावांश्च॥

टीका०—एवमनेन प्रकारेण सिकतावति देशे स्त्री सिकता सिकतिलः सैकतः सिकतावानित्युन्नेयाः। तत्र पूर्ववदेव केवल एव देशे वाच्ये आदिमौ द्वौ शब्दौ। इतरौ देशे चादेशे चेति॥

देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्॥ १२॥

क्षीर०—नद्यम्बुजातसस्यवर्धितो नदीमातृकः। वर्षजव्रीहिवर्धितस्तु देशो देवमातृकः। देवो माता अस्येति॥

टीका०—नद्यम्बुसम्पन्नव्रीहिपालिते देशे नदीमातृकः। वृष्ट्यम्बुसम्पन्नव्रीहिपालिते देशे देवमातृकः। मातृशब्दोऽत्रोपचारात्। उभयत्रापि बहुव्रीहौ 'नद्यृतश्च' (५. ४. १५३) इति कब् नित्यः॥

सुराज्ञि देशे राजन्वान्

क्षीर०— बहुव्रीहौ सुराज्ञीति समासान्ताभावः। 'राजन्वान् सौराज्ये' (८.२.१४) इति साधुः। देशो विषयोपलक्षणम्। यथा— राजन्वान् लोक इत्युच्यते ॥

टीका०— प्रजापालनपरायणराजयुक्ते सुराज्ञि देशे राजन्वान्। सुराज्ञीति बहुव्रीहौ टचोऽभावः, 'न पूजनात्' (५.४.६९) इति निषेधात्। 'राजन्वान् सौराज्ये' (८.२.१४) इति मतुपो वत्वं नुगागमश्च निपात्यते ॥

स्यात् ततोऽन्यत्र राजवान्।

क्षीर०— राजमात्रयुक्ते देशे ॥

टीका०— नृपतियुक्तमात्रे[1] देशे राजवान् ॥

गोष्ठं गोस्थानकं

क्षीर०— गावस्तिष्ठन्त्यत्र गोष्ठम्। 'अम्बाम्बगोभूमि—' (८.३.९७) इति षत्वम् ॥

टीका०— गोष्ठद्वयं गोष्ठे। गावस्तिष्ठन्त्यस्मिन् इति गोष्ठम्। 'घञर्थे कविधानम्' (वा० ३.३.९८) इति कः। 'अम्बाम्बगोभूमि—' (८.३.९७) इत्यादिना षत्वम्। गोस्थानकमिति। अधिकरणे ल्युट्। 'कृद्योगा च षष्ठी समस्यत' इति समासा(न्तः? त् कः) ॥

तत् तु गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥

क्षीर०— यत्र गावः प्रागासन्। 'गोष्ठात् खञ् भूतपूर्वे' (५.२.१८) ॥

टीका०— तदेव गोष्ठं भूतपूर्वं पूर्वस्मिन् काले भूतं गौष्ठीनम्। 'गोष्ठात् खञ् भूतपूर्वे' (५.२.१८) इति खञ् ईनादेशः ॥

---

१. 'त्र' ख. पाठः.

पर्यन्तभूः परिसरः

क्षीर०—परितः सरन्ति अस्मिन् इति परिसरः । ग्रामादेः परिच्छेदभूः ॥

टीका०—पर्वतनगरादेः पर्यन्तभूमिः उपान्तभूमिः परिसरः । परिसरन्त्यत्रेत्यर्थे सर्तेरधिकरणे 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः ॥

सेतुरालौ स्त्रियां पुमान् ।

क्षीर०—सिन्वन्ति बध्नन्ति तं सेतुः पुल्लिङ्गः । आलीयते अम्भः अत्र आलिः स्त्रीलिङ्गः । सस्यार्थजलधा(रि।र)णोऽयम् । सङ्क्रमस्तु तरणार्थः । यन्माला—'सङ्क्रमो दुर्गसञ्चरः' ॥

टीका०—सेतुद्वयमालौ । स्त्रीलिङ्गायामालौ सेतुः पुमानिति व्याख्या । सेतुरिति । 'षिञ् बन्धने' । 'सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्' (उ० १. ७२) । अर्तेराङ्पूर्वाद् अच इः । रलयोरेकत्वस्मरणम् । आलिः ॥

वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् ॥ १४ ॥

क्षीर०—वामं लूयते वामैर्वा वामलूरः । न अकति नाकुः । वलन्ते प्राणिनः अत्र वल्मीकम् ॥

टीका०—वामलूरत्रयमुपदीकास्तूपे । नाकुरिति । 'णमु प्रह्वत्वे शब्दे' । 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' (उ० १. १८) इति उप्रत्ययो नाक्यादेशश्च । इकार उच्चारणार्थः । वल्मीकमिति । 'वल वल्ल धारणे' । 'अलीकादयश्च' (उ० ४. २९) इतीकन्मुडागमौ ।

"वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य" (पू० मे० श्लो० ५)

इति कालिदासः ।

"नद्यां कूपतटे तरौ च विवरे शैले चितौ वल्मिकः"

इति प्राणेश्वरः ।

"वल्मीके वाल्मिकः प्रोक्तो वाल्मीकिरपि वाल्मिकिः"

इति तारपालः । तदा च मुनौ 'तस्येदम्' (४. ३. १२०) इत्यण् 'अत इञ्' (४. १. ९४) च ॥

अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीनि च ॥ १७ ॥

क्षीर०—अयन्ते वर्तन्ते मार्गन्ति अद्यन्ति पतन्ति पन्थन्ति वा पद्यन्ते सरन्ति चानेनेति वाक्यानि । पद्भ्यां हन्यते पद्धतिः । 'हिमकाषिहतिषु च' (६. ३. ५४) इति पत् । 'पदमस्मिन् दृश्यम्' (४. ४. ८७) इति यति पद्या । 'पद्यत्यतदर्थे' (६. ३. ५३) । एके पादाः अस्याम् एकपदी । कुम्भपद्यादौ साधुः ॥

टीका०— अयनद्वादशकं वर्त्मनि । यन्त्यनेनेत्ययनम् । करणे ल्युट् । 'वृतु वर्तने' । 'भूतेऽपि दृश्यन्ते' (३. ३. २) इति मनिन् । वर्त्म । 'मार्ग अन्वेषणे' । कर्मणि घञ् । मार्गः । अध्वेति । 'अद भक्षणे' । 'शीङ्कुशिरुहिजिक्षिसृधृभ्यः क्कनिप्' (उ० ४. ११५) इति वर्तमाने 'अदेर्घ च' (उ० ४. ११७) इति क्कनिप् धकारश्चान्तादेशः । 'प(तेः खश्च ? तः स्थ च)' (उ० ४. १२) इति इनिः (ख ? थ)कारश्चान्तादेशः । 'पथिमथि—' (७. १. ८५) इत्यादिना आकारः । 'थो न्थः' (७. १. ८७) इति न्थः । पन्थाः । पदमस्यां विद्यते इति पदवी । वप्रकरणे *'अन्यत्रापि दृश्यते' इति वः । गौरादिङीष् । सर्तेः करणे क्तिन् । सृतिः । सर्तेरेव धरणिवत् सरणिः । 'सरणिः श्रेणिवर्त्मनोः' इति दन्त्यादौ रभसः । पादाभ्यां हन्यत इति पद्धतिः । कर्मणि क्तिन् । 'हिमकाषिहतिषु च' (६. ३. ५४) इति पादस्य पद्भावः । बाह्वादिपाठाद् ङीषि पद्धती च । नृणां खुररहितत्वात् पादाय हिता पद्या । हितार्थे 'शरीरावयवाद् यत्' (५. १. ६) । 'पद्यत्यतदर्थे' (६. ३. ५३) इति पद्भावः । 'वृतेश्च' (उ० २. १०६) इति (इ ? अ)निः । 'कृदिकारात्' (ग० ४. १. ४५) इत्यादिना वा ङीप् । वर्तनी । एकः एकाकी असहितः पादः अस्यां अस्या वा इत्येकपदी । 'कुम्भपदीषु च' (५. ४. १३९) इति पादस्यैकारलोपः । 'पादोऽन्यतरस्याम्' (४. १. ८) इति ङीच्विकल्पे प्राप्ते 'कुम्भपदीषु च' इति नित्यं ङीच् निपात्यते । 'पादः पत्' (६. ४. १३०) इति पद्भावः ॥

---

१. 'स्याद्यावा' घ. च. पाठः.

---

* 'वप्रकरणे अन्येभ्योऽपि दृश्यते' इत्येव मुद्रितपुस्तकेषु दृश्यते ।

अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि।

क्षीर०—'न पूजनात्' (५. ४. ६९) इत्यत्र स्वतिग्रहणाद् 'ऋक्पूरब्धूः—' (५. ४. ७४) इति समासान्तो नास्ति। सन् पन्थाः सत्पथः। समासान्तोऽकारः॥

टीका० — * अतिपन्थास्त्रयमर्चिते **प्रशस्ये वर्त्मनि**। स्वती पूजादौ। प्रशस्यः पन्थाः अतिपन्थाः, सुपन्थाः। कुगतिसमासः। 'न पूजनात्' (५. ४. ६९) इति निषेधाद् 'ऋक्पूः–' (५. ४. ७४) इत्यादिना समासान्तो न भवति। संश्चासौ पन्थाश्चेति सत्पथः॥

व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः॥ १६॥

क्षीर०—विरुद्धः अध्वा व्यध्वः। दुष्टोऽध्वा दुरध्वः। 'उपसर्गादध्वनः' (५. ४. ८५) इत्यच्। विरुद्धः पन्थाः विपथः। कुत्सितोऽध्वा पन्थाश्चेति। 'कोः कत् तत्पुरुषेऽचि' (६. ३. १०१), 'का पथ्यक्षयोः' (६. ३. १०४)। विपथं कापथं च क्लीबे आह। यद्वामनः—'संख्याव्ययपूर्वकश्च पथः'॥

टीका० — व्यध्वपञ्चकं **निन्दितवर्त्मनि**। विरुद्धोऽध्वा व्यध्वः। एवं दुरध्वः। कुगतिसमासः। 'उपसर्गादध्वनः' (५. ४. ८५) इति समासान्तोऽच्। 'नस्तद्धिते' (६. ४. १४४) इति टिलोपः। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६) इति पुंस्त्वम्। विरुद्धः पन्थाः विपथम्। 'पथः सङ्ख्याव्ययादेः' (वा० २. ४. ३०) इति नपुंसकत्वम्। 'वाटः पथश्च माथश्चे'ति अदन्तोऽपि पथशब्दस्त्रिकाण्डशेषे पठ्यते। तदा च समासे पुल्लिङ्गपाठोऽपि युक्तः। नपुंसकविधौ समासान्तपथशब्दग्रहणात्। तथा च रभसः—

"सत्पथस्तु सुपन्थाः स्याद् व्यध्वो विपथकापथौ।"

कुत्सितोऽध्वा कदध्वा। नान्तः। 'कोः कत् तत्पुरुषेऽचि' (६. ३. १०१) इति कद्भावः। कुत्सितः पन्थाः कापथः। पूर्ववदच् समासान्तः। 'का पथ्यक्षयोः' (६. ३. १०४) इति नित्यं कोः काभावः। लिङ्गानुशासने वामनेन कापथं क्लीबमुक्तम्। अदन्तपथशब्देन कुपथश्च साधुः॥

---

* 'अयनद्वादशकं' 'व्यध्वपञ्चकम्' इत्यादिवद् 'अतिपथित्रयम्' इति नोक्तम्।

अपन्थास्त्वपथं

क्षीर०—'पथो विभाषा' (५. ४. ७२) इत्यच्। अपथं नपुंसकम् ॥

टीका०—अपथिद्वयममार्गे। अपथमिति। 'पथो विभाषा' (५. ४. ७२) इति पक्षेऽकारः समासान्तः। 'अपथं नपुंसकम्' (२. ४. ३०) इति नपुंसकत्वम् ॥

तुल्ये शृङ्गाटकचतुष्पथे।

क्षीर०—शृङ्गैरटन्त्यस्मिन् शृङ्गाटकम्। संस्थानं चत्वरं च ॥

टीका०—शृङ्गाटकद्वयं चतुष्पथे। चतुर्णां पथां समाहारः चतुष्पथम्। 'पथः सङ्ख्याव्ययादेः' (वा० २. ४. ३०) इति नपुंसकत्वम्। 'इदुदुपधस्य चाप्रत्ययस्य' (८. ३. ४१) इति षत्वम् ॥

प्रान्तरं दूरशून्योऽध्वा

क्षीर०—प्रगता अन्तरे तस्मात् प्रान्तरं दूरशून्यो मार्गः ॥

टीका०—दूरशून्यः पोलुवाट[1] इति यत्र प्रसिद्धिः, तत्र प्रान्तरम्। प्रकृष्टमन्तरमवकाशस्तस्येति प्रान्तरम्। 'प्रादिभ्यो धातुजस्य—' (वा० २. २. २४) इति बहुव्रीहिः ॥

कान्तारं वर्त्म दुर्गमम् ॥ १७ ॥

क्षीर०—कस्यांभसोऽन्तमृच्छति कान्तारम्। कान्तारप्रान्तरे एकार्थे प्राहुः ॥

टीका०—चोरकण्टकादिना दुर्गमं वर्त्म कान्तारं[2]म्। कांश्चिद् न तारयतीति कान्तारम्। पृषोदरादिः। अनेकार्थे पुन्नपुंसकत्वं वक्ष्यति ॥

गव्यूतिः स्त्री क्रोशयुगं

क्षीर०—'गोर्यूतौ छन्दोऽपरिमाणयोः (वा० ६. १. ७९) इत्यवादेशः ॥

---

१. 'पोमृवा' ङ. छ. पाठः. २. 'रम। पृ' ज. झ. पाठः.

टीका० — क्रोशद्वये गव्यूतिः।

"चतुष्काधिकविंशत्यङ्गुलैर्[1]हस्तककल्पना।
सहस्रैरष्टभिः ख्यातं हस्तकैः क्रोशनामकम्॥"

गव्यूतिरिति। 'यु मिश्रणे।' 'ऊतियूतिजूतिसाति—' (३. ३. ९७) इत्यादिना क्तिन् दीर्घत्वं च निपात्यते। गोर्यूतिः गव्यूतिरिति षष्ठीसमासः। 'गोर्यूतौ छन्दसि' (वा० ६. १. ७९) इत्यनुवर्तमाने 'अध्वपरिमाणे च' (वा० ६. १. ७९) इति वक्तव्येन भाषायामपि ओकारस्यावादेशः।

"द्वाभ्यां धनुःसहस्राभ्यां गव्यूतिः पुंसि भाषितः"

इति शब्दार्णवः।

"गव्यूतं स्त्रीति (?) गव्यूतिः गोरुतं गोमतं च तत्"

इत्यन्यः॥

नल्वः किष्कुचतुश्शतम्।

क्षीर०—'णल गन्धे'। किष्कुर्हस्तः। 'तेषां चतुश्शती नल्वमि'ति माला। काल्यः—'नल्वं विंशं हस्तशतमि'त्याह॥

टीका०—किष्कुः मूर्धन्यषः हस्तवाची। तच्चतुश्शतेन नल्वः। 'णल बन्धने'। 'इण्शीभ्यां[2] वन्' (उ० १. १५८) इति बाहुलको वन्॥

घण्टापथः संसरणं

क्षीर०—घण्टोपलक्षितानां हस्तिनां पन्थाः घण्टापथः। चाणक्योक्तोऽष्टदण्डः। सम्यक् सरन्त्यनेनेति संसरणम्। यद् भ्रमः (?)—

"बुधैः संसरणं वर्त्म गजादीनामसङ्कुलम्।
पुरोपनिष्करश्चोक्तम्"॥

---

१. 'ल' क. ख. घ. ज. झ. पाठः. २. 'भी' क. ख. घ. च. ज. झ. पाठः.

टीका० — घण्टापथद्वयं ग्रामादौ **प्रधानमार्गे**। दशधन्वन्तरो राजमार्गः घण्टापथः। संहताः सरन्त्यनेनेति संसरणम्। सर्तेः करणे ल्युट्॥

तत् पुरस्योपनिष्करम्।

क्षीर० — तत् संसरणं, पुरं राजधानी, तस्या उपनिष्कराख्यम्। उपनिष्कीर्यते सैन्यमिति॥

इति भूवर्गः।*

टीका० — घण्टापथ एव पुरस्य दुर्गपुरस्य उपनिष्करम्। मूर्धन्यवत्। पारस्करादित्वात् सुट्॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे

भूवर्गः।

अथ पुरवर्गः।

पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम्।
स्थानीयं निगमः

क्षीर० — पक्षे पुरं नगरं च वाशब्दात् पत्तनसाहचर्यात् क्लीबे। पूर्यते पूः। नगाः सन्त्यस्य नगरम्। 'नगपांसुपाण्डुभ्यो रः' (वा० ५. २. १०७)। पतन्त्यस्मिन् पत्तनम्। पुटा भाण्डवसनानि भिद्यन्ते अस्मिन् पुटभेदनम्। तिष्ठन्त्यस्मिन् नित्यं शतग्रामीमध्ये स्थानीयम्। नियतं गच्छन्त्यस्मिन् निगमः। 'गोचरसञ्चर—' (३. ३. ११९) इति साधुः। नानार्थेऽधिष्ठानदुर्गे कोट्टे राजधानी च॥

---

१. 'पो' ख. पाठः.

* 'भूवर्गः' इत्यतः प्राग्

"द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी।
दिवःपृथिव्यौ गङ्गा तु रुमा स्याल्लवणाकरः॥"

इति श्लोकः पठितो, न तु व्याख्यातः।

टीका० — पूःसप्तकं **नगरे** । तथा च नाममाला —

"पुटभेदनं पुरं स्यात् स्थानीयं पूः पुरी नगरी"

अन्ये पुनः पूरादित्रयं पुरे, पत्तनद्वयं पत्तने, स्थानीयद्वयं स्थानीय इति मन्यन्ते। तथा च रभसः—

"पूः स्त्री न पुंसि नगरी खपुरं नृद्वसं(?) पुरम् ।
हरिश्चन्द्रपुरं शौभं पत्तनं पुटभेदनम् ॥"

इति । तत्राष्टशतग्रामीयव्यवहारस्थानं तन्मध्यवर्ति नगरम् । राजधानिकान्वितं[2] पत्तनम् । प्राकारादिना दुर्गमं[3] स्थानीयम् । पालयति परचक्रादिति पूः । रेफान्ता । 'पॄ पालनपूरणयोः' । 'अन्येभ्योऽपि —' (३. २. १७८) इति क्विप् । 'उदोष्ठ्यपूर्वस्य' (७. १. १०२) इत्युत्त्वम् । 'वोरुपधायाः —' (८. २. ७६) इति दीर्घः । पुरीति । 'पुर अग्रगमने' । इगुपधलक्षणो वा घञर्थे[4] कविधानाद् वा कः । गौरादिङीष् । नगाः प्रासादादयोऽत्र सन्तीति नगरी । नगशब्दाद् 'नगपांसुपाण्डुभ्यश्चेति वक्तव्यम्' (वा० ५. २. १०७) इति रः । गौरादित्वात् पक्षे ङीप् । पुरीनगर्यौ वा स्त्रियौ । 'कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च' (उ० ४. १४४) इति इप्रत्यये कित्त्वे च पुरिः ह्रस्वान्तापि । पक्षे पत्तनसाहचर्यात् क्लीबे । 'वीपतिभ्यां तनन्' (उ० ३ १५१)। पत्तनम् । पण्यानां[5] पुटाः पुटिकाः भिद्यन्ते अत्रेति पुटभेदनम् । अकुतोभयत्वात् स्थानाय वासाय हितं स्थानीयम् । 'तस्मै हितम्' (५. १. ५) इति छः । निगमः गोचरसञ्चरादौ घप्रत्ययेन निपातितः ॥

अन्यत् तु यन्मूलनगरात् पुरम् ॥ १ ॥

तच्छाखानगरं

क्षीर० — **मूलनगरं राजधानी । ततोऽन्यत् समुदायस्थानम् । शाखेत्युपाङ्गोपलक्षणम् ।**

"स्यात् साकेतमयोध्यायां विदेहा मिथिलापुरी ।
महोदया कन्यकुब्जा कन्याकुब्जं महोदयम् ॥

---

१. 'जाधिका' क. ख. पाठः. २. 'ब्वि' घ. च. पाठः. ३. 'गं नगरं स्था', ४. 'पं वा' घ. ङ. च. छ. ज. पाठः. ५. 'पु' घ. च. ज. झ. पाठः,

काशी वाराणस्यवन्ती विशाला चोज्जयिन्यपि ।
प्राग्ज्योतिषं कामरूपं द्वारका द्वारवत्यपि ॥"

इति वक्तव्यम् ॥

टीका० — मूलनगरे असम्मार्तृजनौघस्य सरिदङ्के सरोङ्के वा कल्पितं पुरं (यत्) तद् मूलनगरस्य तरुस्थानीयस्य शाखाप्रायत्वाच्छाखानगरम् ॥

वेशो वेश्याजनसमाश्रयः ।

क्षीर० — विशन्त्यस्मिन् कामुकाः वेशः ॥

टीका० — वेश्याजनसमाश्रये स्थाने वेशः । नेपथ्यपर्याये शकारो निरूप्यः ॥

आपणस्तु निषद्यायां विपणिः पण्यवीथिका ॥ २ ॥

क्षीर० — आपणन्ते अस्मिन् इत्यापणः । 'गोचरसञ्चर' — (३. ३. ११९) इति साधुः । निषीदन्त्यस्यां निषद्या । 'संज्ञायां समज —' (३. ३. ९९) इति क्यप् । विपण्यते अस्यां विपणिः । वणिग्वीथी । आद्यो वणिक्स्थाने, अन्त्यो हट्टवर्तन्यामित्याहुः । यच्छाश्वतः —

"आपणिः पण्यवीथी च द्वयं विपणिसंज्ञकम्" ॥

टीका० — आपणचतुष्कं पण्यशालायाम् ।

"आवेशनं शिल्पशाला वाजिशाला तु मन्दुरा ।
पण्यविक्रयशाला स्यादापणो विपणिस्तथा ॥"

इति हलायुधः ।

"फलकं फलमथ चर्मापणं निषद्यां वणिक्पदं विपणिम्"

इति पादेन नामकथनेन नाममालायां संवदन्तोऽपि केचिद् आपणादिद्वय हट्टमण्डपे विपण्यादिद्वयं पोट्टलीआ (?) वीथ्यां मन्यन्ते । तथा च रत्नकोषे पादनामकथने

"आपणोऽथ निषद्या स्याद् विपणिः पण्यवीथिका"

---

१. 'त' क. ख ङ छ. ज. पाठः. २. 'पा' घ., 'पोहाली' ख. ङ. छ. पाठः.

"पर्यापतत्कयिकलोकमगण्यपण्य-
पूर्णापणं विपणिनो विपणिं विभेजुः" (स० ५. श्लो० २४)

इत्यत्र माघश्लोके वल्लभेन आपणमावारिका विपणिर्हट्ट इति व्याख्यातम्। अरुणेन तु 'विपणिसरणिवाणिश्रेणिनिश्रेणयश्च' इति स्त्रीत्वमुक्तम्। विपणेरनुशा-(स्याःसनाद)स्मादेव माघप्रयोगात् पुंस्त्वं व्युत्पादितम्। एत्य पणाय(न्तेऽन्ति) व्यवहरन्त्यस्मिन्नित्यापणः। गोचरसञ्चरादिसूत्रे निपातितः। निषीदन्त्यस्यामिति निषद्या। 'संज्ञायां समजनिषद—' (३. ३. ९९) इत्यादिना क्यप्[1]। 'सदिरप्रतेः'(८. ३. ६६) इति षत्वम्। विपाणिरिति। †'इन्' इति इन् औणादिकः। 'कृदिकारात्—' (ग० ४. १. ४५) इति ङीषि विपणी[3] च॥

रथ्या प्रतोली विशिखा

क्षीर०— रथं वहति रथ्या। 'तद् वहति रथ—'(४. ४. ७६) इति यत्। प्रतोल्यते प्रतोली। विगता शिखा मुण्डितेन समत्वाद्, विशीयते जनसम्मर्देन वा विशिखा। पञ्चैकार्थानाहुः। यत् कौटिल्यः— "विशिखायां सौवर्णिकप्रचारः"॥

टीका०— रथ्यात्रयं ग्राममार्गे। लॅाच्छ इति यावत्। रथं वहतीति रथ्या। 'तद् वहति रथयुगप्रासङ्गम्' (४. ४. ७६) इति यत्। प्रतोलीति। 'तुल उन्मानें'। चुरादिः पचादिः गौरादिश्च। विशिखेति। 'शीङो ह्रस्वश्च' (उ० ९. २४) इति खन्। प्रादिसमासः। केचिद् दुर्गनगरद्वारे अट्टैर्प्रयोजनाश्रयो यः क्रियते तत्रेति। चाणक्ये तु रथ्याप्रतोल्योर्भेदः॥

स्याच्चयो वप्रमस्त्रियाम्।

---

१. 'ति मा' ङ. छ. पाठः. २. 'पि' ज. पाठः. ३. 'णीति च' ज. पाठः. ४. 'माश्च इ' घ. पाठः. ५. 'ङः किद्भ्स्व' क. ख. घ. ङ. च. छ. झ. पाठः. ६. 'चा' ज. पाठः. ७. 'ष्ट' ङ. छ. पाठः. ८. 'ङ्' ज. पाठः.

† 'सूत्रमिदं मुद्रितेणादौ न दृश्यते।

क्षीर०— चीयते चयः। (प्रा)कारोधारः। उप्यते अस्मिन् वप्रः॥

टीका० — चयद्वयं दुर्गनगरे परिखोद्धृतमृत्तिकया यः स्तूपः क्रियते, तत्र। तथा चार्थशास्त्रं — "परिखोद्धृतया मृत्तिकया वप्रं कारयेत्, तस्योपरि प्राकारम्" इति।

"प्राकारमूलबद्धश्च समूहश्च चयो मतः"

इत्यनेकार्थः। चिनोतेरधिकरणे 'पुंसि संज्ञायां घः—' (३. ३. ११८)। चयः। वपतेः 'वृधिवपिभ्यां रन्' (उ० २. ३०)। वप्रः॥

प्राकारो वरणः सालः

क्षीर०— प्रक्रियते प्राकारः। 'सादकारयोः कृत्रिमे' इति दीर्घः। वृणोति वरणः। स्यति पर्यन्तं करोति सालः॥

टीका० — प्राकारत्रयं वप्रस्योपरि इष्टकादिरचिते वेष्टने पैंगा इति ख्याते। प्रपूर्वात् कृञः कर्मणि घञ्। 'कारसादयोः कृत्रिमे दीर्घ इत्युपसङ्ख्यानम्' इति नित्यं दीर्घः। प्राकारः। वृणोतेः करणे ल्युट्। वरणः। 'सल गतौ'। कर्मणि घञ्। सालः।

"सालः सर्जतरौ वृक्षे प्राकारेऽपि प्रयुज्यते"

इति दन्त्यादावजयः॥

प्राचीनं प्रान्ततो वृतिः॥ ३॥

क्षीर०— प्रागेव प्राचीनम्। 'अञ्चेरदिक् स्त्रियाम्' (५. ४. ८) इति खः। प्राचीरमित्येके। व्रियते अनया वृतिः। वद्ध्यो(?)वाटिप्रवेष्टकोऽपि॥

टीका० — दुर्गनगरादेर्वेणुवेत्रमयी वेष्टनिका प्राचीरम्। अन्यत्रोपचारात्। प्राच्युपपदात् 'ईर गतौ' इत्यतः 'कर्मण्यण्' (३. २. १)॥

१. 'न्ध' घ. च. ज्ञ. पाठः. २. 'राग' छ., 'पाम इ' घ., 'बार इ' च., 'पराग इ' ङ., 'पगार इ' ज. पाठः.

* इदं मुद्रितवार्त्तिकपाठे न दृश्यते।

भित्तिः स्त्री कुड्यम्

क्षीर०— भिद्यते भित्तिः। कुड्यां साधु कुड्यम्। पृषोदरादित्वाद् जश्त्वम्॥

टीका०— भित्तिद्वयं मण्डपगृहादेरिष्टकामृत्तिकादिकृते वेष्टने। भिदेः क्तिन्। भित्तिः। 'भिदा विदारणे' (?) इति पाठाद्ङ् न भवति। कुड्यमिति। 'कुड् शब्दे'। *कुवतेर्यगुडुक्च इति यग् डुभागमश्च। कश्चिद् दकारवत् कुद्यमाह॥

एडूकं तदन्तर्न्यस्तकीकसम्।

क्षीर०— तत् कुड्यमन्तर्न्यस्तास्थि एडयत्येडूकम्॥

टीका०— यत् कुड्यमन्तर्गतास्थि तदेडूकम्। 'ईड स्तुतौ'। भल्लूकादित्वाद् ऊकन्[1]। आदेर्गुणः। अतो मध्यदीर्घः। 'ईवीरु(?)चैडूकमलीकशाकम्' इत्यरुणदत्तोऽपि। अमरसिंहस्वरसोऽप्यत्र।

"उपशल्यं ग्राम्यान्तिकमेडुकमन्तःकृतास्थि कुड्यं स्यात्"

इति रत्नकोशे तु ह्रस्वमध्योऽपि। तदा च बहुलवचनात् 'समि कस उक'(ञ्? न्) (उ०२. ३२) इति उक(ञ्? न्)॥

गृहगेहोदवसितवेश्मसद्मनिकेतनम्॥ ४॥

निशान्ता[†]वस्त्यसदनभवनागारमन्दिरम्।
गृहाः पुमांसो भूम्न्येव निकाय्यनिलयालयाः॥ ५॥

वासः कुटी द्वयोः शाला सभा

क्षीर०— गृह्णाति गृहम्। 'गेहे कः'(३.१.१४४) इति कः। उदवसिनोति स्मोर्ध्वमवसीयते वा उदवसितम्। विशन्त्यस्मिन् वेश्म। सीदन्त्यस्मिन्

---

१ 'हकादिमृत्तिकाकृ' ज. पाठः. २. 'काकु' ख. घ. च. झ. पाठः. ३. 'ञ्' क. ङ. छ. ज. झ. पाठः. ४. 'डिरिवेडृ' घ. च. पाठः.

---

* इदं मुद्रितोणादौ न दृश्यते। † अवस्त्यपाठः क्षीरस्वामिनः, वन्द्यघटीयस्य तु वस्त्यशब्दः। एवमनयोः पाठभेदस्तत्र तत्रोहनीयः।

सद्म । सदनं च । निकेतन्त्यस्मिन निकेतनम् । निशान्तिः अस्मिन निशान्तम्। निशाया अन्तोऽत्रेत्येके । अवस्त्यायति सङ्घातीभवत्यवस्त्यम । भवन्त्यस्मिन् भवनम् । अग्यतेऽस्मिन अगारम्, अगान वृक्षान इयर्ति वा । मन्द्यते मुष्यतेऽत्र मान्दिरम् । 'मदि स्तुतिमोदमदस्वप्नगतिषु' । भूम्नि बहुत्वे गृहाः। गृहाणीत्यप्याहुः । निचीयते निकाय्यः । 'पाय्यसान्नाय्य—'(३. १. १२९) इति साधुः । निल्लीयतेऽस्मिन निलयः । आल्लीयन्तेऽस्मिन आलयः । 'पुंसि संज्ञायां घः—' (३. ३. ११८)। उष्यतेऽस्मिन वासः। कुड्यतेऽस्यां कुटी । शलन्त्यस्यां शाला । शालते वा । सह भान्त्यस्यां सभा । वसतिर्वासतेयी निवेशनमावसथः संस्त्यायोऽपि ॥

टीका०—गृहादय ऊनविंशतिर्गृहे । 'ग्रह उपादाने' । 'गेहे कः' । (३.१. १४४) इति कर्तरि कः । गृहम्। 'गेहे कः' इति निर्देशादेव गेहम्। उदकं वसितमाच्छादनीकृतमनेनेति उदवसितम् । 'वस आच्छादने'। 'उदकस्योदः संज्ञायाम्' (६. ३. ५७) इत्युदभावः। 'जातिकालसुखादिभ्यः परवचनम' (वा० २. २. ३६) इति निष्ठान्तस्य परनिपातः । वेश्मेति । विशतेः मनिन् । सीदन्त्यस्मिन्निति सद्म मन्त्रन्तम् । निकेतनमिति । 'कित निवासे' । अधिकरणे ल्युट् । सदनभवने अपि ल्युडन्ते । अतिशयनातिशायनवद् दीर्घत्वे सादनमपीति हेमचन्द्रः। अवश्यं निशायाम् अम्यते गम्यत इति निशान्तम् । 'अम गत्यादिषु'। क्तः। 'रुप्यमत्वरमङ्घुषास्वनाम्' (७. २. २८) इति इडभावः । 'वन्त गन्ध अर्दने' । णिजन्ताद् 'अचो यत्' (३. १. ९७)। अगान् वृक्षान् स्तम्भभूतान् राति गृह्णातीत्यगारम् । ह्रस्वादि । 'आतोऽनुपसर्गे कः' (३. २. ३)। तथा च 'वेश्म निशान्तमगारम्' इति नाममालायामार्या। 'वसंश्चतुर्थोऽग्निरिवाग्न्यगारे' (स० ५. श्लो० २५) इति रघुश्च । 'मदिमुदि—' (उ० १. ५४) इत्यादिना मन्देः किरच् । 'मन्दिरं शकटं पीठं क्रोडं रशनं तुम्बं नगरं मन्दिरापुर्यौ' इत्यरुणदत्तेन स्त्रीक्लीबयोर्मन्दिरं पठितम् । तथा चास्यैव प्रयोगः—'व्रजति पथि मनाहं(?) मन्दिरान्त-

१. 'भद्रम्' इ. ख ज. पाठः.

* स्थलद्वयोपात्तत्वेऽपि गृहपदस्यैकत्वेनैव गणनौचित्यात् ।

वारिः' इति । पुल्लिङ्गगृहशब्दो भूम्न्येव नित्यं बहुवचनान्त इत्यर्थः । 'पाय्य-साय्याय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु' (३. १. १२९) इति निपातनाद् निकाय्यः । 'लीङ् श्लेषणे' । 'पुंसि संज्ञायां' (३. ३. ११८) इति घः । निलयालयौ । वसेरधिकरणे घञ् । वासः । 'कुट कौटिल्ये' । इगुपधलक्षणः कः । स्त्रियां कुटी गौरादिः । 'कृगृशृपृकुटि—' (उ०४. १४४) इत्यादिना इप्रत्ययेन कुटिरपि । तथा च 'भ्रुकुटिकुटिकुटी'रिति रामदासः । शालेति । 'शल हुल पल्ल गतौ' । अधिकरणे 'हलश्च' (३. ३. १२१) इति घञ् । ततष्टाप् । सम्यग् भातीति सभा । 'आतोऽनुपसर्गे कः' (३. २. ३) । पृषोदरादित्वाद् वर्णलोपः ॥

सञ्जवनं त्विदम् ।

चतुश्शालं

क्षीर०— सञ्जवति, जवन्ते वा अस्मिन् सञ्जवनम् । चतसृणां शालानां समाहृतानां चतुश्शालम् ॥

टीका० —सञ्जवनद्वयं **चतुश्शालागृहे** । संपूर्वाद् 'जू' इति सौत्रधातोर्ल्युट् । चतसृणां शालानां समाहारः चतुश्शालम् । 'ह्रस्वो नपुंसके—' (१. २. ४७) इति ह्रस्वत्वम् । पक्षे चतुश्शालीत्यपि । 'वा टाबन्त' इत्युपसंख्यानात् ॥

मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥

क्षीर० — **इदं गृहं मुनिसम्बन्धि पर्णशालाख्यम् । उटैः§ देश्यां तृणपर्णैर्जायते उटजम् ॥**

टीका० —पर्णशालाद्वयं **पत्ररचितमुनिकुटिकायाम्** । मुनीनां गृहं पर्ण-

१. 'च ह पाल भ्रु' ज. पाठः. २. 'क' क. ख. ङ. छ. झ. पाठः. ३. 'टीति' घ. ङ. च. छ. ज. झ. पाठः.

---

* 'आवन्तो वा' इति मुद्रितवार्त्तिकपाठः । § उट इति देश्यपदमित्यर्थः ।

शाला स्यादिति सम्बन्धः । पर्ण पत्रं, तत्प्रधाना शाला पर्णशाला । उटजं ह्रस्वा. दि । 'सौधवास उटजेन विस्मृत' इति रघुश्च[1] । 'निशान्तं भवनोटजम' इममरमालायां गृहपर्याय एव ॥

चैत्यमायतनं तुल्ये

क्षीर०— चित्याया इदं चैत्यम् । देवकुलमहावृक्षानुग्राशयः (?) । आयतन्ते अस्मिन्नित्यायतनम् ॥

टीका०— चैत्यद्वयं सुखग्रहितं देवकुलसदृशे यज्ञस्थाने । तथा च

"स्वल्पावशेषा पृथिवी चैत्येनामीन्महात्मनः ।
गदस्य यजमानस्य तत्र तत्र विशां पते ! ॥"

इति । 'चिती संज्ञाने' । 'अ(र्य्या)म्यादयश्च' (उ० ४. ११३) इति यग् वृद्धिश्च । चैत्यम् । 'यती प्रयत्ने' । अधिकरणे ल्युट् । आयतनम ॥

वाजिशाला तु मन्दुरा ।

क्षीर०— मन्दन्ते अत्र मन्दुरा ॥

टीका०— वाजिशालाद्वयमश्वशालायाम् । मन्दुरेति । 'मदि स्तुतिमोदादौ' । 'मन्दिवाशिमथिचनिचटयडकिभ्य उरच्' (उ० १. ४०) ॥

आवेशनं शिल्पिशाला

क्षीर०— आविशन्त्यत्र आवेशनम् । गृहादन्यत् कारूणां कर्मस्थानम् । तेन शिल्पशालेति सभ्यः पाठः ॥

टीका०— आवेशनद्वयं सुवर्णकारादिशिल्पशालायाम् । आङ्पूर्वाद् विशतेः 'करणाधिकरणयोश्च' (३. ३. ११७) इति ल्युट् ॥

---

१. 'त्यमा॥' प. च. पाठः. २. 'नाम् ।' प. च. पाठः. ३. 'तः ॥' ख. छ. पाठः.

---

§ इदं मुद्रितरघुवंशे न दृश्यते ।

प्रपा पानीयशालिका ॥ ७ ॥

क्षीर०— प्रपिबन्त्यस्यां प्रपा । घञर्थे कः ॥

टीका०— प्रपाद्वयं **पानीयशालायाम्** । प्रपिबन्त्यस्यामिति प्रपा । 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कः ॥

मठश्छात्रादिनिलयः‡

क्षीर०— मठ्यतेऽस्मिन् मठः । 'मठ निवासे' । छत्रशीला विद्यार्थिनश्छात्राः । छत्रेण गुरुसेवा लक्ष्यते । छत्रादित्वाण्णः ॥

टीका०— छात्रपरिव्राजकादीनां गृहं मठः । 'मठ मदनिवासयोः' । 'पुंसि संज्ञायां—' (३. ३. ११८) इति घः ॥

गञ्जा तु मदिरागृहम् ।

क्षीर०— गञ्जन्ति नदन्त्यस्यां क्षीबाः गञ्जा ॥

टीका०—गञ्जाद्वयं **मदिरासन्धानगेहे** । गञ्जन्ति शब्दायन्त इति गञ्जा । 'गज गजि गृज गृजि मुज मुजि शब्दार्थाः' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः ॥

गर्भागारं वासगृहम्

क्षीर०— वासाय वासमध्ये वा गृहं वासगृहम् । **अपवरकं कोष्ठकं च** ॥

टीका०—गर्भागारद्वयमीश्वराणां वासहर[२] इति ख्याते । देववासस्थान इति केचित् । निर्वातत्वाद् गर्भ इव अगारं गर्भागारम् । वासस्य शयनस्य गृहं वासगृहम् ॥

---

१. 'ति ॥' ङ. छ. पाठः. २. 'वाह' क. ख. पाठः. ३. 'भ' झ. पाठः.

---

‡ एतदुत्तरं 'सत्रशाला प्रतिश्रयः । बौद्धानां तु विहारोऽस्त्री' इति पादद्वयमधिकं पठ्यते क्षीरस्वामीये, न तु व्याख्यायते ।

अरिष्टं सूतिकागृहम् ॥ ८ ॥

क्षीर०— न रिष्यते हिंसैः कृतरक्षत्वाद् अरिष्टम् ॥*

टीका०—अरिष्टद्वयं **सूतिकागेहे** । मन्त्रादिना निरस्तत्वाद् नास्ति रिष्टमक्षेममस्मिन्नित्यरिष्टम् । 'वा सूतकासूतिकापुत्रकापुत्रिकाबृन्दारकाबृन्दारिका—' (वा० ७. ३. ४५) इत्युपसंख्यानात् सूतकागृहमित्यपि ॥

वातायनं गवाक्षः

क्षीर०— 'इन्द्राक्षयोः समासे' इत्यवङ् । इन्द्रलोको मतङ्गकः ॥

टीका०—वातायनद्वयं **जालके** । वातस्य अयनं पन्थाः इति वातायनम् । गावो रश्मयः, तैरक्षो व्यवहारोऽस्मिन्निति गवाक्षः । 'सर्वत्र विभाषा गोः' (६. १. १२२) इत्यनुवर्तमाने 'अवङ् स्फोटायनस्य' (६. १. १२३) इति व्यवस्थितविभाषाविज्ञानाद् जालके नित्यमवङ् । प्राणिनि तु गोक्षः । 'वातायनं गवाक्षो ना' इत्यमरमाला ॥

अथ मण्डपोऽस्त्री जनाश्रयः ।

क्षीर०—मण्ड्यतेऽनेन लोकैर्वा मण्ड्यते मण्डपम् ॥

टीका०— मण्डपद्वयमास्थानादिमण्डपे । मण्डनं मण्डः भूषा । 'मडि भूषायाम्' । तं पाति रक्षतीति मण्डपः । वेष्टयत इति वा मण्डपः । 'वडि वेष्टने' 'मडि च' । 'विटपविष्टपमण्डपविशिपोलपाः' (उ० ३. १४९) इति निपातिनः ॥

हर्म्यादिर्धनिनां वासः

क्षीर०—हरति मनो हर्म्यम् । आदिशब्दाद् अट्टालादिः ॥

टीका०— इष्टकामयं धवलंगृहमिति ख्यातं हर्म्यम् । यकारवत् । हरतेः

१. 'वासगृहादिः' क. ग. पाठः. २. 'ला' ख. घ. ङ. च. छ. झ., 'लमि' ज. पाठः.

* एतदुत्तरं
"कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम् ।
मत्तालम्बोऽपाश्रयः स्यात् प्रग्रीवो मत्तवारणः ॥"
इत्यधिकं पठ्यते, न च व्याख्यायते ।

'अव्यादयश्च' (उ० ४. ११३) इति यत् मुडागमः गुणश्च । आदिना अट्टाट्टालिकादिः ॥

प्रासादो देवभूभुजाम् ॥ ९ ॥

क्षीर०— वास इत्येव । प्रसीदन्त्यस्मिन् प्रासादः । 'सादकारयोः कृत्रिमे' इति दीर्घः ॥

टीका० — देवानां राज्ञां चेष्टकादिमयैः[1] प्रासादः[2] । अन्यत्रोपचारात् । प्रमुदिताः सीदन्त्यस्मिन्निति प्रासादः । 'हलश्च' (३. ३. १२१) इति घञ् । उपसर्गस्य घञि—' (६. ३. १२२) इत्यादिना दीर्घः ॥

सौधोऽस्त्री राजसदनम्

क्षीर० — सुधाशुभ्रं सौधम् ॥

टीका० — राज्ञ एव सदने सौधः । तथा च 'सौधो हर्म्ये नृपागारमि'त्यमरमाला । सुधायोगात् सौधः । अण्प्रकरणे 'ज्योत्स्नादिभ्य उपसङ्ख्यानम्' (वा० ५. २. १०३) इत्यण् ॥

उपकार्योपकारिका ।

क्षीर० — उपक्रियते उपकरोति च पटमण्डपादि राजसदनम् ॥

टीका० — उपकार्याद्वयम् आरीति ख्यातायाम्। उप अधिकं क्रियते इत्युपकार्या । 'ऋहलोर्ण्यत्' (३. १. १२४) । उप अधिकं करोतीत्युपकारिका । कर्मण्यणन्तङीबन्तात् स्वार्थे कः । 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम् । राजानमुपकरोतीति वा उपकारिका । केचित् प्रासादद्वयं देवानां राज्ञां च गेहे, राजसदनत्रयमुपकार्यायामित्यभिदधति ॥

स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ॥ १० ॥

---

१. 'दि तदीयं प्रा' क. पाठः. २. 'यं' ख. घ. ङ. च. छ. झ. पाठः. ३. 'कर्मणि ण्यत् । उ' क. ख. पाठः.

पिच्छन्दकप्रभेदा हि भवन्तीश्वरसद्मनाम् ।

क्षीर० — स्वस्ति कायति स्वस्तिकः । नन्दी आवर्तोऽत्र नन्द्या-[1]वर्तः । आदिशब्दाद् रुचकवर्धमानाद्याः । पिच्छन्दकप्रभेदा रचनाविशेषाः । 'छदि दीप्तौ' । विशिष्टा छन्दिका विच्छन्दिका इत्येके ॥

टीका० — स्वस्तिकादय ईश्वरसद्मनां भेदाः । पिच्छन्दकप्रभेदाः रचनाविशेषा इत्यर्थः । आदिना रुचकवर्धमानौ । तथा च —

"स्वस्तिकः सर्वतोभद्रो रुचको वर्धमानकः ।
नन्दावर्तादयश्चापि द्वारालिन्दादिभेदजाः ॥"

स्वस्ति करोतीति स्वस्तिकः । 'अन्येभ्योऽपि—'(वा० ३. २. १०१) इति डः । आकृत्यायं चतुरश्रः । सर्वतोभद्रो विहागाकृतिः । नन्दनं नन्दः, तमावर्तयतीति नन्दावर्तः वर्तुलाकृतिः । तथा च संहितायां वराहः—

"अपरोऽन्त्यगतोऽलिन्दः प्रान्तगतौ तदुत्थितौ चान्त्यौ ।
तदवधि(वि)धृतश्चान्यः प्राग्द्वारं स्वस्तिनं शुभदम् ॥
अप्रतिषिद्धालिन्दं समन्ततो वास्तु सर्वतोभद्रम् ।
नृपबृन्दसमूहानां कार्यं द्वारैश्चतुर्भिरपि ॥
नन्दावर्तमलिन्दैः शालाकुड्यान् प्रदक्षिणोऽन्त्यगतैः ।
द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि ॥
प्राक्पश्चिमावलिन्दावन्त्यगतौ तदवधिस्थितौ शेषे ।
रुचकद्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि ॥
द्वारालिन्दान्त्यगतः प्रदक्षिणोऽन्यस्ततश्चान्यः ।
रुद्धश्च वर्धमानो द्वारं तु न दक्षिणं कार्यम् ॥"

इति ॥

१. 'न्या' क. ख. ब. ङ. च. छ. ज. पाठः. २. 'णा' घ. ङ. च. छ. ज. झ. पाठः. ३. 'न्त' ङ. छ. पाठः.

* तथा चेत्यादि वराह इत्यन्तम् आकृत्यंशनः पूर्वमेव मातृकासु दृश्यते ।

स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥

शुद्धान्तश्चावरोधश्च

क्षीर० — **स्त्रीणामगारम्** । **अवरुध्यन्ते अस्मिन्नित्यवरोधनम्** । **शुद्धाः सुरक्ष्याः अन्ता अत्र शुद्धान्तः** । **एते महिष्यामपि तात्स्थ्याद् वर्तन्ते** ॥

टीका० — अन्तःपुरचतुष्कं **नृपतिस्त्रीगृहे**[1] । अन्तः मध्ये पुरम् इत्यन्तःपुरम् । पुरशब्देन गृहमुच्यते । तथा च रत्नमाला — 'अगारे नगरे पुरम्' इति । अवरुध्यन्ते राजस्त्रियः अनेनेत्यवरोधनम् । रुधेः करणे ल्युट् । घञा अवरोधः । शुद्धाः कामोपधापरिशुद्धा अन्ते समीपे रक्षका अस्येति[2] शुद्धान्तः । 'सप्तमीविशेषणे बहुव्रीहौ' (२. २. ३५) इति पूर्वनिपाते प्राप्ते राजदन्तादित्वात् परनिपातः ॥

स्यादट्टः क्षोममस्त्रियाम् ।

क्षीर० — **अटन्त्यट्टन्त्यत्र वा अट्टः अट्टालकः** । **'अट्ट अतिक्रमहिंसयोः'** । **'प्राकाराग्रे रणगृहम्'** इति **कौटिल्यः** । **क्षुवन्ति शब्दायन्ते अत्र योधाः अन्तः क्षोमः** । **प्राकारधारणार्थोऽभ्यन्तरे बोमाख्य इत्येके** ॥

टीका० — अट्टद्वयमट्टे । एतच्च मण्डपस्योपरि हर्म्यादिपृष्ठे च क्रियते । 'अट्ट सुट्ट अनादरे' । चुरादिः । 'एरच्' (३. ३. ५६) । अट्टः । क्षोमम् अवृद्धम् । 'टुक्षु शब्दे' । सोमवन्मन् ।

"क्षौममट्टे दुकूले स्यादतसीवसनेऽपि च[3]"

इति विश्वप्रकाशे अतसीवसनवाचिना सह पाठादट्टेऽपि वृद्धम् । तस्य हि क्षुमाभवं क्षौममिति व्युत्पत्तिः । दुकूले अवृद्धमिति भिक्षुदेवः ॥

प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥

---

१. 'पत्नी' घ. ङ. च. छ. ज. पाठः. २. 'स्य शु' क. ख. पाठः. ३. 'वा' झ., 'च । वि' क. ख. पाठः.

क्षीर०— प्रहन्यते प्रघाणः । 'अगारैकदेशे प्रघणः प्रघाणश्च' (३. ३. ७९) । अल्यते हृष्यते अलिन्दः । द्वारप्रकोष्ठकाद् बहिर्द्वाराग्रवर्ति-चतुष्किकान्ते उपालिन्दिकाख्यः ॥

टीका०— प्रघाणत्रयं गृहबाह्यपिण्डके विनीति ख्याते । तथा च 'अगारैकदेशे प्रघणः प्रघाणश्च' (३. ३. ७९) इत्यत्र निपातनसूत्रे 'द्वारप्रकोष्ठको बाह्य उच्यते' इति वृत्तिः । अलिन्द इति । 'अल भूषणादौ' । ¶'कलिपुलिभ्यां किन्दच्' (उ० ४. ८६) इति बहुलवचनात् किन्दच् ।

"यस्यामलिन्देषु न चक्रुरेव मुग्धाङ्गना गोमयगोमुखानि" (स०३. श्लो०४८)

इति माघप्रयोगेऽपि ह्रस्वादिः ।

"गृहैकदेश आलिन्दः प्रघाणः प्रघणस्तथा"

इत्यमरमालायां दीर्घादिरपि । तथा च आङ्पूर्वेण साधुः ॥

गृहावग्रहणी देहली

क्षीर०— द्वाराग्रे स्थले । संवीथ्याख्य इत्येके । बुध्नोदुम्बरमिति तु सभ्योऽर्थः । अवगृह्यते द्वारशाखानया अवग्रहणी । दिह्यते देहली ॥

टीका०— गृहावग्रहणीद्वयं देहलीति ख्यातायाम् । गृहमवगृह्यते परिच्छिद्यते इति गृहावग्रहणी । ल्युट् । देहं प्रवेशेन लातीति देहली । 'ला आदाने' । 'आतोऽनुपसर्गे कः' (३. २. ३) । गौरादिः ॥

अङ्गनं चत्वराजिरे ।

क्षीर०— अङ्गत्यत्राङ्गनम् । चत्यते चत्वरम् । अजन्त्यत्राजिरम् ॥

---

१. 'भि' ड. छ. ज., 'ही' घ. च. झ. पाठः. २, ३. 'न्' ड. छ. पाठः. ४. 'ण', ५. 'ण' क. ग. पाठः.

¶ 'कुणिपुल्योः किन्दच्' इति मुद्रितोणादिपाठः ।

टीका० — अङ्गनत्रयं **प्राङ्गणे**। 'अगि रगि' इत्यादिना दण्डकादधिकरणे ल्युट्। अङ्गनम्। तथा च नकारान्ते विश्वप्रकाशः —

"अङ्गनं प्राङ्गणे याने कामिन्यामङ्गना मता"

अतो णकारान्तोऽसाधुः। प्रोपसर्गाद् णत्वम्। यथा प्राङ्गणम्। पृषोदरादिणत्वे अङ्गणमपीति केचित्। 'चते चदे याचने च'। कृगृशृवृञ्चतिभ्यष्ट्रच्' (उ० २. १२१)। टकारो ङीबर्थः। तेन 'नेड्वशि—' (७. २. ८) इतीडभावः। चत्वरम्। 'अजिरशिशिरशिबिर—' (उ० १. ४६) इत्यादिना निपातनादजिरम्॥

अधस्ताद्दारुणि शिला

क्षीर० — **स्तम्भादीनामधोदारु शिलाख्यम्। स्तम्भोर्ध्वे दार्वन्तरस्थापनार्थं यदासज्ज्यते, सा शिलीति गौडाः॥**

टीका०—चतुष्किकाद्वारादेरधस्तिर्यक्काष्ठं शिलीति ख्यातं शिला। 'शिल उञ्छे'। इगुपधलक्षणः कः॥

नासा दारूपरि स्थितम्॥ १३॥

क्षीर० — **स्तम्भादेरित्यर्थः। द्वारशाखाधऊर्ध्वदारुणि शिलानासे इति माला। यदाह** —

"नासा दारूपरिद्वारेऽस्याधोदारु शिला स्त्रियाम्"

"ऊर्ध्वोदुम्बरमुत्तरासङ्गोऽधउदुम्बरं दोहली"

इत्याचार्याः॥

टीका० — **द्वारोपरिस्थितदारुणि** नासा। 'णासृ नासृ शब्दे'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः।

"शिला द्वाराधरस्तम्भहदोः शिलमुञ्छके।
नासा द्वारोर्ध्वकाष्ठे स्यान्नासिकायां च कीर्तिता॥"

इत्यजयः॥

प्रच्छन्नमन्तर्द्वारं स्यात्

क्षीर० — **खडकिकाख्यम्॥**

टीका० — प्रच्छन्नद्वयं गृहाभ्यन्तरप्रकोष्ठद्वारे । गम्भीरिकाद्वार इति केचित् । 'छद अपवारणे' । क्तः । 'रदाभ्याम्—' (८. २. ४२) इति नत्वम् । प्रच्छन्नम् ॥

पक्षद्वारं तु पक्षकम् ।

क्षीर० — पार्श्वद्वारमेकमेतदिति कात्यः । यदाह —

"प्रच्छन्नमन्तर्द्वारं स्यात् पक्षद्वारं तदुच्यते" ॥

टीका० — पक्षद्वारद्वयं खसंकीति ख्याते द्वारे । गृहस्य पक्षे पार्श्वे क्रियत इति पक्षकम् । करोतेः 'अन्येभ्योऽपि—' (वा० ३. २. १०१) इति कर्मणि डः ॥

वलीकनीव्रे पटलप्रान्ते

क्षीर० — छादनान्तो वलीकाख्यः । वलति संवृणोति कुड्याद् बहिर्वीथी येनच्छाद्यते । नियतमिव्यते नीयते वाम्भोऽनेन नीव्रम् ॥

टीका० — वलीकत्रयम् ओहालीति ख्यातायाम् । वलीनि संवलितानि कानि तोयानि अत्रेति वलीकम् । 'अन्येषामपि—' (६. ३. १३७) इति दीर्घः । निश्चयेन व्रियते संव्रियते अनेनेति नीव्रम् । मूलविभुजादित्वात् कः । पृषोदरादित्वाद् दीर्घः । 'वलीकः पटलप्रान्त' इति पुंस्काण्डे वोपालितः ॥

अथ पटलं छदिः ॥ १४ ॥

क्षीर० — पटं लातीति पटलम् । छाद्यते अनेन छदिः । इसन्तः क्लीबे । **'इस्मन्त्रन्किषु च' (६.४.९७) इति ह्रस्वः ॥**

टीका० — पटलद्वयं चाले[1] इति ख्याते । 'अट पट गतौ' । 'वृषादिभ्यश्चित्' (उ० १. १११) इति कलच् । छदिः सान्तम् । साहचर्यात् क्लीबे च ।

१, 'ड' ई. छ. ज., 'ण्ड' झ. पाठः. २. 'ला' ङ. छ. पाठः,

'छद अपवारणे'। चुरादिणिच्। *'कृभृविच्छिदिच्छादिभ्य इसिः' (उ०२. १०८)। 'इस्मन्त्रन्क्विषु च' (६.४.९७) इति ह्रस्वः ॥

गोपानसी तु वलभीछादने वक्रदारुणि।

क्षीर० — **गोपायति गोपानसी। पटलाधारो वंशपञ्जरो वलभी (सा?)वलभ्याश्छादके संवरणे ॥**

टीका० — वलभी चूडाट्ट इति यस्याख्या, तद्धारणार्थं धरणकं वक्रीकृत्य यत् काष्ठं दीयते सा गोपानसी। दन्त्यसा। 'शिखायां वलभौ चूडे'ति रुद्रः।

"वलभीचन्द्रशाले तु प्रासादोपरिमण्डपे"

इति कोशान्तरमपि ॥

कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम् ॥ १५ ॥

क्षीर० — **विशिष्टं टङ्कयते विटङ्कम्। पक्षिविश्रमार्थं बहिर्निर्गतं दारु वक्रदार्वाधारः। पक्षिपङ्क्तिर्हि तत्रोत्कीर्यते ॥**

टीका० — हर्म्यविहारादौ विदग्धपक्षिवासार्थं यद् बहिष्कृत्य काष्ठैकदेशे स्थाप्यते तत्र कपोतपालिकाद्वयम्। कपोतान् पालयतीति कपोतपालिका। कर्मण्यणन्तात् स्वार्थे कः। टाबादिः। वीन् पक्षिणः टङ्कयति[3] बध्नातीति विटङ्कम्। 'टकि बन्धने'। चुरादिः। कर्मण्यण् ॥

स्त्री द्वार्द्वारं प्रतीहारः

क्षीर० — **'द्वृ वरणे'। प्रतिहियन्ते रुध्यन्ते अनेन प्रतीहारः। नानार्थे वलजम् ॥**

टीका० — द्वास्त्रयं द्वारे। 'द्वृ आवरणे'। चुरादिण्यन्तात् क्विप्। कर्मणि

१, २. 'ङ' ख. ज. झ. पाठः. ३. 'तीति' ङ. छ. पाठः.

---

* 'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य' इति मुद्रितोणादिपाठः।

घञि द्वारम् । स्वभावादेव घञन्तोऽपि नपुंसक इति धातुप्रदीपः । हृञः कर्मणि घञ् । 'उपसर्गस्य —' (६. ३. १२२) इत्यादिना वा दीर्घः । प्रतीहारः ॥

स्याद् वितर्दिस्तु वेदिका ।

क्षीर० — दारुपरिष्कृता विश्रान्तिभूः । विगतं तर्दनं यत्रेति वितर्दिः । विदन्त्यस्यां वेदी ॥

टीका० — वितर्दिद्वयमावासिन्यङ्गणमध्यस्थचतुष्किकायाम् । अशुभं वितर्दयतीति वितर्दिः[1] । 'तर्द हिंसायाम्' । 'इन्' (उ० ४. ११९) इति इन् । एवं विदेरिति (?) वेदिका ॥

तोरणोऽस्त्री बहिर्द्वारं

क्षीर० — मङ्गलार्थं तुरन्त्यत्र तोरणम् । द्वाराग्रे स्तम्भोपनिबद्धं सिंहद्वाराख्यम् ।

"मङ्गल्यसक्तोरणार्थे भवेद् वन्दनमालिका" ॥

टीका० — तोरणद्वयं तोरणद्वारे । एतच्च स्तम्भद्वयमुभयतो निखन्य मूलद्वाराद् बाह्यतः क्रियते । 'तुर त्वरणे'[2] । करणे ल्युट् । तोरणम् ॥

पुरद्वारं तु गोपुरम् ॥ १६ ॥

क्षीर० — गोप्यते गोपुरम् । प्रतोली ॥

टीका० — पुरद्वारद्वयं नगरद्वारे[3] ॥

कूटं पूर्द्वारि यद्धस्तिनखस्तास्मिन्

क्षीर० — दुर्गद्वारावतरणार्थः क्रमनिम्नो हस्तिनखाख्यो मृत्कूटः[4] अपसोपानाख्यः । सोपानयुक्तं बहि(रग ? श्च)भ्रमन्तस्सोपानयुक्तं युक्तार्थम्[5] (?) इत्येके ।

---

१. 'र्दिका । त' क. ख. घ. च. ज. झ. पाठः. २. 'णे ल्यु', ३. 'पुर' क. ख. झ. पाठः. ४. 'टः । अवसो' ख., 'टः । ब' क. ग. पाठः. ५. 'नम् ।' क. पाठः.

टीका० — दुर्गपुरद्वारे यन्मृत्तिकाकूटं[1] क्रियते बहिरवटप्रधानमभ्यन्तरेण सोपानयुक्तं, यस्मिन्नुत्थाय पारकाणां काण्डादिकं दीयते, स हस्तिनखः ॥

अथ त्रिषु।

कवाटमररं तुल्ये

क्षीर० — **कस्य वायोर्गतागतप्रवर्तकस्य वाटः। अरं कर्षणं राति अररम्। त्रिलिङ्गौ। शिरः पाटयति प्रविशतां कवाटो द्वारपुटः। जपादित्वात् वत्वम्। इयर्ति अररम् अररिः च ॥**

टीका० — कवाटद्वयं **कवाटे**। कं वातं वाटयतीति कवाटम्। 'वट वेष्टने'। 'कर्मण्यण्' (३. २. १)। कैर्वातैः पाटयति भाषते इति कपाटं पकारमध्यं च। 'अट पट लुट तुजि विजि भाषार्थाः'। चुरादिणिच्। पचाद्यच्। स्त्रियां कवाटी। गौरादिः। 'अ(र्तेः ? र्ति)*कमिचमिदेविवासिभ्यश्चित्' (उ० ३. १३२) इति अरः। अररम्। तुल्ये तुल्यार्थे, न तुल्यलिङ्गे। 'प्रेर्यन्तेऽमी परमररयो हर्म्यवातायनानाम्' इति तु कप्फिणाभ्युदयः ॥

तद्विष्कम्भेऽर्गलं न ना ॥ १७ ॥

क्षीर० — **विष्कम्भो बन्धननिमित्तम्। विष्कम्भात्यवष्टम्भात्यवश्यम्। विष्कम्भीत्येके पेठुः। अरेण कर्षणेन गलत्यर्गलं दारुमयो लौहो वा दण्डः। न ना पुमान् न भवति। परार्धिश्च ॥**

टीका० — तद्विष्कम्भिनि तद्द्वारके दण्डादौ अर्गलम्। स्त्रियामर्गला। न नेत्यनेन निषिद्धलिङ्गं शेषार्थमिति सूचयति।

"अर्गलं त्रिषु कल्लोले दण्डे चान्तःकवाटयोः"

इति तु रभसः ॥

आरोहणं स्यात् सोपानं

---

१. 'टः' क. ख. घ. च. छ. ज. झ. पाठः.

---

* 'अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्' इति मुद्रितोणादिपाठः.

क्षीर० — **आरुह्यते अवरुह्यते चानेनारोहणम्। सह उपानन्त्यस्मिन् सोपानम्॥**

टीका० — आरोहणद्वयं **खडखडीति** ख्यातायाम्। आङ्पूर्वाद् रुहेः करणे ल्युट्। आरोहणम्।

"सोपानपथमुत्सृज्य वायुवेगः समुद्धृतः।
महापथे नाग इव स्तूयमानगुणो जनैः॥"

इति काव्या(दर्शे? लङ्कारे) (२. १. २२) वामनेनासभ्यार्थत्वे(नायमु? नो)दाहृतत्वात् सोपानं दन्त्यादि। स वायुवेगः अपानपथमुत्सृज्येति पदविभागतोऽसभ्यार्थत्वम्॥

निःश्रेणिस्त्वधिरोहणी।

क्षीर० — **निश्रयति भित्तिं, नियोजिता श्रेणिः सोपानपङ्क्तिर्वात्र निश्रेणिः। अतिरोहन्त्यवरोहन्ति च यया दारुमय्या सा अधिरोहणी॥**

टीका० — निःश्रेणिद्वयं **निःश्रेणी**[1]**ति** ख्यातायाम्। 'श्रिञ् सेवायाम्'। निर्पूर्वः। 'वहिश्रिश्रुयु*द्रुग्लाहात्वरिभ्यो निः' (उ० ४. ५२) इति निः। रुहेः करणे ल्युट्। 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप्। अधिपूर्वः अधिरोहणी॥

सम्मार्जनी शोधनी स्यात्

क्षीर० — **बहुलाख्या[3] रजोवारणी। मार्जन्या पूतं हि बहुलीकृतं वान्याद्याहुः। समूहनीति तद्बहुकरी वर्धनी च (?)।**

टीका० — सम्मार्जनीद्वयं **सम्मार्जन्याम्**। 'मृजू शुद्धौ'। करणे ल्युट्।

---

१. 'नित् इ' क. घ. च. ज. झ. पाठः. २. 'धानाद्या' घ. पाठः. ३. 'ति स्म त बहुं' ग. घ. ङ. पाठः.

---

* 'युग्लात्वरिभ्यः' इत्येवं मातृकासु दृश्यते।

'मृजेर्वृद्धिः' (७. ३. ११४) इति वृद्धिः। शोधनीति। 'शुध शुद्धौ'। पूर्ववल्ल्युडादि।

"सम्मार्जनी वर्तनी स्यात् सङ्करोऽवकरः स्मृतः"

इति हलायुधः॥

सङ्कारोऽवकरस्तया॥ १८॥

क्षिते

क्षीर०—धूल्यादाविति शेषः। अवकीर्यतेऽवकरः॥

टीका०—तया सम्मार्जन्या क्षिते **मलादिके** सङ्कारद्वयम्। समः किरतेः घञ्। सङ्कारः। अस्मादेव 'ऋदोरप्' (३. ३. ५७)। अवकरः॥

मुखं निस्सरणं

क्षीर०—गृहादेर्निस्सियते प्रविश्यते येन तन्मुखम्। यत् कौटिल्यः—"मुखसमः संक्रमः मुखानुसारेण निस्सारणविधिर्वा"॥

टीका०—मुखद्वयं गृहादेर्द्वारप्रदेशे। तथा च पू(र्वा?र्व)मुखा आवासिनीति प्रयोगः। 'खनु अवदारणे'। 'डित्खनेर्मुट् चोदात्तः' (उ० ९. २०) इत्यनेन अलचौ प्रत्ययौ भवतः मुडागमश्च। करणे ल्युट्। निस्सरणम्॥

सन्निवेशो निकर्षणम्।

क्षीर०—समन्ताद् निविशन्तेऽत्र सन्निवेशः। पुरादेर्बहिर्विहरणभूः। निवृत्तं कर्ष(णम्) अत्र निकर्षणम्॥

टीका०—सन्निवेशद्वयं **पत्तनादिपरिच्छिन्नप्रदेशे**। तथाहि—

"देशं कालं तथा स्थानं सन्निवेशं तथैव च"

इत्यत्र विश्वरूपेण "स्थानं पत्तनादिकं तत्रैव दिग्विभागपरिच्छिन्नानि कियन्त्यपि गृहाणि सम्यङ् निविष्टानि सन्निवेशः"(इति) उक्तम्। 'विश प्रवेशने'। 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ्। कृषेः ल्युटि निकर्षणम्॥

---

१. 'णः॥' ग. घ. ङ. पाठः.

समौ संवसथग्रामौ

क्षीर०— संवसन्त्यत्र संवसथः । ग्रस्यते भोगिभिः ग्रामः । दुर्गं ग्रामधानं खेटकं च ॥

टीका०— संवसथद्वयं ग्रामे । संवसन्त्यत्रेति संवसथः । वसतेः 'उपसर्गे वसेः' (उ० ३. ११६) इत्यथप्रत्ययः । 'ग्रसु ग्लसु अदने' । *'ग्रसतेरा च' (उ० १. १४८) इति मन् सकारे चाकारः ग्रामः ॥

वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥

क्षीर०— वसन्त्यस्मिन् वास्तुः । 'वसेर्णिच्च' (उ० १. ७९) इति तुन् ॥

टीका० — वेश्मभूद्वयं गृहकरणयोग्यभूमौ ।

"निवासात् सर्वभूतानां वास्तुरित्यभिशब्दितः"

'अगारे णिच्च' (उ० १. ७९) इति वसतेस्तुन् । णित्त्वाद् वृद्धिः । वास्तुः अस्त्रियामिति सम्बन्धः ॥

ग्रामान्त उपशल्यं स्यात् सीमसीमे स्त्रियामुभे ।

क्षीर०— अन्ते चिह्नार्थं शल्यप्रक्षेपादुपशल्यम् । उपशले[1] समीपभ्रमणे साधु वा । सीयते बध्यते । सीमा । 'मनः' (४. १. ११) । 'डाबुभाभ्यामन्यतरस्याम्' (४. १. १३) । सीम्न्याघाटार्थगौ सालकोऽस्त्री ग्रामान्तरेऽटवी[3]' (?) ॥

टीका०— ग्रामान्तद्वयं ग्रामसमीपदेशे ।

"अन्तः प्रान्ते समीपे च स्वरूपे च निषेधने"

इत्यजयः । 'ग्रामान्तिकोपशल्यमि'त्यमरमाला । उपगतः शल्यः कीलको यस्येत्युपशल्यम् । प्रादिसमासः । 'शूकशिक्योपशल्यमि'ति शभेदः ।

---

१. 'लेन समीपभ्रमणेन सा' ग. घ. ङ. पाठः. २. 'घाटकटौ सा', ३. 'विः ।' ख. पाठः.

---

* 'ग्रसेरा च' इति मुद्रितोणादिपाठः ।

सीमद्वयं **क्षेत्रादिसीमायाम्**। 'षिञ् बन्धने'। नामन्सामन्नादिसूत्रेण (उ० ४. १९२) इमन्प्रत्ययः। 'ऋन्नेभ्यो ङीप्' (४. १. ५) इति प्राप्तस्य ङीपः 'मनः' (४. १. ११) इति प्रतिषेधेन नान्तं रूपम्। 'डाबुभाभ्यामन्यतरस्याम्' (४. १. १३) इति डाबन्तं द्वितीयम्। आघाटमर्यादाशब्दावप्यत्र। तथा च—

"दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते"

इति प्रयोगः।

"सीमानो मर्यादा आघाटे पूरुषे मताः सीमाः"

इति वोपालितोऽपि॥

घोष आभीरपल्ली स्यात्

क्षीर०— घोषन्ति गावोऽत्र घोषः। आबिभ्यति आ भीत ईरयन्ति वा गाः आभीरा गोपाः। पाल्यते पल्ली गृहाली। 'कुटीग्रामकयोः पल्लिः' इति तु शाश्वतः॥

टीका०— घोषद्वयं **गोपालपल्ल्याम्**। 'घुष घुष्टौ'। 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ्। घोषः। आभीरा गोपाः, तेषां पल्ली कुटीसङ्घात इत्याभीरपल्ली॥

पक्कणः शबरालयः॥ २०॥

क्षीर०— पच्यतेऽस्मिन् पक्कणः। शबन्ति भ्रमन्ति शबराः अरण्यचण्डालाः॥

इति पुरवर्गः।

टीका०— पक्कणद्वयं **शबरपल्ल्याम्**। 'शबरौकश्च पक्कणमि'ति क्लीबकाण्डे अमरमाला। पचतेः क्विप्। पक्। पचनीयः कणोऽत्रेति पक्कणः। वकाररहितः[1]॥

इति पुरवर्गः।

---

१. 'पकारादिः॥' ङ. छ पाठः.

अथ शैलवर्गः ।

महीध्रशिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥

क्षीर० — महीं धारयति महीध्रः । मूलविभुजादित्वात् कः । हर्तुमशक्योऽहार्यः । ध्रियते धरः । पर्वाणि सन्त्यस्य पर्वतः । '(तप्) पर्वमरुद्भ्याम्' (वा. ५. २. १२२) । अद्यते अद्रिः । गां त्रायते गोत्रः । गीर्यते गिरिः । शिलानामयं शैलः । मत्वर्थे वाण् ॥

टीका० — महीध्रादयस्त्रयोदश **पर्वते** । महीं कीलीभूतो धरति बिभर्तीति महीध्रः । मूलविभुजादित्वात् कः । पचाद्यचि महीधरः । शिखरी नान्तः । क्ष्माभृत् तान्तः । हर्तुं न शक्यत इत्यहार्यः । 'ऋहलोर्ण्यत्' (३. १. १२४) । धरति भुवनमिति धरः । पचादिः । *'पर्वमरुद्भ्यां तः' (वा० ५. २. १२२) इति मत्वर्थीयस्तः । पर्वतः । 'अदिशदिभुशुभिभ्यः क्रिन्' (उ० ४. ६६) । अद्रिः । गां पृथिवीं त्रायत इति गोत्रः । गोपूर्वात् त्रैङः 'आतोऽनुपसर्गे कः' (३. २. ३) । 'कृगृशृपृकुटिभिदिच्छिदिभ्य† इः' (उ० ४. १४४) । किच्चासौ । गिरिः । 'ग्रह उपादाने' । 'ग्रहेरा च' इति वनिप् आकारश्चान्तादेशः । ग्रावा नान्तः । शिलाः प्रचुराः अत्र सन्तीति शैलः । ज्योत्स्नादित्वादण् । शिलानामुच्चयः स्तूपः शिलोच्चयः ॥

लोकालोकश्चक्रवाडः

क्षीर० — अन्तर्लोक्यतेऽस्य बाह्यं च न लोक्यतेऽनर्कत्वाल्लोकालोकः । चक्राकारेण वलते वाडते वा चक्रवाडः । 'वाडृ आप्लाव्ये' । आवेष्टच द्वीपाब्धीन् स्थितो ह्यसौ ॥

---

१. 'ल' ङ. च. छ. ज. पाठः. २. 'रुदिभि' ङ. छ. पाठः.

---

* 'तप्पर्वमरुद्भ्याम्' इति मुद्रितवार्त्तिकपाठः । † 'भ्यश्च' इति मुद्रितोणादिपाठः ।

टीका० — लोकालोकद्वयं सकलभूमण्डलस्य[1] **मण्डलाकारेणावस्थिते प्राकारभूते गिरौ**। अस्याभ्यन्तरं पार्श्वं सूर्यरश्मिभिः प्रकाश्यते न बाह्यमिति प्रकाशाप्रकाशतया लोकालोकः। 'लोकृ दर्शने'। कर्मणि घञ्। मण्डलाकारेण परिवेष्ट्य स्थितत्वात् चक्रवाडः। पृषोदरादित्वाद्[2] डत्वम्[$] ॥

त्रिकूटस्त्रिककुत् समौ।

क्षीर० — **'(त्रिककुत्) पर्वते'** (५. ४. १४७) इति **साधुः** ॥

टीका — त्रिकूटद्वयं **त्रिकूटगिरौ**। त्रीणि कूटान्यस्येति त्रिकूटः। त्रीणि ककुदाकाराणि चूडाकाराणि शृङ्गाण्यस्येति त्रिककुद् दान्तः। 'त्रिककुत् पर्वते' (५. ४. १४७) इत्यन्तलोपः ॥

अस्तस्तु चरमक्ष्माभृद्

क्षीर० — **अस्यत्यर्कादीनस्यते वा अस्तः। चरन्त्यत्र चरमः पश्चिमो मन्दराख्यः ॥**

टीका० — **पश्चिमे अस्तपर्वते** अस्तः। अस्तमनुपलब्धिं ग्रहनक्षत्राणां करोतीत्यस्तः। 'तत् करोति —' (ग० ३. १. २६) इति णिच्। पचाद्यच् ॥

उदयः पूर्वपर्वतः ॥ २ ॥

क्षीर० — **उद्यन्त्यस्माद् ग्रहा उदयः ॥**

टीका० — **उदयगिरावुदयः**। उद्यन्त्यस्मादित्युदयः[3]। इणः 'एरच्' (३. ३. ५६) ॥

---

१. 'लम' क. ख. पाठः. २. 'दिड' घ. च., 'दिः ॥' ङ. छ. पाठः. ३. 'देत्यस्मा' ङ. छ. पाठः

$ इदं वलतेर्लकारस्य।

हिमवान् निषधो विन्ध्यो माल्यवान् पारियात्रकः।
गन्धमादनमन्ये च हेमकूटादयो नगाः ॥ ३ ॥

क्षीर०— नियतं सीदन्त्यस्मिन निषधः। विध्यति विन्ध्यः। अघ्र्यादिः। माल्याकारता अस्यास्ति माल्यवान्। परितो यात्रायां भवः पारियात्रकः, स्वारोहन्वात्। गन्धेन मादयति गन्धमादनम्। आदिशब्दाद् मलयमन्दराद्याः ॥

"हिमालयोऽद्रिराजः स्यान्मलयश्चन्दनालयः" ॥

टीका०— हिमवदादयः सप्त प्रत्येकं स्वनामप्रसिद्धे पर्वते। निषीदन्ति सुरा अत्रेति निषधः। 'गोचरसञ्चर—' (३. ३. ११९) इत्यादिना चकारस्यानुक्तसमुच्चयार्थत्वाद् घः। 'सदिरप्रतेः' (८. ३. ६६) इति षत्वम्। पृषोदरादित्वाद् दकारे धकारः। विन्ध्यः यकारान्तः। पारियात्र एव पारियात्रकः। अन्तस्थावान्। तथा च योगयात्रायां वराहयमकं—

"लब्धे महान् सम्यगवाप्य यात्रां ससह्यविन्ध्याचलपारियात्राम्"

इति। गन्धैर्मादयति तर्पयतीति गन्धमादनम्। 'मदी हर्षग्लपनयोः' इत्यत्र मित्संज्ञा न भवति, माद्यतेस्तर्पणार्थत्वात्। न गच्छतीति नगः। 'अन्येभ्योऽपि—' (वा० ३. २. १०१) इति डः। 'नगोऽप्राणिष्वन्यतरस्याम्' (१. ३. ७७) इति नकारस्य वा प्रकृतिवद्भावः। आदिना मलयदर्दुरादयः ॥

पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्।

क्षीर० पिनष्टि, प्रस्तृणाति, गिरति, उपलाति, अश्नाति, शिनोति, दृणाति, इति वाक्यानि ॥

टीका०— पाषाणादयः सप्त प्रस्तरे। पाषाणो मूर्धन्यष इति वर्णदेशना। प्रस्तृणातीति प्रस्तरः। पचादिः। उप समीपं लातीत्युपलः। 'आतश्चोपसर्गे' (३. १. १३६) इति कप्रत्ययान्तः। 'अशू व्याप्तौ'। 'अन्येभ्योऽपि ' (३.२.७५) इति मनिन्। अश्मा। नान्तः। शिलेति। 'शिल उञ्छे'। इगुपधलक्षणः कः। दृणातेः

१. 'धः। वि' ष. ड. च. छ. ज. झ. पाठः. २. 'रा' क. ख. घ. ङ. च. छ. झ. पाठः.

षुग् ह्रस्वश्च' (उ० १. १३६) इति अदिप्रत्ययेन दृषद् दान्ता मूर्धन्यषा। साहर्यात् स्त्रीत्वम्। चान्द्राणां तु शरद् दरद् दृशद् इति दृशेः तालव्यशा॥

कूटोऽस्त्री शिखरं शृङ्गं

क्षीर०—कूटयति कूटं कूट्यते वा वातदावाभ्याम्। 'कूट दाहे'। शिखा अस्यास्ति शिखरम्। 'शिखाया ह्रस्वश्च' (उ० ५. २) इति रः। शृणाति शृङ्गम्॥

टीका०—कूटत्रयं शृङ्गे। 'कूट परिदाहे'। चुरादिः। पचाद्यच्। शिखायां रोहतीति शिखरः। 'अन्येभ्योऽपि—' (वा० ३. २. १०१) इति डः। 'ङ्यापोः—' (६. ३. ६३) इत्यादिना ह्रस्वः। 'शिखरी द्रुमशैलयोः' इति तालव्यादावजयः। अस्त्री शिखरमिति सम्बन्धः।

"धारान्धकारशिखरसहस्राङ्गारतोरणाः"

इति पुन्नपुंसकाधिकारे चन्द्रगोमी। 'शृणातेर्ह्रस्वश्च' (उ० १. १३१) इति गन्। किच्च सः। शृङ्गम्॥

प्रपातस्त्वतटो भृगुः॥ ४॥

क्षीर०—प्रपतन्त्यस्मात् प्रपातः। तटशून्योऽतटः। तटो भृगुरिति पाठे प्रपत्यते यतस्तटात् स भृगुः। बिभर्ति भृज्ज्यते वा भृगुः॥

टीका०—प्रपातत्रयम् अरड इति ख्याते। प्रपतन्त्यस्मादिति प्रपातः। 'अकर्तरि च—' (३. ३. १९) इत्यादिना घञ्। न तटः अतटः। 'भ्रस्ज पाके'। 'प्रथिभ्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' (उ० १. २८) इति कुः। न्यङ्क्वादिकुत्वम्। भृगुः॥

कटकोऽस्त्री नितम्बोऽद्रेः

क्षीर०—कटत्यावृणोति कटकः। मध्यमभागो मेखलाख्यः॥

टीका०—कटकद्वयं पर्वतकटिप्रदेशे। 'कटे वर्षावरणयोः'। 'कुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २. ३५) इति क्वुन्॥

---

१. 'स्वत्वम्।' ङ. छ. ज. पाठः.

स्नुः प्रस्थः सानुरस्त्रियौ ।

क्षीर० — स्नौत्यम्भस्तस्मात् । प्रतिष्ठन्तेऽस्मिन् समभूभागत्वात्[1] प्रस्थः । घञर्थे कः । सनोति ददाति सुखं सानुः । 'षणु दाने' । द्वित्वात् प्रस्थोऽप्यस्त्री ॥

टीका०—स्नुत्रयं **पर्वतैकदेशीयसमभूभागे**। 'सानुः समा गिरेः क्षितिः' इति नाममाला । 'ष्णा शौचे' । 'पृभिदिव्यधिगृधिधृषिभ्यः' (उ० १. २३) इति बहुलवचनात् कुः । स्नुः । प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः । 'घञर्थे कविधानं कर्तव्यम्' (वा०३. ३. ९८) इति कः । 'षण सम्भक्तौ' । 'दृसनिजनिचरिचटिभ्यो ञुण्' (उ०१. ३) । सानुः ॥

उत्सः प्रस्रवणं

क्षीर०—उ(न्दि?न)त्स्यम्भसा उत्सः । प्रस्रवन्त्यस्मात् प्रस्रवणम् ॥

टीका० — पर्वतात् स्रुत्वा एकत्र स्थिते जलसङ्घाते उत्सद्वयम् । 'उन्दिगुधिकु*सिभ्यः कित्' (उ० ३. ६६) इति सः । प्रस्रवणं दन्त्यवत् ॥

वारिप्रपातो निर्झरो झरः ॥ ५ ॥

क्षीर०— निर्झीर्यते निर्झरः । प्रपाताम्बु । 'निर्झरो झरा' इत्येके ॥

टीका० — निर्झरद्वयं स्रुत्वा स्रुत्वा अन्यथा वा वारिप्रवाहे । 'जृष् झष् वयोहानौ' । 'ऋदोरप्' (३. ३. ५७) । निर्झरः । एवं झरोऽपि । 'स्त्रियां झरीत्यपी'ति धातुप्रदीपादिः ॥

दरी तु कन्दरो वा स्त्री

---

१. 'मभा', २. 'नमिति' ङ. छ. पाठः.

---

* 'कुषिभ्यः' इति मुद्रितोणादिपाठः ।

क्षीर० — दीर्यति दरी। पचाद्यिः[1]। कुत्सितं दीर्यति कं दृणाति वा कन्दरा स्त्री। पक्षे रूपात् पुमान्। निर्दरोऽपि ॥

टीका० — दरीद्वयं कृत्रिमेऽकृत्रिमे वा पर्वतविवरे। 'दृ विदारणे'। 'ऋदोरप्' (३. ३. ५७)। गौरादिर्ङीष्। केन जलेन दीर्यत इति कन्दरः। स्त्रियां टाप्॥

देवखातबिले

क्षीर०— समे इत्यर्थः। देवखातमकृतकम्। 'बिल भेदने' ॥

गुहा।

गह्वरं

क्षीर० — गूहति गुहा। अगे ह्वरति गाहते वा गह्वरम्। अकृतकबिलविषये गुहा गह्वरं चेत्येके पूर्वेण सह सम्बध्नन्ति। यत् कात्यः— 'देवखातं बिलं गुहा'। शाश्वतोऽप्याह — 'गह्वरं बिलदम्भयोः' ॥

टीका० — देवैरेव खाते बिले गुहाद्वयम्। 'गुह्व संवरणे'। 'गुहा गिर्योषध्योरि'ति भिदादिपाठादङ्। यद्यपि गिरौ वाच्ये अङ् भवति, तथापि समुदाये प्रवृत्ताः क्वचिदेकदेशेष्वपि वर्तन्ते। 'गाह्व विलोडने'। 'छित्वरछत्वरधीवरपीवरमीवरचीवरनीवरगह्वरकट्वरसंय*द्वरोपह्वराः' (उ० ३. १) इति निपातनाद् गह्वरः ॥

गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥ ६ ॥

क्षीर० — गण्डाः शैला इव स्थूलाश्मानः। च्युताः भूकम्पादिना गलिताः।

"दन्तकास्तु बहिस्तिर्यक्प्रदेशा निर्गता गिरेः" ॥

टीका० — भूकम्पादिना गिरेश्च्युता महोपला गण्डशैलाः ॥

खनिः स्त्रियामाकरः स्यात्

---

१. 'दिर्दरट्। कु' क. ग. घ. ङ. पाठः.

---

* 'द्वराः' इति मुद्रितोणादिपाठः।

क्षीर० — खन्यन्ते लोहादयोऽस्याः खनिः । खानिश्च । आकीर्यन्ते धातवोऽस्मिन्नाकरः । गञ्जोऽपि । यच्छाश्वतः —

"भाण्डागारे विदुर्गञ्जं खनौ गञ्जां सुरागृहे" ॥

टीका० — खनिद्वयं सुवर्णरत्नाद्युत्पत्तिस्थाने । खन्यते इति खनिः । 'खनि[†]कम्यञ्ज्यसिवसिध्वनिवनिसनिग्रन्थिचरिभ्यश्च' (उ० ४. १४१) इति इः । आकारश्च । 'खनिः खानिरि'ति व्याडिः । किरतेः 'पुंसि संज्ञायां—' (३. ३. ११८) इत्यधिकरणे घः । आकरः ॥

पादाः पर्यन्तपर्वताः ।

क्षीर० — मुख्यशैलान्ते क्षुद्रपर्वताः पादा इवाधःस्थत्वाद् धारणाच्च ॥

टीका० — मूलपर्वतस्यान्ते परित्वत्य स्थितेषु पादद्वयम् । 'पद गतौ' । 'पदरुजविशस्पृशो घञ्' (३. ३. १६) पादाः ॥

उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ ७ ॥

क्षीर० — अद्रेर्भूमिरित्येव । 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' (५. २. ३४) । 'न यासयोः' (७. ३. ४५) इत्यत्र त्यकन उपसंख्यानादित्त्वाभावः ॥

टीका० — अद्रेरासन्ना प्रत्यासन्ना भूरुपत्यका । 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' (५. २. ३४) इति त्यकन् । अद्रेरुपरिभूमावधित्यका । पूर्ववत् त्यकन्नादि । 'न यासयोः' (७. ३. ४५) इति प्रतिषेधे 'त्यकन उपसंख्यानम्' (वा० ७. ३. ४५) इति इत्त्वप्रतिषेधः । भट्टिना तु समीपभूमात्रे प्रयुक्ता । तथाहि —

---

१. 'कञ्य' क. ख. च. ज्ञ., 'कम्यञि' ज. पाठः.

---

† 'कम्यञ्ज्यसिवसिवनिसनिभ्वनिग्र —' इति मुद्रितोणादिपाठः ।

"समुद्रोपत्यका हैमी पर्वताधित्यका पुरी।
रत्नपारायणं नाम लङ्केयं मम मैथिलि!॥" (स० ९. श्लो० ८७)

इति। अतोऽद्रेरित्युपलक्षणमात्रम्। उदाहरणं च यं कञ्चिदधिकृत्य कर्तव्यमित्येतावता पर्वतस्य च प्रकृतत्वादद्रेरासन्ना भूमिरित्युक्तम्॥

धातुर्मनश्शिलाद्यद्रेः

क्षीर० — **धत्ते धातुः। आदिशब्दाद् हिङ्गुलिकादि। यदाहुः—**

"सुवर्णरूप्यताम्राणि हरितालमनश्शिलाः॥
गैरिकाञ्जनकांसीयलोहसीसाः सहिङ्गुलाः।
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः॥"

टीका० — मनश्शिला हरितालादिः। अश्मविकारो धातुः। 'सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्' (उ० १. ७२)॥

गैरिकं तु विशेषतः।

क्षीर० — **विशेषणैर्वं धातुः धातुशब्देनैव प्रसिद्धः। गैरिकमित्येके। गिरौ भवमिति गिरिणा विग्रहो गिरिकादण्॥**

टीका० — पूर्वेण सामान्यतो विशेषतश्च सिद्धे वचनं नियमार्थम्। गैरिकमेव विशिष्टं धातुरुच्यते न मनश्शिलादिः। गिरौ भवं गैरिकम्। अध्यात्मादित्वात् ठक्॥

निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे॥ ८॥

क्षीर० — **स्थान इति शेषः। कुञ्जिरावरणार्थः लोकात्। व्यधिकरणे सप्तम्यौ॥**

टीका० — निकुञ्जद्वयं पर्वतादेर्लतापल्लवतृणादिभिः समन्तादाच्छादिते

---

१. 'न्ना', २. 'ति' ङ. छ. पाठः. ३. 'ङ्गलादि' ख. पाठः. ४. 'ण धातुः' ङ. पाठः. ५. 'ब्देन प्र', ६. 'कं हमि' ख. पाठः. ७. 'ते म' क. ख. घ. च. ज. ञ. पाठः

गह्वरादिनिम्नभागे । 'कुजि अव्यक्ते शब्दे' । 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ् । 'न क्वादेः' (७. ३. ५९) इति कुत्वाभावः । निकुञ्जकुञ्जावित्यनेनान्योपसर्गनिवृत्तिः । उदरमिवोदरम् उपमानादिति ॥

इति शैलवर्गः ।

अथ वनौषधिवर्गः ।

अटव्यरण्यं विपिनं गहनं

क्षीर० — अटन्त्यस्यामटवी । इयर्ति भ्राम्यत्यत्रेत्यरण्यम् । वेपन्ते भयेनात्र विपिनम् । 'वेपितुभ्योर्ह्रस्वश्च' (उ० २. ५५) इतीनच्* । गाह्यते गहनम् ॥

काननं वनम् ।

क्षीर० — कन्यते गम्यतेऽस्मिन् काननम् । वन्यते सेव्यते वनम् । वृक्षबहुलं स्थानम् । पूर्वैः सहानयोरैक्यमाहुः । सत्रं नानार्थे ॥

टीका० — अटवीषट्कं वने । अटन्तीत्यटाः । पचादिः । अटाः वयः पक्षिणोऽत्रेत्यटविः । पक्षे 'कृदिकाराद्—' (ग० ४. १. ४५) इति ङीष् । 'ऋ गतौ' । 'अर्तेर्मित्' (उ० ३. १०२) इत्यन्यप्रत्ययः । 'अट्कुप्वा—' (८. ४. २) दिनाणत्वम् । अरण्यम् । 'टुवेपृ कम्पने' । तुहिनवद् विपिनम् । 'गाहू विलोडने' । 'बहुलमन्यत्रापि' (उ० २. ८१) इति युच् । बहुलवचनाद्ह्रस्वत्वम् । गहनम् । 'कनी दीप्त्यादौ' । हेतुमण्ण्यन्ताद् गहनवद् युच् । काननम् । 'वनु याचने' । पचाद्यच् । वनम् ॥

महारण्यमरण्यानी

---

१. 'यच । अ' घ. ङ. छ. पाठः. २. 'दिण' क. ख. च. ज. झ. पाठः.

---

* अन्यत्राय नित् पठ्यते ।

क्षीर०—'हिमारण्ययोर्महत्त्वे' (वा० ४. २. ४९) ङीबानुकौ ॥

टीका०—महारण्यद्वयं महावने। हिमानीवदरण्यानी ॥

गृहारामास्तु निष्कुटाः ॥ १ ॥

क्षीर०—कुटाद् गृहान्निष्क्रान्ता[1] निष्कुटाः ॥

टीका०—गृहारामद्वयं गृहसमीपरचिते[2] वने। कुटाद् गृहान्निर्गताः निष्कुटाः 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा० २. २. १८) इति समासः। 'इदुदुपधस्य चाप्रत्ययस्य' (८. ३. ४१) इति षत्वम् ॥

आरामः स्यादुपवनं कृत्रिमं वनमेव यत्।

क्षीर०—आरम(न्ते ऽन्त्य)स्मिन्नारामः। करणेन निर्वृत्तं[3] कृत्रिमं वनं वृक्षसमूहः। समीपं वनस्योपवनम्। तुल्यत्वेन नैकध्यात् ॥

टीका०—आरामद्वयं कृत्रिमवने। आरमन्त्यस्मिन्नित्यारामः। 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ्। उपरोपितं वनमुपवनम् ॥

अमात्यगणिकागेहोपवने वृक्षवाटिका ॥ २ ॥

क्षीर०—अमात्यगणिकयोरुपलक्षणत्वात् सार्थवाहादीनामपि ॥

टीका०—अमात्यानां गणिकानां च गृहारामे वृक्षवाटिका। वृक्षसहिता वाटिकेति शाकपार्थिवादिः ॥

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्।

क्षीर०—आक्रीडन्त्यस्मिन्नाक्रीडः। उद्यान्त्यस्मिन्नुद्यानम्। साधारणं राज्ञीभिः सह ॥

---

१. 'न्तो निष्कुटः ॥' ख. पाठः. २. 'तव' क. ख. च. ज. झ. पाठः. ३ 'त्तः कृत्रिमो वृ' क. ग घ. ङ. पाठः.

टीका० — आक्रीडद्वयं **सर्वोपभोग्ये राज्ञो वने** । आरामवदाक्रीडः । उद्यातीत्युद्यानम् । गहनवद् युच् ॥

स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥

क्षीर० — **प्रमदार्थं वनं प्रमदानां वा प्रमदवनम् । 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (६. ३. ६३) इति ह्रस्वः । अन्तःपुरं तत्स्था देशाः ॥**

टीका० — **राज्ञो वनं यदन्तःपुरोचितं**, न साधारणं, तत् प्रमदवनम्। 'ङ्यापोः —' (६. ३. ६३) इति ह्रस्वः ।

"प्रमदवनोपकण्ठनलिनीषु लताभवनेषु भूभुजः"

इति ह्रस्वः ।

"रावणे जहिहि द्वेषं[1] जहाहि प्रमदावनम् ।" (स० २०. श्लो० १०)

इति भट्टौ दीर्घवदपि ॥

वीथ्यालिरावलिः पङ्क्तिः श्रेणी

क्षीर० — **वियन्त्यनया वीथी । आलाति आवलति पञ्च्यते श्रीयते इति वचनानि ॥**

टीका० — वीथीपञ्चकं **पङ्क्तिमात्रे** । वीथीति विपूर्वादिणः 'समीणः' (उ० २. ११) इत्यनेन बाहुलकस्थक् । गौरादिङीष् । 'अल भूषणादौ' । आङ्पूर्वः । 'इन्' (उ० ४. ११९) इति इन् । आलिः । 'वल वल्ल संवरणे' । इन् । आवलिः । 'पचि व्यक्तीकरणे' । 'वसेस्तिः (उ० ५. १८१) इति बाहुलकात् तिप्रत्ययः । 'चोः कुः' (८. २. ३०) इति कुत्वम् । 'इदितो नुम् धातोः' (७. १. ५८) इति नुमागमः । पङ्क्तिः । अथवा पञ्च पदानि परिमाणमस्येत्यर्थे पञ्चन्शब्दात् तिप्रत्ययः । टिलोपः चकारस्य ककारः जकारस्य ङकारः । 'पङ्क्तिविंशति—' (५. १. ५९) इत्यादिना सूत्रेण निपात्यते । 'श्रिञ् सेवायाम्' ।

---

१. 'क्रोधं ज' घ. ङ छ. पाठः. २. 'न्।' घ. ङ. छ. ज. पाठः.

वह्निवद् निः। श्रेणिः। वीथीवत् पक्षे 'कृदिकारात्—'(ग० ४. १. ४५) इति ङीषि दीर्घान्ता। श्रेणी॥

क्षीर०—सान्तरा पङ्क्तिः। निरन्तरा लेखा। यदाह—

लेखास्तु राजयः।

लिख्यन्ते लेखाः। राजन्ते राजयः। पङ्क्त्यपङ्क्तिसाधारणाः॥

टीका०—लेखाद्वयं निरन्तरपङ्क्तौ। लेखेति। 'लिख अक्षरविन्यासे'। भिदादित्वादङ्। टाप्। राजतेर्वापिवदिञ्। राजिः॥

वन्या वनसमूहे स्याद्

क्षीर०—पाशादित्वाद् यत्॥

टीका०—वनसङ्घाते वन्या। 'पाशादिभ्यो यः' (४. २. ४९)॥

अङ्कुरोऽभिनवोद्भिदि॥ ४॥

क्षीर०—अङ्क्यते अङ्कुरः। 'अकि लक्षणे'। उद्भिद्यते उद्भित्। प्ररोहोऽपि॥

टीका०—अभिनवोत्थिते वृक्षे अङ्कुरः। 'अकि लक्षणे'। मन्दुरावदुरच्। 'अङ्कूरश्चाङ्कुरः प्रोक्त' इति हलायुधः। तथा चाश्वचरिते वसन्तराजः—

"अङ्कूरिते पल्लविते सपुष्पे फलान्विते भूरुहि सारमेये"

इति। उद्भिनत्ति भुवं बीजं चेत्युद्भित्। 'सत्सूद्विष—' (३. २. ६१) इत्यादिना क्विप्॥

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।
अनोकहः कुठः सालः पलाशी द्रुद्रुमागमाः॥ ५॥

क्षीर०—वृश्च्यते छिद्यते वृक्षः। वृक्षति वृणोति वा। शाखी। व्रीह्यादौ। पादैर्मूलैः पिबति पादपः। एवमङ्घ्रिपः। चरणपस्त्वप्रसिद्धः। तरन्त्यापदमनेन तरुः। अनसः शकटस्य अकं गतिं हन्त्यनोकहः। निर्वचनाद् दुर्वृक्षैकदेशेऽप्यस्ति। द्रुमः। 'द्रुद्रुभ्यां मः' (५. २. १०८)

द्रुशब्दोऽपि अवयवेषु हि वृत्ताः शब्दाः समुदायेष्वपि वर्तन्त इति । न गच्छत्यगमः । अगनगौ नानार्थे । कुजशब्दोऽपि ॥

टीका०—वृक्षादयस्त्रयोदश वृक्षे । 'वृक्ष वरणे' । पचादिः । वृक्षः । महीरुह इति । मूलविभुजादित्वात् कर्तरि कः । 'यत्राधिरूढेन महीरुहौघैः' इति माघे हलन्तोऽपि । तदा च क्विप् । शाखीति । व्रीह्यादित्वादिनिः । 'अत इनिठनौ' (५.२.११५) इति इनिः । विटपी । पादेन पिबतीति पादपः । 'सुपि' (३.२.४) इति योगविभागात् कः । तरतेः मरुवदुः । तरुः । अनसः शकटस्य अकनं गमनं हन्तीत्यनोकहः । 'अन्येष्वपि—' (३.२.१०१) इति डः । 'कु शब्दे' । 'अन्येभ्योऽपि—'(उ० ४.१०७) इति ठः । बाहुलकात् ठस्येकादेशो न भवति । 'कणेष्ठः' (उ० १.१०८) इति बाहुलकाद्वा ठः । कुठः । 'सल गतौ' । घञ् । सालः ।

"सालं सालं विकलिका सालं सालं न वीक्षितुम्"

इति दण्डियमकम् । द्रुरिति । 'हरिमितयोर्द्रुवः' (उ० १.३५) इति केवलादपि द्रवतेर्बाहुलकात् कुः । तत्र च डित्त्वात् टेर्लोपः । 'द्रुद्रुभ्यां मः' (५.२.१०८) द्रुमः । न गच्छतीत्यगमः । पचादिः ॥

वानस्पत्यः फलैः पुष्पात्

क्षीर०—वनस्य पतिर्वनस्पतिः । पारस्करादित्वात् सुट् । भवेऽर्थे 'दित्यदित्यादित्य—' (४.१.८५) इति ण्यः । पुष्पेभ्यो जातफलैर्हेतुभिः ॥

टीका०—पुष्पाद् जातैः फलैः लक्षितः आम्रादिर्वानस्पत्यः । भवार्थे पूर्ववद् ण्यः ॥

नैरपुष्पाद् वनस्पतिः ।

क्षीर०—पुष्पं विना तैः फलैः ॥

टीका०—तैः फलैरपुष्पाज्जातैर्लक्षित **उदुम्बरादिः** वनस्पतिः । 'पारस्करप्रभृतीनि च संज्ञायाम्' (६.१.१५७) इति सुट् । केचिद् वृक्षवनस्पत्योरभेदमाहुः । तथा च त्रिकाण्डे —

"विष्टरोऽस्त्री द्रुमः सालो वनस्पतिरनोकहः" ॥

ओषधिः फलपाकान्ता

क्षीर०— ओषं रुजं धयत्योषधिः। फलपाक एवान्तोऽस्याः ॥

टीका०— फलपाकेन नश्वरस्वभावे धान्यकदल्यादावोषधिः। ओषो दाहो धीयते अत्रेति ओषधिः। 'कर्मण्यधिकरणे च' (३. ३. ९३) इति किः। ङ्यन्तापि ओषधिः। रूपभेदात् स्त्रीत्वम् ॥

स्यादवन्ध्यः फलेग्रहिः ॥ ६ ॥

क्षीर— फलानि गृह्णातीति 'फलेग्रहिरात्मम्भरिश्च' (३. २. २६) इति साधुः ॥

टीका० — अवन्ध्यद्वयम् **ऋतुकाले फलधरे वृक्षे**। फलानि गृह्णाति धारयतीति फलेग्रहिः। 'फलेग्रहिरात्मम्भरिश्च' (३. २. २६) इति निपातितः ॥

वन्ध्योऽफलोऽवकेशी च

क्षीर० — **बध्नाति**[1] **अफलं वन्ध्यः। अवकं शून्यम् ईष्टे अवकेशी ॥**

टीका०— वन्ध्यत्रयम् ऋतुकालप्राप्तावपि **फलहीने**। 'बन्ध बन्धने'। 'अघ्न्यादयश्च' (उ० ४. ११३) इति यत्। वन्ध्यः। फलं यस्य नास्ति, सोऽफलः। केश इव केशः। अवध्वस्तः केशः[2] अवकेशः। सोऽस्यास्तीत्यवकेशी। इनिः ॥

फलवान् फलिनः फली।

क्षीर० — **फलं बह्वस्यास्तीति। 'फलबर्हाभ्यामिनच्' (वा० ५. २. १२२) ॥**

टीका०— फलवत्त्रयं **वर्तमानफले**। 'फलबर्हाभ्यामिनच्' (वा० ५. २. १२२)। फलिनः। फलीति। अत इनिः ॥

---

१. 'ति बलं' क. ग. घ. ङ. पाठः. २. 'शः सो' क. ख. च. ज. झ. पाठः.

प्रफुल्लोत्फुल्लसम्फुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥

फुल्लश्चैते विकसिते

क्षीर० — प्रफुल्लति स्म प्रफुल्लः। 'त्रिफला विशरणे'। क्तः। 'उत्परस्यातः' (७. ४. ८८) इत्युत्वम्। 'अनुपसर्गात् फुल्लक्षीव —' (८. २. ५५) इति साधुः फुल्लः। उत्फुल्लसम्फुल्लावुपसंख्यानात्। प्रफुल्लेति पाठे 'फुल्ल विकसने'। अच्। विगत आकोशः सङ्कोचोऽस्य व्याकोशः। विशेषेण कचति विकचः। स्फुटति ॥

टीका० — प्रफुल्लाष्टकं विकसितपुष्पे। प्रफुल्लस्तोपधः। 'त्रिफला विशरणे'। 'क्तीतः क्तः' (३. २. १८७)। 'ति च' (७. ४. ८९) इति उपधाया उकारः। 'आदितश्च' (७. २. १६) इति इडभावः। निष्ठातकारस्य लत्वं नास्ति, सोपसर्गत्वात्। तथा च 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (८. २. ५५) इत्यत्र वृत्तावुक्तम् 'अनुपसर्गादिति किं, प्रफुल्लाः सुमनसः' इति। यत्तु धातुप्रदीपे 'फुल्ल विकसने। प्रफुल्ल' इति दर्शितं, स विकासवाची घञन्तः। उत्फुल्लसम्फुल्लयोरुपसङ्ख्यानाद् लत्वम्। उत्फुल्लसम्फुल्लौ। व्याकोषो मूर्धन्यषः तालव्यशो वा। 'कच बन्धने'। पचाद्यच्। विकचः। 'स्फुट विकसने'। इगुपधलक्षणः कः। स्फुटः। फुल्ल इति। 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (८. २. ५५) इति लत्वम्। विकसितम्। 'क्षिनो विकसित सितम्' इति कीचकवधे दन्त्यमध्यम् ॥

स्युरवन्ध्यादयस्त्रिषु।

क्षीर० — वाच्यलिङ्गत्वात् ॥

टीका० — अवन्ध्यादयो विकसितान्तास्त्रिषु ॥

स्थाणुरस्त्री ध्रुवः शङ्कुः

क्षीर० — तिष्ठति ध्रुवति शङ्कतेऽस्मात् ॥

१. 'प्रा' क. ख. घ. ङ. छ. ज. पाठः.

टीका० — स्थाणुत्रयं **मुण्ड** इति ख्याते। स्थाणुरुक्तः। पक्षे[1] रूपभेदाद्[†] **नपुंसकम्**। ध्रुवशङ्कू तारकयादोभेदपर्याय एवोक्तौ॥

ह्रस्वशाखाशिफः क्षुपः॥ ८॥

क्षीर० — **सुसूक्ष्मलतादिप्रतानः। क्षौति दह्यमानो वा (?)॥**

टीका० — यस्य शाखाः ह्रस्वाः शिफाश्च शाखोटकादेः, स क्षुपः॥

अप्रकाण्डे स्तम्बगुल्मौ

क्षीर० — **प्रकाण्डो ग्रन्थिः**[2]। तद्रहित उद्भिद्विशेषस्तृणसङ्घो वा **स्तम्बः**। तिष्ठतीति। 'स्थः स्तोऽम्बजबकौ च' (उ० ४. ९७)। गुडति **गुल्मः**। नानार्थे विटपः॥

टीका० — स्तम्बद्वयमपगतप्रकाण्डे बहुपत्रे मल्लीविटपादौ। प्रकाण्डश्च शाखातः पूर्वो भागः। 'स्थः[3] स्तोऽम्बाम्बकौ च' (उ० ४. ९७) इति तिष्ठतेरम्बप्रत्ययः[4] स्तादेशश्च। स्तम्बः॥

वल्ली तु व्रततिर्लता।

क्षीर० — **वलति वेष्टते वल्ली**। गुलूच्यादिर्माधव्यादिश्च। वृक्षशाखापि। यच्छाश्वतः —

"लता प्रततिराख्याता लता शाखा च शाखिनाम्।"

प्रकृष्टा ततिरस्याः व्रततिः। जपादि(?)त्वाद् वत्वम्। **लाति लता**॥

टीका० — वल्लीत्रयं लतायाम्। 'वल वल्ल संवरणे'। पचादिर्गौरादी। इ[5]प्रत्यये वल्लिरपि। तथा च प्रयोगः —

"गतः स कालो यत्रासीन्मुक्तानां जन्म वल्लिषु"

---

१. 'क्षे तु रू' क. पाठः. २. 'गण्डः।' ग. घ. ङ., 'जङ्घः।' क. पाठः. ३. 'स्थस्तो', ४. 'थस्ता' क. ख. घ. ङ. छ. पाठः. ५. 'इनिप्र' क. ख. घ. ङ. छ. ज. झ. पाठः.

---

† 'स्थाणु वा ना ध्रुवः' इति टीकासर्वस्वपाठः स्यात्।

इति । प्रपूर्वात् तनोतेः क्तिन् । प्रततिः ।

"प्रस्थः सानुनि माने च प्रततिस्तरुवीरुधोः"

इति पकारादावजयः । माघे तु वकारादिङीपन्तेप्रयोगोऽप्युत्पन्नो दृश्यते । प्रपूर्वात् क्तिन्नन्तत्वे ङीप् न स्यात् । तथा च माघः—'धराधरेन्द्रं वततीततीरिव' (स० १. श्लो० ५) इति । उणादौ तु 'कृतिभिदिलतिभ्यः कित्' (उ० ३. १४८) इत्यत्र लतिः सौत्रः । तत्र लता ॥

लताप्रतानिनी वीरुद् गुल्मिन्युलपमित्यपि ॥ ९ ॥

क्षीर०—लतानां प्रतानोऽस्त्यस्याः प्रतानिनी लता वा वीरुत् । यत् कात्यः—

"वीरुत् सुपर्णजटिला प्रतानशतगामिनी ।"

विरुणद्धि विरोहति वा वीरुत् । 'अन्येषामपि दृश्यते' (६. ३. १३७) इति दीर्घः । न्यङ्कादित्वाद् धत्वम् । उलते उलपम् । उलः सौत्र आवरणार्थः । उल्लुप्यते वा ॥

टीका०—प्रतानः शाखापर्वसञ्चयः । तद्युक्ता गुडूचीचित्रपुष्पादिलता वीरुदादित्रिकवाच्या । विविधं रोहतीति वीरुत् । क्विप् । 'न्यङ्कादीनां च' (७. ३. ५३) इति हकारे धकारः । 'अन्येषामपि—' (६. ३. १३७) इति दीर्घः । उच्यते । 'विटपविष्टपा'दिसूत्रेण (उ० ३. १४५) कपन् चकारस्य लकारः । उलपम् । वल्ल्यादिसप्तकेनैव लतोच्यत इति केचित् । तथा च पुनर्लतेत्यनुवादः । तेनायमर्थः—लतैव प्रतानिन्याद्युच्यते ॥

नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।

क्षीर०—आरुह्यते आरोहः । औत्सन्यम् । उच्छ्रयणमुच्छ्रायः । 'उदिश्रयतियौति—' (३. ३. ४९) इत्यनित्यो घञ् । यल्लक्ष्यं—'पतनान्ताः समुच्छ्रयाः' । उत्सेध उद्गतिः । यच्छाश्वतः 'उत्सेधौ वपुरुन्नती' ॥

---

१. 'न्ते' घ. ङ. च. छ. पाठः. २. 'प्युपपन्नो' क. पाठः. ३. 'न्येभ्योऽपि' क. ङ. पाठः. ४. 'अचयः' घ. ङ. छ., 'अप्रचयः' क. ख. ज. झ. पाठः.

टीका०—नगादीनामारोहे ऊर्ध्वरूपतया दैर्घ्ये उच्छ्रायत्रयम्। आदिना गिरिदेवकुलादेर्ग्रहणम्। 'श्रिञ् सेवायाम्'। 'उदिश्रयतियौति—'(३.३.४९) इत्यादिना भावे घञ्। उच्छ्रायः। 'सिधु गत्याम्'। भावे घञ्। उत्सेधः। श्रयतेः 'एरच्' (३.३.५६)। उच्छ्रयः। यद्यपि 'उदिश्रयति—' इत्यादिना नित्यवद् घञ्, तथापि सिंहावलोकितेन 'विभाषाङि रुप्लुवोः' (३.३.५०) इत्यत्र विभाषाग्रहणमनुवर्तते॥

अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोः॥१०॥

क्षीर०—प्रकाण्ड्यते प्रकाण्डो वृक्षजङ्घा। स्कन्ध्यते आरुह्यते स्कन्धः॥

टीका०—प्रकाण्डद्वयं वृक्षस्य मूलादारभ्य शाखापर्यन्ते। स्कन्धशब्दोऽदन्तोऽव्युत्पन्नः। तथा च माघे—

"सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्" (स० २.श्लो० २८)

इति। 'स्कन्धः समुदयेऽपि वा' इत्ययमेव वक्ष्यति। उणादौ 'स्कन्देश्च स्वाङ्गे' (उ० ४.२०८) इत्यनेनैव सूत्रेण 'स्कन्दिर् शोषणे' इत्यतो धादेशासुन्भ्यां सकारान्तो नपुंसकश्चोक्तः॥

समे शाखालते

क्षीर०—'शाखृ व्याप्तौ'। श्यै(न्तेः[2]तेः) खो वा। शिखापि॥

टीका०—शाखाद्वयं तालं[3] इति ख्याते। 'शाखृ व्याप्तौ'। अच्। शाखा। तालव्यादिः। लता उक्ता। समे इत्यधिकारः शिफाजटे इति यावत्॥

स्कन्धशाखासाले

क्षीर०—समे इत्येव। सीयते साला। शालेति शाश्वतः—

---

१. 'दा' क. ख. पाठः. २. 'श्यन्ते खं वा' क. ग. घ. पाठः. ३. 'लव्य इ' क. पाठः,

"शाला तरुस्कन्धशाखा शाला भवनमिष्यते" ॥

टीका० — स्कन्धशाखाद्वयं तरुप्रकाण्डनिर्गतायां प्रधानशाखायाम्। स्कन्धाद् निर्गता शाखा स्कन्धशाखा। मत्स्ये शाल उक्तः। टापि शाला ॥

शिफाजटे।

क्षीर०— शिनोति शेतेऽधो वा शिफा। जटति जटनं वा जटा। वृक्षादिमूलम्। 'जट सङ्घाते'। भिदाद्यङ् ॥

टीका०— शिफाद्वयं शिंहड[1] इति ख्याते। शयात् तिर्यक् स्फायतीति शिफा। पृषोदरादिः। 'शिथिलशिफाशलशेफाः' इति शभेदः। जटेति। 'जट झट[2] सङ्घाते'। पचादिः ॥

क्षीर०—एवं शिफालतयोः पर्यायानुक्त्वा रूपमाह—

शाखाशिफावरोहः स्याद्

अवरोहन्ती शाखाशिफा शिफारूपा शाखा (वा) अवरोहोऽश्वत्थादेरित्युपाध्यायः ॥

टीका०— वटादिशाखायाः शिफायामवरोहः। शाखावलम्बिनी शिफा शाखाशिफा। रुहेः पचाद्यचि अवरोहः ॥

क्षीर०— बुध्नादूर्ध्वं गता लता। यदाह—

मूलाच्चाग्रं गता लता ॥ ११ ॥

टीका०— तरुमूलात् प्रभृति वृक्षाग्रं यावद् गता गुडूच्यादिलता साप्यवरोहश्च। एतत् तु प्रसङ्गेनोक्तम् ॥

शिरोऽग्रं शिखरं वा ना

---

१. 'शी' ङ. छ. पाठः. २. 'स' घ. ङ. छ.; 'श' झ. पाठः.

क्षीर०— वृक्षादेर्मूर्धा अग्राख्यः। शिखरं तु वा ना पक्षे पुमान्। रूपात् पक्षे क्लीबे ॥

टीका०— शिरआदित्रयं वृक्षाग्रे। 'श्रयतेः स्वाङ्गे शिरः किच्च' (उ० ४. १९५) इत्यसुन्शिरादेशौ। शिरः। 'अक अग कुटिलायां गतौ'। उग्रवद् रः। अग्रम्। शिखरं वा नेति सम्बन्धः ॥

मूलं बुध्नोऽङ्घ्रिनामकः।

क्षीर०— 'मूल रोहणे'। बुध्यन्तेऽनेन बुध्नः। वृक्षादेः पादपर्यायः॥

टीका०— मूलद्वयं वृक्षमूले। अङ्घ्रिनामकः पादपर्यायनामक इत्यर्थः। 'मूल्ल रोहणे'। चुरादिः। पचाद्यच्। मूलम्। सूर्ये बुध्न उक्तः। उकारवांश्चायम्। तथा च राजशेखरः—

"निवेश्य बुध्ने चरणं स्मितानना भुजेन काण्डं कलयावलम्ब्य च"

इति। रेफवत्पाठे छन्दोभङ्गः ॥

सारो मज्जा नरि

क्षीर०— सरति सारः। 'सृ स्थिरे' (३. ३. १७) घञ्। मज्जति मज्जा। नरि पुंसि ॥

टीका०— सारद्वयं वृक्षस्य सारभागे। कालान्तरं सरतीति सारः। 'सृ स्थिरे' (३. ३. १७) इति घञ्। एवं दन्त्यादिः। मज्जा नान्तः। मघव-(व)तुँ कनिना 'टुमस्जो शुद्धौ' इत्यतो निपातितः।

"अथ मज्जा द्वयोरस्थिस्नेहेऽशुक्रकरो बली"

इत्युत्पलिन्यां धातौ टाबन्ता। तत्र हि द्वयोरिति पुंक्लीबयोरिति परिभाषितम्। तन्निषेधोऽकारप्रश्लेषात्। 'केलिः प्रदहति मज्जाम्' इत्यार्याकोशश्च ॥

त्वक् स्त्री वल्कं वल्कलमस्त्रियाम् ॥ १२ ॥

---

१. 'तॄटु' घ. ङ. च. छ. पाठः. २. 'हः शु' घ. ङ. छ. पाठः.

क्षीर० — 'त्वच संवरणे'। वल्यते छाद्यतेऽनेनेति वल्कम्। 'वल संवरणे'। वल्कं लाति वल्कलं श्यामलवत् ॥

टीका०— त्वक्त्रयं वल्कले। आवृणोति वृक्षमिति त्वक्। 'त्वच संवरणे'। क्विप्। 'वल वल्ल संवरणे'। 'शुकवल्कोलकाः' (उ० ३. ४२) इति कन्। वल्कम्। अस्मादेव 'कलच्' (उ० ४. ९) इत्यनेन कलच्। वल्कलम्। 'मुसलं मूलवल्कलम्' इति पुंस्काण्डाधिकारे चन्द्रगोमी ॥

काष्ठं दारु

क्षीर० — काशते काष्ठम्। दीर्यते दारु॥ विशेषमाह—

टीका० — काष्ठद्वयं काष्ठमात्रे। दिशि काष्ठोक्ता। 'दृ विदारणे'। 'दृसनिजनि —' (उ० १. ३) इत्यादिना ञुण्। दारु। 'पुन्नपुंसकयोर्दारुः' इति त्रिकाण्डशेषः ॥

इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्।

क्षीर० — इध्यतेऽनेनाग्निरिन्धनम्। इध्मं च। 'इषियुधीन्धि—' (उ० १. १५०) इति मक्। आद्यमेधेरसुनि दाद्यदार्वर्थे। पर एधः 'अवो दैधौद्य —' (६. ४. २९) इति इन्धेर्धात्वि साधुः। होमार्थे समिध्यतेऽनया अग्निः समित्॥

टीका० — इन्धनपञ्चकमग्निदीपनमात्रे काष्ठतृणादौ। 'ञिइन्धी दीप्तौ'। करणे ल्युट्। इन्धनम्। 'एध वृद्धौ'। 'असुन्' (उ० ४. १९०) इत्यसुन्। एधः।

"एध इन्धनमिध्मं स्यादेधः पुंसि समित् स्त्रियाम्"

इति क्लीबकाण्डे अमरमाला। होमीये त्विन्धने समिदिध्मयोर्बहुलः प्रयोगः। इध्ममिति। 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' (उ० १. १५०)। कित्त्वादनुनासिकलोपः। 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ्। एधः। अदन्तोऽपि। सम्पूर्वादिन्धेः सम्पदादिक्विप्। सामिद् धान्ता ॥

निष्कुहः कोटरं वा ना

क्षीर० — **निष्कुह्यते निष्कुहयते वा निष्कुहः । निष्कुट इत्येके । कुटति कोटरः विष्वग्गर्तः । रूपात् पक्षे क्लीबे ॥**

टीका० — निष्कुहद्वयं **वृक्षकोटरे** । 'कुह विस्मापने' । मूलविभुजादिः । 'इदुदुपधस्य चाप्रत्ययस्य' (८. ३. ४१) इति षत्वम् । निष्कुहः । 'कुट कौटिल्ये' । 'ऋच्छेररन्' (उ० ३. १३१) इति बाहुलकोऽरन् । कोटरम् ॥

वल्लरी मञ्जरी स्त्रियौ ॥ १३ ॥

क्षीर० — **मन्यते मञ्जरी । लतादेर्नवोद्भित् ॥**

टीका० — वल्लरिद्वयं **तालवल्लर्यादौ** । 'वल वंल्ल संवरणे' । 'ऋतन्यञ्जिवानि—' (उ० ४. २) इत्यादिना बाहुलकोऽलिच्प्रत्ययः । रलयोरेकत्वस्मरणम् । वल्लरिः । 'वांसिवल्लिभ्याम्' इति सौत्राद्वा वल्लेर्धातोरालिच्प्रत्ययः । मञ्जं रातीति मञ्जरिः । पृषोदरादिः । पक्षे द्वयं ङीषन्तम् ॥

पत्रं पलाशं छदनं दलं पर्ण छदः पुमान् ।

क्षीर० — **पतति पत्रम् । पलं श्यंति शात्यते वा पलाशम् । पल गतौ वा । छाद्यतेऽनेनेति छदनम् । वाक्यादः (?) 'छादेर्घेऽद्व्युपसर्गस्य' (६. ४. ९६) इति ह्रस्वः । दलति दलम् । पिपर्ति पर्णम् । पटिः पत्रसिरा ॥**

टीका० — पत्रादयः षट् **पत्रे** । 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४. १६०) । 'तितुत्रतथसिसुसरकसेषु च' (७. २. ९) इति इट्प्रतिषेधः । षकारो ङीषर्थः । पत्रम् । पलाशं तालव्यान्तम् । 'छद अपवारणे' । 'आधृषाद्वा' इति णिजभावपक्षे 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ल्युट् । छदनम् । 'दल विदारणे' । कर्तरि पचाद्यच् । दलम् । 'पॄ पालनपूरणयोः' । 'धापृवस्यज्यतिभ्यो नः' (उ० ३. ६) । पर्णम् । छदेरेव ण्यन्तात् पुंसि संज्ञायां घः । 'छादेर्घेऽद्व्युपसर्गस्य' (६. ४. ९६) इति ह्रस्वः । छदः । अदन्तः ॥

---

१. 'रा' च. पाठः.

पल्लवोऽस्त्री किसलयं

क्षीर० — पल्यते पल्लवः। किञ्चित् सलति किसलयं विकसति लीयमानं वा। एतत् पत्रं प्रवालाख्यम्॥

टीका० — पल्लवद्वयं पत्रयुक्ते शाखायाः पर्वणि। 'पुंसि क्लीबे च पल्लवः' इति व्याडिः। 'किसलयैः सलयैरिवे'ति माघयमकात् किसलयो दन्त्यवान्॥

विस्तारो विटपोऽस्त्रियाम्॥ १४॥

क्षीर० — शाखादेर्विस्तृतिर्विस्तारः। 'प्रथने वावशब्दे' (३. ३. ३३)। घञ्। विटान् पाति विटपः। यत् कात्यः

"स्कन्धादूर्ध्वं तरोः शाखा कटप्रो विटपो मतः।"

विटन्ति उत्क्रोशन्ति अस्माद्वा॥

टीका० — विस्तारद्वयं शाखापल्लवसमुदाये। विस्तारयति तरुमिति विस्तारः। पचाद्यचि। 'वट वेष्टने'। विटपविष्टपादिना (उ० ३. १४५) विटपो निपातितः। केचित् पल्लवादिचतुष्टयमेव एकपर्यायं मन्यन्ते।

"शाखायां पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियाम्"

इति रभसश्च॥

वृक्षादीनां फलं सस्यं

क्षीर० — वृक्षादीनामिति पूर्वेणापि च सम्बध्नन्ति॥

टीका० — वृक्षलतादीनां फले आम्रादौ सस्यम्। 'फल निष्पत्तौ'। अच्। फलम्। 'सस स्वप्ने'। 'माछासासिसूभ्यो यः' (उ० ४. १११)। सस्यं व्रीहिजातिरित्युणादिः। 'शसु हिंसायाम्'। तालव्याद्यपीति वर्णदेशना॥

१. 'वा चैत' ख. ग. घ. ङ. पाठः. २. 'स्यं चैतत्।' ग. पाठः. ३. 'रिति' घ. ङ. छ. पाठः. ४. 'र्णनिर्देश' घ. ङ. छ. ज. पाठः.

वृन्तं प्रसवबन्धनम्।

क्षीर०— वृणोति वृन्तम्। प्रसवः पुष्पादि। यत् कात्यः— 'बन्धनं पुष्पफलयोर्वृन्तमाहुः' ॥

टीका०— वृन्तद्वयं वोण्ठ इति ख्याते। वृतेर्निष्ठायां पृषोदरादिनत्वम्। वृन्तम्। प्रसवः पुष्पफलपत्राणि, तस्य बन्धनम्॥

आमे फले शलाटुः स्यात्

क्षीर०— शं लाति शलाटुः॥

टीका०— अपक्के फले शलाटुः। 'अम गत्यादिषु'। 'अकर्तरि च —' (३. ३. १९) इति घञ्। 'नोदात्तोपदेश—' (७. ३. ३४) इत्यादिना वृद्ध्यभावः। अमः। धातुप्रदीपे तु णिजन्ताद् घञि आमो दीर्घादिः। 'शल[1] चलनसंवरणयोः'। तालव्यादिः। बहुलवचनाद् आटुः। शलाटुः॥

शुष्के वानम्

क्षीर०— फल इत्येव। 'पै ओवै शोषणे'। 'ओदितश्च' (८. २. ४५) इति निष्ठानत्वम्॥

टीका०— फल एव शुष्के बदरादौ वानम्। 'पै ओवै शोषणे'। क्तः। 'ओदितश्च' (८. २. ४५) इति नत्वम्। वानम्॥

उभे त्रिषु॥ १५॥

क्षीर०— शलाटुवाने अभिधेयलिङ्गे[2]॥

टीका०— उभे शलाटुवाने त्रिषु। शलाटुः कर्कटी[3]। शलाटवो माषाः। शलाटूनि फलानि। एवं वाना हरीतकीत्यादिः[4]॥

---

१. 'व' घ. ङ. छ. पाठः. २. 'यवलिङ्गे' क. ग. घ. ङ. पाठः. ३. 'री' घ. पाठः. ४. 'क्यादिः'.

क्षारको जालकं क्लीबे

क्षीर० — क्षरति प्रसूयते क्षारकम् । जालमिव जालकम् । नवकलिकावृन्दम् ॥

टीका० — क्षारकद्वयं कूष्माण्डादिजालिकायामचिरोद्भूतायाम् । 'क्षर चलने' । घञ् । ततः स्वार्थे कन् । क्षारकः । 'जल धान्ये' । ज्वलादिर्णः । पूर्ववत् कन् । जालकम् ॥

कलिका कोरकः पुमान् ।

क्षीर० — सूक्ष्मा तारिका । कल्यते शब्द्यते कलिका । कुर्यते शब्द्यते कोरकः ॥

टीका० — कलिकाद्वयमविकसितपुष्पे । कलिरेव कलिका । कोरक इति । 'कुर शब्दे' । 'कृजादिभ्यः संज्ञायां वुन्' (उ० ५. ३९) । 'समुपहरन् विचकार कोरकाणि' इति माघे क्लीबम् । अतोऽबहुत्वापेक्षया पुमानित्युक्तम् । केचित् 'कोरकोऽस्त्रियाम्' इत्येव पठन्ति ॥

स्याद् गुच्छकस्तु स्तबकः

क्षीर० — पुष्पसङ्घातो रम्यत्वात् स्तूयते इति स्तबकः । गुलुच्छकोऽपि ॥

टीका० — गुत्सकद्वयं पुष्पस्तबके ।

"एकप्ररोहे पुष्पाणि पृथग् यत्र बहूनि तु ।
पुष्पगुत्सः स विज्ञेयो यथा स्यात् करवीरकः ॥"

'गुध परीषोत्सर्गे' । उत्सवत् सः । गुत्सः । ततः स्वार्थे क इति वर्णदेशना । रन्तिकोशे चवर्गीय उक्तः । स्तम्बवत् स्तबकः ॥

---

१. 'कोऽस्त्रियाम्' ख. पाठः २. 'ते गुच्छ्यते स्त' ग. घ. पाठः

कुट्मलो मुकुलोऽस्त्रियाम् ॥ १६ ॥

क्षीर० — ईषद्विकसिता कलिका । कुटति कुट्मलः । मुञ्चति कलिकात्वं मुकुलः । भुग्राद्यास्तु अवान्तरभेदं मन्यन्ते ।

"मुकुलाख्या तु कलिका कुट्मलं जालकं तथा ।
क्षारकं कोरकं चेति" ॥

टीका० — कुट्मलद्वयं **विकासोन्मुखकलिकायाम्** । 'कुट कौटिल्ये' । कुटिकुषिभ्यां क्मलच्' (उ० ४. १८८) । कुट्मलम् । वररुचिप्राकृतलक्षणे अद् मुकुटादिषु' इत्यत्र सूत्रे आदेरुकारस्याकारो विहितः । अतो द्विरुकारो मुकुलः ॥

स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।

क्षीर० — सुष्ठु मन्यन्ते सुमनसः । रूपाद् बहुत्वम् । पुष्प्यति पुष्पम् । प्रसूयते प्रसूनम् । कुस्यति कुसुमम् ॥

टीका० — सुमनश्चतुष्कं **पुष्पे** । सुप्रीतं मन एष्विति सुमनसः । प्रादिसमासः ।

"बहवश्च समाः सिकता वर्षाः सुमनसो जलौकसः"

इति वामनः । 'पुष्पं सुमनाः कुसुममि'ति नाममाला । 'वेश्या श्मशानसुमना इव वर्जनीये'ति शूद्रकोऽपि । द्वयमेव दृश्यते । बहुभिरादृतत्वाद् बहुवचनस्यात्र स्त्रिय इत्युक्तम् । यत्तु 'अप्रत्याख्येये दधिसुमनसी' इति मनोर्नपुंसकप्रयोगः, तच्छान्दसत्वाद् युक्तम् । अत एव 'दधति सुमनसो वनानि बह्वीरि'ति माघप्रयोगः । 'पुष्प विकसने' । पचाद्यच् । पुष्पम् । 'षूङ् प्राणिप्रसवे' । दिवादिः । 'स्वादय ओदित' इत्योदित्त्वान्निष्ठानत्वे प्रसूनम् । कुसेः सौत्रात् 'कुसेरुम्भोमेदेताः' (उ० ४. १०८) इत्यनेन उमप्रत्ययः । कुसुमम् । 'सकुसुमकेसरबाणम्' (स० १३. श्लो० ३०) इति भट्टिभाषासमावेशः ॥

---

१. 'त्येद' क. च. पाठः. २. 'त्वे निष्ठा' घ. ङ. छ. पाठः.

मकरन्दः पुष्परसः

क्षीर०— मध्वाख्यः । मङ्क्ष्यते मण्ड्यतेऽनेन पुष्पं मकरन्दः ॥

टीका०— मकरन्दद्वयं पुष्पमधुनि ॥

परागः सुमनोरजः ॥ १७ ॥

क्षीर०— परागच्छति परागः । पुष्पधूलिः ॥

टीका०— परागद्वयं पुष्परजसि । परागच्छत्युड्डीयत इति परागः । पृषोदरादिः ॥

द्विहीनं प्रसवे सर्वं

क्षीर०— वक्ष्यमाणं बदर्यश्वत्थादिवृक्षलतौषधिजातीयं स्त्रीपुंसादिलिङ्गमपि प्रसूयमाने पुष्पे मूले फले च वर्तमानं द्वाभ्यां स्त्रीपुंसाभ्यां हीनं नपुंसकलिङ्गं ज्ञेयमित्यर्थः । 'अवयवे च प्राण्योषधिवृक्षेभ्यः' (४. ३. १३५) इति विकारावयवयोरुत्पन्नस्य प्रत्ययस्य लुप्करणे 'पुष्पफलमूलेषु बहुलम्' (वा० ४. ३. १६६) इति लुप् । क्वचिद् 'अनुदात्तादेश्च' (४. ३. १४०) इत्यञो लुप् । कदम्बस्य विकारः कदम्बं पुष्पम् । अशोकं करवीरम् । बदर्याः फलं बदरम् । तक्कोलम् । नालिकेरम् आम्रं फलम् । आमलकमिति तु वृद्धलक्षणस्य मयटः 'फले लुक्' (४. ३. १६३) । सूरणस्यावयवः सूरणं कन्दः । 'लुपि युक्तवद्व्यक्तिवचने' (१. २. ५१) इति स्त्रीपुंसौ प्राप्तौ ॥

टीका०— प्रसवः फलं पुष्पं च । तत्र वर्तमानं यच्छब्दरूपं, तद् द्विहीनं स्त्रीपुं(स)हीनं नपुंसकमिति शेषः । तद् यथा—आम्रस्य फलमाम्रम् । आम्रस्य पुष्पमाम्रम् । तयोर्विकारावयवयोरर्थयोः 'नित्यं वृद्धशरादिभ्यः' (४. ३. १४४) इति मयट् । तस्य फले विकारावयवविशेषे विवक्षिते 'फले लुक्' (४. ३. १६३) इति लुक् । कुवल्याः फलं कुवलम् । लवल्याः फलं लवलम् । अत्र च ङीषन्तत्वादनुदात्तत्वे 'अनुदात्तादेश्च' (४. ३. १४०) इति विहितस्याञः पूर्ववल्लुक् ॥

हरीतक्यादयः स्त्रियाम्।

क्षीर०— हरीतक्याः फलं हरीतकी। 'अवयवे च प्राणि—' (४. ३. १३५) इत्यणः 'अनुदात्तादेश्च' (४. ३. १४०) इत्यञश्च 'हरीतक्यादिभ्यश्च' (४. ३. १६७) इति लुप्। 'लुपि युक्तवद् व्यक्तिवचने' (१. २. ५१) इत्यत्र हरीतक्यादिषु व्यक्तेर्युक्तवद्भावात् स्त्रीत्वम्। आदिशब्दात् कोशातकीद्राक्षाबदर्यादिः॥

टीका०— हरीतक्यादयः स्त्रियामिति पूर्वस्यापवादः। हरीतक्यादयो वृक्षवाचिनोऽभेदोपचारात् फलवृत्ताः स्त्रियां स्युः। तद् यथा— हरीतक्याः फलं हरीतकी। आदिना विभीतक्यादयः। फले विहितस्याणः 'हरीतक्यादिभ्यश्च' (४. ३. १६७) इति लुपि सति 'लुपि युक्तवद् व्यक्तिवचने' (१. २. ५१) इति प्रकृतिवद्भावात् स्त्रीत्वमेव॥

आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फलम्॥ १८॥

बार्हतं च

क्षीर०— अश्वत्थादिषु 'प्लक्षादिभ्योऽण्' (४. ३. १६४) इति पुनर्विधानात् फले लुग् नास्ति। वेणोः 'बिल्वादिभ्योऽण्' (४ ३. १३६)। नैयग्रोधमिति। 'न्यग्रोधस्य च केवलस्य' (७. ३. ५) इत्यैजागमः। बृहत्याः फलं बार्हतम्। फलति फलम्। 'फल निष्पत्तौ'॥

टीका०— अश्वत्थादीनां फले वाच्ये आश्वत्थषट्कम्। तद् यथा— अश्वत्थस्य फलम् आश्वत्थम्। 'प्लक्षादिभ्योऽण्' (४. ३. १६४) इत्यण्। वैणवमिति। 'बिल्वादिभ्योऽण्' (४. ३. १३) इत्यण्। आश्वत्थवत् प्लाक्षम्। नैयग्रोधमिति। 'न्यग्रोधस्य च केवलस्य' (७. ३. ५) इत्यैजागमः परं विशेषः। बृहत्याः फलं बार्हतम्। पूर्ववत्। 'तद्धितेष्वचामादेः' (७. २. ११७) इति सर्वत्र वृद्धिः। तत्र च 'अनुदात्तादेश्च' (४. ३. १४०) इत्याञि प्राप्ते अण्विधाना-

---

१. 'तत्र' घ. ङ. छ. पाठः.

देव लुग् न भवति। बार्हतं चेत्यनेन चकारस्यानुक्तसमुच्चयार्थत्वात् तेन शैग्रवं बैल्वमित्याद्यपि द्रष्टव्यम् ॥

फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम्।

क्षीर०— **'जम्ब्वा वा' (४. ३. १६५) इत्यणि जाम्बवम्। पक्षे अञ्। तस्य 'फले लुक्' (४. ३. १६३)। जम्बु। 'लुप् च' (४. ३. १६६) इति जम्बूः। लुपि युक्तवत्त्वात् स्त्रीत्वम्॥**

टीका०— जम्बूत्रिकं **जम्बूफले**। जम्बूरिति। 'ओरञ्' (४. ३. १३९)। तस्य 'लुप् च' (४. ३. १६६) इति लुप्। 'लुपि युक्तवद् व्यक्तिवचने' (१. २. ५१) इति प्रकृतिगतमेव स्त्रीत्वम्। जम्ब्विति। 'जम्ब्वा वा' (४. ३. १६५) इति लुक्। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१. २. ४७) इति ह्रस्वत्वम्। एवं फले जम्बुशब्दो ह्रस्वो नपुंसकं च। यत्तु किराते 'परिणतजम्बुफलोपभोग-हृष्टा' (स० १०. श्लो० २२) इति वृक्षे ह्रस्वप्रयोगः, ततः 'इको ह्रस्वोऽङ्यो गालवस्य' (६. ३. ६१) इति औत्तरपदिकं ह्रस्वत्वम्। जम्बुरपि प्रकृत्यन्तरमस्तीति हडुचन्द्रः। 'जम्ब्वा वा' इत्यणि जाम्बवम्॥

पुष्पे जातिप्रभृतयः स्वलिङ्गाः

क्षीर०— **पुष्पे विकारे जातेर्लतायाः पुष्पं, जातिः। मालती शेफालिका यूथिका। नान्ये, चम्पकं वकुलं शिरीषम्। 'अनुदात्तादेश्च' (४. ३. १४०) इत्यञश्च 'पुष्पफलमूलेषु बहुलम्' (वा० ४. ३. १६६) इति एषां पुष्प एव लुप्, व्रीहीणां फल एव, विदार्यादीनां मूल एव। तदाह —**

टीका०— पुष्पे वर्तमाना जातिप्रभृतयोऽभेदोपचारात् स्वलिङ्गाः। तद् यथा—जातेः पुष्पं जाती, मल्लीत्यादि। 'पुष्पमूलेषु बहुलम्' (वा०४. ३. १६६) इत्यञो लुपि सति युक्तवद्भावात् स्वलिङ्गता॥

व्रीहयः फले ॥ १९ ॥

क्षीर०— स्वलिङ्गा इत्येव। व्रीणाति व्रीहिः। 'व्री वरणे'। यवानां

फलानि यवाः। माषाः। मुद्गाः। तिलाः। व्रीहिमुद्गाभ्यां मुद्गादि(?)भ्योऽण्। अन्यत्र 'अवयवे च प्राण्योषधि—' (४. ३. १३५) इत्यण्। तस्य 'फलपाकशुषाम्—' (वा० ४. ३. १६६) इति लुप्। युक्तवद्भावः॥

टीका०— व्रीहयोऽपि फले स्वलिङ्गाः। तद् यथा—माषस्य फलं माषः। मुद्गस्य फलं मुद्गः। 'लुप्प्रकरणे फलपाकशुषामुपसङ्ख्यानम्' (वा० ४. ३. १६६) इति लुपि युक्तवद्भावात् पूर्वप्रकृतिगतं लिङ्गम्॥

विदार्याद्यास्तु मूलेऽपि

क्षीर०—स्वलिङ्गा इत्येव। 'मूल प्रतिष्ठायाम्'। विदार्या मूलं विदारी। विदार्याम् 'अनुदात्तादेश्च' (४. ३. १४०) इत्यञ्। पुष्पफलमूलेषु बहुलं लुप्। लुपि युक्तवद्भावः। आद्यशब्दाद् गम्भारीबृहत्यंशुमत्याद्याः॥

टीका०— विदार्याद्या मूलपुष्पयोः, अपिशब्दात् फलेऽपि स्वलिङ्गाः। यथा विदार्या मूलादि विदारी। आदिना अंशुमत्फलग्रहणम्। 'अनुदात्तादेश्च' (४. ३. १४०) इत्यञ्। 'पुष्पमूलेषु बहुलम्' (वा० ४. ३. १६६) इति लुप्॥

पुष्पे क्लीबेऽपि पाटला।

क्षीर०—पाटलायाः पुष्पं पाटलम्। अत्रो बाहुलकाद् लुबभावः। यच्छाश्वतः—

"पाटलं कुसुमे वर्णेऽप्याशुव्रीहिश्च पाटलः"

अपिशब्दात् पाटला स्यात्। बिल्वाद्यणा पाटलीत्यपि। पुष्प इति किम्। पाटलो नाम व्रीहिः॥

टीका०— पाटला पुष्पे नपुंसकम्। रूपभेदात् स्त्रियां च। पाटलायाः पुष्पं पाटलम्। 'पुष्पमूलेषु बहुलम्' (वा० ४. ३. १६६) इति लुब् न भवति। पाटला पुष्पे। विदारीवदञ्लुपौ॥

बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः॥ २०॥

अश्वत्थे

क्षीर०—बोधिद्रुमो बोधिसत्त्वाख्यः, सर्वोपकारित्वात्। तनुवृन्तत्वाद् गुरुपर्णत्वात् स्वल्पेऽपि वाते चलदलः। पिप्पलानि देश्यां पत्राणि। तानि सन्त्यस्येति अर्शआदित्वादच्। अपिप्पलवत इति नैरुक्ताः। एवमाद्याः प्राकृता अपीति धन्वन्तरिः। यदाह—

"प्रायो जनाः सन्ति वनेचराद्या गोपादयः प्राकृतनामतज्ज्ञाः।
प्रयोजनार्थो वचनप्रवृत्तिर्यतस्ततः प्राकृतमित्यदोषः॥"

किञ्च,

"संस्कारविपाकेभ्यो मूलात् पुष्पात् फलाद् दलात्।
आकारादेशकालादेर्नोपध्यर्थमुन्नयेत्॥"

अश्वेषु तिष्ठति अश्वत्थः, अश्वाश्रयत्वात्। पृषोदरादित्वात् सस्य तत्वम्। धन्वन्तरिराह—

"पिप्पलः केशवावासश्चलपत्रः पवित्रकः।
मङ्गल्यः श्यामलोऽश्वत्थो बोधिसत्त्वो गजाशनः॥"

केशवावासमङ्गल्यादयोऽत्राल्पप्रयोगत्वान्नोक्ताः। एवमुत्तरत्रापि॥

टीका०—बोधिद्रुमपञ्चकमश्वत्थतरौ। बोधिनामा द्रुमो बोधिद्रुमः। तथा च—'पिप्पलो बोधिरश्वत्थ' इति रभसकोशः। नित्यं चञ्चलपत्रत्वाच्चलदलः। कुञ्जरगणमशनं भक्ष्यं कुञ्जराशनः। अश्वोपपदात् तिष्ठतेः 'सुपि स्थः' (३. २. ४) इति कः। पृषोदरादित्वात् सकारे तकारः। अश्वत्थः॥

अथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः।
तस्मिन् दधिफलः पुष्पफलदन्तशठावपि॥ २१॥

---

१. 'दः कारणात् पत्राणि सन्त्यस्येति। पिप्पलन्यस्य पिप्पलः। अर्शआदित्वादच्। पिप्पलानि पत्राणि। अपि' ख. पाठः। २. 'कारेभ्यो' क. ग. पाठः। ३. 'द्रुमात्', ४. 'पात्राः। ए' ग. घ. ङ. पाठः।

क्षीर०— कपिषु तिष्ठतीति कपित्थः, कपिप्रियत्वात्। दध्नि तिष्ठतीति दधित्थः, दधिफलत्वात्। ग्राही, विष्टम्भकारित्वात्। मन्मथो मदनाख्यः पर्यायेणोक्तः। दन्तेषु शठोऽम्लत्वात्। आह च —

"कपित्थोऽथ दधित्थस्तु ग्राही *फलसुगन्धिकः।
$अक्षिस्पन्दो दधिफलश्चिरपाकी कपिप्रियः॥"

व्यर्थे पुष्पफलः, कूष्माण्डः कपित्थश्च। तथा दन्तशठः, जम्बीरः कपित्थश्च। व्यर्थे मदनः, पिण्डीतकः कपित्थः सक्तूरश्च॥

टीका०—कपित्थसप्तकं कपित्थे। अश्वत्थवत् कपित्थदधित्थौ। ग्राहीति। ग्रहेः ग्रह्यादित्वाद् णिनिः[1]। मदने मन्मथ इत्युक्तम्। दधिस्वादुफलो दधिफलः। पुष्पात् फलमस्येति पुष्पफलः। अम्लत्वाद् दन्तस्य शठोऽपकारको दन्तशठः॥

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः।

क्षीर०— उल्लङ्घिताम्बर उदुम्बरः। उत्वं लक्ष्यात्। मशकगर्भाणि फलान्यस्येति जन्तुफलः कृमिफलः पर्यायेणोक्तः। आह च —

"क्षीरवृक्षे हेमदुग्ध उदुम्बरसदाफलौ।
†अपुष्पः फलसम्बन्धो यज्ञाङ्गः श्वेतवल्कलः॥"

आहेन्दुः —

"उदुम्बरस्तु यज्ञाङ्गस्तुचमुः (?) ‡श्वेतवल्कलः।
हेमदुग्धः कृमिफलः क्षीरवृक्षः स काञ्चनः॥"

टीका०— उदुम्बरचतुष्कमुदुम्बरे। उदुम्बरो[2] ह्रस्वादिः तवर्गतृतीयवांश्च। जन्तुयुक्तं फलमस्येति जन्तुफलः। हेमवर्णक्षीरत्वाद् हेमदुग्धकः॥

---

१. 'निः। दधि' क. ख. च. ज. पाठः. २. 'रशब्दो ह्' घ. ङ. छ. पाठः.

---

* 'गन्धफलश्च सः।', $ 'अक्षसस्यो', † 'अपुष्पफल', ‡ 'शीत' धन्वन्तरिः।

कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥ २२ ॥

क्षीर० — कोर्भूमेर्विदारणात् कोविदारः । अत एव कुद्दालः । चमरोऽस्यास्ति चमरिकः । आह च—

"कोविदारो[$]ऽथ कुद्दालः[1] कुदालः[2] कुण्डली कुली ।
ताम्रपुष्पश्चामरिको[3] महायमलपत्रकः ॥"

पर्यायेणोक्तः ॥

टीका०— कोविदारचतुष्कं **रक्तकाञ्चने** ।

"कोविदारोऽप्सरः शम्यः कोविदारश्च काञ्चनः ।
पूर्वः सितोऽपरो रक्तो मुक्तपत्रावुभावपि ॥"

इति रत्नकोशः । हरिवंशे—

"कोऽप्ययं दारुरित्याहुरजानन्तो यतो जनाः ।
कोविदारस्त्विति ख्यातस्ततः स तरुपुङ्गवः ॥"

इति । कोविदारः पृषोदरादिः । कुमुद्दालयतीति कुद्दालः । 'दल विदारणे' । अच् । शकन्ध्वादिः । यमलपत्रत्वाद् युगपत्रकः । 'यावादिभ्यः कन्' (५.४.२९) ॥

सप्तपर्णे विशालत्वक् शारदो विषमच्छदः ।

क्षीर० — शरदि पुष्प्यति शारदः । शारदीत्येके । आह च—

"सप्तपर्णः *शक्तिपर्णस्त्रिपर्णश्च सुपर्णकः ।
सप्तच्छदो ‡गुच्छपुष्पस्तथा शाल्मलिपत्रकः ॥"

आहुश्च—

---

१. 'वाह कु', २. 'न्दा', ३. 'न्दारः कु' ख. पाठः. ४. 'र' ग. घ. ङ. पाठः.

$ 'रः काञ्चनारः कुद्दालः कुण्ड', * 'शुक्तिपर्णश्छत्रपर्णः सु', ‡ 'गूढपुष्प' इति धन्वन्तरिः ।

"सप्तपर्णो बृहत्त्वक्कः सप्ताह्वो गुच्छपुष्पकः।
सप्तच्छदः सप्तपत्रोऽयुग्मपत्रो बहुच्छदः॥"

टीका० — सप्तपर्णचतुष्कं चातिपत्र इति ख्याते। प्रतिपर्व सप्त पर्णान्यस्येति सप्तपर्णः। विशाला महती त्वगस्येति विशालत्वक्। साहचर्यादस्य पुंस्त्वम्। शरदि पुष्प्यतीति शारदी। 'कालात् साधुपुष्प्यत्पच्यमानेषु' (४. ३. ४३) इत्यण्। विषमपत्रत्वाद् विषमच्छदः॥

आरग्वधो राजवृक्षशम्याकचतुरङ्गुलाः॥ २३॥

आरेवतव्याधिघातकृतमालसुवर्णकाः।

क्षीर० — आरञ्जयन्त्यारजो मालाः, तेषां वधोऽत्रारग्वधः। राजा चासौ वृक्षः, रोगराजं वृश्चति वा राजवृक्षः। शमीं शिम्बीम् अकति शम्याकः। चतुरङ्गुलपर्वा। अरेवती रोगदेवता। अरेवत्यां भव आरेवतः। आरेवते ज्वरोऽनेन वा आरेवतः। 'रेवृ प्लवगतौ'। कृता माला अस्य कृतमालः। उद्ग्रथित इव सकर्णिकत्वात्। आह च —

"कर्णिकारो राजवृक्षः प्रग्रहः कृतमालकः।
आरोग्यशिम्बी शम्याको व्याधिघातोऽपघातकः॥

आरग्वधो दीर्घफलो व्याघातश्चतुरङ्गुलः।
आरेवतस्तथा कर्णी कर्णीवान् स च रैवतः॥"

टीका० — आरग्वधाष्टकं सोनालु इति ख्याते। आरग्वधो दीर्घादिः।

"आरग्वधोऽथ सम्पाकः कृतमालस्तथाग्वधः"

---

१. 'जातिपर्ण इ' च., 'छातिपत इ' ज. पाठः. २. 'व' घ. ङ. छ. पाठः. ३. 'इहित' क., 'गुम्फित' ग. घ. ङ. पाठः. ४. 'ग्यं बीजशम्या' क. च. पाठः. ५. 'सेनलु' घ. ङ. छ. पाठः ६. 'वु' झ., 'लुलं इ' च. पाठः.

---

* 'तो व्यथान्तकः॥' इति धन्वन्तरिः।

इति रत्नमालायां व्यक्षरोऽपि । सम्यक् पाकोऽस्येति सम्पाकः । दन्त्यादिः । शं कल्याणः पाकोऽस्येति तालव्यादिरपीति केचित् । आरेवतः दीर्घादिः । कर्मण्यणि व्याधिघातः । कृता माला पुष्पैरस्येति कृतमाल इति शृङ्गारप्रकाशः । सुवर्ण इति बहुव्रीहिः ॥

स्युर्जम्भीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २४ ॥

क्षीर०— जम्भेर्मोहनार्थस्यैतानि रूपाणि । दन्तशठो (मृदुः श्लथ)त्वात् । आह च—

"जम्भीरो जम्भलो जम्भः प्रोक्तो दन्तशठस्तथा ।
‡जम्बीरो वक्रशोधी च रोचनो दन्तहर्षणः ॥"

टीका०— जम्बीरपञ्चकं जम्भीरे । कपित्थे दन्तशठ उक्तः । 'जभि जृभि गात्रविनामे' । अच् । जम्भः । 'गम्भीरादय —' (उ० ४. ३९) इतीरन् । जम्भीरः । गम्भीरे इति कुत्रापि पाठः । बाहुलक अलः । जम्भलः ॥

वरुणे वरणः सेतुस्तिक्तशाकः कुमारकः ।

क्षीर०— वृणोति वरुणो वरणश्च, पर्णिकावृक्षत्वात् । अत एव पर्यन्ते रक्षाहेतुत्वात् सेतुः । तिक्तरसशाकश्च, शाकमध्ये पाठात् । कुमारको नित्यतरुणः । आह च—

"*वरणः श्वेतपुष्पस्तु तिक्तशाकः कुमारकः ।
†सेतुद्रुमः सालवृक्षस्तमालो मारुतापहः ॥"

टीका०— वरुणपञ्चकं वरुणे । वरुणवरणसेतवस्त्रयो दिक्पतिप्राकारालिवृक्षाः । कार्त्तिकेये कुमार उक्तः । ततः कन् । कुमारकः ॥

---

१. 'कु', २. 'रादय ईरन् इ' च. पाठः. ३. 'क' ख. पाठः. ४. 'त् । प' क. पाठः. ५. 'धु' ख. पाठः.

---

‡ 'गम्भीरो', * 'वरुणः', † 'श्वेतद्रुमो गन्धवृक्ष' इति धन्वन्तरिः ।

पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ २५ ॥

क्षीर०— पूजितः पुमान् पुन्नागः स इव प्राधान्यात् । प्रशस्ताः केसराः सन्त्यस्य । आह च—

"‡तुङ्गः पुष्पकसंज्ञः स्यात् पुन्नामा रक्तकेसरः ।
पुन्नागः पुरुषाह्वश्च केषाञ्चित् पद्मकेसरः ॥"

टीका०— पुन्नागपञ्चकं **पुन्नागे** । 'पुरः कुषन्' (उ० ४. ७५) । पुरुषः । किञ्जल्के केसर उक्तः ॥

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।

क्षीर०—पारि, सम्प्राप्तिः पारं, भद्रमस्य पारिभद्रः । निम्बो नियमनात् । आह च—

"निम्बो नियमनो नेता पिचुमन्द*स्तु तिक्तकः ।
†निम्बोऽथ सर्वतोभद्रः प्रभद्रः पारिभद्रकः ॥"

व्यर्थे पारिभद्रः, कोलिः पारिजातो देवदारु च ॥

टीका०— पारिभद्रचतुष्कं **पारिविद** इति ख्याते । तद्विशेषत्वाद् मन्दारेऽपि ।

"अर्कपर्णेऽपि मन्दारो देवद्रौ पारिभद्रकः"

इति रभसः ॥

तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥
वञ्जुलश्चित्रकृच्च

क्षीर०— अतिक्रान्तो निशास्तिनिशः, चिरकालिकत्वात् । स्य-

---

‡ 'पुन्नागः पुरुषस्तुङ्गः पुन्नामा पाटलः पुमान् ।
रक्तपुष्पो रक्तरेणुररुणोऽयं नवाह्वयः ॥',
* 'न्दः सुति', † 'अरिष्टः स' इति धन्वन्तरिः ।

न्दनं स्पन्दनं पेठुः । रथोपयोगित्वाद् रथ(द्रुः) । चक्रान्ते नमति नेमिः । अतिमुक्तो विस्तीर्णत्वात् । वन्यतेऽर्थ्यते वञ्जुलः । चित्रकृद् लघुत्वेऽपि दार्ढ्यदैर्घ्याभ्यामाश्चर्यकारी । आहुश्च—

‡"तिनिशो नेमिश्चित्रकृत् स्यन्दनो रथसाधकः ।
तपारण्यो रथद्रुश्चाप्यतिमुक्तः"

इति । त्र्यर्थे वञ्जुलः, वेतसः स्पर्शनोऽशोकश्चेति ॥

टीका०— तिनिशसप्तकं तिनिशे । अयं म(धु ? शु)राया प्रसिद्धः । तिनिशस्तालव्यान्तः । 'स्यन्दू प्रस्रवणे' । युच् । स्यन्दनः । 'दृलोपे पूर्वस्य दीर्घोऽणः' (६. ३. १११) इति दीर्घत्वे नेमी । नेमिरिति तु प्रकृतिः ॥

"पुल्लिङ्गस्तिनिशे नेमिश्चक्रान्ते तु स्त्रियां मतः"

इति रभसः । ङीषन्तोऽपीति केचित् । रथोपयोगित्वाद् रथद्रुः । चित्रकृत् तान्तः ॥

अथ द्वौ पीतनकपीतनौ ।

आम्रातके

क्षीर०— पीतीक्रियतेऽनेन पीतनः । कपींस्तनोति कपीतनः । कपिप्रियत्वात् । आम्रमतत्याम्रातकः । कपिचूतत्वात् । आहुश्च—

"आम्रातकः पीतनकः कपिचूतोऽ*म्रवातकः ।
शृङ्गी †कपीतराख्यश्च नदः कीरः कपिप्रियः ॥"

त्र्यर्थे कपीतनः, आम्रातकः प्लक्षः शिरीषश्चेति । कपीतरशब्दस्य कपीतनोऽपभ्रंश इत्येके ॥

---

१. 'कर्पार', २. 'न्द' ख. पाठः. ३. 'रभाह्यश्च' ख. पाठः. ४. 'रः' ग. घ. ङ. पाठः.

---

‡ "तिबिशः स्यन्दनश्चक्री रथाङ्गः शकटो रथः ।
रथिका भस्मगर्भश्च मेषी जलधरो दश ॥",

* 'ऽम्लवातकः', † 'कपी रसाढ्यश्च तनुक्षीरः कपि' इति धन्वन्तरिः ।

टीका०— पीतनत्रयमम्बाड[1] इति ख्याते।

"आम्रातके शिरीषेऽपि गर्दभाण्डे कपीतनः"

इति रुद्रः॥

मधूके तु गुडपुष्पमधुद्रुमौ॥ २७॥

वानप्रस्थमधुष्ठीलौ

क्षीर०— गुडवद् मधुराणि पुष्पाण्यस्य गुडपुष्पः। मधुप्रधानो द्रुमो मधुद्रुमः। वनप्रस्थे भवो वानप्रस्थः, स्थलजत्वात्। मधु ष्ठीवति मधुष्ठीलः। मधु माधुर्यमष्ठीले गर्भेऽस्येति मध्वष्ठीलो वा। यदाह—

"मधूको मधुवृक्षश्च मधुष्ठीलो मधुस्रुवः[2]।
गुडपुष्पो रोध्रपुष्पो वानप्रस्थोऽथ वामनः॥"

टीका०— मधूकपञ्चकं महआ[3] इति ख्याते। 'मह पूजायाम्'। 'उलूकादयश्च' (उ० ४. ४१) इत्यूकन् धश्चान्तादेशः। गुड इव स्वादु पुष्पमस्येति गुडपुष्पः। मधुनामा द्रुमो मधुद्रुमः। प्रायेण वनप्रस्थे जातो वानप्रस्थः। 'तत्र भवः' (४. ३. ५३) इत्यण्॥

जलजेऽत्र मधूलकः।

टीका०— जलभवे मधूके मधूलकः। क्वचिद् गिरिज इति पाठः।

"गौरशाको मधूलोऽन्यो गिरिजः सोऽन्यपत्रकः"

इति माधवः॥

पीलुर्गुडफलः स्रंसी

---

१. 'म्ब' घ. ङ. छ. पाठः. २. 'मानवः॥' क. ख. ङ. पाठः. ३. 'त्सू' च. पाठः.

---

§ 'स्रवः' इति धन्वन्तरिः।

क्षीर०—पीयते माधुर्यात् पीलुः । पीड्यते वा । स्रंसते स्रंसयते वा स्रंसी । आह च—

"पीलुः †शीतफलः स्रंसी धारी गुडफलोऽपि च" ॥

टीका०—पीलुत्रयं कोङ्कणदेशप्रसिद्धे पीलौ । 'पील प्रतिष्टम्भे' । 'मृगय्वादयश्च' (उ० १. ३९) इति कुः । पीलुः । गुडपुष्पवद् गुडफलः । 'स्रन्सु ध्वन्सु अधःपतने' । द्विदन्त्यः । णिच् । आवश्यके णिनिः । स्रंसी ॥

तस्मिंस्तु गिरिसम्भवे ॥ २८ ॥

अक्षोटकन्दरालौ द्वौ

क्षीर०—अक्ष्णोत्यक्षोटः । कन्दरास्यास्ति कन्दरावेष्टनात् कन्दरालः । कर्पराल इत्येके । आह च—

"अक्षोटः पार्वतीयश्च फलस्नेहो गु‡हाशयः ।
कीरेष्टः कन्दरालश्च स्वादुमज्जा *मृदुच्छदः ॥"

टीका०—अक्षोटद्वयं पर्वतजे पीलौ ॥

अङ्कोठे तु निकोचकः ।

क्षीर०—अङ्क्यते कीलकैर्लक्ष्यते अङ्कोठः । अङ्कोलोऽपि । प्राकृते अङ्कोल्लः । निकुच्यतेऽस्मात् कण्टकित्वाद् निकोचकः । आह च—

"अङ्कोठोऽङ्कोलको रेची निर्दिष्टो दीर्घकीलकः ।
पीतसारस्त्वाम्रफलो गन्धपुष्पो निकोचकः ॥"

---

१. 'आ' घ. च. ज. ञ. पाठः. २. 'ड' क. ख. ग. पाठः. ३. 'स्ता' ज. पाठः.

---

† 'शीतः सहस्रांशी धानी गु', ‡ 'डा', * 'पृथुच्छ' इति धन्वन्तरिः ।

टीका० — अङ्कोठद्वयं मदनकण्टकसदृशैः कण्टकैर्युक्ते [2]अङ्कोड इति ख्याते ।

"पीतसारस्[3]ताम्रफलो गन्धपुष्पोऽलिकोचकः"

इति तन्त्रान्तरम् ॥

पलाशे किंशुकः पर्णो वातपोथः

क्षीर० — प्रशस्तानि पलाशानि सन्त्यस्य पलाशः । पलं मांसमश्नुते वा । रक्तपुष्पत्वात् किञ्चित् शुकः नीलः किंशुकः । वातं पोथयति वातपोथः । चर्मात्र । तथा च —

"*पलाशः किंशुकः पर्णो याज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः ॥"

टीका० — पलाशचतुष्कं किंशुके ।

"पत्रे पलाशं ना रक्षःशटी हरितकिंशुकः"

इति तालव्ये रुद्रः । 'पृण प्रीणने' । अच् । पर्णः । 'पुथ हिंसायाम्' । वातस्य पोथो वातपोथः ॥

अथ वेतसे ॥ २९ ॥

रथाभ्रपुष्पविदुलशीतवानीरवञ्चुलाः ।

क्षीर० — वयत्यम्भोऽनुवर्तते वितस्यते वा वेतसः । रमन्तेऽस्मिन् रथः । अभ्राणीव पुष्पाण्यस्याभ्रपुष्पः । विदोल्यते नदीवेगेन विदुलः ।

---

१. 'ढ' क. झ., 'ल' ज. पाठः. २. 'आङ्कोड' ज., 'आक्षोड' च., 'आङ्कोढ' क. झ. पाठः. ३. 'स्त्वा' क. पाठः.

---

* "किंशुको वातपोथश्च रक्तपुष्पोऽथ याज्ञिकः ।
त्रिपर्णो रक्तपुष्पश्च पूतद्रुर्ब्रह्मवृक्षकः ॥
क्षारश्रेष्ठः पलाशश्च बीजस्नेहः समिद्वरः ।"

इति धन्वन्तरिः ।

शीतो वीर्येण, लेपाद् दाहशमनात्। वनति भजत्यम्बु वानीरः। वञ्जुलश्च ॥

टीका०—वेतससप्तकं वेतसवृक्षे। 'वेञस्तुट् च' (उ० ३. ११८) इत्यसच् तुडागमश्च। वेतसः। 'रसु क्रीडायाम्'। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २. २)। रथः। 'र(थ?थौ) स्यन्दनवानीरौ' इत्यजयः। अभ्रसमये पुष्पमस्येत्यभ्रपुष्पः। विदेर्बाहुलकादुलच् गुणाभावश्च। विदुलः। शीतः पूर्वमुक्तः।

"शीतं तुषारवानीरबहुवारद्रुमेषु च"

इत्यजयः ॥

द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतसे ॥ ३० ॥

क्षीर०—परिविध्यतेऽम्भसा परिव्याधः। नद्यां भवा नादेयी। नित्यं स्त्री। वेतसी तु द्वयोः। व्यर्थेष्विन्दुः नादेयी, तर्कारी जलवेतसी भूमिजम्बूश्च। चन्द्राद्यास्तु विभागेनाहुः—

"वेतसो विदुलो नस्यो वञ्जुलो दीर्घपत्रकः।
नादेयी गन्धपत्रश्च जलौकाः संवृतस्तथा ॥
नदीकूलप्रियस्त्वन्यः सुशीतो घनपुष्पकः।
नालजातस्तोयकामो विदुलो जलवेतसः ॥"

निचुलो वेतसादन्यो वक्ष्यते ॥

टीका०—परिव्याधचतुष्कं जलवेतसे। 'व्यध ताडने'। 'हलश्च' (३. ३. १२१) इति घञ्। परिव्याधः। नद्यां जाता नादेयी। 'नद्यादिभ्यो ढक्' (४. २. ९७)। एयादेशः। 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप् ॥

सौभञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः।

---

१. 'ञ्जु' क. पाठः. २. 'वयस' क. ख. ग., 'वायस' घ. ङ. छ. पाठः. ३ 'सौ' ख. पाठः. ४. 'स्यो' ग. पाठः. ५. 'ञ्जु' क. पाठः. ६. 'दीर्घप' ख. पाठः.

क्षीर०— सुष्ठु भनक्ति मुखं सौभञ्जनः। शिनोति तैक्ष्ण्यात् शिग्रुः। न क्षीवन्त्यनेनावृष्यत्वादक्षीवः। मुञ्चति गन्धं मोचकः। आहुश्च—

"शिग्रुः स्याच्छ्वेतमरिचं मुखभञ्जोऽतितीक्ष्णकः।
शिग्रुर्हरितशाकोऽन्यो मतो मूलकपल्लवः॥

घनच्छदस्तीक्ष्णगन्धो मरुद्भीदं शरक्षमः(?)।
तृतीयो मधुशिग्रुः स्यात्"

व्यर्थे मोचकः, कदली शल्मलिः सौभञ्जनश्च। चतुर्थेष्विन्दुः अक्षीबः, सलवणं नीली महानिः सौभञ्जनश्च॥

टीका०— शोभाञ्जनपञ्चकं सोहण इति ख्याते। शोभां व्यनक्तीति शोभाञ्जनः। 'बहुलमन्यत्रापि' (उ० २. २५) इति युच्। सौभाञ्जनो वृद्धदन्त्यादिरित्यन्यः। शाम्यतेर्जञ्वादित्वाद् रुप्रत्यये उपधाया इत्त्वे अन्त्यस्य च गत्वे शिग्रुः। तीक्ष्णो गन्धोऽस्येति तीक्ष्णगन्धः। ततः 'शेषाद् विभाषा' (५. ४. १५४) इति कप्। आक्षीब इति। आङ्पूर्वात् 'क्षीवृ मदे' इत्यतो णिच्। पचाद्यच्। ह्रस्वादिरप्ययमिति केचित्। काङ्क्षीब इति केचित्। मुचेरपि मोचः। ततः स्वार्थे कः॥

रक्तोऽसौ मधुशिग्रुः स्याद्

क्षीर०— मधुप्रधानः शिग्रुः॥

टीका०— शोभाञ्जनो रक्तपुष्पो मधुशिग्रुः॥

अरिष्टः फेनिलः समौ॥ ३१॥

क्षीर०— न रिष्यतेऽनेनारिष्टः। रक्षाहेतुः। फेनाः सन्त्यस्य फेनिलः। चन्द्रोऽत्र—

---

१. 'हि' ख. पाठः. २. 'भी' क. ग. घ. ङ. पाठः. ३. 'क्षी' घ. ङ. च. छ. ज. पाठः. ४. 'ल्य' ग. ङ. पाठः.

"अरिष्टकस्तु मङ्गल्यः कृष्णबीजोऽर्थसाधनः ।
रक्षाबीजः शीतफेनः फेनिलो गर्भपातनः ॥"

टीका०— अरिष्टद्वयं हरिठ इति ख्याते । फेनयोगात् फेनिलः । 'फेनादिलच्च' (५. २. ९९) इतीलच् ॥

बिल्वे शाण्डिल्यशैलूषौ माठुरश्रीफलावपि ।

क्षीर०— विलति भिनत्ति बिल्वः । शण्डिलगोत्रजः शिलूषज इत्यागमाद्यत्रणौ । शाण्डिल्य इव ब्राह्मणमान्यत्वात् । शैलूष इव नाना रूपपरिवर्तनाद् वा । मलते मलान् माठुरः । मां लक्ष्मीं लाति वा । श्रीप्रदानि फलान्यस्य श्रीफलः । आह च—

"बिल्वः शलाटुः शाण्डिल्यो हृद्यगन्धः सदाफलः ।
शैलूषः श्रीफलः श्रेयाद्दः कङ्कटः पूतिमारुतः ॥"

टीका०— बिल्वपञ्चकं बिल्वे । 'बिल भेदने' । 'अशूप्रुषिलटिकणिखटिविशिभ्यः कन्' (उ० १. १५७) बाहुलकः । बिल्वः ।

"मुनिप्रभेदे माठरे शाण्डिल्यः पादपान्तरे"

इति तालव्यादौ रभसः । 'नटे बिल्वे च शैलूष' इति तालव्यादिमूर्धन्यान्ते रभसः । 'मल मल्ल धारणे' । णिच् । 'खर्जिपिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९१) । माठुरः । श्रीप्रियं फलमस्येति श्रीफलः ॥

प्लक्षो जटी पर्कटी स्याद्

क्षीर०— प्लँ(क्षो ? क्षर)त्यधो गच्छति मूलैः । जटाः सन्त्यस्य जटी । अत एव पृच्यते पर्कटी । नान्तोऽयम् । इदन्तोऽप्यस्ति । यच्छाश्वतः —

"विज्ञेयः पर्कटिः प्लाक्षः प्लक्षः पिप्पलपादपः" ॥

---

१. 'शि' ख. पाठः. २. 'त्व' ग. घ. ङ. पाठः. ३. 'ब च ना' ग. ङ. पाठः. ४. 'प्ल' ग. घ. ङ. पाठः.

टीका०— प्लक्षत्रयं पर्कट्याम्। प्रक्षरति प्लक्षः। 'अन्येष्वपि —' (३. २. १०१) इति डः। रलयोरेकत्वस्मरणम्। 'गर्दभा(ण्ड ? ण्डे) जटीप्लक्षौ' इति रुद्रकोशात् जटिरीदन्तापि। 'पर्कट्यां प्लक्षजटिलौ' इति गङ्गदेवे लान्तः॥

न्यग्रोधो बहुपाद् वटः॥ ३२॥

क्षीर०— न्यक् तिर्यग् रुणद्धि मार्गं मूलैः, न्यग् रोहति वा **न्यग्रोधः**। न्यङ्कादित्वाद् धत्वम्। बहवः पादा मूलान्यस्य **बहुपात्**। **'सङ्ख्यासुपूर्वस्य'** (५. ४. १४०) इत्यन्तलोपः। वटति वेष्टयति मूलै-**र्वटः**। आह च—

"वटो रक्तफलः शृङ्गी न्यग्रोधः कन्दजो ध्रुवः।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः॥"

टीका०— न्यग्रोधत्रयं वटे। न्यग् रोहतीति न्यग्रोधः। पचादिः। न्यङ्कादित्वाद् धत्वम्। बहवः पादा अवरोहा अस्येति बहुपात्। 'सङ्ख्यासुपूर्वस्य' (५. ४. १४०) इत्यन्तलोपः। 'वट स्थैर्ये'। वटः। पचादिः॥

गालवः शाबरो रोध्रस्तिरीटस्तिल्वमार्जनौ।

क्षीर०— आद्याः श्वेतरोध्रे। तिरीटाद्या रक्तरोध्रे। गालयति स्रावयत्यक्षि **गालवः**। शाबरः शबरवृक्षः। रुणद्धि व्रणं **रोध्रः**। रलयो-रैक्याद् लोध्रोऽपि। तिरयति रोगान् **तिरीटः**। तिलति स्निह्यत्यङ्गमनेन **तिल्वः**। मार्ष्टि उद्वर्तयत्यङ्गं **मार्जनः**। अत एवोत्सादनः। आह च—

"लोध्रो रोध्रः शाबरकश्चिल्वकस्तिल्वकस्तरः।
तिरीटः कालहीनश्च[1] चिल्ली शबरपादपः॥
द्वितीयः पट्टिका रोध्रो गालवः स्थूलवल्कलः।
जीर्णबुध्नो बृहत्त्वक्कः पट्टी लाक्षाप्रसादनः॥"

इन्दुश्च—

---

१. 'कलाही' क. पाठः.

"रोध्रः कषायकृद् वज्रश्चिल्वको मधुपुष्पकः।
व्रणौषधं कालहीनो हिमपुष्पोऽक्षिभेषजम् ॥
द्वितीयः पट्टिका रोध्रो बृहत्पत्रास्तिरीटकः।
उत्तालकस्तिल्वकश्च पट्टी[1] लाक्षाप्रसादनः ॥"

टीका०— गालवषट्कं श्वेतलोध्रे। गालवाद्दृषेः प्रभवतीति गालवः। शेषेऽण्। सावरो दन्त्यादिः। तथा च—

"सावराख्यापराधे च लोध्रे पापे च पठ्यते"

इति दन्त्यादावजयः। रुधेर्भद्रादिरन्। रस्य लत्वम्। लोध्रः। तरतेः 'कृतृकृपिभ्यः कीटन्' (उ० ४. १८६)। तिरीटः। 'तिल स्नेहने'। बाहुलकः कन्। तिल्वः। मार्जयतीति मार्जनः। नन्द्यादिः ॥

आम्रश्चूतो रसालः

क्षीर०— अम्यते अभिलष्यते आम्रः। 'अमितम्योर्दीर्घश्च' (उ० २. १८) इति रक्। च्योतति रसं चूतः। चूष्यत इति श्रीभोजो निरवोचत्। रसम् अलति रसालः ॥

टीका० — आम्रादित्रिकमाम्रे। 'अम रोगे'। 'अमितम्योर्दीर्घश्च' (उ० २. १८) इति रग्दीर्घत्वे आम्रः। रसम् आलातीति मूलविभुजादित्वात् कः। रसालः ॥

असौ सहकारोऽतिसौरभः ॥ ३३ ॥

क्षीर०— सह कारयति मेलयति स्त्रीपुंसौ सहकारः। सुरासख[2]त्वाद्वा। यदाह—

**"आम्रश्चूतो रसालश्च सचेष्टो मदिरासखः।
कामाङ्गः सहकारश्च परपुष्टो मदोद्भवः ॥"**

---

१. 'लक्षी ला' ख. पाठः. २. 'त्स' क. ग. पाठः.

टीका० — अतिशयितसौरभाम्रे[1] सहकारः ॥

कुम्भोलूखलकं क्लीबे कौशिको गुल्गुलुः पुरः ।

क्षीर० — कुम्भोलूखलाकाराद् वृक्षकोशाद् निर्याति कुम्भोलूखलकम् । कोशे भवः कौशिकः । उलूकाख्यो नक्तञ्चरत्वात् । गुडति रक्षति वातरोगाद् गुल्गुलुः। पिपर्ति पुरः । 'इगुपधज्ञा—' (३. १. १३५) इति कः । 'उदोष्ठ्यपूर्वस्य' (७. १. १०२) इत्युत् । आह च —

"गुल्गुलुः कालनियमो जटायुः कौशिकः पुरः ।
नक्तञ्चरः शिवो दुर्गो महिषाक्षः फलङ्कषः ॥"

टीका० — कुम्भपञ्चकं गुल्गुलौ ।

"कामुके वरनार्यां च कुम्भः क्लीबं तु गुल्गुलौ"

इति रभसः ।

"कुम्भोलूखलकं गुल्गुलुः प्रावृषायणी कपिकच्छुः"

इति द्विपर्यायवर्गे महेन्द्रः पठति । तदैकमेव नाम । 'कौशिकाकाशकेशा' इति शभेदात् कौशिकस्तालव्यः ।

"तस्मात् पूज्याश्च मान्याश्च घृतपायसगुल्गुलैः"

इति मौद्गल्यायनः । अतोऽदन्तोऽपि गुल्गुलः । पुरः अदन्तः पूर्वमुक्तः ॥

शेलुः श्लेष्मातकः शीत उदालो बहुवारकः ॥ ३४ ॥

क्षीर०— शिलति शिनोति रोगान् वा शेलुः । सेलुश्च । श्लेष्माणमतति शीतवीर्यत्वात् श्लेष्मातकः । अत एव शीतः । उदालयत्यङ्गमुदालः । स्पर्शेन स्फोटकारित्वात् । बहु वृणोति स्रोतांसि बहुवारकः । आहेन्दुः—

"सेलुः श्लेष्मातकः शीतो वसन्तकुसुमस्तथा ।
उदालकः कन्दरटः शेलुको भूतवृक्षकः ॥

---

१. 'भ आम्रे' च. झ. पाठः.

पिच्छिलः शाषितः शेलुस्तथा स द्विजकुन्मितः ।
लेखशाटो बहुवारकः"

इति ॥

टीका०— शैलुपञ्चकं बहुवारे । 'शेलृ गतौ' । तालव्यादि । 'कृवापाजिमिस्वदि—' (उ० १. १) इत्यादिना बाहुलक उण् । शैलुः । शीति उक्तः । उद्दालयतीत्युद्दालः । पचादिः । बहून् देशान् वृणोतीति बहुवारः । 'कर्मण्यण्' (३. २. १) ॥

राजादनं प्रियालः स्यात् सन्नकद्रुर्धनुष्पटः ।

क्षीर०— राज्ञामदनं भृष्टत्वात् । प्रियति(?) सरसत्वात् प्रियालः । 'ǂप्री गतौ' । पियाल इत्येके । सन्नकः खरः द्रुः स्कन्धोऽस्य सन्नकद्रुः । धनुष इव पटो विस्तारोऽस्य धनुष्पटः । धनुरुकारान्तोऽप्यस्ति इति गौडो भ्रान्तः । यदाह—

"प्रियालः स्यात् खरस्कन्धश्चारो (बहुल)वल्कलः ।
¶सन्नकद्रुश्चापपटो लवनस्तापसप्रियः ॥"

अर्थे राजादनं, प्रियालः क्षीरिका च ॥

टीका० राजादनचतुष्कं प्रियाले । पीयोः सौत्रात् 'पीयुकणिभ्यां कालन् ह्रस्वः सम्प्रसारणं च' (उ० ३. ७६) । यथाकथम् । पियालः । धनुःपट इत्येकं नाम । तथा च तन्त्रान्तरं—

"सन्नकद्रुश्चापपटो लवणस्तापसप्रियः"

इति ।

१. 'श' ड. छ. पाठः. २. 'द्रोऽस्यन' प. ट. ठ. पाठः.

ǂ 'प्रीङ् प्रीतौ' इति पाठो भाति, प्रियति सदस्थाने च प्रीयत इति. ¶ 'बहुबीजश्चापपटो लवन' इति धन्वन्तरिः ।

"पटः प्रियालवृक्षे ना सुचेले पुन्नपुंसकम्"

इति रभसेन नामद्वयमुक्तम्। तदा धनुरुदन्तः सान्तश्च। तथा च विश्वप्रकाशः—

"*धनुः प्रियालद्रुमराशिभेदयोः शरासने नापि धनुर्धर" (?)

इति। "पियालश्च प्रियालकः" इति माधवः॥

गम्भारी सर्वतोभद्रा का(र्ष्मै?इर्म)री मधुपर्णिका ॥३५॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चापि

क्षीर०— गमो बिभर्ति सरत्वाद् गम्भारी। कृश्यति तनूकरोति का(र्ष्मै?इर्म)री का(र्ष्मै?इर्म)र्यश्च। मधूनि मृष्टानि पर्णान्यस्या मधुपर्णी। 'पाककर्णपर्ण—' (४. १. ६४) इति ङीष्। आह च—

"†काश्मर्यः काश्मरी हीरा कश्मरी मधुपर्ण्यपि।
श्रीपर्णी सर्वतोभद्रा गम्भारी कृष्णवृन्तिका"॥

टीका०— गम्भारीसप्तकं **गम्भार्याम्**। गम्भारीति। पिप्पल्यादित्वाद् ङीष्। मधु पर्णेऽस्या अस्तीति मधुपर्णी। 'पाककर्णपर्ण—' (४. १. ६४) इत्यादिना ङीष्। कश्मरी काश्मर्यश्च तालव्यशौ॥

अथ द्वयोः।

कर्कन्धुर्बदरी कोलिर्घोण्टा कुवलफेनिले॥ ३६॥
सौवीरं बदरं कोलम्

क्षीर०— कर्कलोहिता अन्धुः कर्कन्धुः। शकन्ध्वादित्वात् पररूपम्। बदति बदरी। 'बद स्थैर्ये'। कोलिः। 'कुल संस्त्याने'। 'कुड

---

१. 'काषरी' ग. घ. पाठः.

---

* "धनुस्संज्ञा प्रियालद्रौ राशिभेदे शरासने" इत्येव तु विश्वप्रकाशे पठ्यते। † 'काश्मर्या काश्मरी हीरा काश्मर्यो म' इति धन्वन्तरिः।

बाल्ये' । अस्माद्वा । घुणति वृत्तत्वाद् भ्रमति घोण्टा । कौ भूमौ वलति भ्रमति कुवलम् । फेनिलं कफवर्धनात् । सुवीरदेशे भवं सौवीरम् । तत्राद्यास्त्रयो वृक्षार्था अन्ये फलार्थाः । घोण्टा तूभयस्पृक् । यदाह —

"बदरी स्निग्धपत्रा च राष्ट्रवृद्धिकरी तथा ।
फलं तस्याः स्मृतं कोलं कोकिलं फेनिलं कुहम् ॥
लोलं सूक्ष्मफलं तत्तु ज्ञेयं कर्कन्धु कन्दुकम् ।
स्वादुकन्दुः सिञ्चतिका कूर्चकोलफलं च तत् ॥"

धन्वन्तरिः सामान्येनाह —

"बदरं * कोकिलं कोलं सौवीरं फेनिलं कुहम् ।
§ कर्कन्धूः कन्दुकः स्वादुकन्दुः सिञ्चतिका गुडा ॥"

द्व्यर्थे कुवलं, नीलाब्जं बदरं च । कोलिफलत्वात् कोलिकमिति सभ्यः पाठः । कोकिलमिति तु वैद्याः । चन्द्रोऽपि —

"बदरी गोपघोण्टा च घोण्टा मुण्डाथ कोलिका ।
स्निग्धच्छदा कोलफला राष्ट्रवृद्धिकरी तथा" ॥

टीका० — कर्कन्धूत्रयं **बदरीवृक्षे** । 'अन्दूदम्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (उ० १.९६) इत्यनेन कर्कपूर्वाद् धाञः कूप्रत्ययः (म?) नुडागमश्च निपातितः । 'बद स्थैर्ये' । 'ऋच्छेरन्' (उ० ३.१३१) इति बाहुलकोऽरन्प्रत्ययः । ङीषि बदरी । 'कुल संस्त्याने' । 'इन्' (उ० ४.११९) इतीन् । कोलिः । †कोलचतुष्कं **बदरीफले** । कोलेः फलं विकारः कोलम् । 'तस्य विकारः' (४. ३. १३४) इत्यण् ।

१, २. 'हत्॥' ङ. छ. पाठः. ३. 'मृ' ख. पाठः. ४. 'दुड्ढाडको' क. पाठः. ५. 'गा' घ, 'मा' ङ. छ. पाठः.

---

* 'कोलकं को', § 'कर्कन्धुकं गुडफलं बालेष्टं फलशैशिरः' इति मुद्रितकोशपाठः । † 'कोलषट्कम्' इति स्यात् ।

'पुष्पमूलेषु बहुलम्' (वा० ४. ३. १६६) इति लुगभावः। संज्ञापूर्वकत्वान्न वृद्धिः। अरिष्टे फेनिल उक्तः।

"स्रोतोञ्जने च सौवीरं बदरे काञ्जिकेऽपि च"

इति दन्त्यादौ रभसः। "सौवीरं बदरं च (न)बिति" तन्त्रान्तरम्।

"सौवीरं बदरं कोलं बदरीणां फलं मतम्"

इति केचित्। बदरं घोण्टापीति। घोण्टाफलेऽपि बदरम्। अपिशब्दाद् बदरीफले च। घोण्टा च सृगालकोलिः। तदुक्तं—

"बदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत्।
अटव्यामेव सा घोण्टा गोपघोण्टेति सोच्यते" ॥

अथ स्यात् स्वादुकण्टकः।

विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ ३७ ॥

क्षीर०— विकङ्कते प्रसरति विकङ्कतः। ककिर्गत्यर्थः। स्रुवा स्रुक्। सा हि वैकङ्कती आम्नाता। आह च—

"विकङ्कते[$] पृथुफलो ग्रन्थिलः स्वादुकण्टकः।
[‡] गोकण्टकः काकपादो व्याघ्रपादोऽथ [*] किङ्करी ॥"

टीका० — स्वादुकण्टकपञ्चकं वैहेश्वीति ख्याते। स्रुवोपयुक्तो वृक्षः स्रुवावृक्षः। दन्त्यादिः। 'अन्येषामपि—' (६. ३. १३७) इति दीर्घः। ग्रन्थियोगाद् ग्रन्थिलः। पिच्छादित्वादिलच्। व्याघ्रपादिति। 'पादस्य लोपोऽहस्त्यादिभ्यः' (५. ४. १३८) इत्यन्त्यलोपः ॥

---

१. 'वृद्धफ' क. पाठः. २. 'पघण्टा काकवेदो' ख. पाठः. ३. 'ल' घ. ङ. पाठः. ४. 'दील' क. ख. च. ज. झ. पाठः.

$ 'तो मृदुफ', ‡ 'गोपघोटः का', * 'किङ्किणी' इति धन्वन्तरिः।

ऐरावतो नागरङ्गः

क्षीर०— इरावत्या विद्युत इवायं रक्तत्वादैरावतः । नागस्य सिन्दूरस्येव रङ्गोऽस्य नागरङ्गः । न आगच्छति सहजो रङ्गोऽस्य वा । आह च—

"नारङ्गस्त्वक्सुगन्धश्च नागरङ्गो मुखप्रियः ।
स चैराव[*]तकः प्रोक्तः सुरातक्राधिवासनः" ॥

नादेयी भूमिजम्बुका ।

क्षीर०— नादेयी नदीजाता । भूमौ जम्यते अद्यते जम्बूः । चत्वारो नागरङ्गार्था इति गौडः ॥

टीका०— ऐरावतचतुष्कं नागरङ्गे । भूजम्बूनामा च । अग्रतो वक्ष्यति (?) ॥

तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ॥ ३८ ॥

क्षीर०— तिम्यति तिन्दुकः । शितिः कालः सारो मज्जास्य शितिसारः । आह च—

"तिन्दुको नीलसारश्च कालस्कन्धो[‡]ऽधिमृत्सरः ।
स्फूर्जकः स्फूर्जः" इति ॥

टीका०— तिन्दुकचतुष्कं केन्दुवृक्षे । स्फूर्जक इति । कृञादिभ्यः संज्ञायां वुन्' (उ० ५. ३९) । शितिः कृष्णः सारोऽस्येति शितिसारः । तालव्यादिः ॥

---

१. 'स' क. च. ज. झ. पाठः. २. 'सिमत्सरः ।' ग घ. ङ. पाठः. ३. 'दु' घ. ङ. छ. पाठः.

---

* 'तिकः प्रोक्तो योगी तक्राधि', ‡ 'तिमुक्तकः । स्फूर्जको रामणश्चैव स्फूर्जनः स्यन्दनाह्वयः ॥' इति धन्वन्तरिः ।

काकेन्दुः कुलकः काकतिन्दुकः काकपीलुके ।

क्षीर० — काकवर्णस्तिन्दुः काकेन्दुः काकभक्षो वा । कुत्सितैर्लक्यते कुलकः । 'लक आस्वादने' । ह्रस्वे कुलकः, काकतिन्दुकः पटोलोऽपि । आह च —

*"तिन्दुकोऽन्यो द्वितीयस्तु सन्धुकः काकतिन्दुकः ।
काकेन्दुकश्च विख्यातः कुपीलुः काकपीलुकः ॥"

मर्कटतिन्द्वाख्यः ॥

टीका० — काकेन्दु (क ?)चतुष्कं मर्कटकेन्दौ ॥

गोलिहो झाटलो घण्टा पाटलिर्मोक्षमुष्ककौ ॥ ३९ ॥

क्षीर० — गोभिर्लिह्यते गोलिहः । गोलीढोऽपि । झाटं सङ्घातं लाति झाटलः । हन्यते घण्टा । पटं विस्तारं राति पाटलिः । मोक्षति सहते मोक्षः । मुष्णाति रोगान् क्षारत्वान्मुष्ककः । आह च —

"मुष्कको मोक्षको ‡घण्टा मुखको मुञ्जकस्तथा ।
क्षारश्रेष्ठो †गोलिहश्च द्विविधः श्वेत$मुष्ककः" ॥

टीका० — गोलीढपञ्चकं झारलीति ख्यातायाम् । घण्टाकारा पाटलिः घण्टापाटलिः । द्वयोः । 'मुष खण्डने' । §'सृवृहृशुषिमुषिभ्यः कित्'(उ० ३. ४१) इति कः । मुष्कः । ततः स्वार्थे कः ॥

तिलकः क्षुरकः श्रीमान्

---

१. 'स्फूर्जकः' ख. घ. पाठः. २. 'ल' क. ङ. च. पाठः. ३. 'क' ग. पाठः. ४. 'मूर्खको', ५. 'ण्ड', ६. 'कृष्णकः' ख., 'मुष्णकः' ग. घ. ङ. पाठः.

---

* द्वितीयतिन्दुकः काकातिन्दुर्मर्कटति', ‡ 'मुष्टिर्मूषको', † 'गोलकश्च', $ 'कृष्णकः' इति धन्वन्तरिः । § 'संवृभूशुषिमुषिभ्यः कक्' इति मुद्रितोणादिपाठः ।

क्षीर० — तिलाभं पुष्पमस्य तिलकः । क्षुरति परुषत्वात् क्षुरकः । आह च —

"तिलकः * पुष्करः श्रीमान् †क्षुरकश्छत्रपुष्पकः" ॥

टीका० — तिलकत्रयं तिल इति ख्याते दीर्घपत्रे । अयं च वसन्ते पुष्प्यति । व्रीहिभेदस्तु न वसन्ते । 'तिल स्नेहने' । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) तिलकः । श्रीमान् मत्वन्तः ॥

समौ पिचुलज्ञावुकौ ।

क्षीर० — पिचुं तूलं लाति पिचुलः । [1]ध्यायते[2]र्ज्ञावुकोऽपभ्रष्टः ॥

टीका० — पिचुलद्वयं ज्ञावुल इति ख्याते ॥

श्रीपर्णिका कुमुदिका कुम्भी कैडर्यकट्फलौ ॥ ४० ॥

क्षीर० — श्रीपर्णिका सुपर्णत्वात् । 'पाककर्णपर्ण—' (४.१.६४) इति ङीष् । कुमुदप्रतिकृतिः कुमुदिका कौ मोदते वा । कुम्भी [5]रसाधारत्वात् । कं रसम् ईष्टे स्तौति कैडर्यः । अविभावितप्रकृतिप्रत्ययार्थोऽयं वा । कटत्यावृणोति कषायत्वात् फलमस्य कट्फलः । आह च —

"कट्फलः सोमवल्कश्च श्रीपर्णी कुमुदा तथा ।
महाकुम्भी [6]च कुम्भी च भद्रा भद्रवतीति च ॥"

अन्यर्थे कैडर्यः, कट्फलो मदनफलश्च ॥

टीका० — श्रीपर्णिकापञ्चकं काफल इति ख्याते । कटुं फलमस्येति कट्फलः । पृषोदरादिः । कुम्भी स्त्री । कैडर्येतिच्छेदः ॥

---

१. 'लः । आह च— ध्या' क. ग. घ ङ. पाठः २. 'ज्ञा' ख. पाठः. ३. 'र्ज्ञा' ग. घ. ङ. पाठः. ४. 'चु' क. ख, 'चुरी इ' ज्ञ., 'चु इ' घ. पाठः. ५. 'आधा' ग. घ. ङ. पाठः. ६. 'च करभी भ' ख. पाठः. ७. 'टुकं फ' घ. ङ. छ. पाठः.

---

* 'पूर्णकः', † 'क्षुरकश्छत्रपु' इति धन्वन्तरिः ।

क्रमुकः पट्टिकाख्यः स्यात् पट्टी लाक्षाप्रसादनः।

क्षीर०— क्रामति क्रमुकः। पट्टोऽस्यास्तीति पट्टी पट्टिका। लोध्रोऽयम्। लाक्षां प्रसादयति। लोध्रप्रस्तावे गतमेतत्॥

टीका० — क्रमुक(पञ्चकं? चतुष्कं) पाटि आख्यलोध्रे। क्रामतेः 'लषपत—' (३.२.१५४) इत्यादिना उकञ्। क्रमुकः। पट्टी इत्याख्या अस्येति पट्टिकाख्यः। पट्टी नान्तः। ङ्यन्तोऽयमिति केचित्। अस्मिन् प्रक्षिप्ते लाक्षा प्रसन्ना भवतीति लाक्षाप्रसादनः। दन्त्यवान्॥

नूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च॥ ४१॥

तूलं च

क्षीर० — नूद्यते नूदः। यूपप्रकृतित्वाद् यूपः। ब्रह्मणि वैदिके साधुर्ब्रह्मण्यः। अत एव ब्रह्मदारु। तूल्यते तूलम्। तूलीति गौडः। 'तूल निष्कर्षे'। आह च—

"तूलं नूदं च यूपं च क्रमुकं ब्रह्मकाष्ठकम्।
ब्रह्मदारु *ब्रह्मनिष्ठं ब्रह्मण्यं ब्रह्मचारि च॥"

टीका० — नूदषट्कमश्वत्थाकारे ब्रह्मदारुवृक्षे। नूदस्तकारादिरिति केचित्। अश्वत्थो हि[1] ब्राह्मणक्षत्रियवैश्यशूद्राभिदाभिन्नो भवति। तत्र ब्राह्मणरूपी ब्रह्मप्रायत्वाद् ब्रह्मदारु इत्युच्यते। अनेनैवारणिः क्रियते। यूपोपयुक्तत्वाद् यूपः। क्रमुक उक्तः। 'तूल निष्कर्षे'। इगुपधलक्षणः कः। तूलः॥

नीपप्रियककदम्बास्तु हलिप्रिये।

क्षीर० — नयति सुखं नीपः। प्रीणातीति प्रियकः। के दाम्य-

---

१. 'पि' क. ख. पाठः.

---

* 'ब्राह्मणेष्टं ब्रह्मण्यं' इति धन्वन्तरिः।

ति कदम्बः । हलिनः प्रियः सुराधिवासनात् । धाराकदम्बो राजकदम्बश्चासौ । धूलीकदम्बोऽन्यः । आह च—

*"पञ्चवकुम्बः प्रावृषेण्यः कदम्बोयो हलिप्रियः ।
नीपो धूलिकदम्बोऽन्यः सुवासा वृत्तपुष्पकः ॥"

टीका०— नीपचतुष्कं हुम्फल इति ख्याते । नयतेः पप्रत्ययेन नीपः । कदेः सौत्रात् †'कदेर्णिद् वा' (उ० ४. ८४) इत्यम्बच् । कदम्बः । णित्पक्षे कादम्बः । गोमन्ते गिरौ मधोज्झितं जलं कदम्बकोटरस्थं मद्यमजायत । तद् बलभद्रेण पीतम् । अतोऽयं हलिप्रियः ॥

वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकस्त्रिषु ॥ ४२ ॥

क्षीर०— विशेषेणेरयति वीरः वीराणां वा वृक्षो दुस्पर्शत्वात् । अरूंषि स्फोटैर्व्रणान् करोत्यरुष्करः । 'दिवाविभा—' (३. २. २१) इति टः । अग्निवद् मुखमस्या दाहकत्वाद् अग्निमुखी । भल्ल इवाततिं वृणोति वा भल्लातकः । आह च—

" भल्लातकः स्मृतो ‡रूक्षो दहनस्तपनोऽग्निकः ।
अरुष्करो वीरतरुर्भल्ली§ चाग्निमुखी धनुः" ॥

टीका०— वीरवृक्षचतुष्कं भल्लातके । अरुर्व्रणं करोतीत्यरुष्करः । विभाकरवत् टः । 'नित्यं समासेऽनुत्तरपदस्थस्य' (८. ३. ४५) इति षत्वम् । दाहकत्वादग्निमुखी । 'भल्लातः शोभकृत तथा' इत्यमरमाला । ततः स्वार्थे कः ॥

गर्दभाण्डे कन्दरालकपीतनसुपार्श्वकाः ।

१. 'चापणः कदम्बः', २. 'म्ब' क. ग. घ. ङ. पाठः. ३. , ४ ५. 'म्ब' क. ग. च. ज. झ. पाठः.

* 'धाराकदम्बः प्रावृष्यः क' इति पुस्तकान्तरे । † 'कदेर्णित् पक्षिणि' इति मुद्रितोणादिपाठः । ‡ 'रूक्षो द', § 'ल्लातोऽग्नि' इति पुस्तकान्तरे ।

प्लक्षश्च

क्षीर०—गर्दभ इवाण्डमस्य गर्दभाण्डः। गर्दं सशब्दं भाण्डमस्येति युक्तम्। कन्दरालत्वात्। कं पीतयति कपीतनः, कपींस्तनोति वा। आह च—

"प्लक्षः कपीतनः शृङ्गी सुपार्श्वश्चारुदर्शनः।
प्लवको गर्दभाण्डश्च कमण्डलुवटप्लवः॥"

टीका०—गर्दभाण्डपञ्चकं गान्धउण्ड इति ख्याते। गन्धपिप्पल इति केचित्। अयं च काण्डपत्रफलादिभिरश्वत्थेन समः। कपीतनप्लक्षावुक्तौ॥

तिन्त्रिडी चिञ्चान्विलका

क्षीर०—तिम्यति तिन्त्रिडी। चिञ्चिमायतेऽम्वलत्वाद् प्लुखं यया सा चिञ्चा। (फलान्तः?) चुक्रिकाख्यः। आह च—

"अम्बिलका चुक्रिका चुक्रा सान्वला शुक्ताथ शुक्तिका।
अम्बिलका *चाम्बिका चिञ्चा तिन्त्रिडीकश्च तिन्त्रिडा॥"

टीका०—तिन्तिडीत्रयं तिन्तिलीति ख्यातायाम्। 'तिम ष्टिम आर्द्रभावे'। 'पर्परीकादयश्च' (उ० ४.२०) इत्यनेन उणादौ ईकन्प्रत्ययेन तिन्तिडी निपातिता। पृषोदरादित्वात् ककारलोपः। तथा च—

"चिञ्चान्विलका तिन्तिडीकं लकुचो लिकुचो डहुः"

इत्यमरमालाप्रयोगदर्शनादव्युत्पन्ना तिन्तिडीति केचित्। अन्वलरसयोगादन्विलका। 'अत इनिठनौ' (५.२.११५)।

"अन्वलं धात्रीफलान्वीका मातुलुङ्गोऽन्वलवेतसम्"

इति वाहटेन दीर्घमध्योऽप्युक्तः॥

१, २. 'न्ति' ग. ङ. पाठः.

---

* 'चिञ्चिका' इति धन्वन्तरिः।

अथो पीतसालके ॥ ४३ ॥

सर्जकासनबन्धूकपुष्पप्रियकजीवकाः ।

क्षीर०— पीतवर्णः सालः । सृजति निर्यासं सर्जकः । अस्यत्यसनः । बन्धूकस्येव रक्तानि पुष्पाण्यस्य बन्धूकपुष्पः । काम्यत्वात् प्रियकः । जीवयति जीवक इति निघण्टुः ।

"संज्ञायां बीजको ज्ञेयो बीजपूरस्तथासनः"

आहुश्च —

"जीवकस्त्वसनः काम्यः शौरिः कृष्णोऽलकप्रियः ।
तिष्यपुष्पः पीतसालः प्रियकः प्रियसालकः ॥
सुगन्धिनीलनिर्यासस्तथा बन्धूकपुष्पकः ।
स स्यात् प्रियकसालश्च प्रियासन्ध्यश्च नामतः" ॥

टीका०— पीतसालपट्कमसनतरौ । 'अर्ज सर्ज अर्जने' । दन्त्यादिः । अच् । सर्जः ।

"प्रियविमानितमानवतीरुषां निरसनैरसनैरवृथार्थता" (स० ६. श्लो० ४७)

इति माघे दन्त्ययमकम् । ह्रस्वादिर्श्च । असनः ।

"विकसितकन्दलदशनैर्यो वमति दरीमुखैश्च कं दलदशनैः"

इति वृन्दावनयमके तालव्योऽपि ।

"पीठेभस्कन्धयोः क्लीबमासनं ना तु जीवके"

इति दीर्घादौ रभसः । बन्धूकपुष्पमिव पुष्पमस्येति बन्धूकपुष्पः । (जीवयतीति) जीवकः । (ण्वुल्) ॥

साले तु सर्जकाद्यर्याश्वकर्णकाः सस्यसंवरः ॥ ४४ ॥

---

१. 'बीजक', २. 'ण्डः', ३. 'महासर्जश्च' स. पाठः. ४. 'श्च । वि' क. ख. च. ज. झ. पाठः.

क्षीर० — स्यति सालः । कृश्यति कार्श्यः । अश्वकर्णाभपत्रः । सस्यं फलं संवृणोतीति सस्यसंवरः । आह च—

"सर्जकार्श्यश्वकर्णश्च कषायी दीर्घपत्रकः ।
सस्यसंवरणः शूरः सर्जकः साल उच्यते" ॥

टीका०— सालपञ्चकं साले । 'सल गतौ' । घञ् । सालः । दन्त्यसः ।

"सालकाननयोगेऽपि सालकाननवर्जिता"

इति भिक्षुप्रयोगः ।

"शालः सर्जतरौ मत्स्ये शाला स्कन्धलताकुटी"

इति धरणिः । अतस्तालव्यादिरपि । सर्जः असन उक्तः । कार्ष्यो मूर्धन्यषः । 'प्रनिरन्तः —' (८. ४. ५) इत्यादौ नियमसूत्रे कार्ष्यग्रहणात् । सस्यं फलं संवृणोतीति सस्यसंवरः । वृक्षादीनां फलं सस्यमित्यत्र सकार उक्तः ॥

नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।

क्षीर०— वीरतरुरर्जुननामसामान्यात् । ककुभः सन्त्यस्य दिग्व्यापकत्वात् ककुभः । कं कुभ्नातीत्यहृद्या व्याख्या । अर्जुनः शौक्ल्यात् । इन्द्रप्रियत्वादित्येके । आहेन्द्रुः—

"ककुभस्त्वर्जुनः पार्थो नदीसर्जो धनञ्जयः ।
अश्रीफलश्चित्रयोगी वीरो वीरान्तकस्तथा ॥"

व्यर्थे इन्द्रद्रुः, कुटजोऽर्जुनो देवदारु च ॥

टीका० — नदीसर्जपञ्चकमर्जुने । ककुभो वीणाप्रसेवक उक्तः ॥

राजादनः फलाध्यक्षः क्षीरिकायाम्

क्षीर० — क्षीरिका क्षीरस्वादुत्वात् । आद्ये तु मृष्टत्वान्नामनी ।

आह च —

"क्षीरिकोक्ता च राजन्यः क्षीरी मृत्स्नूपको नृपः ।
राजादनो नृपस्कन्धः कपीष्टः प्रियदर्शनः" ॥

टीका० — राजादनत्रिकं क्षीरीवृक्षे । क्षीरियोगात् क्षीरिका । 'अत इनिठनौ' (५. २. ११५) ॥

अथ द्रुयोः ॥ ४५ ॥

इङ्गुदी तापसतरुः

क्षीर० — इङ्गति इङ्गुदः, तापसा अरण्ये यस्याः स्नेहमुपयुञ्जते ॥

टीका० — इङ्गुदीद्वयं पुंनाजिभा इति ख्याते । हिङ्गुरयमिति केचित् । पुंसि इङ्गुदः । तपस्विजनोपयुज्यमानफलतया तापसतरुः ॥

भूर्जे चर्मिमृदुत्वचौ ।

क्षीर० — भृणाति भूर्जः भूर्जते वा । आहुश्च —

"भूर्जे भुजो बहुवटो बहुत्वको मृदुच्छदः ॥"

टीका० — भूर्जत्रिकं भूर्जद्रुमे । चर्मीति । 'ब्रीह्यादिभ्यश्च' (५. २. ११६) इतीनिः । मृदवस्त्वचोऽस्येति मृदुत्वक् ॥

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ॥ ४६ ॥

क्षीर० — पिच्छा अस्त्यस्याः पिच्छिला । पूरयति पूरणी । मुञ्चति रसं मोचा । स्थिरायुः कालसहत्वात् । शालते दैर्घ्यात्, शलति वा शाल्मलिः । शल्मलिश्च । आह च —

"शल्मली रक्तपुष्पा च कुकुटी स्थिरजीविका ।
पिच्छिला तूलिनी मोचा कण्टकारी च मोचनी" ॥

१. 'मु' ज्ञ., 'बु' च. पाठः. २. 'ताअट इ' ज. पाठः. ३. 'कपूरी स्थि', ४. 'ण्ट' ख. पाठः.

टीका० — पिच्छिलापञ्चकं **शाल्मलौ**। फेनिलवत् पिच्छिलः। टाप्। पिच्छिला। मोचं करोतीति मोचा। 'तत् करोति—' (वा० ३. १. २६) इति सुचेर्णिच्। पचाद्यच्। चिरजीवित्वात् चिरायुः। तथा च —

"षष्टिं वर्षसहस्राणि वने जीवति शाल्मलिः"

इति।

"कदलं शाल्मलिन्यां च व्रणिकायां च दृश्यते"

इत्युत्पलिन्यामिन्नन्तोऽपि॥

पिच्छा तु शल्मलीवेष्टे

क्षीर० — पिच्छेव पिच्छा, आचामवदङ्गुलिषङ्गत्वात्। शल्मल्या वेष्टो निर्यासः। आह च —

"शल्मलीवेष्टकः पिच्छा निर्यासः स च शल्मलेः।
मोचस्रावो मोचरसो मोचनिर्यासकस्तथा"॥

टीका० — पिच्छाद्वयं **सङ्गलिआड्** इति ख्याते। पिच्छा स्त्री। शाल्मलीवेष्टः शाल्मलीनिर्यासः। तथा च —

"कषायो निर्यासो निर्यूषो वेष्टकं तथा"

इति॥

रोचनः कूटशल्मलिः।

क्षीर० — रोचत इति रोचनः शल्मलिविशेषः। कूटेन कुत्सितत्वं द्योत्यते। दुर्गादौ हि परसैन्यदलनार्थं सा क्षिप्यते। आह च —

"कुशल्मलिः शाल्मलिको रोचनः कूटशल्मलिः"[1]॥

टीका० — रोचनेद्वयं[2] **कासिम्बेहु**[3] इति ख्याते। रोचनो ल्युडन्तः॥

चिरिबिल्वो नक्तमालः करञ्जश्च करञ्जके॥ ४७॥

---

१. 'लिः। कूटशल्मलिरिति युक्तः। चि' ख. पाठः. २. 'ना' ङ. छ. पाठः. ३. 'म्बलहु' झ., 'म्बल इ' च. छ. ज. पाठः.

क्षीर०— चिरिणं विलति भिनत्ति चिरिबिल्वः । नक्तं रात्रावालाति अस्माद् नक्तमालः, भूताश्रयत्वात् । रक्तमाल इत्येके । कं रञ्जयति करञ्जः ॥

टीका०— चिरिबिल्वचतुष्कं करञ्जतरौ । नक्तं रात्रिमल(ते ? ति) भूषयतीति नक्तमालः । कं वारि रञ्जयतीति करञ्जः । 'कर्मण्यण्' (३. २. १) । करज इति पृषोदरादित्वादनुनासिकलोपविकल्पः ॥

प्रकीर्णः पूतिकरजः पूतिकः कलिमारकः ।

क्षीर०— प्रकीर्यते प्रकीर्णः । पूतिको दुर्गन्धः । कलेर्मारकः । कलहहृत् । यदिन्दुः—

"करजश्च करञ्जोऽन्यः प्रकीर्णो गौर एव च ।
पूतीकरञ्जः सुमनास्तथा कलहनाशनः ॥"

द्व्यर्थे करजः, करञ्जो नखश्च ॥

टीका०— प्रकीर्यचतुष्कं लाङ्गाकरञ्जे । पूतीकः अनीकादित्वाद् दीर्घमध्यः । कलिं करोतीति कलिकारः । ततः स्वार्थे कः । कलिकारकः ॥

करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ॥ ४८ ॥

क्षीर०— षड् ग्रन्थयः अस्य हस्तिवारणाख्यः । मन्दतीति मर्कटी वल्लीकरञ्जः । अङ्गार इव वल्लर्योऽस्य अङ्गारवल्लरी । आह च—

"उदकीर्या तृतीयोऽन्यः षड्ग्रन्थो हस्तिवारणी ।
अङ्गारवल्ली शादस्था काकघ्नी करतालिका ॥"

त्र्यर्थे मर्कटी, आत्मगुप्ता अपामार्गः वल्लीकरञ्जश्च ॥

---

१. 'र' क. ख. झ. पाठः. २. 'ललाटाक' ज. पाठः. ३. 'लरीक' क. पाठः. ४. 'काकता' क., 'करनाचिका' ग. घ. ङ. पाठः.

टीका०—षड्ग्रन्थादयस्त्रयः प्रत्येकं करञ्जभेदाः पृथक् पृथक् षट्प (वीं?र्वा) षड्ग्रन्थ इत्यर्थः। (मर्कटी?) वल्लरी(त्वा?व)द् मर्करी। अङ्गारवर्णा वल्लरी अस्या इत्यङ्गारवल्लरी। द्वयं ङ्यन्तम्॥

रोही रोहितकः प्लीहशत्रु*र्डाडिमपुष्पकः।

क्षीर०— रोहयतीति रोही। रोहितकः। रोहतीत्येके, छिन्नप्ररूढत्वात्।

"रोहीतको रोचनकः प्लीहघ्नो रक्तपुष्पकः।
रक्तको रोहितो रक्तरोही डाडिमपुष्पकः"॥

टीका०— रोहिचतुष्कं मगधदेशप्रसिद्धे रोहडतरौ। रोही नान्तः। दाडिमवत् पुष्पमस्येति इवार्थे कः। दाडिमपुष्पकः॥

गायत्री बालपत्त्रश्च खदिरो दन्तधावनः॥ ४९॥

क्षीर०—गायतः त्रायतेऽवश्यं गायत्री। बालपत्त्रो युवपलाशः। 'बालपत्त्रः खदिरश्चे'ति द्व्यर्थेषु धन्वन्तरिपाठं[1]मदृष्ट्वा गायत्री बालतनय इति बालपुत्त्रभ्रान्त्या ग्रन्थकृद् बालतनयमाह। सूक्ष्मपर्णो ह्ययम्। खदति खदिरः। 'खद स्थैर्ये'। आह च—

"खदिरो रक्तचीर[2]श्च गायत्री दन्तधावनः।
कण्टकी[3] बालपत्त्रश्च जिह्मशल्यः क्षितिक्षमः"॥

टीका०— गायत्रीचतुष्कं खदिरे। 'गायत्री खदिरे स्त्री स्यादि'ति रभसः।

---

१. 'ठान्तरम' ख. ग. घ. ङ. पाठः. २. 'शी' क. ग. घ. ङ. पाठः. ३. 'झरी बा' क., 'ञ' ग. घ. ङ. पाठः.

---

* ङकारादिरिह पठ्यते। दकारादिस्तु दाडिमशब्द उपरिष्टाद् व्युत्पाद्यते। पृषोदरादित्वाद्वा डादिरयं भवतु।

"पारिजातजयानिम्बवह्निगायत्रिणां पृथक्"

इति तु वैद्यकम्। क्षुद्रपत्रत्वाद् बालपत्रः । बालतनय इति तु लिपिदोषात्। पूर्वपूर्वतन्त्रेषु बाल(प?पु)त्रेति पाठदर्शनादुन्नीतमिति भिक्षुदेवः। बालः सूक्ष्मः तनयः पुष्पात्मकोऽस्येत्यर्थे। शिशिरवत् खदिरः ॥

अरिमेदो विट्खदिरे

क्षीर०—अरिर्दुस्सहो मेदः स्रावोऽस्यारिमेदः। विड्गन्धिः खदिरः पूतिखदिराख्यः। आह च—

"अरीमेदोऽरिमेदश्च गोधास्कन्धोऽरिमेदकः।
अहिमेदोऽरिमारश्चारिमः प्रत्यरिमेदकः" ॥

टीका०—अरिमेदद्वयं स्वल्पखदिरविशेषे। विष्ठावद् दुर्गन्धित्वाद् विट्खदिरः ॥

कदरः खदिरे सिते।

सोमवल्कोऽपि

क्षीर०—कं दृणाति कफहरत्वात् कदरः। सोमवल्कोऽकण्टकित्वात् शुक्लत्वाद्वा। आह च—

"†कदरः श्वेतसारोऽन्यः सोमवल्कः पथिद्रुमः।"

$ऽर्थे सोमवल्कः, कट्फलः करञ्जश्च ॥

टीक०—सिते सितसारे खदिरे कदरद्वयम्। कं जलं दृणातीति कदरः। पचादिः। शुक्लत्वात् सोमवद् वल्कमस्येति सोमवल्कः ॥

अथ व्याघ्रपुच्छगन्धर्वहस्तकौ ॥ ८० ॥

---

१. 'इव वल्क' च, ज., 'वल्क' क. ख. ङ. छ. पाठः.

---

† 'खदिरः', $ 'ऽर्थे सोमवल्कः, श्वेतखदिरः कट्फलः विट्खदिरश्च' इति धन्वन्तरिः।

एरण्ड ऊरुपूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुः पञ्चाङ्गुलामण्डवर्धमानव्यडम्बराः ॥ ५१ ॥

क्षीर०— व्याघ्रस्येव पुच्छोऽस्य व्याघ्रपुच्छः । गन्धर्वस्य मृगविशेषस्य भूतविशेषस्येव वा हस्तोऽस्य गन्धर्वहस्तकः । पञ्चाङ्गुलः पञ्चपत्त्रत्वात् । एरयति वायुम् एरण्डः । ऊरू पुनाति ऊरुपूकः । रोचते रुचकः । चञ्चति चञ्चुः । वञ्चुरित्येके । पञ्च अङ्गुलयोऽस्य पञ्चाङ्गुलः । आमण्डयत्यामण्डः । आदण्ड इत्येके । दीर्घदण्डत्वात् । व्यडम्बयतीति व्यडम्बरः* । 'अड उद्यमे' । व्यडम्बक इत्येके । आह (च)—

"एरण्डस्तरुणः शुक्लश्चित्रो गन्धर्वहस्तकः ।
पञ्चाङ्गुलो वर्धमान आमण्डो दीर्घदण्डकः ॥
‡नक्तोऽपरो हस्तिकर्णो व्याघ्रो व्याघ्र†तलो रुवुः ।
§ऊरुपूको हस्तिपर्णश्चञ्चुरुत्तानपत्त्रकः" ॥

टीका०— व्याघ्रपुच्छैकादशकमेरण्डे । उरु पूगमस्य । आद्यद्वयं ह्रस्वम् । तथा च वैद्यके—

"क्वाथः स्यादुरुपूगतैलसहितः सामे सशूलेऽनिले"

इति । बुक इत्यप्यस्य नाम । तथा च वैद्यकरत्नमाला—

"आमण्डो वर्धमानः स्यादेरण्डो रुबुको बुकः"

इत्यादि । चित्र उक्तः । ततः कन् । चित्रकः ।

"चञ्चुरेरण्डके पुंसि पक्षित्रोट्यां स्त्रियां मता"

इति कोशान्तरम् । पत्त्रात्मके हस्ते पञ्च अङ्गुलयोऽस्येति पञ्चाङ्गुलः । 'मडि भूषायाम्' । मण्डः । पचादिः ।

---

१. 'र्वे' ख., 'र्णे' ग. पाठः. २. 'पाति' ख. पाठः.

---

* 'व्यडम्बनः इति स्वामी' इति तु भानुजिदीक्षितः । ‡ 'रक्तो', † 'दलो', § 'रुबु हस्तिकर्णो च चञ्चुकोता' इति धन्वन्तरिः ।

"आमलक्यामनो मण्ड एरण्डे सारपुच्छयोः"

इति रभसः। अमण्डो वा अकारप्रश्लेषात्। दीर्घोऽप्यामण्डः। तथा च—

"गन्धर्वहस्तके दण्ड आमण्डो व्याघ्रपुच्छकः"

इति तारपालः। वर्धमान इति ताच्छील्ये चानश्॥

अल्पा शमी शमीरः स्यात्

क्षीर०— अल्पेऽर्थे 'कुटीशमीशुण्डाभ्यो रः' (५. ३. ८८)॥

टीका०— क्षुद्रशम्यां शमीरः। 'कुटीशमीशुण्डाभ्यो रः' (५. ३. ८८)। स्वार्थिकेऽपि यत् पुल्लिङ्गता तत्र 'लोकाश्रयत्वाद् लिङ्गस्य' इति युक्तिः॥

शमी सक्तुफला शिवा।

क्षीर०— शमयति दोषान् शमी। तच्छीलत्वात्। सक्तव इव फलान्यस्याः। आह च—

"शमी *सक्तुफला तुङ्गकोशा भर्तृफला शिवा"॥

टीका०— शमीत्रिकं शम्याम्। 'शमु उपशमे'। पचादिगौरादी।

"न शमी न च पुन्नागा अस्मिन् संसारकानने"

इति श्लेषात् तालव्यादि। सक्तुफला दन्त्यादिः। शिवा उक्ता॥

पिण्डीतको मरुवकः श्वसनः करहाटकः॥ ५२॥
शल्यश्च मदने

क्षीर०— पिण्डीम् इतः पिण्डीतकः। म्रियन्तेऽनेन विषपुष्पत्वाद् मरुवकः। मरौ वाति वा। श्वसन्त्यनेन श्वसनः। करं हन्ति दुःस्पर्शत्वात् करहाटकः। कंरं हयति वा करहाटकः। शल्यमस्यास्तीति शल्यः। मदयति मदनः। आह च—

---

१. 'कं रह' क. घ. ङ. पाठः.

---

* 'शङ्कुफला तुङ्गा केशहन्त्री शिवाफला' इति धन्वन्तरिः।

"मदनः शल्यको $राठः पिण्डी पिण्डीत†कस्तथा।
¶तस्करः करहाटश्च §श्वसनो विषपुष्पकः॥"

अर्थे मरुवकः, जम्भीरो मदनश्च। शाश्वतश्चाह —

"पिण्डीतके पद्मगन्धे करहाटपदं विदुः"॥

टीका०— पिण्डीतकषट्कं **मणहेल** इति ख्याते। श्वसनकरहाटावुक्तौ। 'शल श्वल्ल आशुगमने'। *'सानसिधर्णसि—' (उ० ४. १०९) इत्यादिना यः। (शल्यः)। 'शल्याख्या मदनतरा'विति तालव्ये अजयः॥

शक्रपादपः पारिभद्रकः।
भद्रदारु द्रुकिलिमः पीतदारु च दारु च॥ ५३॥

पूतिकाष्ठं च सप्त स्युर्देवदारुणि

क्षीर०— परिनिष्ठाप्राप्तं[२] भद्रमस्य पारिभद्रः। द्रौ स्कन्धे किलिमं निर्यासोऽस्य द्रुकिलिमः। पूतिरुग्रगन्धं काष्ठमस्य पूतिकाष्ठम्। सप्तग्रहणं द्रुकिलिमस्यैकत्वाय। आह च —

"देवदारु स्मृतं दारु सुराह्वं किलिमं च तत्।
स्नेहविद्धं महादारु भद्रदार्विन्द्रदारु च॥
देवकाष्ठं भद्रकाष्ठं पूतिकाष्ठं ‡च दारु च।
सुरदार्विन्द्रवृक्षश्च तथैवामरदारु च॥"

अन्यर्थे पारिभद्रः, %कोलिः पारिजातो देवदारु च। तथा पीतदारु, दारुहरिद्रा देवदारु ℔पूतिकाष्ठम्। किलिमं च[३] (त)दिति पदैकदेशत्वाद्, भीमवत्॥

---

१. 'हड इ' झ., 'हे इ' ज., 'इह इ' ङ. च. छ. पाठः. २. 'शिष्टप्रा' क. ग. पाठः. ३. 'चेति' ख. पाठः.

$ 'राटः', † 'कः फलः।', ¶ 'तगरः', § 'छर्दनो' इति धन्वन्तरिः। * 'सानसिवर्णसि' इति मुद्रितोणादिपाठः। ‡ 'सुदारु च', % 'निम्बः पा', ℔ 'सरलश्च।' इति धन्वन्तरिः।

टीका० — शक्रपादपसप्तकं **देवदारुणि** । भद्रदारु क्लीबे । 'सुराह्वं भद्रदारु चे'ति रत्नमाला । देवनाम दारु देवदारु । शाकपार्थिवादि । रूपभेदात् क्लीबम् । 'असुं पुरः पश्यसि देवदारुम्' (स० २. श्लो० ३६) इति रघुकारः । 'पुन्नपुंसकयोर्देवदारु' इति त्रिकाण्डशेषः ॥

अथ द्वयोः ।

पाटलिः पाटलामोघा काला स्थाली फलेरुहा ॥ ५४ ॥
कृष्णवृन्ता कुबेराक्षी

क्षीर० — पाटला ताम्रपुष्पत्वात् । अमोघा बहुफलत्वात् । काला कालवृन्तत्वात् । स्थाली रसाधारकुम्भीत्वात् । काचस्थालीत्येके । फले रोहति । साङ्कुरफलत्वात् । कुबेराक्षी यक्षाक्षितुल्यपुष्पत्वात् । आह च —

"पाटलोक्ता तु कुम्भीका ताम्रपुष्प्यम्बुवासिनी ।
स्थाली वसन्तदूती स्यादमोघा कालवृन्तिका ॥
द्वितीया पाटला श्वेता निर्दिष्टा काष्ठपाटला ।
सा चैव *श्वेतकुम्भी स्यात् कुबेराक्षी फलेरुहा ॥"

'पाटली कृष्णवृन्ते'ति निमिः । 'पाटला पाटलिर्वा ने'ति माला ॥

टीका० —पाटलिसप्तकं **पाटलायाम्** । 'अट पट गतौ' । णिच् । ऋतन्यञ्ज्यादिसूत्रेण बहुलवचनादलिच् । पाटलिः । वृषादिकलचि पाटला । काचस्थालीतिच्छेदः । 'मोघा स्त्री पाटलावृक्ष' इति रुद्रः । फले रोहतीति फलेरुहा । इगुपधलक्षणः कः । 'तत्पुरुषे कृति बहुलम्' (६. ३. १४) इत्यलुक् ॥

श्यामा तु महिलाह्वया ।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ॥ ५५ ॥

---

१. 'हि' ग. घ. ङ. पाठः.

---

* 'श्वेतकुम्भीका कु' । इति धन्वन्तरिः ।

विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सः।

क्षीर०— श्यामा गौरश्यामवर्णा। महिलाह्वया वनितापर्याया। **श्यामत्वात्**। गवि भूमौ (विद्य? वन्द्य)ते गोवन्दनी। गुद्यते क्री(ड?ड्य)ते-**ऽनया** गुन्द्रा। प्रीणाति प्रियङ्गुः। फलति विशीर्यते फली। विष्वक् सिनोति **सर्वतो** बध्नाति विष्वक्सेना। ईषद् रम्भाकारा कारम्भा। आह च—

"प्रियङ्गुः प्रियवल्ली च फलिनी *कुङ्कुटी प्रिया।
वृन्ता गोवन्दनी श्यामा कारम्भा वर्णभेदिनी॥"

इन्दुः 'गौर्वन्दनी'ति भिनत्ति। यदाह—

"वन्दनी पुष्पशोभना।
गन्धा[1] प्रियङ्गुः कारम्भा लता गौर्वर्णभेदिनी॥"

व्यर्थे §गुन्द्रा, [2]एरकः प्रियङ्गुः [3]सेरी च। तथा प्रियकः, असनः प्रियङ्गुः कद-**म्बश्च**। द्व्यर्थे गन्धफलिनी, प्रियङ्गुश्चम्पककलिका च॥

टीका०—श्यामाद्वादशकं प्रियङ्गौ। श्याम उक्तः, ततष्टाप्। महिलाह्व-**येति**। स्त्रिया यानि नामानि तान्यस्या अपीत्यर्थः। फलिन उक्तः, ततो गौरादि-**ङीष्**। फलीति। अर्शआद्यच् ङीष्। गन्धप्रधानं फलमस्या इति गन्धफली। 'पाक-**कर्ण**—'(४. १. ६४) इत्यादिना ङीष्॥

मण्डूकपर्णपत्रोर्णनटकद्वङ्गडुण्डुकाः॥ ५६॥

श्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः।
शोनकश्चारलौ

---

१. 'न्धः' ग. घ. ङ. पाठः. २. 'सारः प्रि', ३. 'सेचरी' ख. पाठः.

---

* 'कङ्गुनी प्रिया। वृत्ता गो', § 'लता, प्रियङ्गुः सारिवा ज्योतिष्मती च' इति **ध्वन्तरिः**।

क्षीर० — मण्डूका इव पर्णान्यस्य । पत्रेषूर्णास्य पत्रोर्णः । नटति वातेन नटः । कटून्यङ्गान्यस्य रौक्ष्यात् कट्वङ्गः । डुण्डुभिः शिम्बीभिः कायति डुण्डुकः । स्योनां [1]मुखं कायति स्योनाकः । शुकनासेव पुष्पाण्यस्य । ऋक्ष्णोति हिनस्ति ऋक्षः । अत एव भालूकः । दीर्घो वृन्तोऽस्य । कुटन् वक्रीभवन् नटत्यास्पन्दते कुटन्नटः । शवति शोनकः । गौडाः शोणकमाहुः । 'शोणृ वर्णे' । [3]लूय(त्यृ?तेऽ)रमरलुः । आह च —

"स्योनाकः शुकनासश्च कट्वङ्गोऽथ *[4]कडम्बरः ।
मयूर$जङ्घोऽरालूकः प्रियजीवः कुटन्नटः ।
[5]सं प्रोक्तः पृथु†शिम्बिश्च ‡डुण्डुको दीर्घवृन्तकः ।
§भालूकः सल्ल[6]कः फल्गुवृन्तको जम्बुको नटः" ॥

टीका० — मण्डूकपर्णद्वादशकं शोणके । मण्डूकाकृतिपर्णत्वाद् मण्डूकपर्णः । नटतीति नटः । (अति?)कटु तीक्ष्णम् अङ्गम् अस्येति कट्वङ्गः । 'श्यैङ् गतौ' । 'पिनाकादयश्च' (उ० ४.१९) इत्याकन् नुमागमः धात्वन्तस्य चोत्वम् । श्योनाकः ।

"भालूके शोणके ऋक्षो नक्षत्रे पुन्नपुंसकम्"

इत्यजयः । कुटन्नट इतिच्छेदः । 'शोण वर्णगत्योः' । 'बहुलमन्यत्रापि' (उ० २.२५) इति कन् । शोणकः । 'ऋ गतौ' । ¶'अर्तिशृभ्यामटुच्' । अरटुः । एवं ह्रस्वादिः टोपधश्च । क्वचिदरलु इति पाठः ॥

तिष्यफला त्वामलकी त्रिषु ॥ ५७ ॥

अमृता च वयःस्था च

---

१. 'उद्धं का' क. पाठः. २. 'खमकति', ३. 'आ (?) इयर्त्यरलु', ४. 'कुटन्दरः', ५. 'सं', ६. 'ल्ल' ख. पाठः.

---

* 'कटम्भरः, $ 'जङ्घोऽरलुक', † 'शिम्बश्च', ‡ 'टिण्टुको', § 'भल्लूकः शिल्लको फल्गुवृन्ताको जम्बुको मतः ॥' इति धन्वन्तरिः । ¶ इदं मुद्रिताणादौ न दृश्यते ।

क्षीर० —तिष्यं मङ्गल्यं फलमस्याः तिष्यफला। नित्यमामलके लक्ष्मीरिति। आमलते गुणान् आमलकी आमला वा। अमृता वयःस्था च रसायनत्वात्। धात्री नानार्थे। आह च—

"वयःस्थामलकं ‡तिष्यं जातीफलरसं शिवम्।
धात्रीफलं श्रीफलं च तच्चामृतफलं स्मृतम्" ॥

टीका० —तिष्यफलाचतुष्कमामलक्याम्। तिष्ययुक्ते[2] काले फलं करोतीति तिष्यफला। 'तत् करोति —' (वा० ३. १. २६) इति णिच्। पचाद्यच्। टाप्। आमलकी[3]ति। 'मल मल्ल धारणे' इत्यत आङ्पूर्वात् 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २. ३५) इति क्वुन्। गौरादिः। एवं धातुप्रदीप उक्तम्। पुंस्यामलकः। क्लीबे त्वामलकम्। वयो यौवनं तिष्ठति स्थिरीभवत्यनयेति वयःस्था। 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कः ॥

त्रिलिङ्गस्तु विभीतकः।
नाक्षस्तुषः कर्षफलो भूतवासः कलिद्रुमः ॥ ५८ ॥

क्षीर०— विभेत्यस्माद् विभीतकः। अक्ष्णोति व्याप्नोति अक्षः। **ना पुमान्**। तुष्यति, तुप इति निघण्टुषु[4] न संवादी, तेषु तुमुलपाठात्। **कर्षफलोऽक्षसामान्यात्**। अक्षो विभीतके पलचतुर्भागे च वर्तते। **भूतानां वासः**। कलेराश्रयो द्रुमः। आह च—

"संवर्तको भूतवासः *कर्षो हार्यो †विभेदकः"

इन्दुश्च—

"अहार्यं बहुवीर्यं च तुमुलं च विभेदकम्" ॥

---

१. 'च नरर', २. 'क्तका' क. पाठः. ३. 'की म', ४. 'न्। ए' घ. ङ. छ. पाठः. ५. 'धु सम्पादिते' ग. पाठः.

---

‡ 'वृष्यं', * 'ल्को हा', † 'विभीतकः' इति धन्वन्तरिः।

टीका०— विभीतकचतुष्कं [1]बेहडीति ख्यातायाम् । 'अशेर्देवने' (उ० ३. ६५) इति सः । अक्षः । 'तुप तुष्टौ' । इगुपधलक्षणः कः । तुषः । नलनृपतिमपहाय कलिर्विभीतकमाश्रितः इति कलिद्रुमः ॥

अभया त्वव्यथा पथ्या कायस्था पूतनामृता ।
हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥ ५९ ॥

क्षीर०— नास्ति भयमस्यां[2] अभया । न व्यथयत्यव्यथा । पथि साधुः पथ्या । हितेत्यर्थः । काये तिष्ठति निष्फला न भवति कायस्था । वयःस्थेत्येके । पूतं करोति पूतना । विरेचनीत्वात् । पृतनेत्येके । हरति रोगान् हरीतकी । चेतयत्यनया स्रोतः शुद्धेः चेतकी । आह च—

"हरीतक्यभया पथ्या प्रपथ्या †पूतनामृता ।
जयाव्यथा हैमवती §कायस्था चेतकी तथा ॥"

त्र्यर्थे श्रेयसी, राज्ञा हरीतकी हस्तिपिप्पली च । 'शिवाव्यथा पूतने'ति चन्द्रः ॥

टीका०— अभयैकादशकं हरीतक्याम् । उपयुज्यमानायामस्यां नास्ति रोगभयमित्यभया । एवमव्यथापि । हारिणा इतो गतः हरीतः । ततः कन्ङीषौ । हरीतकी । चेतकीति । चेतयतेर्वुन्ङीषौ ॥

पीतद्रुः सरलः पूतिकाष्ठं च

क्षीर०—सरलः ऋजुत्वात् । आह च—

"सरलः पूतिकाष्ठं च *पीडा पीतद्रुरुच्छ्रितः" ॥

---

१. 'वहडी' ङ., 'वेहडी' छ. पाठः. २. 'स्यां', ३. 'बी' ङ. पाठः. ४. 'मः श्रितः' क. पाठः.

---

† 'पूतना', § 'वयःस्था चेतकी शिवा ।', * 'चिडा पिन्नद्रुमो मतः ।' इति धन्वन्तरिः ।

टीका०—पीतद्रुत्रयं **सरले**। पीतद्रुरिति कर्मधारयः। सर्तेः ‡'मङ्गलादयश्च' (उ० ५. ७१) इत्यलच्। सरलः। 'सरलः सरले साहसरागमि'ति भाषासमावेशे भवभूतिः(?)॥

अथ द्रुमोत्पले।

कर्णिकारः परिव्याधः

क्षीर०—उत्पलानीव पुष्पाण्यस्य द्रुमोत्पलः। सुरभिश्चायम्। अन्यो निर्गन्धः। कर्णिकामियर्ति कर्णिकारः। द्व्यर्थे परिव्याधः, जलवेतसः कर्णिकारश्च॥

टीका०—द्रुमोत्पलत्रयं **कलिआर** इति ख्याते। परिव्याधो घञन्तः॥

लकुचो लिकुचो डहुः॥ ६०॥

क्षीर०—लक्ष्यते आस्वाद्यते लकुचः। फलं लिह्यते[1] आस्वाद्यते लिकुचः। डह्यते डहुः॥

टीका०—लकुचत्रयं **उहुआ** इति ख्याते। 'लघुचोऽपी'ति रभसः॥

पनसः कण्टकिफलः

क्षीर०—पन्यते स्तूयते पनसः। 'पणस' इति दुर्गः। लोकोक्त्या कण्टकिफलः। महासर्गोऽपि॥

टीका०—पनसद्वयं **कण्टभौल** इति ख्याते। 'पण व्यवहारे', 'पन च'। §'अत्यमिचमिरभिनभिलभिपतिपदिभ्योऽसच्' (उ० ३. १७) पनसः। दन्त्यवान्। कण्टकयुक्तं फलमस्येति कण्टकिफलः। तथाच 'लक्ष्मीवान् कण्टकिफलः' इति लैटकोशे[3] पुरुषोत्तमः॥

---

१. 'ते लि' ख. पाठः. २. 'भा इ' घ. ङ. छ. पाठः. ३. 'टलको' च., 'कोशे' छ. पाठः.

---

‡ 'मङ्गेरलच्', § 'अत्यविचमितमिराभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्' इति मुद्रितोणादिपाठः।

निचुलो हिज्जलोऽम्बुजः ।

क्षीर०— निचोल्यते अम्बुना निचुलः । हिंमजलस्यापभ्रंशो हिज्जलः जलवेतसविशेषत्वात् । निचुलो लज्जल इति केचित् ॥

टीका० — निचुलत्रयं हिज्जले । जलम् एतीति इज्जलः । एतेः किप् । तुक् । राजदन्तादित्वाद् जलशब्दस्य परनिपातः । 'निचुलेज्जलहिज्जला' इति रभसः ॥

काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ॥ ६१ ॥

क्षीर० — काकप्रिया उदुम्बरी । फलति फल्गुः । मलं श्वित्रं यवति मलयूः । 'यु जुगुप्सायाम्' । जघने बुध्ने फलान्यस्या जघनेफला । आह च —

"काकोदुम्बरिका *फल्गुरराजी फल्गुवाटिका ।
फल्गुनः फलहारी च मलयूः श्वित्रभेषजम्" ॥

टीका० —काकोदुम्बरिकाचतुष्कं **कोट्टाडम्बर** इति ख्याते ।

"काकोदुम्बरिकायां स्त्री फल्गुस्त्रिषु निरर्थके ।"

'फल निष्पत्तौ' । 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधताश्च' (उ० १. १८) इत्यनेन फल्गुर्निपातितः । मलं पुनातीति मलपूः । क्विबन्तः । जघनेफलेति । 'अमूर्धमस्तकात् स्वाङ्गादकामे' (६. ३. १२) इत्यलुक् ॥

अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः ।
पिचुमन्दश्च निम्बे

---

१. 'त' ख. ग. घ. ङ. पाठः.

---

* "फल्गू राजिफल्गुः शिवाटिका ।
फल्गुनी फलसम्भारा मलयूश्चित्रभेषजा ॥"
इति धन्वन्तरिः ।

क्षीर० — हिङ्गुगन्धिर्निर्यासोऽस्य । माल्यते वेष्ट्यते काकैर्मालकः । शुक(कां?मा)लकैकदेशश्चायम् । पिचुं मन्दयति पिचुमन्दः[2] । *रोमशत्वात् । पिचुमं[3](न्दा?र्दं) इत्येके । यवनेष्टोऽपीति सौश्रुताः । शाश्वतोऽपि—

"हिङ्गुनिर्यासशब्दोऽयं निम्बे हिङ्गुरसेऽपि च ।"

चन्द्रनन्दनस्तु शुकमालकमाह ॥

टीका० — अरिष्टषट्कं निम्बे । हिङ्गुवाकारो निर्यासोऽस्येति हिङ्गुनिर्यासः । 'मल मल्ल धारणे' । ण्वुल् । मालकः । पिचुं कुष्ठं मृद्नातीति पिचुमर्दः । नयतेः 'उल्वादयश्च' (उ० ४. ९६) इत्यनेन बन् मुम् ह्रस्वश्च । निम्बः ॥

अथ पिच्छिलागुरुशिंशपा ॥ ६२ ॥

क्षीर० — अगुरुतुल्यसारा शिंशपा अगुरुशिंशपा । यदाह—

"शिंशपा तु महाश्यामा §कृष्णसारः स्मृतोऽगुरुः ।"

अगुरुर्हि धूपद्रव्यं शिंशपासारश्च । द्व्यर्थे पिच्छिला, शल्मलिः शिंशपा च ॥

कपिला भस्मगर्भा सा[4]

क्षीर० — ‡रक्ताभा रक्तशिंशपान्या कपिला भस्मगर्भा[5] वसादनी ॥

टीका० — पिच्छिलापञ्चकं शिंशपायाम् । पिच्छिला उक्ता । अगुरु क्लीबम् । शिंशपा द्वितालव्या । कपिल उक्तः । ततष्टाप् । भस्मगर्भा दन्त्यसा ॥

---

१. 'सा' ख. ग., 'कसाल' घ. ङ. पाठः. २. 'न्दः । अरो' क. ग. घ. ङ. पाठः. ३. 'न' ख. पाठः. ४. 'सा तदाह —रक्त' ख. पाठः. ५. 'र्भ' क. ग. घ. ङ., 'र्भाह्व' ख. पाठः.

---

* 'रोमशः पिचुमन्दश्च' (पृ० ५१. श्लो० ७५) इति यादवः । § 'कृष्णसारा स्मृता गुरुः ।', ‡ 'कुशिंशपान्या कपिला भस्मगर्भा वसादनी' इति धन्वन्तरिः ।

शिरीषस्तु कपीतनः ।

तण्डिरोऽपि

क्षीर० — शिरसि इष्यते शिरीषः । शीर्यते वा सौकुमार्यात् । तण्ड्यते तण्डिरः । [2]भण्डीरोऽपि । आह च —

"शिरीषो मृदुपुष्पश्च [†][3]भण्डीरः शिखिनीफलः ।
कपीतनः शुकतरुः श्याम[¶]वल्कः शुकप्रियः ॥"

[3]भाण्डिल इत्येके ॥

टीका० — शिरीषत्रयं शिरीषे । 'शृदृभ्यां [§]कित्' (उ० ४. २७) इति ईषन् । शिरीषः । तालव्यादिः मूर्धन्यान्तश्च । 'भडि कल्याणे' । 'सलिकल्यनि—' (उ० १. ५७) इत्यादिना इलच् । भाण्डिलः ॥

अथ चाम्पेयश्चम्पको हेमपुष्पकः ॥ ६३ ॥

क्षीर० — चम्पादेशभवश्चाम्पेयः । चम्यतेऽद्यतेऽलिभिः चम्पकः । [4]चेम्पकोऽपि । आह च —

"चम्पकः सुकुमारश्च सुरभिः शीतलश्च सः ।
चाम्पेयो हेमपुष्पश्च काञ्चनः षट्पदातिथिः" ॥

टीका० — चाम्पेयत्रयं चम्पके । हेमवर्णं पुष्पमस्येति हेमपुष्पकः ॥

एतस्य कलिका गन्धफली स्याद्

क्षीर० — गन्धः फलमस्या गन्धफली । प्रियङ्गुः चम्पक(नाक)लिका चेति द्व्यर्थे (गन्ध)फली[5] ॥

---

१. २. 'त' ख पाठः. ३. 'ण्डीर्ये' क. ग. घ. ङ. पाठः. ४. 'लि' ख. घ. ङ. छ. ज. झ पाठः. ५. 'चाम्पको' ख. पाठः. ६. 'लिनी च ॥' क. ग. घ. ङ. पाठः.

† 'भडिकः शङ्खिनी', ¶ 'वर्णः शु' इति धन्वन्तरिः । § 'कित्' इति मुद्रितोणादिपाठः ।

टीका० — चम्पककलिकायां गन्धफली ॥

अथ केसरे।

वकुलः

क्षीर० — केसरति, केसराः सन्त्यस्य वा केसरः। उच्यते **वकुलः**। आह —

"बकुलः *शीधुगन्धश्च मद्यगन्धो विशारदः।
मधुगन्धो हेमपुष्पः §शिम्बी केसरकस्तथा" ॥

टीका० — केसरद्वयं वकुले। किञ्जल्के केसर उक्तः ॥

वञ्चुलोऽशोके

क्षीर० — अश्नुते अशोकः। शोकनाशकत्वाद् वा। यदाह —

"अशोकः शोकनाशश्च विचित्रः कर्णपूरकः"।

ऽर्थे वञ्चुलः, वेतसः स्पन्दनः अशोकश्च ॥

टीका० — वञ्चुलद्वयमशोके। अशोकतले तपस्यन्ती गौरी पूर्णमनोरथत्वादशोका जातेत्यतस्तरुरप्यशोकः ॥

समौ करकदाडिमौ ॥ ६४ ॥

क्षीर० — किरति कणान् करकः। दड्यते दाडिमः। आह —

"दाडिमो दालिमः सारकुट्टिमः फलषाडवः।
स्वाद्वम्लो रक्तबीजश्च करकः शुकवल्लभः" ॥

टीका० — करकद्वयं दाडिमे। 'दल विदारणे'। भावे घञ्। दालः।

---

१. 'गूढपु', २. 'ल्य' ख. पाठः. ३. 'डा' घ. पाठः. ४. 'डा' ग. क. घ. पाठः.

---

* 'सीधुग', § 'शीर्षके' इति धन्वन्तरिः।

अनेन निर्वृत्त इति दाडिमः। 'भावप्रत्ययान्तादिमच् वक्तव्यः' (वा० ४. ४. २०) इति इमप्। डलयोरेकत्वस्मरणम्।

"कान्ताङ्घ्रिदोहदोऽशोको दाडिमे फलषाडवः।
दाडिम्बसारपिण्डीरस्वाद्वम्लशुकवल्लभाः॥"

इति रभसः॥

चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः।

क्षीर०— नागप्रियाणि केसरवन्ति पुष्पाण्यस्य **नागकेसरः**। आह च—

"नागपुष्पो मतो नागः केसरो नागकेसरः।
चाम्पेयो नागकिञ्जल्कः करकं हेम काञ्चनम्"॥

टीका०— चाम्पेयचतुष्कं **नागकेसरे**। नागो हस्ती तन्नामा केसरो नागकेसरः। काञ्चनाह्वयः सुवर्णपर्यायनामकः॥

जया जयन्ती तर्कारी नादेयी वैजयन्तिका॥ ६५॥
श्रीपर्णमग्निमन्थः स्यात् कणिका गणिकारिका।
जयः

क्षीर०— जयति जया। अन्त्यो जय इति पुंसि। तर्कमियर्ति तर्कारी। वैजयन्ती केतुत्वात्। अग्निं मथ्नाति दीप्यमानत्वाद् अग्निमन्थः। अत एवाराणिकणाः सन्त्यस्याः कणिका। समूहमियर्ति गणिकारी। गणं तर्कं करोति वा। स्वार्थे कः। व्यर्थे नादेयी, जलजम्बूः जलवेतसः तर्कारी च। लिङ्गसाङ्कर्येण जयेत्यर्थे जयन्तं श्रीपर्णमिति चापपाठेन श्रीवर्णमाहुः। तद् न, वनौषधिवर्गे तस्यानादृतत्वात्। यदिन्दुः—

"अग्निमन्थोऽग्निमथनस्तर्कार्यरणिको जयः।
अरणिः कणिकश्चैव तपनो वैजयन्तिकः॥"

---

१. 'न्यादृशत्व' ग. घ. ङ. पाठः.

चन्द्रनन्दनश्चाह —

"अग्निमन्थोऽग्निमथनस्तर्कारी वैजयन्तिकः।
वह्निमन्थोऽरणिः केतुर्जयः पावकमन्थनः॥
तर्कार्या वैजयन्ती च वह्निर्निर्मथनी ज(या? यः)।
अरणिका जयन्ती च जया च विजयावहा"॥

टीका० — जयापञ्चकं जयन्त्याम्। जयेति पचादिः[1]। जयन्त उक्तः। ङीषि[2] जयन्ती। श्रीपर्णपञ्चकमग्निमन्थे। अग्नये मथ्यत इति अग्निमन्थः। कर्मणि घञ्। यतोऽस्मिन् घृष्यमाणे शीघ्रमग्निरुत्पद्यते॥

अथ कुटजः शक्रो वत्सको गिरिमल्लिका॥ ६६॥

क्षीर० — कुटिलो[3] जायते[4] कुटजः। शक्रः इन्द्रवृक्षः। वस्ते त्वचं वत्सकः। आह च —

*"कूटजः कुटजः कोटी[5] वत्सको गिरिमल्लिका।
कलिङ्गो मल्लिकापुष्प इन्द्रवृक्षोऽथ वृक्षकः"॥

टीका० — कुटजचतुष्कं कुटिज[6] इति ख्याते॥

एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले।

क्षीर०—कलिङ्गयति कलिङ्गम्। कलिङ्गदेशजं वा। अत एव कालिङ्गः कालिङ्गी च। इन्द्रयवं कुटजफलम्। भद्रयवं कुटजबीजम्। यदाह—

†"फलानि तस्येन्द्रयवा बीजं भद्रयवास्तथा"॥

---

१. 'दिः। ङी' घ. ङ. छ. पाठः. २. 'पि' घ. ङ. छ. पाठः. ३. 'टो जा' घ. पाठः. ४. 'ले' ग. ङ. पाठः. ५. 'का' ख. पाठः. ६. 'च' च. ज. पाठः.

---

* 'कुटजः कौटजः कौटो वा',

† "फलानि तस्येन्द्रयवाः शक्राह्वाः स्युः कलिङ्गकाः।
तथा वत्सकबीजानि प्रोक्ता भद्रयवास्तथा॥"

इति धन्वन्तरिः।

टीका० — कुटजफले कलिङ्गत्रयम् ।

"पूतीकरजधूम्याटदेशभेदे पुमान् भवेत् ।
कुटजस्य फले क्लीबं कलिङ्गं स्त्री तु योषिति ॥"

इति रभसः । अपरेणापि रूपभेदेन क्लीबमुक्तम् । 'कलिङ्गेन्द्रयवः पुमान्' इति तु स्त्रीकाण्डेऽमरमाला ॥

कृष्णपाकफलाविघ्नसुषेणाः करमर्दके ॥ ६७ ॥

क्षीर० — करिमुखाभः[1] करेण मृद्यते करमर्दः[2] । कराम्लोऽपि ॥

टीका० — कृष्णपाकफलचतुष्कं करन्द[3] इति ख्याते । कृष्णपाकं फलमस्येति ।

"कृष्णपाकफलः कृष्णफलपाकोऽवनालकः ।
कृष्णपाकः पाककृष्णः फलकृष्णो वरालकः ॥
पाककृष्णफलः पाकफलकृष्णः कराम्बुकः ।
फलपाकः पाकफलः पोलः कृष्णफलोऽवशः ॥"

इति शब्दार्णवः । अविघ्नो ह्रस्वादिः । सुष्ठु सिनोतीति सुषेणः । 'एति संज्ञायामगात्' (८. ३. ९९) इत्येकारपरस्य[4] सकारस्य षत्वम् ॥

कालस्कन्धस्तमालः स्यात् तापिञ्छोऽपि

क्षीर० — प्राहुः —

"कालस्कन्धस्तिन्दुकः श्यामखदिरस्तमालश्च ।"

ताम्यतीति तमालः । तापिनं छादयतीति तापिञ्छः ॥

टीका० — कालस्कन्धत्रयं तमाले । 'तमु काङ्क्षायाम्' । त*मिबिडिमृणि — (उ० १. १२३) इत्यादिना कालन् । तमालः ॥

---

१. 'ति' क. ख. झ. पाठः. २. 'पि' ग. घ. ङ., 'लि' ख. पाठः. ३ 'रमन्द' घ. ङ. च. छ. झ. पाठः. ४. 'ति प' क. ख. झ. पाठः.

* 'मिविशिबि' इति मुद्रितोणादिपाठः ।

अथ सिन्दुकः।

सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ॥ ६८ ॥

क्षीर० — स्यन्दते सिन्दुकः। स्यन्दं वृणोति सिन्दुवारः। इन्द्रस्य सुरसः, दिव्य इत्यर्थः। अत एवेन्द्राणी। निष्क्रान्ता गुण्डाद् वेष्टनाद् निर्गुण्डी। आह च —

"सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः।
नीलपुष्पः शीतसहो निर्गुण्डी तिलसन्धिकः" ॥

टीका० — सिन्दुवारपञ्चकं निसुन्दार इति ख्याते। इन्द्राणिकेति स्वार्थे कन् ॥

वेणी गरागरी देवताडो जीमूत इत्यपि।

क्षीर० — वेणीव वेणी। गरमागिरति गरागरी। मूषिकविषघ्नीत्वात्। ताडयति कर्णं ताडः मुख्यत्वाद् देवताडो राजताडवत्। जीमूतो ह्लादकत्वात्। आह च —

"जीमूतको देवताडो वृत्तकोशो गरागरी।
प्रोक्ताखुविषहा वेणी देव*ताडी च ताडकः" ॥

टीका० — वेणीपञ्चकं शिरीषपत्राकारपत्रे देवेंता इति ख्याते।

"देवताडे खरा तीक्ष्णे त्रिषु स्याद् गर्दभे पुमान्"

इति रभसः। केचित् खरागरीत्येकं नाम वर्णयन्ति। जीमूत उक्तः ॥

श्रीहस्तिनी तु भूरुण्डी

क्षीर० — भुवि रोहति भूरुण्डी हस्तिकर्णपत्रः शाकविशेषः। इतो धर्तूरान्तानि पुष्पाणि ॥

---

१. 'रितः।' ग. घ. ङ. पाठः. २. 'नी' ख. पाठः. ३. 'डी' क. पाठः. ४ 'व इ' ज., 'वन इ' च., 'वत इ' क. ख. झ. पाठः.

---

*'दाली च ताडका' इति धन्वन्तरिः।

टीका० — श्रीहस्तिनीद्वयं बकुलसंस्थानलोहितपुष्पे माषक्षेत्रादिजे सिरिहण्डीति[1] ख्याते। भूरुण्डी दीर्घादिः ॥

तृणशूल्यं तु मल्लिका ॥ ६९ ॥

भूपदी शीतभीरुश्च

क्षीर०—तृणशूले गुल्मे साधु तृणशूल्यम्। मल्यते मूर्ध्नि मल्लिका। भुवि पदमस्या भूपदी। शीतभीरुर्ग्रैष्मिकत्वात्। आह च—

"मल्लिका शीतभीरुश्च मदयन्ती प्रमोदिनी।
मदनीया गवाक्षी च भूपद्मष्टापदी तथा[2]" ॥

टीका० — तृणशूल्यादिचतुष्कं मल्लिकायाम्। सर्वैर्धार्यत इति मल्लिका। 'मल मल्ल धारणे'। क्वुन्॥

सैवास्फोता[3] वनोद्भवा।

क्षीर०—आस्फोटत्यास्फोता[4]। गिरिमल्लिका[5] ॥

टीका०—वनोद्भूतायां मल्लिकायामास्फोता।

"आस्फोता विष्णुकान्तायां वनमल्लयर्कपर्णयोः"

इति दीर्घादौ रभसः ॥

शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ॥ ७० ॥

क्षीर०—शेरते शेफाः अलयः अस्यां शेफालिका। सुष्ठु वहत्यामोदं सुवहा। नीलवर्णा। आह च—

"शेफालि[6]का तु निर्गुण्डी *यमको नीलमञ्जरी।"

---

१. 'हि' ङ. छ. पाठः. २. 'था सोऽपि विचिकिलं। सै' ख. घ. ङ. पाठः. ३. 'ल्या च' घ. ङ. छ.. 'न्याच' क. ख. ग. पाठः. ४. 'टा', ५. 'स्फु', ६. 'टा' ख. पाठः. ७. 'का च।' क. पाठः.

† 'कान्ता नि', * 'बनजा नी' इति धन्वन्तरिः।

त्र्यर्थं सुवहा, रास्ना शेफालिका गन्धनाकुली च ॥

टीका०—शेफालिकाचतुष्कं कृष्णवर्णपुष्पायां शेफालिकायाम्। शेतेः बाहुलकः फालन्। ततो गौरादिङीष्। कनादिः। शेफालिका ॥

सितासौ श्वेतसुरसा भूतवेशी

क्षीर०—भूतानि विशत्याह्लादयति भूतवेशी ॥

टीका०—श्वेतसुरसादिद्वयं श्वेतपुष्पायां शेफालिकायाम् ॥

अथ मागधी।

गणिका यूथिकाम्बष्ठा

क्षीर०—मगधदेशे भवा मागधी। गणिका चित्ताकर्षणात्। यूथो जालकमस्त्यस्या[1] यूथिका। अम्बे शब्दे तिष्ठत्यम्बष्ठा। आह च—

"यूथिका *चालिपुष्पा च पुण्यगन्धा गुणोज्ज्वला।
गणिका चारु‡मोटा च शिखण्डी §च" ॥

टीका०—मागधीचतुष्कं यूथिकायाम्[2]। प्रायो मगधे भवतीति मागधी। यूथिनस्ति। 'यूथादण' इति गौरे। शार्ङ्गधरस्तु। ततो गौरादिङीषादि:। अम्ब शब्दे तिष्ठति। 'अम्बाम्बगोभूमि—' (८. ३. ९७) इत्यादिना षत्वम्॥

सा पीता हेमपुष्पिका ॥ ७१ ॥

क्षीर०—आह च—

"सुवर्णयूथी हरिणी पीतिका पीतयूथिका।"

त्र्यर्थे हेमपुष्पी, बिम्बी[3] दुःस्पर्शा $हेमयूथिका च ॥

---

१. 'तोऽस्य' क. ग. घ. ङ. पाठः. २ 'मागधिका' घ. ङ. छ. पाठः. ३. 'शि' क. ग. घ. ङ. पाठः.

---

* 'चारुपुष्पा तु पुष्पगन्धा', ‡ 'मोदा च', § 'स्व', $ 'पीतयू' इति धन्वन्तरिः।

टीका०—यूथिकैव पीता हेमपुष्पिका॥

अतिमुक्तः पुण्ड्रकः स्याद् वासन्ती माधवी लता।

क्षीर०—अतिक्रान्तो मुक्तान् विरक्तान् अतिमुक्तः। पुण्ड्रदेशे भवः पुण्ड्रकः। मण्डकोऽयं निघण्टुषु। मधौ वसन्ते भवा माधवी। आह च—

"*अतिमुक्तो माधवी च सुवसन्तधराश्रयः।
अधियुक्तः कामुकश्च मण्डको भ्रमरोत्सवः"॥

टीका०—अतिमुक्तपञ्चकम् अद्भङ्ग इति ख्याते। 'मडि भूषायाम्'। 'पुडि चे'त्येके। 'स्फायितञ्चिवञ्चि—' (उ० २. १३) इत्यादिना बाहुलको रक्। पुण्ड्रकः। वसन्ते पुष्प्यति वासन्ती। 'कालात् साधुपुष्प्यत्पच्यमानेषु' (४. ३. ४३) इत्यण्। एवं मधौ चैत्रे माधवे वैशाखे वा पुष्प्यतीति माधवी। लता उक्ता। नामे च पृथगेव। अत एवातिमुक्तकच्छन्नो मण्डपो लतामण्डप इति प्रसिद्धिः॥

सुमना मालती जातिः

क्षीर०—सुष्ठु मन्यते सुमनाः, मनोज्ञत्वात्। मालयत्यामोदैर्मालती। जायते जातिः। आह च—

"जातिर्मनोज्ञा सुमना राजपुत्री प्रियंवदा।
मालती ह्यगन्धा च पौरिका कोलभाविनी"॥

---

१. 'वासन्ती धारकाश्रयः' ख. घ. ङ. पाठः. २. 'दक इ' ज. पाठः. ३. 'नार', ४. 'म पृ' घ. ङ. छ. पाठः. ५. 'तेऽनया जा' ग. ञ. पाठः ६. 'धौतिका' ख. ग. घ. ञ. पाठः.

---

* "अतिमुक्तः कामुकश्च मण्डनो भ्रमरोत्सवः।
अधिमुक्तो माधवी च सुवसन्तः पराश्रयः॥"
इति धन्वन्तरिः।

टीका० — सुमनाख्यं जात्याम् । सुमनाः सान्ता स्त्रीलिङ्गा च ॥

सप्तला नवमालिका ॥ ७२ ॥

क्षीर०—सप्त मनोबुद्ध्यन्तानीन्द्रियाणि लाति सप्तला, सप्तदलेति वा । **नवा** स्तुत्या मालास्याः नवमालिका ॥

टीका० — सप्तलाद्वयं नेवालीति ख्यातायाम् ॥

माघ्यं कुन्दं

क्षीर०— माघे मासि भवं माघ्यम् । कुं द्यति कुन्दम् । 'कुन्द' इति **माला** ॥

टीका० — माघ्यद्वयं कुन्दे । माघे भवो माघ्यः । दिगादियत् । 'कु शब्दे' । 'अन्दादयश्च' (उ० ४.९९) इति दन्नुमागमगुणाभावाः । कुन्दः । 'कुन्दो माघ्यः प्रकीर्तित' इति पुंस्काण्डे अमरमाला । 'कुन्दं वा ना स्मृतम्' इति तु व्याडिः ॥

रक्तकस्तु बन्धूको बन्धुजीवकः ।

क्षीर० — बध्नाति चित्तं बन्धूकः । बन्धुजीवकः ॥

टीका० — रक्तकत्रयं बाम्बुलीति[1] ख्याते । रक्तपुष्पतया रक्तकः । 'बन्ध बन्धने' । 'उल्लकादयश्च' (उ० ४. ४१) इत्यूकन् । बन्धूकः । क्वचिद् बन्धुल इति पाठः । तथा च — 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९१) ॥

सहा कुमारी तरणिः

क्षीर० — सहते परिमलं सहा । कुं भूमिष्ठान् मारयति कुमारी । कुत्सितो मारोऽस्यामिति वा कुमारी । (जनान् नयति वा । कुमारयन्त्यस्यां कुमारी ?) । तरन्त्यनया दुःखं तरणिः । आह च—

"कुप्यर्कस्तरणिर्वल्ली[2] कुमार्यलिकुलप्रिया"

---

१. 'त' ज. पाठः. २. 'क' ख. ग. ङ. पाठः

त्र्यर्थे सहा, मुद्गपर्णी वचा तरुणिश्च ॥

टीका० — सहात्रयं कुमार्याम् । सहा दन्त्यसा ।

"द्युमणौ तरणिः पुंसि कुमारीनौकयोः स्त्रियाम्" ॥

अम्लानस्तु महासहा ॥ ७३ ॥

क्षीर० — कुरण्डो हि म्लानिं न गच्छत्यम्लानः । वात्स्यायनोऽत एव कूर्चकस्थाने कुरण्डकमालश्चेत्याह । महती विमर्दसहा महासहा । यद्माला — 'अम्लानस्तु कुरण्डकः' ॥

टीका० — अम्लानद्वयम् आमिराल इति ख्याते । न म्लानं पुष्पमस्येत्यम्लानः । महासहेतिच्छेदः ॥

तत्र शोणे कुरवकस्तत्र पीते कुरण्टकः ।

क्षीर०—तत्र अम्लाने । कौ रूयते (इ)त्यर्थे कुरवकः । कौ रूयते कुरण्टकः । कैरञ्जकोऽपि । आह च —

"अम्बितानोऽपरिम्लानस्तथैवाम्रातकः स्मृतः ।
रक्तपुष्पः कुरवकः पीतपुष्पः कुरण्टकः ॥ "

किङ्किरातोऽसौ ॥

टीका०— लोहितपुष्पे अम्लाने कुरुवकः । कुरुवकरेफो न निरुकारः । कथं 'कुरवकारवका रणतां दधुः' इति रघुः । कुरवकस्तिलक इति ख्याते पुष्पवृक्षभेदे निरुकारः । एतत्पुष्पविषयमेव यमकमिदम् । तथा च रत्नमाला —

"कुरवकः शुक्लपुष्पस्तिलकः कुलकोऽपि च"

इति । तस्मिन्नेवाम्लाने पीतपुष्पे कुरण्टकः ॥

नीला झिण्टी द्वयोर्बाणा दासी चार्तगलश्च सा ॥ ७४ ॥

---

१. 'रा इ' ज. पाठः. २. 'कुरण्टको' क. ख. पाठः.

क्षीर०—नीलपुष्पा। झिण्टी शुष्का (झिः[2] झृ)णाति। बाणा द्विलिङ्गः। 'बण शब्दे'। दस्यति क्षीयते दासी। आर्तः क्षीणः गलः इत्यार्तगलः॥

टीका०—बाणात्रयं कृष्णझिण्टिकायाम्। दासी दन्त्यसा। अर्तगलो ह्रस्वादिः॥

सैरेयकस्तु झिण्टी स्यात् तस्मिन् कुरवकोऽरुणे।

क्षीर०—सैरेयभवा सैरेयाख्या झिण्टी। अरुणपुष्पा चेत् कुरवकोऽसौ॥

टीका०—सैरीयकद्वयं सामान्यझिण्टिकायाम्। लोहितझिण्ट्यां कुरुवकः।

"शोणाम्लानः कुरुवकोऽरुणा पीता च झिण्डिका"

इति रुद्रः॥

पीता कुरण्टको झिण्टी तस्मिन् सहचरी द्वयोः॥ ७५॥

क्षीर०—सहचराख्या झिण्टी पीतपुष्पा। झिण्टी पीतपुष्पा चेत्[3] कुरवकोऽसौ। आह च—

"सैरेयकः सहचरः सैरेयश्च महाचरः।
पीतो रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत्॥
पीतः कुरण्टको ज्ञेयो रक्तः कुरवकः स्मृतः।
नीलश्चार्तगलो दासी बाण ओदनपाक्यपि"॥

टीका०—पीतझिण्ट्यां कुरण्टकद्वयम्॥

***भद्रपुष्पं जपा**

---

१. 'ण्टी झायतीति' क. घ. ङ. पाठः. २. 'झं याति' ग. पाठः. ३. 'दः कु' क. ग. घ. पाठः. ४. 'रु' क. ख. पाठः.

---

* 'ओड्रपुष्पं जपा' इत्येव पाठं भानुजिदीक्षितोऽनुपादत्ते।

क्षीर० — भद्रदेशे भवं पुष्पम् । जपतीव जपा ॥

टीका० — ओड्रपुष्पद्वयम् ओड्र[1] । जुः सौत्रः । अच्टापौ । जवा चवर्गादिः । 'जवायां तु जपा स्त्रियामि'ति धर्मः । काश्मीरवल्लभदेवरचितसुभाषितावल्यामपि पकारान्तश्लेषः । तथा च —

"मदनमवलोक्य निष्फलमनित्यतामपि बन्धुजीवानाम् ।
वनमुपगम्य भ्रमरः सम्प्रति जातो जपासक्तः ॥ "

इति ॥

वज्रपुष्पं पुष्पं तिलस्य यत् ।

क्षीर० — वज्रमिव विदारकं वज्रपुष्पम् ॥

टीका० — वज्रपुष्पं तिलपुष्पे । 'तिलपुष्पे वज्रमस्त्री' । अतो वज्रनाम पुष्पं वज्रपुष्पम् ॥

प्रतिहासशतप्रासचण्डातहयमारकाः ॥ ७६ ॥

करवीरे

क्षीर० — प्रतीपोऽश्वघ्नत्वाद् हासो विकासोऽस्य प्रतिहासकः । शतं बहूनि प्रासाः कुन्ता इव पुष्पाण्यस्य शतप्रासः । श्वेतश्चासौ । चण्डमतति तीक्ष्णत्वात् चण्डातः । रक्तोऽसौ । (करवीर इव ?) मारकत्वात् कराः कान्तारा(?)वीरा अत्रेति । आह च —

"शतकुन्तः श्वेतपुष्पः प्रतीहासोऽश्वमारकः ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥
चण्डातको गुल्मकश्च प्रचण्डः करवीरकः" ॥

टीका० — प्रतिहासपञ्चकं करवीरे । 'उपसर्गस्य घञि —'(६. ३. १२२) इति दीर्घत्वे प्रतीहासोऽपि ॥

---

१. 'रुद्रपु' घ. पाठः २. 'ड्र' ङ. छ. पाठः.

करीरे तु ककरग्रन्थिलावुभौ।

क्षीर०—करिणमीरयति कण्टकैः करीरो मरुवृक्षः। क्रेति करोति ककरः। तीक्ष्णत्वात्। आह च—

"करीरं गूढपत्रं च शाकपत्रं मृदूफलम्।
ग्रन्थिलं तीक्ष्णसारं च ककरं तीक्ष्णकण्टकम्"॥

टीका०—मरुदेशजे उष्ट्रभक्ष्ये करीरत्रयम्। 'कृ विक्षेपे'। '¶कृकृशृ-शौटिभ्य ईरन्' (उ० ४.३०)। करीरः। सिध्मादिलचि ग्रन्थिलः॥

उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः॥ ७७॥

मातुलो मदनश्च

क्षीर०—उन्मत्त उन्मादकरत्वात्। धूर्वति हिनस्ति धूर्तः। अत एव कितवः। धर्यति धत्तूरः। धात्तूरमिति प्राच्याः। काञ्चनाह्वयः भुक्तेऽस्मिन् हेमवर्णपृथ्वीदर्शनात्। आह चेन्दुः—'स ज्ञेयो हमनामभिः'। नास्ति तुलाऽस्येति मातुलः। मा प्रतिषेधे। मदयति मदनः। आह च—

"धत्तू*रकः स्मृतो धूर्तो ‡देविता कितवः शठः।
उन्मत्तको मदनकः †सुनीलः कनकस्तथा"॥

टीका०—उन्मत्तसप्तकं धूस्तूरे। उन्मत्त इति। 'तत् करोति—' (वा० ३. १. २६) इति णिच्। पचाद्यच्।

---

१. 'रु' ख. ग. घ. ङ. पाठः. २. 'गू' घ. ङ. च. छ. ज. पाठः. ३. 'कौ' क. पाठः. ४. 'धरय' ख. पाठः. ५. 'तूं' ग. घ. ङ. पाठः. ६. 'तूं' क. ग. घ. ङ. पाठः. ७. 'प्रतिप्रद' ख. ङ. पाठः. ८. 'नत्वात्' क. ङ. पाठः. ९. 'ल्यो' क. ग. घ. पाठः.

¶ 'कृशृपृकटिपटिशौटिभ्यः' इति मुद्रितोणादिपाठः। * 'रः कनको धू', ‡ 'देवता', † 'कालिश्च हरवल्लभः॥' इति धन्वन्तरिः।

"धूस्तुरस्तु पुरीसोह्या (?) धूस्तूरः कनकाह्वयः ।
धुस्तूरो मातुलश्चास्य फले मातुलपुत्रकः ॥"

इति शब्दार्णवः । कनकाह्वयः सुवर्णपर्यायनामा । मदयतीति मदनः ॥

अस्य फले मातुलपुत्रकः ।

क्षीर०— यतो धन्वन्तरिः मातुलं धत्तूरं मातुलपुत्रकं च तत्फलमाह ॥

टीका०— धुस्तूरफले मातुलपुत्रकः ॥

फलपूरो बीजपूरो रुचको मातुलुङ्गके ॥ ७८ ॥

क्षीर०— रोचते रुचकः । आह च—

"फलपूरो बीजपूरः केसरी बीजपूरकः ।
बीजकः केसराम्लश्च मातुलुङ्गस्तु पूरकः ॥"

अनेकार्थे—

"सौवर्चलं मातुलुङ्गं शिला चन्दनपेषणी ।
ग्रीवाभरणकं चैषु चतुर्षु रुचकं स्मृतम्" ॥

टीका०— फलपूरद्वयं बीजपूर इति ख्याते । फलं पूरयतीति फलपूरः । 'कर्मण्यण्' (३. २. १) । रुचकद्वयं मातुलुङ्गके । रुचकः क्वुन्नन्तः ॥

समीरणो मरुवकः प्रस्थपुष्पः फणिर्जकः ।
जम्बीरोऽपि

क्षीर०— समीरयत्यामोदं समीरणः । मरौ वङ्कति मरुवकः । प्रस्थे सानौ पुष्प्यति जाङ्गलत्वात् प्रस्थपुष्पः । खरत्वेन फणाभपत्रत्वाद् देश्यः फणिर्जकः । जम्ब्यते जम्बीरः । जम्भीरोऽपि । आह च—

---

१. 'ल्मलं स' क. ग. पाठः. २. 'त्वात् फ' ग. पाठः.

§ 'पुरीसोह्या' इति पाठः भाति । अस्य पदस्य स्थाने 'पुण्डरीक्षो' (?) इति पदं धुत्तूरशब्दव्युत्पादने भानुजिदीक्षितैरेव पठ्यते । ¶ 'ङ्गः सुपूरकः' इति धन्वन्तरिः ।

"जम्बीरः खरपत्रश्च फणी चोक्तः *फणिर्जकः ।
‡मरूवको मरुवको †मरुन्मरुवकस्तथा" ॥

टीका० — समीरणपञ्चकं स्वल्पपत्रे पर्णासे । तदुक्तं — 'स्वल्पपत्रः फणिर्जकः' इति ॥

अथ पर्णासे कठिञ्जरकुठेरकौ ॥ ७९ ॥

क्षीर० — पर्णान्यस्यति पर्णासः । कठिनं जरयति कठिञ्जरः । कुठति कुठेरः कृष्णार्जकाख्यः ॥

टीका० — पर्णासत्रयं सामान्यपर्णासे । पर्णमस्यतीति पर्णासो दन्त्यसः ॥

सितेऽर्जकोऽत्र

क्षीर० — शुक्लकुठेरोऽर्जकः, अर्जयतीति । आह च —

"कुठेरकस्तु वैकुण्ठः क्षुद्रपत्रोऽर्जकः[1] सितः ।
वटपत्रः कुठेरोऽन्यः पर्णासो बिल्वगन्धकः" ॥

टीका० — श्वेतपर्णासे अर्जकः । 'अर्जकः श्वेतपर्णासे' इत्यमरमाला ॥

पाठी तु चित्रको वह्निसंज्ञकः ।

क्षीर० — पाठोऽस्यास्तीति पाठी । चेतश्चित् चितो ज(तू?न्तू) न् त्रायते चित्रकः । नानारूपो वा । वह्निपर्यायो दीपनत्वात् । आह च —

"चित्रको दहनो व्यालः पाठीनो दारुणोऽग्निकः[2] ।
ज्योतिष्कवल्लरी वह्निः पाठी"

इति ॥

---

१. 'तौ जाय' क. ग. घ. पाठः. २. 'गः' क. ग. ङ. पाठः.

---

* 'फणिज्जकः', ‡ 'मरुत्तको', † 'मरुर्मरु', ℞ 'र्जकस्तथा ।' इति धन्वन्तरिः ।

टीका० — पाठित्रयं चित्रके । पाठी नान्तः । वह्निसंज्ञको वह्निपर्यायनामकः ॥

अर्काह्ववसुकास्फोटगणरूपविकीरणाः ॥ ८० ॥

मन्दारश्चार्कपर्णे

क्षीर० — अर्काह्वोऽर्कपर्यायः। वसत्यस्मिंस्तेजो वसुकः। आस्फुटत्यास्फोटः। गणो बहवो रूपाण्यस्य गणरूपः। विकिरति पुष्पाणि विकीरणः। मन्दमियर्तीति मन्दारः। मन्दा अरा अस्य वा। अर्कनिभानि पर्णान्यस्यार्कपर्णः ॥

टीका० — अर्काह्वसप्तकमर्कपर्णे । अर्काह्वः सूर्यनामकः । आस्फोतो दीर्घादिः । 'गणरूपो द्वावि'ति जातरूपः ॥

अत्र शुक्लेऽलर्कप्रतापसौ ।

क्षीर० — शुक्लोऽर्कोऽलर्कः, अलयति भूषयतीति । प्रतापं स्यति प्रतापसः, प्रकृष्टास्तापसा येन वा । आह च —

"अर्कः सूर्याह्वयः पुष्पी * विच्छ्लूरश्च विकीरणः ।
जम्भलः क्षीरपर्णः स्यादास्फोटो भास्करो रविः ॥

राजार्को वसुकोऽ‡प्यर्को मन्दारो गणरूपकः ।
एकाष्ठीलः सदापुष्पी स चालर्कः प्रता†पसः" ॥

टीका० — अलर्कद्विकं[२] श्वेतार्कपर्णे ॥

शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः ॥ ८१ ॥

क्षीर०—शिवप्रिया मल्लिका शिवमल्ली । उक्तं च—

---

१. 'ञ्जू' क., 'जू' घ. पाठः. २. 'द्वयं श्वे' ङ. छ. पाठः.

---

* 'विक्षीरश्च', ‡ 'त्यर्को', † 'पनः' इति धन्वन्तरिः ।

"बुकं वेणं[1] सधे[2]त्तूरं सुमनाः पाटला तथा।
पद्ममुत्पल(गो?कं) सूर्य[3]मष्टौ पुष्पाणि शङ्करे ॥"

पशुपतेः प्रियोऽयमिति पाशुपतः। एकाष्ठीला मज्जा अस्त्यस्य। बाँति बुकः। वक इति प्राच्याः। वस्ते छादयति वसुः। आह (च)—

*"वसो वसुक इत्युक्तः शिवाङ्कः शिवशेखरः।
महापाशुपतश्चैव सुव्रतः शिवमल्लिका" ॥

टीका०—शिवमल्लिकापञ्चकं बुकपुष्पे। शिवेन मल्लयते धार्यत इति शिवमल्ली। 'अकर्तरि च—'(३. ३. १९) इति घञ्। 'पिप्पल्यादयश्च' (ग० ४. १. ४१) इति ङीप्। पशुपतेरयं प्रियः पाशुपतः। 'अश्वपत्यादिभ्यश्च' (४. १. ८४) इत्यण्॥

वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि[6]।

क्षीर०—जन्मवृक्षमत्ति नाशयति वृक्षादनी। वृक्षे रोहति वृक्षरुहेति वनेचराः। आह च—

‡"वन्दाका स्याद् वृक्षरुहा शैखरी †कामवृक्षकः।
वृक्षादनी §नगरुहा कामन्यङ्घ्रिपरोहिणी" ॥

=यर्थे जीवन्ती, वृक्षरुहा गुडूची शाकविशेषश्च॥

टीका०—वन्दाचतुष्कं वृक्षोपरि जाते विजातीये पल्लवे। वन्देति। 'वदि अभिवादनस्तुत्योः'। अच्। इयं जायमाना वृक्षम् अर्दयतीति वृक्षादनी।

---

१. 'णुं', २. 'प क. ग. ङ. पाठः. ३. 'धू' क. पाठः. ४. 'वे' क. ग. ङ. पाठः. ५. 'ब' क. ख. घ. ज. पाठः. ६. 'पि वृ' ख. पाठः. ७. 'म' क. ख. घ., 'आदय' ङ. छ. पाठः.

---

* "वसुकोऽथ वसुः शैवो बसोऽथ शिवमल्लिका।
पाशुपतः शिवमतः सुरेष्टः शिवशेखरः॥",

‡ 'वन्दका', † 'मरुपका', § 'तरुरुहा कामिनी पद्मरूपिणी' इति धन्वन्तरिः।

वृक्षरुहेति । मूलविभुजादित्वात् कः । जीवन्तीति । जीवतेः 'रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि' (उ० ३.१२७) इति झच् । 'षिद्गौरादिभ्यश्च' (४.१.४१) इति ङीष् ॥

वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता ॥ ८२ ॥

जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।

क्षीर० — वत्सानामदनं वत्सादनी । छिन्ना रोहति छिन्नरुहा । गुडति रक्षति गुडूची । तन्त्रयते धारयत्यायुस्तन्त्रिका । जीवयति जीवन्तिका । सोमवल्ली अमृतत्वात् । मधूनि पर्णान्यस्या मधुपर्णी । आह च—

"गुडूच्यमृतवल्ली च छिन्ना छिन्नरुहाऽमृता ।
छिन्नोद्भवामृतलता धारा वत्सादनी स्मृता ॥
सैवोक्ता सोमवल्ली तु कुण्डली चक्रलक्षणा ।
जीवन्ती मधुपर्णी तु तन्त्रिका देवनिर्मिता ॥"

व्यर्थे विशल्या, मङ्गली दन्ती गुडूची च ॥

टीका० — इतः प्रभृति पिप्पलीपर्यन्तं श्लोकेन नाम । वत्सादनीनवकं गुडूच्याम् । छिन्नापि रोहतीति छिन्नरुहा । इगुपधलक्षणः कः । 'ङ्याप्पोः —'(६.३.६३) इत्यादिना ह्रस्वत्वम् । न म्रियत इत्यमृता । मधुवत् पर्णमस्या इति मधुपर्णी ॥

मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ॥ ८३ ॥

मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।

क्षीर० — मूर्वति बध्नाति मूर्वा । अत एवास्या विकारो मौर्वी । मधुनो रसोऽस्या मधुरसा । मुरति संवेष्टयति मोरटा । तेजयत्यग्निं तेजनी । स्रवति रसं स्रवा । स्रुवेत्येके । मधूलिका मधूयतीति । मधुनः श्रेणी[2] पङ्क्तिः मधुश्रेणी । गोकर्णी गोकर्णाभपत्रा । 'पाकर्ण —' (४.

---

१. 'रस धारा', २. 'णीव म' क. ग. घ. ङ. पाठः.

१. ६४) इति ङीष्। पीलोरिव पर्णान्यस्याः पीलुपर्णी। आह च—

"मूर्वा मधुरसा देवी पृथुत्वक् पीलुपर्ण्यपि।
रेवश्रेणी स्वादुरसा स्निग्धपर्णी च मोरटा॥"

द्व्यर्थे तेजनी, तेजोवती मूर्वा च। आहेन्दुः—

"स्निग्धच्छदा मधुश्रेणी पृथुत्वग् रसवाहिनी।
रेवश्रेणी मधुमती सुरङ्गी द्विजमेखला॥
आतोलनी योगवहा मोरटी च मधुस्रवा।
सुघोषिका स्निग्धपर्णी गोकर्णी सा मधूलिका॥
पीलुपर्णी कर्मकरी तथा मधुमतीति च।"॥

टीका०—मूर्वादशकं धनुर्गुणोपयुक्तायां मूर्वायाम्। मूर्वेति। 'मुर्वी बन्धने'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। 'उपधायां च' (८. २. ७८) इति दीर्घः। यद्वा 'मृ हिंसायाम्'। 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (उ० १. १५७) इति बाहुलकः क्वन्। 'उदोष्ठ्यपूर्वस्य' (७. १. १०२) इत्युः, रपरः। 'र्वोरुपधाया दीर्घ इकः' (८. २. ७६) इति वर्तमाने 'हलि च'(८. २. ७७) इति दीर्घः। टाप्। मूर्वाविकारतयैव ज्या मौर्वीत्युच्यते। 'मुर संवेष्टने' इत्यतो वा मौर्वी। देवी गौरादिः। मोरटेति। 'मुर संवेष्टने'। 'शकादिभ्योऽटन्' (उ० ४. ८२) स्रुवतीति स्रुवा। क्वन्। धनुःश्रेणीत्येकं नाम॥

पाठाम्बष्ठा विद्धकर्णी स्थापनी भेयसी रसा॥ ८४॥
एकाष्ठीला पापचेली प्राचीना वनतिक्तका।

क्षीर०—पठ्यते पाठा। विद्धौ कर्णौ यया विद्धकर्णी। शास्त्रे श्रूयमाणत्वात्। स्थापनी वास्तिकर्मोपयोग्या। रस्यते रसा। पापचेली प्रै-

---

१. 'थक्त्वक्' क. ख. घ. पाठः. २. 'थक्त्व', ३. 'खोषिता स्नि' ख. पाठः. ४. 'वृकत्वा' ख. घ. पाठः., 'प्रतीक' क. पाठः.

§ 'थक्पर्णी त्रिपर्ण्यपि। देवश्रेणी' इति धन्वन्तरिः।

कीर्णत्वात् । प्राचि भवा प्राचीना । वने तिक्तरसा वनतिक्तका । आह च—

"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
*[1]प्रतीका[2] वनतिक्ता वा पापिका स्थापनी वृ[3]की ॥"

त्र्यर्थे रसा, रास्ना सल्लकी पाठा च ॥

टीका०— पाठादशकं कर्णविद्ध्याम् । पाठा घञन्ता ॥

कटुः कटुम्भराशोका रोहिणी कटुरोहिणी ॥ ८६ ॥

मत्स्यपित्ता कृष्णभेदा वक्राङ्गी शकुलादनी ।

क्षीर०— कटत्यावृणोति नलं कटुः कटुम्भरा । अशोका शोकहर्त्री । †रोहयत्यङ्गानि वाशोका रोहिणी (?) । मत्स्यपित्ता आस्वादात् । मत्स्यानां पित्तं जीवितं वा । कृष्णो भेदः छेदोऽस्याः कृष्णभेदा । शकुलाना(म)दनं शकुलादनी । आह च—

"कटुका ‡मत्स्यशकुला मत्स्यपित्ता च रोहिणी ।
कृष्णभेदा ¶दण्डरुहा रास्ना कटुकरोहिणी ॥
अशोक[4]रोहिणी तिक्ता §वक्राङ्गी शकुलादनी ।
कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी ॥"

त्र्यर्थे कटुम्भरा, कद्वङ्गः कटुका च ॥

टीका०— कट्वाद्यनवकं कटुरोहिण्याम् । कटुः स्त्री । अशोका ।

---

१. 'वृकती व' ख. पाठः. २. 'ता' ग. घ. ङ. पाठः. ३. 'प्र' क. ग. ङ. पाठः. ४. 'का' ख. पाठः.

---

* 'वरतिक्ता बृहत्तिक्ता पाठिका स्था' इति धन्वन्तरिः । † 'रोहयत्यङ्गानि रोहिणी । अशोकरोहिणीं वा' इति स्यात् । ‡ 'मत्स्यशकला', ¶ 'काण्डरुहा नाम्ना क', § 'चक्राङ्गी' इति धन्वन्तरिः ।

"अशोका कटुरोहिण्यामशोको वञ्जुलद्रुमे।
रोहिणी कटुरोहिण्यां तद्भेदे लोहितागरोः॥"
इति रभसः॥

आत्मगुप्ताजहाव्यण्डा कण्डुरा प्रावृषायणी॥ ८६॥
ऋश्यप्रोक्ता शूकशिम्बी कपिकच्छूश्च मर्कटी।

क्षीर०.— आत्मगुप्ता स्पर्शविषमत्वात्। न जहाति शूकानजहा। न विगताण्डा। कण्डुं राति कण्डुरा। प्रावृषि भवा प्रावृषायणी। ऋश्यैर्मृगैः प्रोक्ता दर्शिता ऋश्यप्रोक्ता। ऋषिभिरप्रोक्ता हेयत्वादित्येके। शूकप्रधाना सकण्टका शिम्बी यस्याः सा। कपीन् कशति कपिकच्छूः। मर्कटी कपिरोमफलत्वात्। आहेन्दुः—

"ऋश्यप्रोक्ता स्वयंगुप्ता कपिकच्छूश्च कण्डुरा।
आत्मगुप्ता दुरालम्भा लाङ्गली दुरभिग्रहा॥
अव्यण्डा पृषती गुप्ता कण्डूरा शूकशिम्बिका।
कपिरोमफला चैव समाक्षादवृषायणी(?)॥
ज्ञेया जाङ्गलिका सैव साजहा प्रावृषायणी।"॥

टीका०— आत्मगुप्तानवकं शूकशिम्ब्याम्। इयं स्पर्शात् कण्डूं जनयति। अतो लोकैः परिह्रियते। तेनात्मगुप्ता[1]। जटा अध्यण्डा एते द्वे नामनी। कण्डूं राति ददातीति कण्डुरा। 'इको ह्रस्वोऽङ्यो गालवस्य' (६.३.६१) इति ह्रस्वत्वम्। प्रावृषि जायत इति प्रावृषायणी। शूकसहिता शिम्बिः[2] शूकशिम्बिः[3]। दीर्घादि। "शश्वच्छशाङ्कशिशिरा अपि शूकशिम्बिः" इति शभेदः। कपिकच्छूः॥

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा॥ ८७॥
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि।

---

१. 'प्ता। आत्मरक्षितेत्यात्मगुप्ता। ज' क. ख. ज. पाठः. २. ३. 'म्बी' क. ख. ज. झ. पाठः.

क्षीर० — चित्रा नैकवर्णपत्रा । न्यग् रोहति रुणद्धि वा बहुमूलत्वाद् न्यग्रोधी । द्रवतीति द्रवन्ती । शं वृणोति शम्बरी । वर्षति वृणोति वा वृषा । प्रतीची श्रेण्यस्याः प्रत्यक्श्रेणी । सुतानां मूलादीनां श्रेण्यस्याः सुतश्रेणी । रम्यते रण्डा । मूषिकपर्णी आखुकर्णाभपत्रा । आह च—

"द्रवन्ती शम्बरी चित्रा न्यग्रोधी मूषिकाह्वया ।
प्रत्यक्श्रेणी वृषा रण्डा पुत्रश्रेण्याखुपर्णिका ॥"

अर्थे उपचित्रा, द्रवन्ती पृश्निपर्णी चेति । क्वचि द्रवन्ती । ग्रन्थकृदुपाचित्रामत्राह ॥

टीका० — चित्रादशकं मूषिकपर्ण्याम् । न्यग्रोधी गौरादिः । सम्बरी दन्त्यादिः, तालव्यादिर्वा । रण्डेति । 'रमु क्रीडायाम्' । 'अमन्ताड्डः' (उ० १. ११०) ॥

अपामार्गः शैखरिकोऽधामार्गवमयूरकौ ॥ ८८ ॥

प्रत्यक्पर्णी कीशपर्णी किणिही खरमञ्जरी ।

क्षीर० — अपकृष्टः समन्ताद् मार्गोऽस्य अपामार्गः, अधःशल्यारूयत्वात् । शिखरे भवः शैखरिकः । अधमं धाम वाति, अथवा अधाम अर्जति वा अधामार्गवः । मयूरप्रतिकृतिर्मयूरकः । प्रत्यञ्चि पर्णान्यस्याः प्रत्यक्पर्णी । कीशपर्णी कपिरोमन्वात् । अत एव केशपर्णीत्येके । किणिनो जिह्मीते याति किणिही । स्पर्शात् किणोत्पादकत्वात् । आह च—

"अपामार्गस्तु शिखरी प्रत्यक्पुष्पी मयूरकः ।
अधः श(ल्यौल्या)थ किणिही दुर्ग्रहः खरमञ्जरी ॥
स एवोक्तः शैखरिको मर्कटी दुरभिग्रहः ।
पत्रपुष्पी एव शिरःकूटो मर्कटपिप्पली ॥"

अर्थेऽधामार्गवः. अपामार्गः कोशातकी च ॥

१. 'अन्या द्र' क. ग. पाठः. २. 'अथा मयूर्याः खरञ्जा' क. ग. घ. ङ. पाठः. ३. 'क' ख. पाठः.

४. 'विषा चण्डा'. ५. 'पराक्पुष्पी वशीरश्च कण्टा म'

टीका०—अपामार्गाष्टकमपामार्गे । अपपूर्वान्मृजेः घञ् । अपामार्गः । 'उपसर्गस्य घञि—' (६. ३. १२२) इति दीर्घः । प्रायः शिखरे भवतीति शैखरिकः । अध्यात्मादित्वात् ठञ् । प्रत्यग् विमुखं पुष्पमस्या इति प्रत्यक्पुष्पी§ । 'पाककर्ण—' (४. १. ६४) इत्यादिना ङीप् । क्वचित् प्रत्यक्पर्णीति पाठः । कीशपर्णी ताल-व्यशा । †धामार्गवेत्येकं नाम ॥

हज्जिका ब्राह्मणी पद्मा भाङ्गी ब्राह्मणयष्टिका ॥ ८९ ॥
अङ्गारवल्लीबालेयशाकबर्बरबर्बकाः ।

क्षीर०—हन्ति रोगं हज्जिका । ब्राह्मणी पवित्रत्वात् । पद्मा पद्म-पुष्पा । भञ्जति भाङ्गी । भृज्जतीत्येके । अत एव ब्राह्मणी । अङ्गाराभा वल्लचस्याः अङ्गारवल्ली । बालेयशाको गर्दभयोग्यत्वात् । वृणोति बर्बरो बर्बकश्च बर्बराकृतिपत्रो वा । आह च—

"†भाङ्गी गर्दभशाकश्च पद्मा ब्राह्मणयष्टिका ।
अङ्गारवल्ली ‡भङ्गी च बर्बो बर्बरकस्तथा ॥"

अर्थे ब्राह्मणी, स्पृक्का भाङ्गी च । आह इन्दुः—

"§ब्रह्मरीतिस्तथा स्पृक्का *भाङ्गी च ब्राह्मणी मता" ॥

टीका०—हज्जिकानवकं बाभणिआठीति ख्यातायाम् । 'भार्गी गर्दभ-शाकश्च' इति कोशान्तरपाठाद् बालेयशाकेति गर्दभपर्यायपूर्वा पठिता ॥

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेशिका ॥ ९० ॥
मण्डूकपर्णी भण्डीरी भाण्डी योजनवल्ल्यपि ।

क्षीर०—मञ्जे मनोज्ञे वर्णे तिष्ठतीति माञ्जिष्ठा । 'अम्बाम्बगोभूमि—' (८. ३. ९७) इति षत्वम् । विकसति दूरं विकसा । जिङ्गति प्रसरति

---

१. 'भ्रज्जति भाङ्गी' ग. पाठः. २ 'ब्री । अ' क. ग. घ. ङ. पाठः. ३. 'म्भ' च. पाठः.

---

§ टाबन्तं युक्तम् । † 'प्रातिपदिकनिर्देशः' । ‡ 'भार्गी'. § 'फञ्जी च सैव ब्रह्म सुवर्चसा ॥', * 'भाङ्गी' इति धन्वन्तरिः ।

जिङ्गी । समन्ततोऽङ्गति समङ्गा । काले मिश्यते शब्द्यते कालमेशिका । भण्ड्यते भण्डीरी ‡भाण्डी च । योजनवल्ली दूरप्रसरात् । आह च—

"मञ्जिष्ठा कालमेशी च समङ्गा विकसारणा ।
मञ्जिका[3] रक्तयष्टिश्च भाण्डी योजनवल्ल्यपि ॥"

आहेन्दुः—

"विकसा कालमेशी तु कालकोष्ठी[2] तु जिङ्गिका ।
रक्ता भाण्डी करा च"

इति ॥

टीका०— मञ्जिष्ठानवकं मञ्जिष्ठायाम् । समङ्क्तीति समङ्गा । 'गम्भीरादयः' इति भण्डेरीरच् । गौरादिः । भण्डीरी ह्रस्वमध्यापीति रभसः । योजनं वल्ली अस्या इति योजनवल्ली ॥

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥ ९१ ॥
रोदनी कच्छुरानन्ता समुद्रान्ता दुरालभा ।

क्षीर०— याति प्रसरति यासः । यौति यवासः । दुःस्पर्शः कण्टकित्वात् । धन्वयासो मरूद्भवत्वात् । कुं नाशयति कण्टकित्वात् कुनाशकः । रोदयति रोदनी । चोदनीति सभ्याः । कच्छूरोगं राति कच्छुरा । अनन्ता समुद्रान्ता च दूरव्याप्तेः । कृच्छ्रेण लभ्यते स्पृश्यते दुरालभा । आह च—

"यासो यवासकोऽनन्ता वालपत्रो †विकञ्चकः ।
*वीरमूलः समुद्रान्तो दीर्घमूलो मरूद्भवः ॥

---

१. 'ञ्जु' ग., 'ञ्जू' घ., 'ञ्जरा र' क. पाठः. २. 'ष्ट्री' ख. पाठः. ३. 'मगङ्क' क. ख. च. ज. पाठः.

---

‡ 'भण्डी' इति भानुजिदीक्षितः । † 'विकण्टकः', * 'दूरमूलः' इति धन्वन्तरिः ।

धन्वयासो दुरालम्भा §ताम्रपर्णी च कच्छुरा।
दुरालभा च दुःस्पर्शा यासो धन्वयवासकः"॥

टीका० — यासदशकं दुरालभायाम्। यवास इति। 'यु मिश्रणे'। 'ऋतन्यञ्जि—' (उ० ४. २) इत्यादिना आसच्। यवासो दन्त्यसः। कण्टकाचितत्वाद् दुःखेन स्पृश्यत इति दुःस्पर्शः। धन्वा मरुः तद्भवो यासो धन्वयासः। यासं इत्यस्यैव नाम। अत एव वैद्यके धन्वयवासोऽपि, 'बन्धच्छिन्नोद्भवाम्बुधरधन्वयवा(सि? स)विश्वैः' इति। कुणाशकः तालव्यशः। कण्डुरावत् कच्छुरा। दीर्घमूलत्वादनन्ता। तथा हि तन्त्रान्तरे 'दीर्घमूलो मरुभवः' इति। समुद्रस्यैवान्तो दूरतोऽस्याः इति समुद्रान्ता। दुःखेनालभ्यत इति दुरालभा। कर्मणि घञ्। आगमशासनस्यानित्यत्वाद् 'उपसर्गात् खलघञोः' (७. १. ६७) इति नुम् न भवति। आङ्पूर्वो हि लभिः स्पर्शे। तथा च 'गावश्चालेभिरे भट्टैः' (स० १४. श्लो० ९१) इति भट्टिः॥

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका॥ ९२॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनी गुहा।

क्षीर०— पृश्निश्चित्रगवीव पर्णान्यस्याः पृश्निपर्णी सूक्ष्मपर्णा वा। यदाह— 'पृश्निरल्पतनौ'। अङ्घ्रेर्बुध्नादारभ्य पर्णान्यस्या अङ्घ्रिपर्णी। क्रोष्टुभिर्विन्ना दत्तेव क्रोष्टुपुच्छत्वात्। सिंहस्येव पुच्छोऽस्याः सिंहपुच्छी। लोकोक्त्यासिंगुच्छकः। कलशिः गह्वरीव ह्रैतिलत्वात्(?)। धावति प्रसरति धावनी। गूहति रसं गुहा। आह च—

"पृश्निपर्णी पृथक्पर्णी कलशिर्धावनिर्गुहा।
सृगालविन्ना †ह्रैतिला पर्णी क्रोष्टुकपुच्छिका"॥

---

१. 'सस्यै' च. ज. पाठः. २. 'रुद्भवः' ज. पाठः. ३. 'सिंहगु' क. पाठः. ४. 'नावृतिकत्वा' ख., 'घृ' ग. घ. ङ. पाठः. ५. 'घृ' ख. ग. ङ., 'वृ' घ. पाठः. ६. 'क' क. पाठः.

§ 'ताम्रमूली च', † 'ङ्घ्रिबला' इति धन्वन्तरिः।

टीका०— पृश्निपर्णीनवकं पीठावनी[1]ति ख्यातायाम्। केचित् पृश्निपर्णीचतुष्कं पीठावन्यां क्रोष्टुविन्नापञ्चकं काटारासिभुव इति ख्याते वदन्ति। पृश्निरल्पं तनु पर्णमस्या इति पृश्निपर्णी। पृथग् असंश्लिष्टं पर्णमस्या इति पृथक्पर्णी। क्रोष्टुभिर्विन्ना क्रोष्टुविन्ना। 'कर्तृकरणे कृता बहुलम्' (२. १. ३२) इति समासः। सिंहपुच्छाकृतिः पुष्पमञ्जरी अस्या इति सिंहपुच्छी। गौरादिः॥

निदि[2]ग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका॥ ९३॥
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि।

क्षीर०—नि[3]दिह्यते नि[4]दिग्धिका। स्पृशति कण्टकैरुपतपति स्पृशी। व्याघ्री हिंसकत्वात्। कण्टकबाहुल्याद् बृ[5]हति बृहती। कण्टकानियर्ति कण्टकारिका। प्रचोदयति कण्टकैः प्रेरयति प्रचोदनी। कौ[6]लति कुली। क्षुणत्ति क्षुद्रा हिंस्रा क्षुद्रवार्ताक्येकदेशा वा। दुःखेन स्पृश्यते दुःस्पर्शा। राष्ट्रमस्त्यस्या राष्ट्रिका। बृहती निदिग्धिकेति भागुरिवाक्याद् ग्रन्थकृद् भ्रान्तः। यतोऽनयोर्महान् भेदः। यदाह—

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
‡कण्टकाली कण्टकारी धावनी दुष्प्रधर्षिणी॥
बृहती *सिंहना क्रान्ता वार्ताकी राष्ट्रिका कुली।
विषदा स्थूलगा§ण्डाकी महती तु महोटिका॥"

भागुरिर्हि द्वयोर्बृहतीत्वं मन्यते। यच्छाश्वतः—

"क्षुद्रायां क्षुद्रवार्ताक्यां बृहती छन्दासि क्वचित्।"

द्व्यर्थे प्रचोदनी, कण्टकारिका दुरालभा च॥

---

१. 'ती' ज. पाठः. २, ३, ४. 'द' क. पाठः. ५. 'दंबृहति बृ' ख. पाठः. ६. 'कौ लयति' ख. पाठः.

---

‡ 'कण्टालिका कण्टकिनी धा', * 'सिंहिका क्रा', § 'कण्टाकी' इति धन्वन्तरिः।

टीका०— निदिग्धिकादशकं कण्टकारिकायाम्। 'स्पृशी प्रचोदनी राष्ट्री' इति रभसः। अतो हलादिः। स्पृशी। कण्टकान् (इयर्ति) करोतीति कण्टकारी। कण्टकित्वादेव दुःस्पर्शा॥

नीली काला क्रीतकिका ग्रामीणा मधुपर्णिका॥ ९४॥

रञ्जनी श्रीफली[1] तुत्थी[2] द्रोणी दोला च नीलिनी।

क्षीर०— नीली काला च वर्णे नीलात् प्राण्योषध्योर्ङीप्। क्रीतकं विनिमयोऽस्त्यस्याः क्रीतकिका। ग्रामे भवा ग्रामीणा। रञ्जयति नीलीकरोति रञ्जनी। श्रीफली[3] रम्यफला। तुत्थ(य)ते तुत्थी। द्रवत्यस्याः स्पर्शाज्जनो द्रोणी। तूणीत्येके। दोल्यते दोला। मेलेत्येके। नीलोऽस्त्यस्या नीलिनी। आह च—

"नीलिनी नीलिका काला ग्राम्या तूणी[4] च शोधनी।
तुत्थी श्रीफलिका *मेला सारवाही च र[5]ञ्जिका॥"

अन्यर्थे मधुपर्णी, गुडूची काश्मरी [6]नीलिका च। अन्यर्थे क्रीतकिका, मधुयष्टी नीलिका च॥

टीका०— नील्येकादशकं नील्याम्। 'नीलादोषधौ' 'प्राणिनि च' (वा० ४. १. ४२) इति ङीप्। नीली। कृष्णत्वात् काला। ग्रामे भवा ग्रामीणा। 'ग्रामाद् यखञौ' (४. २. ९४) इति खञ्। तुत्थेति। 'तुद व्यथने'। 'पातृतुदिवचिरचिसिचिभ्यस्थक्' (उ०२. ७)॥

---

१. 'ला' ख. पाठः. २. 'च्छा' घ. ङ. पाठः. ३. 'ला' ख. पाठः. ४. 'च्छ' ग. घ. ङ. पाठः. ५. 'च्छा' ङ. पाठः. ६. 'च्छा' ख. ग. घ. ङ. पाठः.

---

‡ 'वि', * 'मोचा भार', † 'ञनी', § 'नलि' इति धन्वन्तरिः।

अवल्गुजः सोमराजी *सुवल्ली सोमवल्लिका ॥ ९५ ॥
कालमेषी कृष्णफला वाकुचिः[1] पूतिफल्यपि ।

क्षीर० — अवलगोररम्याज्जातोऽवल्गुजः । सोमेनाह्लादेन राजते सोमराजी । कालेन मिष्यते शब्द्यते कालमेषी । कृष्णफलत्वात् । वाति कुचति सङ्कोचयतीति निर्वचनाद् वाकुचिः[2] । पूतिः फलेष्वस्याः पूतिफली । 'पाककर्ण —'(४. १. ६४) (इति) ङीष् । त्र्यर्थे कालमेषी, माञ्जिष्ठा ‡बृहती वाकुचिका च ॥

टीका०— अवल्गुजाष्टकमवल्गुंच इति ख्याते । शोभना वल्लिरस्येति सुवल्लिः । अस्याः फलमशोभनगन्धीत्यतः पूतिफली ॥

कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥ ९६ ॥
ऊषणा पिप्पली शौण्डी कोला

क्षीर० — कर्षति कृष्णा श्यामत्वाद् वा । उपकोलति संस्त्यायति उपकुल्या । विदेहदेशभवा वैदेही । मगधभवत्वाद् मागधी । चपला सरा । कणाः सन्त्यस्याः कणा । ऊषत्यूषणा । 'ऊष रुजायाम्' । उषणापि । 'उष दाहे' । तीक्ष्णतण्डुलत्वात् । पिपर्ति पिप्पली । शौण्डी शक्तत्वात् । कोला । 'कुल संस्त्याने' । आह च —

"पिप्पली मागधी कृष्णा चपला तीक्ष्णतण्डुला ।
उपकुल्या कणा श्यामा कोला शौण्डी तथोषणा ॥"

इन्दुश्च —

"पिप्पली तण्डुलफला वैदेही कृष्णतण्डुला" ॥

---

१. 'ची' ख. घ. पाठः. २. 'ची' ख. पाठः. ३. 'गु' क. ख. पाठः.

---

* 'सुवल्लिः' इति भानुजिदीक्षितः । ‡ 'स्योनाकः' इति धन्वन्तरिः ।

टीका०—कृष्णादशकं पिप्पल्याम्। प्रायेण कुल्यासमीपे भवतीत्युपकुल्या। प्रायो विदेहायां तीरभुक्तौ भवतीति वैदेही। मगधायामियं मागधी। चपल उष्णो रसः, तद्योगाच्चपला। ऊषणेति। 'ऊष रुजायाम्'। 'बहुलमन्यत्रापि' (उ० २. ९१) इति युच्। एवं दीर्घादिः। 'अयस्तिलव्यूषणकोलभागै'रिति वैद्यके। पिप्पलीति 'पिप्पल्यादयश्च' (ग० ४. १. ४१) इति ङीप्॥

अथ करिपिप्पली।

कपिवल्ली कोलवल्ली श्रेयसी वसिरः पुमान्॥ १७॥

क्षीर०—करिपिप्पली बृहत्त्वात्। गजयोग्या वा। कपिवल्ली मर्कटरोमत्वात्[1]। एवं कोलवल्ली। वस्यते छाद्यते वसिरः। चव्यफलं चैतत्॥

टीका०—करिपिप्पलीपञ्चकं हस्तिपिप्पल्याम्। वसिरो दन्त्यसः। तालव्यश इत्यन्यः॥

चव्यं तु चविका

क्षीर०—चव्यते चव्यं च्यवते वा। आह च—

"चविका कोलवल्ली तु चव्यं §च्यवनमेव च।
तस्याः फलं विनिर्दिष्टं श्रेयसी हस्तिपिप्पली॥"

चन्द्रनन्दनः सामान्येनाह—

"चव्या कोलाथ चविका श्रेयसी गजपिप्पली।
च्यवना कोलवल्ली तु चव्यं कुञ्जरपिप्पली॥"

च्यर्थे मर्कटवल्ली, अपामार्गो हस्तिपिप्पली स्वयंगुप्ता च। तथा वसिरः, अपामार्गः समुद्रलवणं* हस्तिपिप्पली चेति॥

---

१. 'मवत्त्वात्' ख. पाठः.

---

§ 'चविकमे', † 'टी अ', 'वल्लीकरजः स्व', * 'णं पि' इति धन्वन्तरिः।

टीका० —चवीद्विकं चव्याम् ।

" चव्यां तेजोवती कोला नाकुली च विकोषणे "

इति रत्नमालायां स्त्रीलिङ्गः ॥

काकचिञ्चीगुञ्जे तु कृष्णला ।

क्षीर० —काकवर्णा चिञ्चा प्रान्तोऽस्याः काकचिञ्ची । गुञ्जति शिम्बां[1] गुञ्जा । कृष्णं प्रान्तं लाति कृष्णला । रक्तकापि ॥

टीका०—काकचिञ्चीत्रयं काकचिञ्चीति[2] ख्यातायाम् । 'दुर्भेषा रक्तफला चूडामणिश्च सा' इति तन्त्रान्तरम् ॥

पलङ्कषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ॥ ९८ ॥

गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।

क्षीर० —पलं मांसं कषति पलङ्कषा । इक्षोर्गन्ध इवास्याः स्वादुकण्टकित्वादिक्षुगन्धा । शुनो दंष्ट्रेव हिंस्रत्वात् श्वदंष्ट्रा । गवां कण्टको बाधको गोकण्टकः । गोक्षुरकत्वात् । गौर्महीति युक्तम् । अत एव वनशृङ्गाटो भूक्षुरश्चायम् । आह च—

"गोक्षुरः स्याद् गोक्षुरको ¶भूक्षुरः स्वादुकण्टकः ।
गोकण्टको *भूक्षुरकः षडन्तः क्षुरकः क्षुरः ॥
गोकण्टो †गोखुरः कण्ठी षडङ्गस्त्रिकटस्त्रिकः ।
त्रिकण्टकः कण्टफलः श्वदंष्ट्रो व्यालदंष्ट्रकः ॥"

---

१. 'म्बि' ख., 'म्ब्यां' ग. पाठः. २. 'काइचां' च. ज. झ., 'काञ्ची' क. ख. पाठः.

¶ 'भक्षकः स्वा', * 'भक्षटकः षडङ्गः कण्टकत्रिकः', † 'गोक्षुरः कण्टी षडङ्गः क्षुरकः क्षुरः । त्रि' इति धन्वन्तरिः ।

त्यर्थे पलङ्कषः, लाक्षा गुग्गुलुः गोक्षुरश्च। तथा इक्षगन्धा, विदारी कोकिला गोक्षुरश्च ॥

टीका०—पलङ्कषासप्तकं गोक्षुरके। 'पलङ्कषा गोक्षुरक' इति मूर्धन्ये रभसः। शुन इव दंष्ट्रा कर्णिकात्मा अस्या इति श्वदंष्ट्रा ॥

विश्वा विषा प्रतिविषातिविषोपविषारुणा ॥ ९९ ॥
शृङ्गी महौषधं च

क्षीर०—विशत्यन्तर्विश्वा। वेवेष्टि विषा। प्रतीपा विषस्य प्रतिविषा अगदत्वात्। शृङ्गयुक्तत्वाच्छृङ्गी। आह च—

"अतिविषा †शुक्लगन्धा (?) ज्ञेया विश्वा च भङ्गुराः।
श्यामकन्दा प्रतिविषा शृङ्गी चोपविषा विषा ॥
महौषधं तु विषमा[2] "

त्यर्थे महौषधं, *विषं शुण्ठी ‡लशुनं चेति। विषाशब्दं बुद्ध्वा भ्रान्तोऽयम् ॥

टीका०—विश्वाष्टकमतिविषेति ख्याताथाम्। विश्वाशृङ्गयौ तालव्यशे। अन्ये षकारा मूर्धन्याः। प्रत्याद्युपसर्गो नियमार्थः ॥

अथ क्षीरावी दुग्धिका समे।

क्षीर०—क्षीरमवति क्षीरावी। दुग्धमस्त्यस्या दुग्धिका। क्षीरकाकोल्यीयम्। आह च—

---

१. 'श्वदंष्ट्रा च' २. 'णा' घ., 'णातिविषा' क. ग. पाठः.

---

† 'शुक्लकन्दा', * 'अतिविषं', ‡ 'रसोनश्च' इति धन्वन्तरिः।

"द्वितीया क्षीरकाकोली क्षीरशुक्ला पयस्विनी।
वयःस्था क्षीरमधुरा वीरा $क्षीराविका निका ॥"

निकेति ग्रन्थकृद् मन्यते। निकारिकेति तु वैद्याः॥

टीका०—क्षीरावीद्वयं क्षीरावी[1]लतायाम्। क्षीरमवति रक्षतीति क्षीरावी। 'कर्मण्यण्' (३. २. १)॥

शतमूली बहुसुता भीरुरिन्दीवरी वरी ॥ १०० ॥
ऋश्यप्रोक्ताभीरुपत्रीनारायण्यः शतावरी।
अहेरुः

क्षीर०—शतं बहूनि मूलान्यस्याः शतमूली। बहुधा सुवति बहुसुता। न भीरुरभीरुः स्थिरपत्रा रसायनत्वाद् वा। इन्दीवर्युत्पलपुष्पा। वृणोति वरी। ऋश्यैः प्रोक्ता श्रिता द्वीपिशत्रुत्वात्। नारायणी विष्णुजाता। शतेनावृणोति शतावरी। न हिनोत्यहेरुः, अभीरोरपभ्रंशोऽयं वा हरमेखलानिघण्टौ दृष्टः। यदाह—सअमूली सआवरी अहेरु इति। आह च—

§"शतवीर्या शतपदी पीवरीन्दीवरी वरी।
सहस्रवीर्याभीरुश्च *तुङ्गिनी बहु[2]पुत्रिका॥
ऋश्यप्रोक्ता द्वीपिशत्रुर्द्वीपिका †खरकण्टका।
¶मता परुषवृन्ता च शतावर्यूर्ध्वकण्टका"॥

टीका०—शतमूलीदशकं शतावर्याम्। शतं मूलान्यस्या इति शतमूली। बहुप्रतानत[3]या बहुसुता। अभीर्वभीरुपल्ल्यहेरवो ह्रस्वाद्याः। ऋष्यप्रोक्ता मूर्धन्यषा॥

---

१. 'व' ज. पाठः. २. 'प' क. ख. ङ. च. पाठः. ३. 'तनया' ङ. छ. पाठः.

$ 'क्षीरविषाणिका', § 'शतावरी श', * 'रङ्गिणी ब', † 'चोर्ध्वक', ¶ 'महापुरुषदन्ता' इति धन्वन्तरिः।

अथ पीतद्रुकालेयकहरिद्रवः ॥ १०१ ॥

दार्वी पचम्पचा दारुहरिद्रा पर्जनीत्यपि ।

क्षीर० — पीतो द्रुः स्कन्धोऽस्य पीतद्रुः । कालयति दोषान् कालेयकः कालीयको वा । हरिः पीतो द्रुः दारुहरिद्रा पिण्डहरिद्रातोऽन्या । अत्यर्थं रोगेभ्यः पर्जनी । आह च —

"हरिद्रा पीतिका[1] *पिण्डा र
गौरी वर्णवती पीता हरित
अन्या दारुहरिद्रापि हरिद्रु
निर्दिष्टा[2] §सा खेटकिनी स
‡कालीयको दारुनिशा दार्व
कटङ्कटेरी पर्जन्या पीतदारु

टीका० — पीतद्रुसप्तकं[3] दारुहरिद्र ३९) । हरिद्रुः ॥

वचोग्रगन्धा षड्ग्रन्था गोल

शुक्ला हैमवती

क्षीर० — वक्त्यनया वचा वाक् ण्यस्याः षड्ग्रन्था । गोरिव लोमान्य शुक्ला कृष्णा च द्वेधाऽसौ । यदाह —

---

१. 'तकी पि' क. ग., 'त' घ. पाठः. २ ङ. छ. पाठः.

---

* 'पिङ्गा', § 'रजिनी', $ 'काष्ठरजनी र तकम्' इति धन्वन्तरिः ।

"वचोग्रगन्धा गोलोमी जटिलोग्रा च रोमशा ।
अन्या श्वेतवचा मेध्या षड्ग्रन्था हैमवत्यपि ॥"

व्यर्थे शतपर्वा, दूर्वा ‡पाशा वचा च ॥

टीका० — वचापञ्चकं वचायाम् । 'वच[1] परिभाषणे' । अचि[2] वचा । वचैव शुक्ला हैमवती । प्रायो हिमवति प्रभवतीति हैमवती ॥

वैद्यमातृसिंह्यौ तु वाशिका ।
वृषोऽटरूषः सिंहास्यो वासको वाजिदन्तकः ॥ १०३ ॥

क्षीर० — वैद्यानां मातेव रोगजित्त्वात् । हिनस्ति रोगान् सिंही । उश्यते काम्यते वाशिका । वर्षति मधु वृषः । अ(ङ्गाद्[3] ?टान्) गच्छ(ति? तो) रूषत्यटरूषः । सिंहास्याकारपुष्पत्वात् सिंहास्यः । वाजिदन्ता इव केसराण्यस्य वाजिदन्तकः । आह च —

*"वाशकः सिंहपर्णी च वृषो †वर्षोऽथ सिंहिका ।
§अटरूषः सिंहमुखी भिषङ्माताटरूषकः "॥

टीका०— वैद्यमात्रष्टकं वासके । 'दशा कशा वाशा पेशी[4]' इत्यादिलिङ्गकारिकायां वाशा तालव्यशा । 'वासायां विद्यमानायामि'ति वर्णविधौ दन्त्यसकारेऽप्युदाहृता । 'मुस्ताटरूषकमहौषधिधन्वयासैः' इति वैद्यकप्रयोगाद् अटरूषो दीर्घोकारवान् मूर्धन्यषश्चायम् । 'अटरुषकुसुमेषु भुजंगमुखचकित[5]' इति कस्यापि प्रयोगः प्रमाणाभावाद् न प्रामाणिक इति केचित् । पुष्पं सिंहस्येवास्यमस्येति सिंहास्यः । वाजिन इव दन्तः कुसुमलक्षणोऽस्येति वाजिदन्तकः ॥

---

१. 'च भा' क. ख. ज. पाठः. २. 'चू' क. ख. च. ज. झ. पाठः. ३. 'गा' क., 'हं रू' ख. पाठः. ४ 'दिनागीलि' घ. ङ. छ. पाठः. ५. 'जमु' क. ख. पाठः.

---

‡ 'वंशः व', * 'वासकः', † 'वासाथ', § 'आटरूषः' इति धन्वन्तरिः ।

आस्फोटा गिरिकर्णी स्याद् विष्णुक्रान्तापराजिता।

क्षीर०— आस्फुटत्यास्फोटा[1]। गिरिरिवैव[2] कर्णिका अस्याः गिरिकर्णी। विष्णुक्रान्ता। अत एव रक्षाहेतुत्वादपराजिता अप्रतिहता। आह च—

"अश्वक्षुरः श्वेतपुष्पी श्वेता च गिरिकर्णिका।
कटभी $श्वेतसारा च ‡श्वेतस्यन्दापराजिता॥"

द्वयं आस्फोटा[3], शारिवा गिरिकर्णिका च॥

टीका०— आस्फोताचतुष्कमपराजितायाम्।
"पुमानर्काह्व आस्फोता वनमल्लयपराजिता"॥

इक्षुगन्धा तु काण्डेक्षुः कोकिलाक्षेक्षुरक्षुराः॥ १०४॥

क्षीर०— इक्षोर्गन्ध इवास्याः। स्वाद्वीत्यर्थः। इक्षुसदृशकाण्डत्वाद् वा। कोकिलस्येवाक्षीण्यस्य कोकिलाक्षः। इक्षुं रातीक्षुरः। स एव लोकोक्त्या क्षुरः, पारुष्याद् वा। आह च—

"तथान्य इक्षुगन्धः स्यादिक्षुरः कोकिलाक्षकः।
काशः काण्डेक्षुरुद्दिष्टः काकेक्षुर्वायसेक्षुकः॥
क्षुरश्च"
इति॥

टीका०— इक्षुगन्धापञ्चकं कोइलखा इति ख्याते। इक्षुरो ह्रस्वादिः।
"नापितस्योपकरणे कोकिलाक्षेऽपि च क्षुरः।"
'पृथुको मैमै चक्षुरस्ये'ति कीचकवधयमकम्॥

---

१. 'ता' ख. ङ. छ. पाठः. २. 'इमै' ख. पाठः. ३. 'ता' ङ. छ. पाठः. ४. 'म च' क. ख. घ. झ. पाठः. ५. 'र' छ. पाठः.

$ 'श्वेतनामा च', ‡ 'श्वेतस्पन्दा' इति धन्वन्तरिः।

शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः।
मिश्रेयोऽपि

क्षीर०— शालायां भवः शालेयो गुप्तत्वात्। अत एव शालीनः। शीतः शिवश्च शीतशिवः। छत्राभं पत्रमस्याः छत्रा। मस्यति परिणमते मिसिः। आह च—

"मिश्रेया तालपत्री च तालपर्णी मिसिस्तथा।
शालेयः स च शालीनो नाम्ना शीतशिवो मतः" ॥

टीका०— शालेयषट्कं हुरीति[1] ख्यातायां। 'शालेयो मधुरिकायां त्रिषु शाल्युद्भव' इति तालव्ये रुद्रः।

"माधुर्यं ना शीतशिवः क्लीबं शैलेयसैन्धवे"

इति तालव्ये रभसः। छत्रेति। 'छद अपवारणे'। त्रन्। मिसिरिति। 'जिषु मिषु सेचने'। 'इगुपधात् किः' (उ०४. १२१)। मिसिः। पक्षे ङीष्। 'मिसिस्तु मधुरीमांस्योः' इति दन्त्यान्ते विश्वप्रकाशः ॥

अथ सिंहुण्डो वज्रश्च स्नुक् स्नुही गुडा ॥ १०५ ॥
सामन्तदुग्धा

क्षीर०— सिंहुण्डः सिंहतुण्डापभ्रंशः। यद् मेखला—'कुलीशतरुः सिंहुण्डः'। वज्रो भेदकत्वाद्। स्रौति क्षीरं स्नुक् स्नुही च। स्नुहेति वैद्याः। गुडो[2] वृत्तत्वात्। गुहेत्यपपाठः। यच्छाश्वतः—

"गुडौ गोलेक्षुविकृती स्नुहीगुडिकयोर्गुडा"।

सुधापि। आह च—

"स्नुक् *सुधा च महावृक्षो गुडा निस्त्रिंशपत्रकः।

---

१. 'स्वी' ख., 'ह' च., 'हू' घ., 'हुवरी' ज. पाठः. २. 'डेति वृ' ख. पाठः.

---

* 'स्नुही च' इति धन्वन्तरिः।

समन्तदुग्धा ‡षण्डेरा सीहुण्डो ¶वक्रकण्टकः ॥"

'वज्रद्रुः स्नुक् स्नुही' इत्येके पेटुः ॥

टीका०—सिंहुण्डषट्कं सिज्य इति ख्याते । 'वज्रद्रुमसिहुण्डौ चे'[2]ति ह्रस्वादौ रभसः । 'ष्णुह उद्गिरणे' । 'वा द्रुहमुहष्णुहष्णिहाम्' (८. २. ३३) इति वा घत्वम् । स्नुक् । हान्ता । स्नुहीति । इगुपधलक्षणः कः । गौरादिः । 'गुड रक्षायाम्' । इगुपधलक्षणः कः ।

"गुडा स्नुहीगुडकयोर्गुड ऐक्षवगोलयोः"

इत्यजयः ॥

अथो वेल्लममोघा चित्रतण्डुला ।

तण्डुलश्च कृमिघ्नश्च विडङ्गं पुन्नपुंसकम् ॥ १०६ ॥

क्षीर०—वेल्लति वेल्लम् । विडति भिनत्ति विडङ्गं विडङ्ग इति वा । आह च—

"विडङ्गा जन्तुहन्त्री च कृमिघ्नी चित्रतण्डुला ।
*तण्डुलः कृमिहामोघा कैरला मृगगामिनी" ॥

टीका०—वेल्लषट्कं विडङ्गे । 'वेल्ल धारणे'[3] । अच् । वेल्लम् ।

"तण्डुलाख्या विडङ्गे स्याद् धान्यादिनिकरेऽपि च"

इति विश्वप्रकाशः । 'विड आक्रोशे' । '†त्रादिभ्यश्च' (उ० १. १२५) इत्यङ्गच् । विडङ्गः । बाहुलको गुणाभावः ॥

बला वाट्यालकः

---

१. 'सिं' ख. पाठः. २. 'सिं' घ. ङ. च. छ. ज. पाठः. ३. 'धातोः अ' क. ज. पाठः.

---

‡ 'गण्डीरः सी', ¶ 'वज्रकण्टकः', * 'तण्डुली कृ' इति धन्वन्तरिः । † 'तरत्यादिभ्यश्च' इति मुद्रितोणादिपाठः.

क्षीर०—बलत्यनया बला । बलकृद् वा । वटति वाट्यालकः । चन्द्रनन्दनो 'बलाभद्रौ नदीहृद्या तथा वाट्यालक' इत्याह ॥

टीका०—वेलाद्वयं वालिआँड इति ख्याते । वाटीमलतीति वाट्यालकः । स्वार्थे कः ॥

घण्टारवा तु शणपुष्पिका ।

क्षीर०—घण्टेव रौति घण्टारवा । शणस्येव पुष्पाण्यस्याः शणपुष्पी । 'पाककर्ण—' (४. १. ६४) इति ङीष् । आह च—

"शणपुष्पी बृहत्पुष्पी †स चोक्तः शर्मकण्टकः" ॥

टीका०—घण्टारवाद्वयं घण्टारवायाम् । 'शणु दाने' । तालव्यादिः । अच् । शणस्येव पुष्पमस्या इति शणपुष्पिका । इवार्थे कः ॥

मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥ १०७ ॥

क्षीर०—मृद्वीका सौकुमार्यात् । गोस्तनाभा गोस्तनीति विशेषोऽपि सामान्यवृत्तिः । द्राति रसवत्त्वाद् द्राक्षा । आह च—

"द्राक्षा चारुफला कृष्णा *विलोला कालमेषिका ।
‡स्वाद्वी गुडा मधुरसा मृद्वीका गोस्तनी स्मृता" ॥

टीका०—मृद्वीकापञ्चकं द्राक्षायाम् । मृद्वीकेति । 'मृद क्षोदे' । §'पर्परीकादयश्च' (उ० ४. २०) इतीकन्वुगागमौ । स्वाद्वीति । 'वोतो गुणवचनात्' (४. १. ४४) इति ङीष् ॥

---

१. 'वे' घ. ङ. छ., 'वा' ज. पाठः. २. 'आ इ' घ. ङ. छ. पाठः. ३. 'मैं' ख. पाठः. ४. 'ने । अच् । तालव्यादिः श । ' घ. ङ. छ. पाठः. ५. 'म' ख. पाठः.

---

† 'सा चोक्ता शणघण्टिका', * 'प्रियाला तापसप्रिया', ‡ 'स्वादुपाका म' इति धन्वन्तरिः । § 'पर्फरी' इति मुद्रितोणादिपाठः ।

सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत्।
त्रिभण्डी रोचनी

क्षीर०—सर्वास्त्वनुभूतयो यस्यां सा सर्वानुभूतिः, नानारसेत्यर्थः। सरति सरला, विरेचनीत्वात्। सरहेत्येके। त्रयः पुटाः छादका अस्याः[2] त्रिपुटा। त्रिपुटो वा। त्र्यश्रेत्येके। त्रिभिर्वर्तते वर्त्यते छाद्यते वा[3] त्रिवृता। त्रिवृच्च त्रिपुटात्वात्। त्रिभिर्भण्ड्यते उत्पाद्यते त्रिभण्डी। रोचयति रुचिकर्त्री रोचनी। रेचनीत्येके[5]॥

टीका०—सर्वानुभूतिसप्तकं शुक्लंतेवडीति[6] ख्यातायाम्। त्रिवृत् तान्ता। रोचनीति[7]। करणे ल्युट्॥

श्यामापालिन्यौ तु सुषेणिका॥ १०८॥
काला मसूरविदलार्धचन्द्रा कालमेषिका।

क्षीर०—पालयति[8] पालिनी। सुषिणोति सुषेणी। आह च—

"श्यामा त्रिवृन्मालविका मसूरविदला च सा।
कालार्धचन्द्रा ‡पालिन्दी सुषेणा कालमेष्यपि॥
*शुक्ला चापि त्रिभण्डी स्यात् काकाक्षी[9] सरला त्रिवृत्।
सर्वानुभूतिस्त्रिपुटा ¶त्रियन्ता[10] कूटवाहिनी॥
रोचनी[11] रेचनी चैव कण्ठविक्षोभणी तथा"॥

---

१. 'चटिकाः', २. 'त्रियते', ३. 'त्रिभिः' क. ग. घ. ङ. पाठः. ४. 'कृ' क. ख. च. झ., 'क' ज. पाठः. ५. 'रे' क. ख. च. ज. झ. पाठः. ६. 'न्ती' क. ग. पाठः. ७. 'ताक्ष्यी-क्षी' क. ग. घ. ङ. पाठः. ८. 'त्र्यश्री कूटनाशिनी' क. पाठः. ९. 'अहसी रे' क. ग. घ. ङ. पाठः.

---

§ अतः परं 'कृष्णामाह' इत्यधिकं ख. पुस्तके परमवतारिकात्वेन दृश्यते। ‡ 'कालिन्दी', * 'शुक्लभाण्डी त्रि', ¶ 'त्र्यस्रा कुमुदगन्धिनी' इति धन्वन्तरिः।

टीका० — कृष्णायामेवास्यां श्यामासप्तकम् ।

"कृष्णात्रिवृति काला स्त्री नीलीमञ्जिष्ठयोरपि" ॥

मधुकं क्लीतकं यष्टीमधुकं मधुयष्टिका ॥ १०९ ॥

क्षीर० — यष्टीरूपं मधुकं यष्टीमधुकम् एकदेशाद् मधुकम् । क्लीबत्वं तकतीति प्रतीपवृत्तिवचनत्वात् क्लीतकं क्रीतसंज्ञं वा । आह च —

"मधुयष्टी च यष्टी च यष्टीमधु मधुस्रवा ।
* यष्टीमधुकं मधुकं यष्ट्याह्वं मधुयष्टिका ॥
तल्लक्षणं §क्लीतकं च"

इति ॥

टीका० — मधुकचतुष्कं यष्टिमधुकायाम् । मधुकं ह्रस्वमध्यम् ॥

विदारी क्षीरशुक्लेक्षुगन्धा

क्षीर० — विदार्य भक्ष्यते विदारी । क्षीरेण शुक्ला । इक्षुसमगन्धा । माधुर्यात् क्षीरविदारीयं कृष्णा । भूकूष्माण्डोऽयं प्राक्षु ॥

क्रोष्ट्री तु या सिता ।

क्षीर०—कृष्णां च भूतकूष्माण्डीं मण्डली न[4] सृजतीति (?) । क्रोष्ट्री तु लक्षणया । आह च —

"¶ विदारी क्षीरशुक्ला तु स्वादुकन्दा सृगालिका ।
‡ऋष्यकर्मा विदारी च $क्रोष्ट्री ऋष्यविदारिका ॥"

इत्यर्थे इक्षुगन्धा, विदारी कालाक्षको गोक्षुरश्च ॥

---

१. 'तिवृ' क. ग. घ. छ. पाठः. २. 'र्णो भूकू', ३. 'ण्डः'. ४. 'न संसृ' ख. पाठः.

---

* 'ष्टीकं मधुकं चैव य', § 'तनकं' राजनिघण्टुः. ¶ 'विदारिका मता शुक्ला स्वा', ‡ 'वृष्यकन्दा वि', $ वृष्यवल्ली विडालिका' इति धन्वन्तरिः ।

टीका० — या सिता शुक्ला विदारी तत्र विदारीचतुष्कम्। विदारी च[1] भूकूष्माण्डः। क्षीरशुक्लेतिच्छेदः॥

अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका॥ ११०॥

क्षीर० — ऋक्षान् गन्धयत्यर्दयति ऋक्षगन्धा। आह च —

"अन्या क्षीरविदारी स्यादिक्षुगन्धेक्षुवल्ल्यपि[2]।
क्षीरवल्ली क्षीरकन्दा क्षीरशुक्ला पयस्विनी॥"

अन्यार्थे महाश्वेता, नीलस्यन्दा यवशर्करा क्षीरविदारी च। तथा ऋक्षगन्धा, **मूलकं**[3] रक्तवालुकं क्षीरविदारी च। तथा क्षीरशुक्ला, क्षीरविदारी क्षीर-**काकोली**[4] नीलस्यन्दा चेति॥

टीका० — अन्येति शुक्लेतरविदारी तत्र क्षीरविदारीत्रयम्। महत्यश्वेता महाश्वेता। ऋक्षगन्धेतिच्छेदः॥

लाङ्गली शारदी तोयपिप्पली शकुलादनी।

क्षीर० — लाङ्गली हलाकारा। शकुलादनी मत्स्यभक्षणी[5]। **आह च** —

"जलपिप्पल्यभिहिता शारदी तोयपिप्पली।
मत्स्यादनी मत्स्यगन्धा लाङ्गली शकुलादनी"॥

टीका० — लाङ्गलीचतुष्कं काश्चद[6] इति ख्याते। सप्तपर्णे शारद्युक्ता॥

खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः॥ १११॥

क्षीर० — खरमश्नुते खराश्वा। कारोरियं कारवी, कर्मण्येत्यर्थः। **दीप्योऽग्निदीपनः**। मीनात्यग्निमान्द्यं मयूरः। लोच्यते लुच्यते वा मस्त-

---

१. 'चाभ्रकू' घ. ङ. छ., 'चकू' क. ख. पाठः. २. 'ट्' ख. पाठः. ३. 'कु' क. ग. घ. पाठः. ४. 'होली' क. ग. घ. पाठः. ५. 'णात्।' ख. पाठः. ६. 'कौ' ख. पाठः.

कोऽस्य बर्बराकारत्वाल्लोचमस्तकः । लोचमर्कट इत्येके । आह च—

"अजमोदा वस्तमोदा दी(प्ये?प्य)को लोचमर्कटः ।
*खराश्वा कारवल्ली च मोचा हस्तिमयूरकः ॥"

व्यर्थे मयूरः, अपामार्गोऽजमोदा तुत्थकश्च ॥

टीका० — खराश्वा[1]पञ्चकं मयूरशिखेति ख्यातायाम् ॥

गोपी श्यामा शारिवा स्याच्चन्दनोत्पलशारिवा ।

क्षीर०—गोपायति गोपी । श्यामा श्यामवर्णा । यच्छाश्वतः—

"शारिवायां निशि श्यामा श्यामा च हरिता सिता" ।

शीर्यन्तेऽनया दोषाः शारिवा । चन्दना आह्लादनत्वात् । अनन्तेत्येके । उत्पलाभपुष्पा उत्पलशारिवा । आह च—

§"शारिवा फणिजिह्वा च गोप्यास्फोताथ चन्दना" ॥

टीका० — गोपीपञ्चकं श्यामा[2]लतायाम् । नागजिह्वाप्येभिरुच्यत इति केचित् । अनन्ताद्वयमनन्तमूल इत्यन्यः । गां पाति रक्षतीति गोपी । शारिबा तालव्यादिः ॥

योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धिरप्याह्वयो इम ॥ ११२ ॥

क्षीर०— योजनीयं योगे साधु वा योग्यम् । ऋध्नोति ऋद्धिः सिध्य(त?ती)ति सिद्धिः । वृद्धेरप्याह्वया इमे वृद्धेरोषधिविशेषस्यापि योग्यादीनि नामानि । आह च—

---

१. 'ख्या' घ. ङ. छ. पाठः. २. 'म' क. ख. घ. च. ज. पाठः. ३. 'च ल' ख. पाठः.

---

* 'खराह्वा कारवी वल्लिर्मोदा ह', § 'सारिवा शारदा गोपा गोपवल्ली प्रतानिका' इति धन्वन्तरिः ।

"ऋद्धिर्वृद्धिः सुखं सिद्धी रथाङ्गं मङ्गलं वसु।
*शिवं भद्रं युगं योग्यं लक्ष्मीः सर्वजनप्रिया॥"

लक्ष्यते लक्ष्मीः॥

टीका०—योग्यचतुष्कमष्टवर्गपठितायामृद्ध्याख्यायामोषधौ वृद्ध्याख्यायां च। वृद्धिनाम्नोऽप्यौषधस्याह्वया इमे इति, योग्यमृद्धिः सिद्धिलक्ष्म्यौ च। जीवकर्षभकमेदा महामेदा काकोली क्षीरकाकोली ऋद्धिर्वृद्धिरित्यष्टवर्गः॥

कदली वारणा बुद्धा रम्भा मोचांशुमत्फला।
काष्ठीला

क्षीर०— केन वायुना दल्यते कदली। वारणाः[1] पुष्यन्ते यया वारणपुष्पेत्येके। रमन्तेऽस्यां रम्भा। मुञ्चति त्वचं मोचा। अंशुमन्ति फलान्यस्या अंशुमत्फला भानुफलाख्या[2]। ईषद्[3] अष्ठीलमस्याः काष्ठीला। निस्सारेत्येके। आह च—

"कदली सुकुमारा च रम्भा भानुफलेत्यपि।
§निस्सारा वारणा बुद्धा मोचा हस्तिपुषा तथा"॥

टीका०— कदलीषट्कं कदल्याम्। शीतवीर्यत्वात् कं वातं दलयतीति कदली। पचादिगौरादी। बुषं जलं वृणोतीति वारणबुषा। मूर्धन्यषा। दन्त्यसेति[4] केश्चित्[5]। पृषोदरादित्वात् तद्विपर्यासः॥

मुद्गपर्णी तु काकपर्णी सहेत्यपि॥ ११३॥

क्षीर०— सहा क्षुद्रसहाख्यात्र। व्यर्थे हि सहा, मुद्गपर्णी बला †नाकुली च। यतो महासहा माषपर्ण्युच्यते॥

---

१. 'णा। वुष्यन्ते' क. ग. घ. पाठः. २. 'च' क. ग. घ. पाठः. ३. 'त् ष्ठी' क. ग. पाठः. ४. 'सा चेति' क. ख. च. ज. झ. पाठः. ५. 'केचित्' घ. ङ. छ. ज. पाठः.

---

* 'ऋषिसृष्टा यु', § 'दीर्घपत्त्रा च निःसारा मोचा हस्तिविषाणिका॥', † 'तरणी च' इति धन्वन्तरिः।

टीका० — मुद्गपर्णीत्रयं मुद्गवनीति ख्यातायाम् । मुद्गस्येव पर्णमस्या इति मुद्गपर्णी ॥

वार्ताकी हिङ्गुली सिंही भण्डाकी दुष्प्रधर्षिणी ।

क्षीर० — वार्ताकं देश्यां भण्डाकम् । कण्टकार्या अन्येयमित्ययं मन्यते । वैद्यास्त्वभिन्नामाहुः । यदाह — 'हिङ्गुली बृहती'ति ॥

टीका० — वार्ताकीपञ्चकं वातिङ्गणे । वार्ताकीति । 'वृतु वर्तने' । 'बलाकादयश्च' (उ० ४. १४) इत्याकः वृद्धिश्च । 'पिप्पल्यादयश्च' (ग० ४. १. ४१) इति ङीष् ।

"वातिङ्गणस्तु वार्ताकुर्वार्ताकः शाकबिल्वकः ।
भण्डाकी राजकूश्माण्डो वार्ताकी दुष्प्रधर्षिणी ॥ "

इति रभसः । 'वार्ताकुरेषा गुणसप्तयुक्ता' इति वैद्यके स्त्रियां वार्ताकुः ॥

नाकुली सुरसा नागसुगन्धा गन्धनाकुली ॥ ११४ ॥
नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा ।

क्षीर० — नकुलानां प्रिया नाकुली । नागसुगन्धा सर्पसुगन्धत्वात् । छत्राकी छत्राभपत्रा[1] । सुष्ठु वहत्यामोदं सुवहा । अर्धेन रास्ना अर्धेन सर्पाक्षीति गौडः । वैद्यास्तु नाकुलीगन्धनाकुल्यौ विदारीक्षीरविदारीवद् भिन्ने मन्यन्ते । आह च —

"नाकुली सर्पगन्धा च सुगन्धा भोगिगन्धिका ।
सैव सर्पसुगन्धेति तथा *चानीतिपत्रिका ॥
अन्या ‡सहा सुगन्धा तु सुवहा गन्धनाकुली ।
सर्पाक्षी नकुलेष्टा च छत्राकी विषमर्दिनी" ॥

टीका० — नाकुलीनवकं §रास्नायाम् । नकुलस्य ह्रद्या नाकुली । अत

---

१. 'त्रत्वात् । सु' ख. ग. च. पाठः.

---

* 'विरिजप', ‡ 'महासु' इति धन्वन्तरिः । § नवकमिति नागस्थाने रास्नापाठेन ।

एव नकुलेष्टा। 'राखासाखास्थूणावीणाः' (उ० ३. १५) इत्यत्र राखा निपातिता ॥

विदारिगन्धांशुमती सालपर्णी स्थिरा ध्रुवा ॥ ११५ ॥

क्षीर०— विदार्या गन्धोऽस्त्यस्या **विदारिगन्धा**। **अंशवः सन्त्यस्यामंशुमती**। दीर्घमूलत्वात्। सालस्येव **पर्णान्यस्याः सालपर्णी**। **आह च**—

"*सालपर्णी स्थिरा सौम्या †त्रिपर्ण्या[1] त्रिगुहा ध्रुवा।
विदारिगन्धांशुमती दीर्घमूला $च पीतनी[2]" ॥

टीका०— विदारिगन्धापञ्चकं **सालपर्ण्याम्**। सालस्येव पर्णमस्या इति सालपर्णी दन्त्यसा। तालव्यशापीति कश्चित् ॥

तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च।

क्षीर०— तुण्डिकान् गवादीनीरयति कण्टकित्वात् **तुण्डिकेरी**। **समुद्रः** कण्टकैः कृतरक्षोऽन्तोऽस्यां **समुद्रान्ता**। दूरप्रसराद् वा। **कल्पते कार्पासी**। बदराणीव फलानि सन्त्यस्या **बदरा**। यद् माला—'**कार्पासो बदरः** प्रोक्तो वादरोऽपि च'। चव्यश्च। **द्व्यर्थे तुण्डिकेरी, बिम्बा कार्पासी च**। **त्र्यर्थे समुद्रान्ता, कार्पासी यवासकः स्पृक्का च** ॥

टीका०— तुण्डिकेरीचतुष्कं **कार्पास्याम्**। यत्फलं कार्पासः। 'कृञः पासः' (उ० ५. ४५) कार्पासी। ह्रस्वादिरपि दृश्यते ॥

भारद्वाजी तु सा वन्या

क्षीर०—वने भवा सा कार्पासी **भारद्वाजी** भरद्वाजसृष्टेत्यागमः। **भद्रापि** ॥

---

१. 'तिपश्यन्ती गु' क. ग. घ. पाठः. २. 'ति' ख. ङ. पाठः.

---

* 'शालिप', † 'त्रिपर्ण्यतिगु', $ 'सुपत्त्रिका' इति धन्वन्तरिः।

टीका०— कार्पास्येव वनभवा भारद्वाजी । भरद्वाजेन निर्वृत्तेत्यण् ॥

शृङ्गी तु वृषभो वृषः ॥ ११६ ॥

क्षीर०— शृङ्गाणि सन्त्यस्याः शृङ्गी । अत एव वृषाख्यः । आह च—

"ऋषभो *धूर्वहो धीरो मातृको वृषभो वृषः ।
विषाणी ¶ककुदीन्द्राक्षो बन्धुरो गोपतिः स्मृतः" ॥

टीका०— शृङ्गीत्रयमष्टवर्गपठिते ऋषभाख्यौषधे । ऋषभवृषौ मुद्गवर्गे एवोक्तौ ॥

गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ।

क्षीर०—गाङ्गमीरयति पवित्रत्वाद् गाङ्गेरुकी । नागानां बलकृन्नागबला । झषति हिनस्ति गन्धेन झषा । गवि जले इन्धे गवेधुका। आह च—

"गाङ्गेरुकी नागबला खर†बन्धनिका झषा ।
विश्वदेवा तथारिष्टा खण्डा ह्रस्वगवेधुका" ॥

टीका०—गाङ्गेरुकीचतुष्कं गोरक्ष[1]चाण्डल[2] इति ख्याते ।

"गाङ्गेरुकी नागबला झषा गोरक्षतण्डुला"

इति कोशान्तरम् ।

"झषा नागबलायां स्याज्झषो मत्स्ये झषं बिले[3]" ॥

धामार्गवो घोषकः स्याद्

क्षीर०— धाम अर्जति धामार्गवः । घोषति शब्दायते घोषकः ॥

---

१. 'क' क. ख. च. ज. झ. पाठः. २. 'पाड इ' झ. पाठः. ३. 'खि' क. ख. ज. झ. पाठः.

---

* 'दुर्धरो धी', ¶ 'ककुभीन्द्रा', † 'गन्धिनि' इति धन्वन्तरिः ।

टीका०—धामार्गवद्वयं घोष इति ख्याते। 'घुष घुष्टौ'। घञ्। घोषः। ततः स्वार्थे कः॥

महाजाली स पीतकः॥ ११७॥

क्षीर०—स धामार्गवः पीतपुष्पो महाजाली। जालं वितानम्। आह च—

"धामार्गवः कोशफलो राजकोशातकी[1] तथा।
कार्कोटकी[2] पीतपुष्पा महाजाली तथोच्यते"॥

टीका०—स एव घोषकः पीतपुष्पो महाजाली। ङ्यन्ता॥

ज्यौत्स्नी पटोलिका जाली

क्षीर०—ज्यौत्स्नी रात्रौ भासनात्। पटति विस्तीर्यते पटोली। जाली सविताना॥

टीका०—ज्यौत्स्नीत्रयं पटोलीति ख्यातायाम्॥

नादेयी भूमिजम्बुका।

क्षीर०—भूमेर्जम्बूः।

"ऐरावतो नागरङ्गो नादेयी भूमिजम्बुका"

इत्युक्तापि भ्रान्त्यात्रोपात्ता॥

टीका०—नादेयीद्वयं भूजम्ब्वाम्॥

स्याल्लाङ्गली त्वग्निशिखा

क्षीर०—लाङ्गलवद् भेदनाल्लाङ्गली। अग्निशिखा स्पष्टुमशक्यत्वात्। अग्निमुखीत्येके। आह च—

---

१. 'कस्तथा', २. 'कर्णाट' ख. पाठः,

"कलिकारी तु *फलिनी विशल्या गर्भपातिनी ।
लाङ्गल्यग्निमुखी सैरी दीप्ता §नन्तेन्दुपुष्प्यपि ॥"

द्व्यर्थे अग्निमुखी, भल्लातकी लाङ्गली च ॥

टीका०—लाङ्गलीद्वयं लाङ्गलिआ इति ख्याते विषे ॥

काकाङ्घ्री काकनासिका ॥ ११८ ॥

क्षीर०— काकस्येवाङ्घ्रं नासारूपं फलमस्याः काकाङ्घ्री । काकजङ्घेत्येके । आह (च)—

"काकनासा ध्वाङ्क्षनासा काकतुण्डफला च सा" ॥

टीका०—काकाङ्घ्रीद्वयं काकजिङ्घीति[1] ख्यातायाम् । काउआरोटीति ख्यातायामिति केचित् ॥

गोधापदी तु सुवहा

क्षीर० —गोधाया इव पादा अस्या गोधापदी । कुम्भपद्यादि । हंसपदी च ॥

टीका० —गोधापदीद्वयं हंसपादिकायाम् । यत्र गोहालिआया इति नीचोक्तिः । गोधाया इव पादोऽस्या इति गोधापदी । 'कुम्भपदीषु च' (५. ४. १३९) इत्यकारलोपो ङीप् च नित्यमनेनैव । 'पादः पत्' (६. ४. १३०) इति पद्भावः ॥

मुसली तालमूलिका ।

क्षीर० —मुस्यति खण्डयति दोषान् मुसली । द्व्यर्थे तालपत्री, मुसली मिश्रेया च ॥

---

१. 'ङ्घो' क. ख. घ. पाठः.

---

* 'हलिनी', § 'नक्तन्दुपुष्पिका' ॥ इति धन्वन्तरिः ।

टीका० — मुसलीद्वयं तालमूलिकायाम्। एतत्पत्रं [1]गवाकस्येव ॥

अजशृङ्गी विषाणी स्याद्

क्षीर० — अजस्येव शृङ्गाण्यस्या अजशृङ्गी कर्कटशृङ्गीत्यर्थः।

"शृङ्गी कर्कटशृङ्गी च [2]‡कलिङ्गा कर्कटाह्वया" ॥

टीका० — अजशृङ्गीद्वयमेण[3]शृङ्गीति ख्यातायाम्। इयमजशृङ्गाकारा नेत्रौषधिः बहुक्षीरा सकण्टका ॥

गोजिह्वादार्विके समे ॥ ११९ ॥

क्षीर० —गोजिह्वाभपत्रा। दारयति रोगान् दार्विका। ओषधिविशेषः ॥

टीका० — गोजिह्वाद्वयं दार्विशाके। एतत् क्षेत्र एवोत्पद्यते। गोरिव जिह्वा गोजिह्वा। दार्विः तर्दूः। तदाकारत्वाद् दर्विका ॥

ताम्बूलवल्ली ताम्बूली नागवल्ल्यपि

क्षीर० — नागवल्ली फणिलता [4]पातालानीतत्वात् ॥

टीका० — ताम्बूलवल्लीत्रयं पर्णे। ताम्बूलीति। §'तमेर्णिद् बुक् च' इति ऊलज्बुगागमौ। णित्त्वाद् वृद्धिः। नागलोकस्येव वल्ली नागवल्ली ॥

अथ द्विजा।

हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥ १२० ॥

क्षीर० — द्विर्जायते द्विजा। हरति हरेणुः। रेणुका भस्मयोगात्।

---

१. 'गु' क. ख. पाठः. २. 'कु' ख. ग. पाठः. ३. 'णसिंहीति' घ. ङ. छ. ज. पाठः. ४. 'वाताभिहितत्वा' ग. घ. ङ. पाठः.

---

‡ 'कुलीरा क' इति धन्वन्तरिः। § इदं 'खर्जिपिञ्जादिभ्यः—'(उ० ४. ९१) इति सूत्रे वाक्यरूपेण दृश्यते। 'तमेर्बुग् वृद्धिश्च' इति च तदानुपूर्वी।

कुन्त्या दुर्वाससा दत्ता कौन्ती। भस्मना धूल्या गन्धयति भस्मगन्धिनी। आह च—

"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा।
भस्मग†र्भा पाण्डुपत्नी स्मृता कौन्ती हरेणुका॥"

गन्धद्रव्यं चैतत्॥

टीका०—द्विजाषट्कं रेणुकायाम्। 'हृकृभ्यामेणुः' (उ० २. १)। हरेणुः।

"कलायेऽपि हरेणुर्ना रेणुकायां स्त्रियां भवेत्"

इति रुद्रः॥

एलावालुकमैलेयं सुगन्धि हरिवालुकम्।
वालुकं च

क्षीर०—एलावद् वलते एलावालुकम्। हरि पिङ्गं वालुकम्। ऽर्थे सुरभिगन्धि, सलुकी सुरसा एलावालुका च॥

टीका०—एलावालुकपञ्चकमेलावालुके सुगन्धिद्रव्ये॥

अथ पालङ्क्या मुकुन्दः कुन्दकुन्दुरू॥ १२१॥

क्षीर०—पाल्यते पालङ्क्या। मुखात् कुन्द इव मुकुन्दः, मुञ्चति रसं वा। कुं ददातीति कुन्दः। आह च—

"कुन्दुरुः स्यात् कुन्दुरुकः ‡कुन्दश्चासौ विलक्ष्यपि।
मुकुन्दस्तीक्ष्णगन्धश्च ‖पालङ्क्यो भीषणो बलिः"॥

---

१. 'करेणु' घ. ङ. च. छ. ज. पाठः. २. 'भिः स', ३. 'रा ए' ग. घ. ङ. पाठः. ४. 'न्ध' घ. ङ. छ. पाठः. ५, ६. 'न्दु' ख. पाठः.

---

† 'न्धा', ‡ 'शिखरी कुन्द्रगोपुरः। मुकुन्द', ‖ 'पालिन्दो भी' इति धन्वन्तरिः।

टीका०— पालङ्क्यावतुष्कं कुन्दुरिति ख्याते सुगन्धिद्रव्ये। पालङ्क्या डाबन्ता ॥

बालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।

क्षीर०— वलते बालम्। जिह्रेतीव ह्रीबेरम्। वर्धते बर्हते बर्हिष्ठम्। उदीचीभवमुदीच्यम्। केशपर्यायं बालत्वात्। अम्बुनाम तृड्घ्नत्वात्। आह च—

"बालकं वारि तोयं च ह्रीबेरं जलजम्बु च।
केशं वज्रमुदीच्यं च *पिङ्गमागसनं रुचम्" ॥

टीका०— बालपञ्चकं बालके। बर्हिषि तिष्ठतीति बर्हिष्ठः। अम्बष्ठवत् षत्वम्। उदग्देशे भवमुदीच्यम्। 'द्युप्रागपागुदक्प्रतीचो यत्' (४. २. १०१)। केशस्य अम्बुनश्च यानि नामानि तान्यस्यापीति केशाम्बुनाम च ॥

कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ॥ १२२ ॥
शैलेयं

क्षीर०— कालमनुसरति शीतोष्णाभ्यां कालानुसार्यम्। वृद्धं कालस्थायि। अश्मनः पुष्पमश्मानं पुष्णाति वा तदूर्ध्वजत्वात्। शीतत्वेन शिवं शीतशिवम्। शिलायां भवं शैलेयम्। आह च—

"शैलेयं पलितं वृद्धं जीर्णं कालानुसार्यकम्।
स्थविरं च शिलादद्रुः शिलापुष्पं शिलाभवम्" ॥

टीका०— कालानुसार्यपञ्चकं शैलजे। वृद्ध इतिच्छेदः। अश्मनः पुष्पमश्मपुष्पम्। अत एव शैलेयम्। शीतशिवं समस्तं नाम ॥

---

१. 'कम्बुरि' घ. ङ. छ. पाठः. २. 'म्धौ। पा' क. ख. च. ज. झ. पाठः. ३. 'क' ख. पाठः. ४. 'वम्। अर्थे शीतशिवं सैन्धवं मिश्रेयो वेद्याहुः न तु(?) शि' क. ग. घ. ङ. पाठः. ५. 'ष्ठं' ख. पाठः.

---

* 'पिङ्गमाचमनं कच', ‡ 'क' इति धन्वन्तरिः।

तालपर्णी तु दैत्या गन्धकुटी सुरा ।

गन्धिनी

क्षीर०— दैत्या सुराख्या[1] दैत्यनामत्वात् । 'सुर संवेष्टने' । आह च—

"सुरा गन्धवती दैत्या गन्धाढ्या गन्धमालिनी ।
सुरभि‡भूसुगन्धा च कुटी गन्धकुटी स्मृता" ॥

टीका०— तालपर्णीपञ्चकं सुरायाम् । सुरो नाम दैत्यः तन्नामधेयतया दैत्या ॥

गजभक्ष्या तु सुवहा सुरभी रसा ॥ १२३ ॥

महेरणा कुन्दुरुकी सल्लकी ह्रादिनीति च ।

क्षीर०— गजैर्भक्ष्यते गजभक्ष्या । सुष्ठु वहति स्रवति सुवहा । सुस्रवेति वैद्याः । महदीरणमस्या महेरणा । सत्कृत्य लक्ष्यते* आस्वाद्यते गजैः सल्लकी । ह्रादोऽस्त्यस्या ह्रादिनी । आह च—

"सल्लकी वल्लकी ह्रादा सुरभिः सुस्रवा रसा ।
अश्वमूत्री कुन्दुरुकी गजभक्ष्या महेरणा" ॥

टीका० —गजभक्ष्याष्टकं सल्लक्याम् । स्वादुत्वाद् गजानां भक्ष्या गजभक्ष्या योपधा । सुरभिः[2] पक्षे ङ्यन्ता । 'सल गतौ' । क्वुन् । सल्लकी । दन्त्यसा । गौरादिपाठान्निपातनाल्लकारद्वित्वम् । ह्रादते[3] इति ह्रादिनी ॥

अग्निज्वालासुभिक्षे तु धातकी धातुपुष्पिका ॥ १२४ ॥

क्षीर०— अग्नेर्ज्वालेव रक्ता । मद्यपाचनीत्वाद् वा । सुभिक्षा सुलभा । धातुरक्ता धातकी । धातुपुष्पीत्वात् । आह च—

---

१ 'ख्याया दै' घ. ङ. छ. पाठः. २. 'भी' क. ख. घ. ङ. छ. पाठः. ३. 'क' क. ख. पाठः.

---

‡ 'भृंरिगन्धा' इति धन्वन्तरिः । * 'लायते' इति स्यात् । लातेराल्लोपः क्वुनः कित्त्वात् ।

"धातकी ताम्रपुष्पी च कुञ्जरा मद्य*पाचनी।
पार्वतीया सुभिक्षा च वह्निपुष्पा च शब्दिता" ॥

टीका०— अग्निज्वालाचतुष्कं धातक्याम् ॥

पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुला

क्षीर० — पृथ्वीका बहुफला पत्रैलात्वाद् वा। एवं बहुला। चन्द्रस्य कर्पूरस्य बाला पुत्रीव चमत्कारात्। मुखे दौर्गन्ध्यं विनयत्येला। निष्क्रान्ता कुटेः कोशान्निष्कुटिः। [3]आह च —

"[†]पत्रैला बृहदेला च [§]त्रिदिवा त्रिदिवोद्भवा।
[¶]स्थलैला त्वक्सुगन्धा च पृथ्वीका कन्यका पुटा॥"

इति। इन्दुः त्र्यर्थे तु पृथ्वीका, हिङ्गुपत्रिका उपकुञ्चिका सूक्ष्मैला चेत्याहुः। त्र्यर्थे त्रिपुटा, त्रिवृत् सूक्ष्मैला चेति। लक्ष्यश्चाग्रे रूपनिश्चयः॥

टीका० — पृथ्वीकापञ्चकमेलायाम्। इल धातोरच्। एला। पक्षे ङीषि निष्कुटी॥

अथ सा।

सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः॥ १२५॥

क्षीर० — सा एला सूक्ष्मा। उपकुञ्चत्युपकुञ्चा। तुत्था अल्पत्वात्। कुरति शब्दायते कोरङ्गी। त्रिपुटा त्र्यश्रीः। त्रुट्यति त्रुटिः सूक्ष्मत्वैक्त्वात्। आह च —

---

१. 'टी बहु', २. 'टी।' क. घ. ङ. छ. पाठः. ३. 'अत्र च' ग. घ. ङ. पाठः. ४. 'हुः', ५. 'त्वात्' क. च. पाठः.

---

* 'वासिनी', † 'भद्रैला', § 'त्रिपुटा त्रिपुटोद्भवा', ¶ 'स्थूलैला' इति धन्वन्तरिः ।

"सूक्ष्मैला द्रामिली तुत्था कोरङ्गी बहुला त्रुटिः ।
एला कपोतवर्णा च चन्द्रबाला च निष्कुटी ॥"

अर्धे त्रिपुटा, त्रिवृत् सूक्ष्मैला च ॥

टीका० — उपकुञ्चिकापञ्चकं सूक्ष्मैलायाम् । तुत्थोक्ता ॥

व्याधिः कुष्ठं वारिभव्यं वाप्यं पाकलमुत्पलम् ।

क्षीर० — व्याधिः पर्यायार्थः कुष्ठत्वात् । कौ तिष्ठति कुष्ठम् । 'अम्बाम्बगोभूमि—' (८. ३. ९७) इति षत्वम् । कुष्णाति रोगं वा । वारिषु तोयाशयेषु भवति वारिभव्यम् । 'भव्यगेय—' (३. ४. ६८) इति साधुः । वाप्यां भवं वाप्यम् । व्याप्यमित्येके । पाकलं व्याधित्वात् । पाकं लाति वा । उत्पलं दाहहृत्त्वात् । उत्पलपुष्पत्वाद् वा । आह च —

"कुष्ठं रोगो गदो व्याधिरुत्पलं पाकलं रुजा ।
वाप्यं वानीरजं रामं *कौवीरं वारिभव्यकम्" ॥

टीका० — व्याधिषट्कं रूढ इति ख्याते । व्याधिनामतया व्याधिः । तथा च रभसः —

"कौबेरं भासुरं कुष्ठं पारिभाव्यं गदाह्वयम्"

इति । 'कुष निष्कर्षे' । 'हनिकुषि —' (उ०. २. २) इत्यादिना क्थन् । कुष्ठम् ॥

शङ्खिनी चोरपुष्पी स्यात् केशिनी

क्षीर० — शङ्खिनी शौक्ल्यात् । चोरपुष्पी धनहरीत्वात् । रात्रौ विकासाद् वा । केशाः सन्त्यस्याः केशिनी । चन्द्रनन्दनोऽत्र —

---

१. 'त्रिपुटा त्रु' ख. घ. ङ. पाठः. २. 'व्यमिति' क. पाठः. ३. 'व्या' ग. घ. ङ. पाठः. ४. 'तिरुजं' क. ग. घ. ङ. पाठः. ५. 'वे' ज., 'श्व' घ. ङ. छ., 'श्वे' क. ख. झ. पाठः. ६. 'र' क. ख. पाठः.

---

* 'कौबेरं' इति धन्वन्तरिः ।

"चण्डा धनहरी चोरपुष्पी सैव च तस्करी।
तथा निशाचरी च स्यात् केशिनी ग्रन्थिकेत्यपि" ॥

टीका० — शङ्खिनीत्रयं चोरवल्लीति ख्यातायाम् ॥

अथ वितुन्नकः ॥ १२६ ॥

झटामलाऽझटा ताडी शिवा तामलकीति च।

क्षीर० — वितुद्यते वितुन्नकः। झटा सङ्घातोऽस्त्यस्या झटा। अमला आमलकीत्वात्। अज्झटा आश्चर्यकारिसङ्घाता। अदाश्चर्येऽद्भुतवत्। ताडयति मलं ताडी। आमलकीत्वाच्छिवा। ताम्यतीति तामलकी। आह च —

"तामल¶क्युत्तमा ताडी तमालं ‡तुमुलाकिनी।
$वितुन्नकस्त्वज्झटा च झटा चामलकीति च" ॥

टीका० — वितुन्नषट्कं भूम्यामलक्याम्। विपूर्वात् तुदेः क्तः। ततः कन्। वितुन्नकम्। अज्झटा अकारादिः। तामलकी तकारादिः।

"तामलक्यज्झटा सूक्ष्मफला क्षेत्रामलक्यपि"

इति रत्नमाला ॥

प्रपौण्डरीकं पौण्डर्यम्

क्षीर० — प्रकर्षेण पुण्डरीकस्येव दाहहृत्त्वात् प्रपौण्डरीकम्। अस्यैकदेशानुकाराल्लोके पौण्डर्यम्। आह च —

"प्रपौण्डरीकं चक्षुष्यं †पौण्डर्यं पौण्डरीयकम्"।

स्थलपद्ममिति गौडः ॥

¶ 'क्यजटा ता', ‡ 'तु तमालिनी', $ 'वितुन्नभूता तमकं भूधात्री भ्वामलक्यपि', † 'पुण्डर्यः पुण्ड' इति धन्वन्तरिः।

टीका० — प्रपौण्डरीकद्वयं पुण्डरीकवृक्षे ।

"सालपुष्पं स्थलपद्मं दृष्टिकृत् पुण्डरीयकम्"

इति रभसः ॥

अथ तुन्नः कुबेरकः ॥ १२७ ॥

कुणिः कच्छः काकुलको नन्दीवृक्षः

क्षीर० — तुद्यते तुन्नः । कुबेरः कुत्सितदेहः । अत एव कुणिः । णिस्थाने निं पेठुः । कष्यते कच्छः । आह च —

"*कुनिस्तुन्नक आपीतस्तुनिकः कच्छकस्तथा ।
$कुबेरकः §काकुलको नन्दीवृक्षोऽथ ¶नन्दकः ॥"

अश्वत्थाकारोऽयम् ॥

टीका० — तुन्नषट्कं क्षीरवति नन्दीवृक्षे । अ(ग्रे?श्वत्थ)वृक्ष इति केचित् । तदुक्तम् —

"अश्वत्थसदृशाकारो नन्दीवृक्ष उदाहृतः"

इति ॥

अथ राक्षसी ।

चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ॥ १२८ ॥

क्षीर० — रक्ष्यन्तेऽस्या राक्षसी । क्षियति वसत्यस्मिन् गन्धः क्षेमः । दुष्पत्रश्चौरकत्वात् । गणं हासयति गणहासकः । कोहनत्वात् । आह च —

---

१. 'तु' क. ख. पाठः. २. 'नः' ख. पाठः. ३. 'गू' क. ख., 'गलवृ' च. झ. पाठः. ४, ५. 'ष्पु' ग. घ. पाठः.

---

* 'तूणिस्तूणीकमापीतस्तृणिकः कनक', $ 'कुठेरकः', § 'कान्तल', ¶ 'नन्दिकः' इति धन्वन्तरिः ।

"चौरकः शङ्कितश्चण्डा दुष्पत्रः क्षेमको रिपुः।
गणहासः †कोहनकः कितवः §कुलकोरकः॥"

गन्धद्रव्यं चैतत्॥

टीका०— राक्षसीषट्कं चोरनाम्नि गन्धद्रव्ये॥

व्यालायुधं व्याघ्रनखं करजं चक्रकारकम्।

क्षीर०— व्यालायुधं व्याघ्रनखत्वात्। चक्रं मेलं धूपद्रव्यैः करोति **चक्रकारकम्**। आह च—

"नखमन्यद् व्याघ्रनखं पुटं व्याघ्रायुधं मतम्।
‡व्यश्रं व्याघ्रतलं पादं कूटस्थं *चक्रकारकम्"॥

टीका०— व्याघ्रायुधचतुष्कं व्याघ्रनखाख्ये गन्धद्रव्ये॥

सुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली॥ १२९॥
धमन्यञ्जनकेशी च

क्षीर०— नली इयं विद्रुमलताभा। कपोताङ्घ्रिर्नलिकत्वात्। नटति **वायुना** नर्तकीत्वात्। धमनी सौषिर्यात्। अञ्जनाभकेशा **अञ्जनकेशी**। **आह च**—

"नलिका विद्रुमलता कपोतचरणा नली।
सुषिरा धमनी शून्या §निर्मन्यौ[2] नर्तकी नटी"॥

टीका०— शुषिरापञ्चकं नालीनाम्नि गन्धद्रव्ये॥

हनुर्हट्टविलासिनी।

१- **'ष्पु'** ग. घ. पाठः. २. 'न्द्या नर्तकिनी न' क. ग. घ. ङ. पाठः.

---

† **'कोपनकः'**, § 'फलचोर' ‡ 'अस्रं व्या', * 'वज्रका', § **'निर्मथ्या'** इति धन्वन्तरिः।

शुक्तिः शङ्खः खुरः कोलदलं नखम्

क्षीर०— हन्ति हनुः तीक्ष्णाग्रत्वात् । हट्टे विलसति हट्टविलासिनी वेश्येव । नखयोगाच्छुक्त्याकृतिः । अत एव शङ्खः । खुरिति विलिखति खुरः । प्राणिशफत्वाद् वा । कोलदलं बदरीपत्राख्ययेन्दुनोक्तत्वात् । न खनति नखम् । आह च—

"नखः कररुहः शिल्पी करजोऽथ खुरः †शिफः ।
शुक्तिः शङ्खश्चलः कोशी हनुर्नागहनुः सहः" ॥

टीका० — धमनीचतुष्कं हट्टविलासिन्याम् । तरणिवद् धमनिः । 'कृदिकारादक्तिनः' (ग० ४. १. ४५) इति ङीपपि ।

"हनुर्हट्टविलासिन्यां कपोलावयवेऽपि च"

इति । शुक्तिपञ्चकं **नखाख्ये गन्धद्रव्ये** । कोलदलं बदरीपत्रमित्यर्थः ॥

अथाढकी ॥ १३० ॥

काक्षी मृत्स्ना तुवरिका मृतालकसुराष्ट्रजे ।

क्षीर०— आढकी सङ्ख्याधान्याख्या । 'तुवरीत्वात् तुवरो हि कषायो रसः । कर्षति काक्षी । प्रशस्ता मृद् मृत्स्ना । 'सत्सौ प्रशंसायाम्' (५. ४. ४०) । म्रियतेऽनेन मृता हेम(?) मृतालकम् । सुराष्ट्रदेशे जाता । आह च—

---

१. 'च ॥ अ' क. ख. पाठः. २. 'लि' घ. ङ. छ., 'ला' झ. पाठः. ३. 'त्रमि' झ. पाठः. ४. 'न हे' ख. पाठः.

---

† 'शफः' इति धन्वन्तरिः । * इदं 'मृत्स्ना' इत्यस्मादनन्तरं पाठ्यं भाति ।

"सौराष्ट्री चामृता *मङ्गः काक्षी काच्छी सुराष्ट्रजा।
अजिता तुवरी §स्तुल्या मृत्सा मृत्स्ना मृतालकम्" ॥

टीका०— आढकीषट्कं [1]डुमरीति ख्यातायाम्। तुवररसयोगात् तुवरि का। मृताल(क)मित्येकं नाम। तथा च—

"अजाता तुवरी स्तुल्या मृत्सा मृत्स्ना मृतालकम्[3]"

इति। [2]द्वितकारं मृत्तालकमित्यन्यः। नामद्वयमिति केचित्॥

कुटन्नटं दाशपुरं वानेयं परिपेलवम्॥ १३१॥
प्लवगोपुरगोनन्दकैवर्तीमुस्तकानि च।

क्षीर०— कुटन् नटति कुटन्नटं, [4]कुटन्नटापि। दशपुरे भवं दाशपुरम्। दाशान् पिपर्ति वा कैवर्तीमुस्तकत्वात्। प्लवते लघुत्वात् प्लवम्। अत एव गोनन्दम्। आह च—

"परिप्लवं प्लवं वन्यं †गोपुरं स्यात् कुटन्नटम्।
‡शतपुष्पं दाशपुरं ¶गोनन्दं जीर्णबुध्नकम्" ॥

टीका०— कुटन्नटाष्टकं [5]कैवर्तीमुस्तके। यत्र नालूकीति प्रसिद्धिः। तदुक्तं—

"परिप्लवं प्लवं वन्यं (स्यात्) कुटन्नटसंज्ञकम्।
जायते मुस्तकाकारं शैवालयवसञ्चये॥"

वने पानीये जातं वानेयम्।

---

१. 'ताला परिस्तु' ख. पाठः. २. 'तु' ङ. छ. पाठः. ३. 'म्। द्वि' झ. पाठः. ४. 'टम्। द' ख. पाठः. ५. 'क इति ख्याते। य' घ. ङ. छ. पाठः.

---

* सङ्गाकाङ्क्षी', § 'तुल्या मृ', † 'गोपुटं स्या', ‡ 'सित', ¶ 'गोनर्दं जीर्णपुष्पकम्।' इति धन्वन्तरिः।

"कैवर्तीमुस्तके क्लीबं शोणके ना कुटन्नटम्"

इति ॥

ग्रन्थिपर्णं शुकबर्हं पुष्पं स्थौणेयकुक्कुरे ॥ १३२ ॥

क्षीर०— ग्रन्थिप्रधानानि पर्णान्यस्य ग्रन्थिपर्णम् । ग्रन्थीन् पिपर्ति वा ग्रन्थिमत्त्वात् । शुकस्येव बर्हाणि पर्णान्यस्य शुकबर्हम् । शुकं बर्हमिति पदैकदेशत्वाद् वा द्वे संज्ञे । पुष्प्यति पुष्पम् । विकचाख्यम् । स्थूणाया इदं रूपं स्थौणेयम् । कुक्कुरं श्वाक्रोति । आह च—

"स्थौणेयकं †बर्हिचूडं शुकपुच्छं शुकच्छदम् ।
‡ विकचं शुकबर्हं च हरितं शीर्णरोमकम्" ॥

टीका०— ग्रन्थिपर्णषट्कं ग्रन्थिपर्णे । ग्रन्थिषु पर्णान्यस्येति ग्रन्थिपर्णम् । 'शुच शोके' । 'शुकवल्कोल्काः' (उ० ३. ४२) इत्यनेन शुको निपातितः । बर्हिःपुष्पं नामैकमिति केचित् ॥

**मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोयिकेत्यपि ॥ १३३ ॥**

क्षीर०— मरुन्मालेति स्रज्मारुताख्ये द्वे एव संज्ञे एते । अयं तु तुशब्दादेकं मन्यते । मरुत्सहिता माला वा । पिशुना गन्धसूचना । स्पृशति गन्धैः स्पृक्का । देवी देवपुत्रीत्वात् । वधूः आशावधूत्वात् । कोटिभिर्वर्षति मधु कोटिवर्षा । लङ्कायामूयते लङ्कोयिका, समुद्रान्तत्वात् । अन्यः—

"स्पृक्का माला पङ्कमुष्टिर्नीली देवी लता गुरुः ।
देवपुत्री च लङ्कोयी शीता पङ्कजमुष्टिका ॥

---

१. 'गु' ग. घ. पाठः.

---

† 'बर्हिचू', ‡ 'विकर्ण शु' इति धन्वन्तरिः ।

स्रङ्माकुता कोटिवर्षा निर्माल्याशावधूः स्मृता ॥"

धन्वन्तरिश्च—

"§ स्पृक्का स्पृग् ब्राह्मणी देवी ‡लता लङ्कोयिकेत्यपि।
पञ्चमुष्टिर्देवपुत्री निर्माल्या पिशुना वधूः ॥"

व्यर्थे समुद्रान्ता, कार्पासी यवासकः स्पृक्का च ॥

टीका०—मरुद्वदशकं पिडीक इति ख्याते। मरुन्मालेत्येकवचनाद्विवचनान्तपाठभेदात् सङ्घातविगृहीतम्।

"स्पृक्का स्रग् ब्राह्मणी देवी माला लङ्कोयिका मरुत्।
पञ्चमुस्तिर्देवपुत्री निर्माल्या पिशुना वधूः ॥"

इति कोशान्तरम्। 'पिश अवयवे'। ¶'क्षिपिपिशिमिथिभ्यः कित्' (उ० ३. ५५) इत्युनन्। पिशुना। लघुशब्द उक्तः। देवी कोटिवर्षेति च पदम्। वर्षेति नामोदधौ पृथगपि ॥

तपस्विनी जटा मांसी जटिला लोमशामिषी।

क्षीर०—जटाः सन्त्यस्या जटा जटिला च। अत एव तपस्विनी। समांसत्वान्मांसी। अत एवामिषी। आह च—

"जटा च पिशिती पेशी क्रव्यादी च तपस्विनी।
द्वितीया गन्ध*मांस्यन्या भूतकेशी जटा स्मृता ॥
पिशाची पूतना केशी भूतकेशी च लोमशा" ॥

---

१. 'नान्त' घ. ङ. छ. पाठः. २. 'पृक्का स्र' क. ख. झ. पाठः.

---

§ 'स्पृक्कास्पृग्', ‡ 'मालाली कोटिका मता। पञ्चमुष्टि' इति मुद्रितधन्वन्तरिपाठः। ¶ 'क्षुधिपिशि' इति मुद्रितोणादिपाठः। * 'मांसी स्यात् केशी भूतजटा' इति धन्वन्तरिः।

टीका० — तपस्विनीषट्कं **मांसीनाम्नि** गन्धद्रव्ये । मधुरिकायां मिसीशब्द उक्तः । जटा अर्शआदिः । जटिला पिच्छादिः । लोमशा लोमादिः ॥

त्वक् पत्त्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ॥ १३४ ॥

क्षीर०—त्वग् वृक्षशकलत्वात् । पत्त्राकृति पत्त्रम् । उत्कटं चमत्कारात् । भृङ्गं काष्ण्यतैक्ष्ण्याभ्याम् । चोचमग्निचोदकम् । वराङ्गं त्वग्रूपम् । आह च—

"त्वचं वराङ्गं भृङ्गं त्वक् चोचं *शकटमुत्कटम्" ॥

टीका० — त्वक्पत्त्रषट्कं **गुडत्वचि** । रभसकोशे त्वगपि पृथगस्य नाम । तथा च — 'त्वचि वराङ्गकमि'त्यादि ॥

कच्छूरको द्राविडकः काल्यको वेधमुख्यकः ।

क्षीर० — कृन्तति त्वग्दोषं कच्छूरकः हरिद्राभः । द्रावयति द्राविडकः । कल्यकारी काल्य(क)ः । आह च —

†"कच्छूरो गन्धमूलं च द्राविडः $काल्य एव च ।
वेधमुख्यो दुर्लभश्च कस्यचित् ‡सम्मता शटी" ॥

टीका० — कर्बुरचतुष्कं[1] **हरिद्राभे** । कचोलभलतीति ख्याताया[2]म् । प्रायो द्रविडदेशे भवतीति द्राविडकः ॥

ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधम् ॥ १३५ ॥

---

१. 'ष्कं क', २. 'ति द्रा' घ. ङ. छ. पाठः.

---

* 'शकलमु', † 'कर्चूरो', $ काश्यं एव', ‡ 'सम्मतः सढी ॥' इति धन्वन्तरिः ।

क्षीर० — **ओषं धयत्योषधिः फलपाकान्ता जातिः । सैवेष्टा[1] रोगहृत् । सर्वमिति क्षौद्रघृततैलाद्यमप्यौषधम्। 'ओषधेरजातौ' (५. ४. ३७) इत्यण् ॥**

टीका०—ओषध्यो जातिमात्रे स्युरित्यस्यार्थः—लतादिजातय ओषध्यः, न तु त्रिफलाकल्कादयः । 'उष दाहे' । घञ्। ओषो (धी)यते अस्य ओषधिः । पक्षे ङीषपि। 'जात्याख्यायामेकस्मिन्—'(१. २. ५८) इति बहुवचनम्। अजातावित्यादि । लतादिजातेरन्यत्र यत्किमपि रोगापनयनकरं तदौषधम्। 'ओषधेरजातौ' (५. ४. ३७) इत्यण् ॥

तद्विशेषान् शाकादीनाह —

शाकाख्यं पत्त्रपुष्पादि

क्षीर० — **शक्यतेऽनेन भोक्तुं शाकम् । श्यति देहं वा । पत्त्रं निम्बादेः । पुष्पं कोविदारादेः । आदिशब्दात् फलं वार्ताकादेः । मूलं मूलकबिसादेः । कन्दं सूरणादेः । अङ्कुरो वंशादेः । आह च —**

"मूलपत्त्रकरीराग्रफलकाण्डाविरूढकाः[2] ।
त्वक् पुष्पं कबकं चेति शाकं दशविधं स्मृतम्[3]" ॥

अविरूढकं तालास्थिमज्जेति गौडाः । वयं तु क्षेत्रोद्भृतस्य फलमूलादेः (सँदा ?) नवोद्भिन्नानङ्कुरान् विरूढाख्यान् बुध्यामहे । कवकं छत्रिका ॥

टीका० — पत्त्रपुष्पादि च शाकाख्यं शाकनामकम् । आदिना अग्रमध्यादीनां ग्रहणम् । तदुक्तम्—

"मूलपत्त्रकरीराग्रफलकाण्डाधिरूढकम् ।
त्वक् पुष्पं कवकं चेति शाकं दशविधं स्मृतम् ॥"

---

१. 'वौषधं रो', २. 'ण्डास्थिरू', ३. 'तम् ॥ 'आस्थिरू', ४. 'स्वेदस्रवद्भि' ख. पाठः.

मूलं मूलकादिः । करीरं वंशस्य । अग्रं वेत्रादि । फलं कर्कैरी[1]कूष्माण्डादि । काण्डं ताडोपलादि । अधिरूढं तालबीजाङ्कुरादि । त्वक् कदल्यादि । पुष्पं वङ्गासनादि । कबकं कोण्डूकम् । 'शो तनूकरणे' । 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' (उ० ३. ४३) इति बाहुलकः कन् । शाकम् ॥

शाकविशेषमाह —

तण्डुलीयोऽपमारिषः ।

क्षीर० — ताडयति दोषांस्तण्डुलीयः । लघुतण्डुलाभबीजो वा । **अपमृष्टत्यपमारिषः** । आह च —

"तण्डुलीयक उद्दिष्ट*श्चण्डाली[2] तण्डुलेरकः ।
भण्डीरस्तण्डुलीबीजो मेघनादो घन§स्वरः" ॥

टीका० — तण्डुलीयद्वयं खोडिआशाक इति ख्याते ॥

विशल्याग्निशिखानन्ता फलिनी शक्रपुष्प्यपि ॥ १३६ ॥

क्षीर० — लाङ्गली इयं पूर्वोक्तापि शाकत्वादिहोपात्ता ॥

टीका० — विशल्यापञ्चकमग्निशिखायाम् ।

"तिन्दुकाकारपत्रस्तु विटपोऽग्निशिखा मता"

इत्यस्या रूपम् ॥

स्याद् वृ[3]ष्यगन्धा छगलाण्ड्यावेगी वृद्धदारकः ।
जुङ्गः

क्षीर० — वृ[4]ष्यवद् गन्धयति वृष्यगन्धा । ऋ[5]क्षगन्धेति च पाठभेदः । छगलस्येवाण्डान्यस्थीन्यस्याः, छगलाण्डी । आवेगी वृष्यत्वात् । उद्वे-

---

१. 'र्त' क. ख. पाठः. २. 'ता' ख. पाठः. ३. 'ऋक्षग', ४. 'ऋक्षव' क. ग. घ. पाठः. ५. 'वृष्यग' ग. घ. ङ. पाठः.

---

* 'स्तण्डुलस्तण्डुलीयकः । ', § 'स्वनः' इति धन्वन्तरिः ।

जको वा । वृद्धं वृद्धत्वं दारयति वृद्धदारकः । वृद्धं दारकीकुरुते वा । जुङ्गति वृङ्क्ते दोषान् जुङ्गः । 'जुगि वर्जने' । आह च—

"वृद्धदारक आवेगी जुङ्गको जीर्णवालुकः ।
*अन्तःकोरकपुष्पी स्या†दजाण्डीछगलाण्ड्यपि ॥"

व्यर्थे वृष्यगन्धा, वृद्धदारकः पिण्डालकं विदारी च ॥

टीका०—ऋक्षगन्धापञ्चकं वृद्धदारके । छगलान्त्री आवेगीति च-च्छेदः । जुङ्गश्चवर्गादिः ॥

ब्राह्मी तु मत्स्याक्षी वयःस्था सोमवल्लरी ॥ १३७॥

क्षीर०—ब्राह्मी पावनीत्वात् । मत्स्याक्षी मत्स्याक्षिपुष्पा । वयसः स्थैर्यकृत् । व्यर्थे सोमवल्ली, वाकुची गुडुची ब्राह्मी च ॥

टीका०—ब्राह्मीचतुष्कं सोमलतायाम् । ब्राह्मीशाक इति केचित् ।

"ब्राह्मी वयःस्था मत्स्याक्षी ब्रह्मी तत् सोमवल्लरी"

इति शब्दार्णवः । अतो ह्रस्वादिरपि । ब्रह्मी ॥

पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ।

क्षीर०—हिमावती हिमवज्जातत्वात् । आह च—

"क्षीरिणी काञ्चनक्षीरी ¶पटुपर्णी च ‡कर्शनी ।
तिक्तदुग्धा हैमवती हेमदुग्धा हिमावती ।
§स्वर्णक्षीरा स्वर्णवती सुवर्णक्षीरिकापि च ॥"

---

१. 'र्शि'

---

* 'वृद्धः कोटरपु', † दजान्त्री छगलान्त्र्यपि', ¶ 'कटु', ‡ 'घर्षिणी', § 'सर्वक्षीरी स्वर्णदुग्धा सु' इति धन्वन्तरिः ।

त्र्यर्थे हैमवती, *हिमावती हरीतकी श्वेतवचा च ॥

टीका० — पटुपर्णीचतुष्कं स्वर्णक्षीरिकायाम् । अमरावतीवद्धिमावती ।

"हेमपीतं पयस्तस्या हिमवद्भूमिसम्भवा"

इत्यस्या रूपम् ॥

हयपुच्छी तु काम्बोजी माषपर्णी महासहा ॥ १३८ ॥

क्षीर० — हयपुच्छाकृतिः । कम्बोजदेशे भवा काम्बोजी । महासहेति मुद्गपर्यायः । सहाया भिन्नेयम् । आह च —

"माषपर्णी तु काम्बोजी कृष्णवृन्ता महासहा ।
आर्द्रमाषा सिंह‡वृन्ता मांसमाषाश्वपुच्छिका" ॥

टीका० — हयपुच्छीचतुष्कं माषपर्ण्याम् । अम्लानेऽपि महासहोक्ता ॥

तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि ।

क्षीर० — तुण्डिकेरी ओष्ठोपमफलत्वाद् बिम्बामिव बिम्बी । आह च —

"बिम्बी रक्तफला तुण्डी तुण्डिकेरफला च सा ।
ओष्ठोपमफला §गेह्वा पीलुपर्णी च तुण्डिका ॥"

त्र्यर्थे तुण्डिकेरी, बिम्बी कार्पासी च ॥

टीका० — तुण्डिकेरीचतुष्कं [२]तेलाकोच इति ख्याते ॥

बर्बरा कबरी तुङ्गी खरपुष्पाजगन्धिका ॥ १३९ ॥

---

१. 'गोष्ठा पी' ख., 'गोणा पी' ग. घ. पाठः. २. 'ल' ङ्ग. ज. पाठः.

---

* 'सीहुण्डः ह', ‡ 'विना मांस मासाश्व', § 'गोह्वा पी' इति धन्वन्तरेः ।

क्षीर० — बर्बरा कुटिलह्रस्वकेशाभा। अत एव कबरी। आह च—

"अजगन्धा खरपुष्पा वस्तगन्धा*गगन्धिका।
†कबरी बर्बरा गन्धा तुङ्गी ‡पीतमयूरकः॥"

टीका० — [1]बर्बरापञ्चकं बार्बारीति ख्याते शाके॥

एलापर्णी तु सुवहा रास्ना युक्तरसा च सा।

क्षीर० — रस्यते रास्ना। आह च—

"रास्ना युक्तरसा रस्या श्रेयसी रसनी रसा"

व्यर्थे सुवहा, रास्ना शेफालिका नाकुली च॥

टीका० — एलापर्णीचतुष्कमेलापर्णीति ख्यातायाम्। इयं क्षुद्राम्लफला। नाकुल्यां रास्नोक्ता॥

चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका॥ १४०॥

क्षीर० — चाङ्गं दन्तपटुत्वमीरयति चाङ्गेरी। चुक्रन्ते व्यथन्तेऽस्याश्चुक्रिका। अम्बे तिष्ठत्यम्बष्ठा। अम्लेन लुनात्यम्ललोणिका। अपभ्रष्टोऽयम्। आह च—

"क्षुद्राम्लिका तु चाङ्गेरी लोणिका चाम्ललोणिका"।

व्यर्थे अम्बष्ठा, पाठा माचिका चाङ्गेरी च। तथा चुक्रिका, अम्लिका चाङ्गेरी षण्डाकी चेति॥

टीका० — [2]चाङ्गेरीपञ्चकं [3]विरोलीति ख्यातायाम्॥

---

१. 'बार्बारप' घ. ङ. छ. पाठः. २. 'ला' घ. ङ. छ. पाठः. ३. 'रेराली' ङ. छ. पाठः.

---

* 'विगन्धिका', † 'कारवी च', ‡ 'मूतिमयूरिका।' इति धन्वन्तरिः।

सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।

क्षीर० — आह च —

"*चुक्रोऽम्लवेतसो भीमो रसालो$ऽम्बिल[1]वेतसः ।
रक्त+स्रावो वेत[2]¶सालः शतवेधी च §वेधकः ॥"

व्यर्थे चुक्रकः, वृक्षाम्लोऽम्लवेतसश्चुक्रश्च । तथा सहस्रवेधी, अम्लवेतसो हिङ्गुः कै[3]स्तूरी च ॥

टीका० — सहस्रवेधीचतुष्कमम्लवेतसे शुक्र इति ख्याते । सहस्रं वेधितुं शीलमस्येति सहस्रवेधी । ताच्छीलिको णिनिः एवं शतवेधी ॥

नमस्कारी गण्डकाली समङ्गा खै[4]दिरीत्यपि ॥ १४१ ॥

क्षीर० — नमस्कारी अञ्जलिरूपपत्रत्वात् । गण्डेषु ग्रन्थिषु कृष्णा गण्डकाली । समान्यङ्गान्यस्याः समङ्गा । खै[5]दिरी कृष्णसूक्ष्मपत्रत्वात् । आह च —

"रक्तपादी शमीपत्रा समङ्गाञ्जलिकारिका ।
नमस्कारी †गण्डकाली राम्ना खैदिरिकेत्यपि" ॥

टीका०— नमस्कारीचतुष्कं खइरीति ख्याते शाके ॥

जीवन्ती जीवनी जीवा जीवनीया मधुःस्रवा ।

क्षीर०— जीवन्त्यनया जीवन्ती । आह च —

"जीवन्ती जीवनीया च ‡जीवा जीवनवर्धनी ।
मङ्गल्यनामधेया च शाकश्रेष्ठा यशस्करी ॥"

---

१. 'क' ग. पाठः. २. 'काकसूची च' क.ग., ३, ४. 'बदरी', ५. 'बदरि' ख. पाठः.

---

* 'अम्लोऽम्ल', $ 'म्लो वीरवे', + 'स्रावी', ¶ 'साम्लः', § 'भेदकः', † 'गन्धकारी स्पर्शसंकोचपर्णिका ॥', ‡ 'जीवनी जवव' इति धन्वन्तरिः ।

टीका०— जीवन्ती(पञ्चकं ? षट्कं) जीवन्तीति[1] ख्यातायाम्। इयं च पवनालप्रख्यच्छविः। मधुः स्त्रीलिङ्गा॥

कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः॥ १४२॥

क्षीर०— कूर्चे शीर्षोऽस्य कूर्चशीर्षः। शृङ्गः शृङ्गाभः। जीवयति जीवकः। जीवतीति वा दीर्घायुष्ट्वात्। आह च—

"जीवकः शृङ्गकः †सर्जो[2] दीर्घायुः कूर्चशीर्षकः।
ह्रस्वाङ्गो मधुरः स्वादुः प्राणदश्चिरजीव्यपि"॥

टीका०— कूर्चशीर्षपञ्चकमष्टवर्गपठिते जीवके। ह्रस्वाङ्गेतिच्छेदः॥

किराततिक्तो भूनिम्बोऽनार्यतिक्तः

क्षीर०— किरातदेशे भवस्तिक्तरसः किराततिक्तः। अनार्यः किरातः। आह च—

"किराततिक्तको हैमः $काण्डतिक्तः किरातकः।
भूनिम्बोऽनार्यतिक्तश्च कैरातो रामसेनकः"॥

टीका०— किराततिक्तत्रयं चिरायित[3] इति ख्याते। किरातदेशजस्तिक्तः किरातितिक्तः। अनार्या म्लेच्छाः, तेषां तिक्तोऽनार्यतिक्तः॥

अथ सप्तला।

विमला सातला भूरिफेना चर्मकसेत्यपि॥ १४३॥

क्षीर०— सपति समवैति सप्तला। सातं सुखं लाति सातला। भूरयः फेनाभा बिन्दवोऽस्या भूरिफेना। चर्मेव कसति वर्धते चर्मकसा।

---

१. 'श्येव ख्या' क. ख. च. पाठः. २. 'गों' ख. पाठः. ३. 'चरायिक इ' ङ. पाठः.

---

† 'श्वेडो·दी', $ 'काण्डस्तिक्तः', इति वन्तारः।

चर्मकषेत्येके । आह च—

"सातला सप्तला सारी *बिन्दुला विमलामला ।
बहुफेना चर्मकसा फेनादीप्ता $सनालिका ॥"

टीका०— सप्तलापञ्चकं पाश्चात्ये सप्तलाख्ये गन्धद्रव्ये । चर्मघासस्य नामेत्यन्यः । चर्मकषा मूर्धन्यषा ॥

वायसोली स्वादुरसा कायस्था

क्षीर०— वायसवदवलीयते वायसोली काकोल्याख्या । काये तिष्ठतीति कायस्था विज्ञाने । आह च—

"काकोली मधुरा शुक्ला क्षीरा ध्वाङ्क्षोडिका मता ।
†कायस्था स्वादुमांसी च वायसोली च ‡कायिका ॥"

व्यर्थे स्वादुरसा, **पृथ्वीका शतावरी काकोली च ॥

टीका०— वायसोलीत्रयमष्टवर्गपठितकाकोल्याम् ॥

अथ मकूलकः ।

निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ॥ १४४ ॥

क्षीर०— मङ्क्षयते चित्रत्वान्मकूलकः । नियतः कुम्भो निकुम्भः । दन्ताभा दाम्यन्त्यनया दोषा वा दन्ती । आह च—

"¶दन्तशीघ्रा निकुम्भा स्यादुपचित्रा मकूलकः ।
तथोदुम्बरपर्णी च विशल्या च §घुणप्रिया ॥"

व्यर्थे प्रत्यक्श्रेणी, द्रवन्ती दन्ती च ॥

---

* 'विदुला', $ 'मराळि', † 'वयःस्था', ‡ 'कर्णिका', ** 'मद्गूका', ¶ 'दन्ती', § 'घुण' इति धन्वन्तरिः ।

टीका०— मुकुलकपञ्चकं दन्तिमूले ॥

अजमोदा तूग्रगन्धा ब्रह्मदर्भा यमानिका।

क्षीर०— अजवन्मोदो गन्धो यस्या अजमोदा। ब्रह्मदर्भा। यच्छत्यग्निमान्द्यं यमानिका। इयमशाके पूर्वोक्तापीह शाकत्वात् पुनरुक्ता। यवानीं मत्वा ग्रन्थकृद् भ्रान्तः। आह च—

"यवानी दीप्यको दीप्यो यवासाह्वयनामकः।
यमानिकोग्रगन्धा च दीपनीया च दीपनी" ॥

पूर्वोक्ता हि खराश्चैवाजमोदा ब्रह्मकुशा च। तथाच वैद्याः—

"अजमोदा ब्रह्मकुशा खराश्वा चोलमर्कटः।
पल्लीमोदा वस्तमोदा सैव हस्तिमयूरकः" ॥

टीका०— अजमोदाचतुष्कं यवानिकायां। द्विविधा यवानी। एका गन्धद्रव्यम्। अपरा क्षेत्रयवानी च। अविशेषादुभयोरिदमिष्यते। दुष्टो यवो यवानी। 'इन्द्रवरुण—' (४. १. ४९) इत्यादिना 'यवाद् दोषे' (वा० ४. १. ४९) इति वचनाद् ङीषानुकौ ॥

मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ॥ १४५ ॥

क्षीर०— पुष्करमूले त्रीणि नामानि। पद्मपत्रमिति ग्रन्थकृद् भ्रान्तः। यतः पद्मवर्णं लिपिभ्रान्त्या पद्मपर्णमिति बुद्धवान्। यदाह—

"मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम्।
काश्मीरं पुष्करजटाचीरं तत् ‡पद्मवर्णकम्" ॥

---

१. 'धू' घ. ङ. पाठः. २. 'यमातिशाकेव पू' ग. घ. ङ. पाठः.

---

‡ 'फलपत्रकम्' इति धन्वन्तरिः।

टीका० — पौष्करे मूले पुष्करमूल इति वणिजां ख्याते पौष्करत्रयम् ॥

अव्यथातिचरा पद्मा चारटी पद्मचारिणी ।

क्षीर० — अत्यर्थं[1] चरति व्याप्नोतीत्यतिचरा । पद्माभा च । चरति चारटी । आह च —

"पद्मचारिण्यतिचरा पद्मा पद्मवती[2]ति च ।
चारटी[3] गन्धमूला च लक्ष्मीः श्रेष्ठा*खुपुष्पिका ॥"

त्र्यर्थे अव्यथा, हरीतकी महाश्रमणी पद्मचारिणी च ॥

टीका० — अव्यथापञ्चकं पद्मचारिण्याम्युत्तरापथख्यातायाम् । चारटीति । चरेर्ण्यन्तात् 'शकादिभ्योऽटन्' (उ० ४. ८२) । 'पिप्पल्यादयश्च' (ग० ४. १. ४१) इति ङीष् ॥

काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनी[4]त्यपि ॥ १४६ ॥

क्षीर० — कम्पिल्यदेशे भवः काम्पिल्यः । चन्द्रो ह्लादनात्, क्षैण्याद्वा । रेचनी[5]ति सभ्यः पाठः । यदाह —

"‡काम्पिल्यकोऽथ रक्ताङ्गो रेची रेचनकस्तथा ।
¶चरको लोहिताङ्गश्च §कर्कशो रक्तचूर्णकः ॥"

इन्दुः—

"कर्कशाख्यः करम्भः स्यात् स काम्पिल्यः पटोदकः" ॥

टीका० — काम्पिल्यपञ्चकं शुण्डा[6]रोषणीति ख्यातायाम् । अस्याश्च वल्कलचूर्णं सिन्दूरवद् रक्तम् । अतोऽसौ रक्ताङ्गो रक्तचूर्णश्च । कम्पिल्लशब्दाद्

---

१. 'न्तं' ख. पाठः. २. 'चरा ।' ३. 'णी' ग, घ. ङ. पाठः. ४. 'रे' ख. पाठः. ५. 'रेचकनी' ख. पाठः. ६. 'गु' ज. पाठः.

---

* 'सुपुष्पिका ।', ‡ 'कम्पिल्लको', ¶ 'रञ्जनो लो', § 'कम्पिल्लो र' इति धन्वन्तरिः ।

'वृञ्छणा'दिना सङ्काशादिपाठाद् ण्यः। काम्पिल्यः॥

प्रपुन्नाटस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः।

पद्माट उरणाक्षश्च

क्षीर०—प्रपुनाति, पुनरटति वा प्रपुन्नाटः। एडवन्मेषाक्षत्वाद् गज्यते शब्द्यते एडगजः। चक्राणि दद्रुमण्डलानि मृद्नाति चक्रमर्दकः। पद्मवदटति पद्माटः। उरणवन्मेषवदक्षीण्यस्य उरणाक्षः। यद् वैद्याः—

"चक्रमर्दः स्मृतश्चक्री प्रपुन्नाटश्च नामतः।
एकरेणो दद्रुहरो मेषाक्ष्येडगजश्च सः"॥

टीका०— प्रपुन्नाटषट्कमेडच्यौम्। प्रपुन्नाट एकनकार इति केचित्। कृमिघ्नवद् दद्रुघ्नः। इको ह्रस्वादिसूत्रेण पूर्वपदह्रस्वत्वम्। चक्राकारतया चक्रं दद्रूः। तन्मर्दनाच्चक्रमर्दकः। उरणाख्यो मेषनामा॥

पलाण्डुस्तु सुकन्दकः॥ १४७॥

क्षीर०— पिपर्ति धातून् पलाण्डुः॥

टीका०— पलाण्डुद्वयं पलाण्डौ। बाहुलकात् पलेराण्डुः। पलाण्डुः। शोभनं कन्दं मूलमस्येति सुकन्दः। ततः कन्॥

लताकदुर्दुमौ तत्र हरिते

क्षीर०— तत्र नीले पलाण्डौ। लताकौ लताकाख्यः। दुष्टो-द्रुमोऽपवित्रत्वाद् दुर्द्रुमः। धन्वन्तरिस्त्वभेदेनाह—

"पलाण्डुर्यवनेष्टश्च सुकन्दो मुखदूषणः।
हरिणोऽन्यः पलाण्डुश्च लताकौ दुर्द्रुमश्च सः॥"

यत् सुश्रुतः—

---

१. 'इव मेषा' ख. पाठः. २. 'इन्द्राद्याः' ख. पाठः. ३. 'व्याम्।' ज. पाठः. ४. 'कम्। त' क. ख. पाठः.

"लशुनो दीर्घपत्रश्च पिच्छगन्धो महौषधम् ।
हिरण्यश्च पलाण्डुश्च लताकी[1] चापवारिता ॥
गृञ्जनो लवणेष्टश्च पलाण्डोर्दश जातयः ॥"

टीका० — लताकीद्वयं हरितपलाण्डौ ॥

अथ महौषधम् ।

लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ॥ १४८ ॥

क्षीर०— महदौषधं सर्वरोगजित्त्वात् । लसतिच्छिनत्ति रोगान् लशुनम् । गृज्यते कुत्सितं शब्द्यते गृञ्जनः । न रिष्यत्यरिष्टः । रसोनः पञ्चरसत्वात् । आह च —

"रसोनो लशुनोऽरिष्टो म्लेच्छकन्दो महौषधम् ।
महाकन्दो रसोनोऽन्यो गृञ्जनो दीर्घपत्रकः ॥"

महौषधगृञ्जनादीनामाकृतिभेदेऽपि रसाद्यैक्यादभेदं मन्यन्ते ॥

टीका०— महौषधषट्कं रसाउण[2] इति ख्याते । 'अश भोजने' । अशेर्लश च' (उ० ३. ९७) इत्युनन् लशादेशः । लशुनम् । तालव्यवत् । अम्लरसेनोनो रसोनः । ततः स्वार्थिकः कः । गृञ्जनारिष्टे द्वे नामनी[3] ॥

पुनर्नवा तु शोफघ्नी

क्षीर०— पुनर्नवो विशाखत्वात् । आह च —

"पुनर्नवो विशाखश्च कठिल्लः[4] ‡शशिलाटकः ।
वृश्चिकः क्षुद्रवर्षाभूर्दीर्घपत्रः कठिल्लकः[5] ॥"

---

१. 'पताकद्व' घ. ङ. च. छ. पाठः. २. 'सुराउ' ङ. छ., 'सराउ' घ., 'रत्साउ' च. पाठः. ३. 'न्नी ॥' ज पाठः. ४. 'ठि' ख. पाठः. ५. 'कुटिल्ल' ग. घ. ङ. पाठः.

‡ 'शशिवाटिका' इति धन्वन्तरिः ।

टीका० — पुनर्नवाद्वयं पुलिनेव इति ख्याते । पुनर्नवेति क्षुभ्नादित्वाण्णत्वाभावः ॥

वितुन्नं सुनिषण्णकम् ।

क्षीर० — वितुद्यते वितुन्नं नाम शाकम् । निषीदन्त्यस्मिन् गुणाः सुनिषण्णकम् । आह च —

"शितिवार*स्तनवकः शल्या च सुनिषण्णकः ।"

शाकभेदोऽयम् । यदाहुः —

"पाठा शूका शटी शाकं वास्तुकः सुनिषण्णकम् ।
विबन्धघ्नमविस्रंसि बन्धोद्भेदि तु वास्तुकम्" ॥

टीका० — वितुन्नद्वयं सुरसुनीति ख्याते । भूम्यामलक्यां वितुन्नमुक्तम् । सुनिषण्णकमिति । 'सदिरप्रतेः' (८. ३. ६६) इति धातुसकारे षत्वम् ॥

स्याद् धातकः शीतलोऽपराजितासनपर्ण्यपि ॥ १४९॥

क्षीर० — शीतलधातक इत्येका संज्ञा । यद् धन्वन्तरिः — 'गुणवर्णकः शीतलधातक' इत्याह । अपराजिता शीतलधातकः । द्वयर्थेषु च अपराजिता, ¶शीतलधातको गिरिकर्णिका च इति ॥

टीका० — धातकचतुष्कमसनपर्णिकायाम् । इयं चासनपत्रसमाना ॥

पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ।

क्षीर० — कटत्यावृणोति कटभी । पण्या स्तुत्या । ज्योतिष्मत्यग्न्याभत्वात् । लता दूरप्रसारात् । आह च —

---

१. 'न इ' च. पाठः. २. 'नुपत्रः श' ग. ङ., 'त' घ. पाठः. ३. 'शु' ङ. पाठः. ४. 'दकवा' घ. पाठः. ५. 'गुणप' घ. पाठः. ६. 'पर्णी शी' घ, 'पर्णशी' क. ङ. पाठः. ७. 'प' घ. पाठः. ८ 'रणा ।' ख. पाठः.

---

* 'रः सूचिपत्रः सूच्याह्वः सु', ¶ 'श्वेतबला गि' इति धन्वन्तरिः ।

"ज्योतिष्मती तु कटभी स्यात् सुवर्णलतेति च ।
‡सज्योतिष्काग्निभासा च लवणोक्ता तु $दुर्दिना ॥"

व्यर्थे (लता), प्रियङ्गुः शारिबा ज्योतिष्मतीति च । **द्व्यर्थे पारावतपदी, ज्योतिष्मती काकजङ्घा च ॥**

टीका० — पारावताङ्घ्रिपञ्चकं ज्योतिष्मतीलतायाम् ।

"जीवन्ती पीततैला च चन्द्रलेख्या च सोच्यते"

इति तन्त्रान्तरम् ॥

वार्षिकं त्रायमाणा स्यात् त्रायन्ती बलभद्रिका ॥ १५० ॥

क्षीर० — वर्षासु भवं वार्षिकम् । आह च —

"त्रायमाणा कृतत्राणा त्रायन्ती त्रायमाणिका ।
*बलभद्रा बला देवा वार्षिकं गिरिसनुजम्" ॥

टीका० — वार्षिकचतुष्कं त्रायमाणेति ख्यातायाम् ॥

विष्वक्सेनप्रिया धृष्टिर्वाराही बदरेत्यपि ।

क्षीर० — वाराही वराहक्रान्ता । अत एव धृष्टिर्धर्षणात् । **व्यर्थे बदरा, सुवर्चला अश्वगन्धा वाराही च ॥**

टीका० — विष्वक्सेनप्रियाचतुष्कं **वाराह्याम्** । वराहैकान्तायामिति केचित् ॥

मार्कवो भृङ्गराजः स्यात्

क्षीर० — मर्कति सम्पृच्यते मार्कवः । भृङ्गवद् राजते, भृङ्गवद् रञ्जयति वा कृष्णीकरोति भृङ्गराजः । भृङ्गरजोऽपि । आह च —

---

१. 'गृ' क. ख. पाठः. २. 'हाक्रान्ता' घ. ङ. छ., 'हक्रान्ता' क. ख. च. पाठः.

---

‡ 'ज्योतिष्कायाग्नि', $ 'दुर्जना', * बलदेवा बलभद्रा वार्षि', इति धन्वन्तरिः ।

"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च।
*अङ्गारकस्त्वेकरजो भृङ्गारः केशरञ्जनः" ॥

टीका० — मार्कवद्वयं भृङ्गराजे ॥

काकमाची तु वायसी ॥ १५१ ॥

क्षीर० — काकवन्माचयति वर्णेन सम्पृच्यते काकमाची। अत एव वायसी। कालमाच्यपि। आह च —

"काकमाची §ध्वान्तमाची ‡काकसाह्वा च वायसी" ॥

टीका० — काकमाचीद्वयं काकमायीति ख्यातायाम् ॥

शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा मिसिः।
अवाक्पुष्पी कारवी च

क्षीर० — शतपुष्पा बहुपुष्पा। सितच्छत्राभा। अवाञ्च्यधोमुखानि पुष्पाण्यस्या अवाक्पुष्पी। कारोरियं कारवी। कर्मण्या। आह च —

"शतपुष्पा मिसिर्घोषा †पीडका माधवी ¶सहा।
अतिच्छत्रा त्ववाक्पुष्पी शताह्वा कारवी स्मृता" ॥

टीका० — शतपुष्पासप्तकं संवृण्वेति ख्याते शाके। केचिदवाक्पुष्पीद्वयं हेठामुण्डीति ख्यातायां वदन्ति। 'पाककर्णपर्ण — '(४. १. ६४) इत्यादेना ङीप्। अवाक्पुष्पी ॥

सरणा तु प्रसारिणी ॥ १५२ ॥

तस्यां कटम्भरा राजबला भद्रबलेति च।

क्षीर० — सरति वातसङ्कोचौ न प्रवर्तते, दूरमनया सरणा। स-

---

१. 'साधका' ख. पाठः. २. 'लु' ङ. पाठः. ३. 'चनचव' ख. पाठः.

---

* 'भृङ्गारको भृङ्गरेणुर्भृङ्गा', § 'ध्वाङ्क्षमा', ‡ 'काकाह्वा चैव वा', † 'पीतिका', ¶ 'शिफा।' इति धन्वन्तरिः।

रणीति युक्तः पाठः। कटं बिभर्ति कटम्भरा। राजरूपा मुख्या बला बलकृत्। आह च—

"प्रसारणी सुप्रसरा सरणी सारणी च सा।
चारुपर्णी राजबला भद्रपर्णी प्रतानिका" ॥

टीका०— सरणापञ्चकं भादालीति ख्यातायाम् ॥

जनी जनूका जननी जन्तुकृच्चक्रवर्तिनी ॥ १५३ ॥
संस्पर्शा

क्षीर०— जायतेऽस्या जन्तुः जनी। जनूं करोति **जनूका**, **जननी** च। सम्यक् स्पर्शोऽस्याः संस्पर्शा। आह च—

"*जनूकारा च जनुकृज्जननी जन्तुकारिका।
संस्पर्शा च जनी चैव जनूका चक्रवर्तिनी" ॥

टीका०— जनीषट्कं जनीत्येव ख्याते सुगन्धिद्रव्ये ॥

अथ षटी गन्धमूली षड्ग्रन्थिकेत्यपि।
कच्छूरोऽपि पलाशोऽपि

क्षीर०— षड्ग्रन्थिकैकदेशः षटीति मूर्धन्यादिमाहुः। पलाशाः सन्त्यस्य पलाशः। आह च—

"‡षटी षडी पलाशश्च ज्ञेया पृथुपलाशिका।
सुगन्धमूला गन्धाली §सुगन्धा सुव्रता वधूः ॥"

कस्यचित् सम्मतः शठीति। कच्छूरस्य षटीत्वं, षट्याः कच्छूरत्वं चेतीह कच्छूरोपादानम्। द्व्यर्थे षटी, गन्धपलाशः कच्छूर इति ॥

---

१. 'भ' ङ. छ., 'भादायी' घ. पाठः

---

* जन्तुकारी जन्तुकृष्णा जतुका रञ्जनी स्मृता। जननी चैव संहर्षा जन्तुका च',
‡ 'सटी सडी प', § 'षड्ग्रन्था' इति धन्वन्तरिः।

टीका० — शटीपञ्चकं शब्द्याम्। 'सती गन्धशटी शटी' इति रभसः। शुणीशटीशरदशोक[1]' इति शभेदः। कच्छूरो दीर्घवच्चवर्गीयमध्यः॥

कारवेल्लः कटिल्लकः॥ १५४॥

सुषवी च

क्षीर० — कारेण वेल्लति कारवेल्लः। कटिं लाति कटिल्लकः। कटत्यावृणोति वा। सुष्ठु सूयते सुषवी॥

टीका० — कारवेल्लत्रयं करवेल[2] इति ख्याते। सुशवी[3]ति। 'शर्व गतौ'। तालव्यादिः। अच्। एतच्चोपाध्यायसर्वस्वे दामोदरेणोक्तम्॥

अथ कुलकः पटोलस्तिक्तकः पटुः।

क्षीर० — कोलति संस्त्यायति कुलकः। कुत्सितं लक्यते* स्वाद्यते वा। पटति सरत्वात् पटोलः। तिक्तो रसेन। पटुर्देहपटुत्वकृत्। लवणानुसर इत्येके। आह च —

"पटोलः कुलकस्तिक्तः पटुकः कर्कशच्छदः"॥

टीका० — कुलकचतुष्कं पटोले। 'अट पट गतौ'। '$कपिकल्लिगडिगण्डिकटिपटिभ्य ओलच्' (उ०१. ६९)। पटोलः॥

कूष्माण्डकस्तु कर्कारुः

क्षीर० — कौ ऊष्माणमण्डयति, कुत्सित ऊष्मा अण्डे[6] बीजेऽस्य वा पित्तकारित्वात् कूश्माण्डः। कुष्यते वा करोति वा तृप्तिं कर्कश्चासावियर्ति आरुः वस्तिशोधन(स?क)रत्वात् कर्कारुः॥

---

१. 'कोश' इ' घ. ङ. छ. पाठः. २. 'वि' ख. झ., 'विल्ल इ' घ., 'फल' ज. पाठः. ३. 'ची' ज. पाठः. ४. 'च' ख. ज. पाठः. ५. 'न्धि' क. ज. झ. पाठः. ६. 'ण्डेषु बीजेष्वस्य' ख. पाठः.

---

* सल्लकशब्देऽपि लकधातुरुक्तः। स तु मृग्यः। † 'कः प्रोक्तः पाण्डुकः' इति धन्वन्तरिः। $ 'कपिगडि' इति मुद्रितोणादिपाठः।

टीका० — कूष्माण्डद्वयं कूष्माण्डे ॥

एर्वारुः कर्कटी स्त्रियौ ॥ १५० ॥

क्षीर० — आ ईर्यते एर्वारुः । कटुचिर्भिटी । 'उर्वारुकमिव बन्धनाद्' इति श्रुतेरुर्वारुः । स्वादुचिर्भिटीमाहुः । ह्रस्वः कर्कः कर्कटी । ग्रामटीवल्लौकिकष्टप्रत्ययः ॥

टीका० — उर्वारुद्वयं कर्कट्याम् ।

"उर्वारुरिति ह्रस्वोऽयंमु(रं ? रु) बीजं प्रचक्षते ।
आरुश्चारुरिति स्मृत्या उर्वारुरिति कथ्यते ॥"

इति धातुपारायणम् । 'उन्मत्तो धुत्तूरः उर्वारुः कर्कटी स्याद्' इति पुंस्काण्डे रत्नकोशः ॥

इक्ष्वाकुः कटुतुम्बी स्यात्

क्षीर० — इष्यते इक्ष्वाकुः । क्षत्रियधनत्वात् । कटुका तुम्बी 'तुबि अर्दने' । आह च —

"कटुका *फलिनी तुम्बी लम्बा पिण्डफला तथा ।
इक्ष्वाकुः क्षत्रिय†धनास्तिक्तबीजो महा‡बलः" ॥

टीका० — इक्ष्वाकुद्वयं तितिलाबू इति ख्यातायाम् ॥

तुम्ब्यलाबूरुभे समे ।

क्षीर० — न लम्ब्यतेऽलाबूः । काँका नञ् । न लाति वान्तर्जलम् इति स्त्रीत्वेनार्थतोऽपि समे । अत्रेन्द्राद्याः —

---

१. 'द्र', २. 'द्र' ख. पाठः. ३. 'यं गुरं' घ. ङ. छ., 'यमिरं' क. ख. ज. पाठः. ४. 'गु', ५. 'स्तू' क. ख. पाठः. ६. 'तिलबू' च., 'तिलम्बू इ' घ. पाठः. ७. 'अल्पार्थे न' ख. पाठः. ८. 'नापि' ख. पाठः.

---

* 'लाम्बुनी', † 'वरा तिक्त', ‡ 'फला' इति धन्वन्तरिः ।

"अलाबूस्तुम्बुकः प्रोक्तो [1]लजालाबूरलाबुनी।
भक्षालाबु[2]र्महातुम्बू[3]ः" ॥

टीका० — तुम्बीद्वयमलाब्वाम्। तुम्बी। 'लुबि तुबि अर्दने'। पचादि-गौरादी। 'नञि लम्बेर्नलोपश्च' (उ० १. ९०) इति ऊः। अलाबूः। ह्रस्वादिदीर्घान्ता। आङ्पूर्वा दीर्घादिरिति कलापाः ॥

चित्रा गवाक्षी गोतुम्बी

क्षीर०— गोतुङ्गापभ्रंशोऽयम्। गवाक्षीत्वात्। आह च—

"ऐन्द्रीन्द्रवारुणी ‡द्राक्षा इन्द्रेर्वारुर्विषादिनी।
गवादनी क्षुद्रफला वृषभाक्षी गवाक्ष्यपि ॥"

ह्यर्थे चित्रा, *विशाला द्रवन्ती चेति। विशालायाश्चित्रात्वाद् भ्रान्तोऽत्र ग्रन्थकृत्। गवाक्षीविशेषोऽपि[5] वा विशालेति न दोषः ॥

टीका० — चित्रात्रयं गोतुम्बायाम् ॥

विशाला त्विन्द्रवारुणी ॥ १५६ ॥

क्षीर०— विशाला महाफलत्वात्। इन्द्रवदक्षैर्वृणोति इन्द्रवारुणी। आह च—

"अन्येन्द्रवारुणी प्रोक्ता विशाला तु महाफला।
आत्मरक्षा चित्रफला †[6]थवुसी त्रपुसी च सा" ॥

---

१ 'जलला' ख. पाठः. २. 'बू', ३. 'र्म्बी' ख. पाठः. ४. 'र्वाद् दी' क. ख. घ. ङ. छ. ज. पाठः. ५. 'षो वा' ख., 'षोऽपि न वा वि' ग. घ. पाठः. ६. 'तुम्बिनी त्र' ख. पाठः.

---

‡ 'न्द्राह्वाथेन्द्रवारुर्मृगादनी', * 'इन्द्रवारुणी बृहद्दन्ती', † 'त्रपुसी त्रपुसा च सा' इति धन्वन्तरिः।

टीका० — विशालाद्वयं गोरक्षकर्कट्याम् ॥

अर्शोघ्नः सूरणः कन्दः

क्षीर० — सु ऊर्यते प्रेर्यते सूरणः । कन्दति त्विष्यते कन्दो मूलविशेषः ॥

टीका० — अर्शोघ्नत्रय मोल्ल[1] इति ख्याते ॥

गण्डीरो[2] ना समष्ठिला ।

क्षीर० — गण्डी सृक्कणी ईरयति गण्डीरः । पुंसि । सम्यगस्थीनि लाति समष्ठिला । साण्डत्वात् । समष्ठिला च शाकम् । यन्माला — 'गण्डीरो ना समष्ठीला' ॥

टीका० — गण्डीरद्वयं शुण्ठीआ इति ख्याते शाके ॥

कलम्ब्यपोदका स्त्री तु मूलकं हिलमोचिका ॥ १५७ ॥

वास्तुकं शाकभेदाः स्युः

क्षीर० — कं[3] लम्बतेऽस्याः कलम्बी । अपगतोदका जाङ्गलत्वाद् अपोदका । मत्स्यकालीति धन्वन्तरिसंज्ञितम् । मूलकत्वाँदुपदंशत्वे ह्यस्य शाकत्वम् । 'यो ह्युभयोर्भवति, लभते सोऽन्यतरव्यपदेश'मिति । हिलाद् वीर्यान्मोचयति हिलमोचिका । वसन्त्यस्मिन् गुणा वास्तुकं *(शाकभेदाः स्युः?) क्षारपत्राख्यम् । कलम्ब्याद्याः पञ्चैते शाकप्रकाराः । 'शाकाख्यं पत्रपुष्पादि' इत्यत आरभ्य वा । यन्माला —

---

१. 'मौ' ख. घ. ङ. छ. पाठः. २. 'रस्तु स' ग. घ. ङ. पाठः. ३. 'क' ग. घ ङ. पाठः. ४. 'मनुप, ५. 'प्य' क. ग. घ. ङ. पाठः.

---

* धनूरेखान्तर्गतं 'पञ्चैते' इत्यतः परं पाठ्यम् इति भाति ।

"मण्डूकपर्णी पालङ्क्या चिल्लिका चाप्यपोदका ।
चाङ्गेरी हिममोचा च कलम्बी शाकजातयः" ॥

टीका० — कलम्ब्यादयः पञ्च प्रत्येकं **स्वनामप्रसिद्धाः शाकविशेषाः** । **के** जले लम्बत इति कलम्बी । पचादिगौरादी । उपशब्दोऽधिकार्थः । **अधिकमुदकमस्या** इत्युपोदिका । [1]चोव इति ख्याता । 'उदकस्योदः संज्ञायाम्' (६. ३. ५७) । वुन् । *[2]हिलमोचा । [3]हिलमञ्चीति ख्याता । मूलकं प्रसिद्धम् । 'मूल रोहणे' । चुरादिः । पचाद्यच् । ततः 'स्थूलादिभ्यः प्रकारवचने कन्' (५. ४. ३) । **वास्तुप्रभवत्वाद्** वास्तुकम् । 'रम्या वास्तुकवास्तवस्तबँकिका' इति प्रयोगोऽपि । वस्तेरुलूकादित्वाद् ऊकाञि वास्तूको दीर्घमध्योऽपीत्युणादिः ।

"पटोलपत्रवास्तूकं काकमाचीयवर्जनात्"

इति **वैद्यकप्रयोगः** ॥

दूर्वा तु शतपर्विका ।
सहस्रवीर्याभार्गव्यौ रुहानन्ता

क्षीर०— दूरं वाति, दूर्व्यते पशुभिर्वा दूर्वा । *भृगोरियं भार्गवी । **सहस्रवीर्या** बहुपर्वा महाप्रभावा वा । रोहति मूले रुहा । **अनन्ता** दूरप्रसरणात् । **नीलदूर्वेयम्** । यदाह —

"नीलदूर्वा स्मृता शष्पं शाद्वलं हरिता तथा ।
शतपर्वा $शातवीर्या शतवल्ल्य‡सिता लता ।
सहस्रवीर्यानन्ता च §[6]दुर्दना भार्गवी रुहा" ॥

---

१. 'पो' ज., 'वो' ख., 'चोन्' क., 'वोप इ' च., 'अपोथ इ' झ. पाठः. २, ३. 'भि' क. ख. ङ. छ. पाठः. ४. 'यमिता इ' क., 'यकिता इ' ङ. छ. ज. पाठः. ५. 'पर्व्यसि' ख. पाठः. ६. 'वं' ख. पाठः.

---

* 'पदद्वयमिदं व्युत्क्रमेण व्याख्यातम् । $ 'शीत', ‡ 'पि शीतला ।' § 'दुर्मना' इति धन्वन्तरिः ।

टीका०—दूर्वाषट्कं दूर्वायाम्। दूर्वेति। 'उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। 'उपधायां च' (८. २. ७८) इति दीर्घः। शतं पर्वाण्यस्या इति शतपर्विका। 'शेषाद् विभाषा' (५. ४. १५४) इति कप्।

"सहस्रवीर्यानन्ता च दुर्मरा भार्गवी रुहा"
इति तन्त्रान्तरम्॥

अथ सा सिता॥ १५८॥

गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः।

क्षीर०—गोरिव लोमान्यस्य गोलोमी। आह च—

"श्वेतदूर्वा च गोलोमी श्वेत*[1]गर्भा सिता लता"।

नीलश्वेतयोः पर्यायविपर्ययोऽद्वेष्यः[2]॥

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्॥ १५९॥

क्षीर०—कुरून् देशं विन्दति कुरुविन्दः। मेघपर्यायोऽम्बुधरत्वात्। मुस्यति खण्डयति रोगान् मुस्ता। लक्ष्ये त्रिलिङ्गः॥

टीका०—गोलोमीचतुष्कं श्वेतदूर्वायाम्। कुरुविन्दचतुष्कं मुस्तके। मेघनामा मेघपर्यायसंज्ञकः॥

स्याद् भद्रमुस्तको गुन्द्रा

क्षीर०—गुणैर्द्रान्ति रोगा अस्या गुन्द्रा। धन्वन्तरिरभेदेनाह—

"मुस्तमम्बुधरो मेघो घनो राजकशेरुकः।
भद्रमुस्ता वराहोऽब्दो गाङ्गेयः कुरुविन्दकः"॥

---

१. 'भर्गा सि' ख. पाठः. २. 'न्वे' क. ग. घ. ङ. पाठः.

---

* 'दण्डा सि' इति धन्वन्तरिः।

टीका०— भद्रमुस्तकद्वयं नागरमुस्तके ॥

चूडाला चक्रलोच्चटा ।

क्षीर०— उच्चटत्युपलमुच्चटा । चक्राङ्कोऽयम् ॥

टीका०— मृडालत्रयं उच्चडं इति ख्याते । अयमल्पपत्रस्तृणविशेषः ॥

वंशो त्वक्सारकर्मारत्वचिसारतृणध्वजाः ॥ १६० ॥

शतपर्वा यवफलो वेणुमस्करतेजनाः ।

क्षीर०— वन्यते वंशः । त्वचि सारत्वात् त्वक्सारः । 'सृ स्थिरे' (३. ३. १७) । घञ् । 'तत्पुरुषे कृति बहुलम्' (६. ३. १४) इति सप्तम्या वा अलुक् । कर्म इयर्ति कर्मारः । तृणानां ध्वज इव मुख्यः । यवाभं फलमस्य यवफलः । वेणते, वयति (वा) वातेन वेणुः । मा क्रियतेऽनेन मस्करः । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६. १. १५४) । तेजयति तेजनः । व्यर्थे तेजनः, शरो वेणुश्च ॥

टीका०— वंशदशकं वंशे । 'वृक्षभृवमिकुभ्यः शॅन्' । वंशः । त्वगेव सारोऽस्येति त्वक्सारः । 'हलदन्तात् सप्तम्याः संज्ञायाम्' (६. ३. ९) इत्यलुकि त्वचिसारः । शतपर्वा नान्तः । यव इव फलमस्येति यवफलः । 'अज गतिक्षेपणयोः' । 'अजिवृजिरीभ्यो निच्च' (उ० ३. ३८) इति करणे नुः । 'अजेर्व्यघञपोः' (२. ४. ५६) इति वीभावः । गुणः । (वेणुः) । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६. १. १५४) इति सुटा मस्करः । अपरं पातालवर्ग उक्तम् । 'तिज निशाने' । ल्युट् । तेजनः ॥

---

१. 'भृ' ज., 'भृटाल' च., 'भृढाल' झ. पाठः. २. 'ट' झ., 'ल' ज. पाठः. ३. 'अम' घ. ङ. छ., 'अघम' ज. पाठः. ४. 'शकन्' ज. 'शक्' च. झ. पाठः. ५. 'क्' क. पाठः. ६. 'वि' ङ. छ. पाठः.

---

* 'अजिवृरीभ्यो निच्च' इति मुद्रितोणादिपाठः ।

कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धुताः ॥ १६१ ॥

क्षीर०— कीति चकति कीचकः । कीचेति कायति वा ॥

टीका०— ये कीटादिभिः कृतरन्ध्रपङ्क्तयो वेणवः शब्दं कुर्वन्ति, ते कीचकाः ॥

ग्रन्थिर्ना पर्वपरुषी

क्षीर०— ग्रथ्यते ग्रन्थिः । पर्वति पर्व । पिपर्ति परुः ॥

टीका०— ग्रन्थित्रयं ग्रन्थौ । एतच्च क्रमादागतम् । 'ग्रथ ग्रन्थ सन्दर्भे' । इः । ग्रन्थिः । पर्व नान्तम् । परुः सान्तम् । यस्तु रत्नकोशे पुंस्काण्डे पठ्यते —'मज्जा सारो ग्रन्थिः परुः परागः कुसुमरेणुः' इति स उदन्तः ॥

गुन्द्रस्तेजनकः शरः ।

क्षीर०— गुन्द्रो दर्भविशेषे रूढः । यदाहुः— 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' । तेजयति निशिनोति तेजनः । शृणाति पारुष्याच्छरः ॥

टीका०— गुम्फत्रयं शरे । शृणातेः पचाद्यच् । शरः ॥

नडस्तु धमनः पोटगलः

क्षीर०— नडत्यर्दति नडः । 'नल गन्धे' । धमनोऽन्तःसुषिरत्वात् । धमिः सौत्रः । यथा—'धाम्नो धातं काञ्चनस्येव राशिः'[1]। पोटेन संश्लेषेण गलति पोटगलः । आह च—

"नलो नटो नडश्चैव स च पोटगलः स्मृतः ।
धमनो नर्त*कश्चेति" ॥

---

१. 'म्म' क. घ. ङ. पाठः.

---

* 'को रन्ध्री' इति धन्वन्तरिः ।

टीका०— नडत्रयं नले ॥

अथो काशमस्त्रियाम् ॥ १६२ ॥

इक्षुगन्धा पोटगलः

क्षीर०— काशते काशः कोकिलाक्षपर्यायः। इक्षुगन्धेत्येके। द्व्यर्थे पोटगलः, काशो नडश्च ॥

टीका०— काशत्रयं काशे। 'काशृ दीप्तौ'। तालव्यान्तः। पचाद्यच्। अपचयविवक्षायां गौरादित्वान्ङीष् काशीति च ॥

पुंभूम्नि तु बल्बजाः।

क्षीर०— बलन्ते बल्बजाः। तृणविशेषाः ॥

टीका०— बाल्ब इति ख्याते बल्बजाः ॥

रसाल इक्षुः

क्षीर०— रस्यते रसालः। इष्यते इक्षुः ॥

टीका०— रसालद्वयमिक्षौ। आम्रे रसाल उक्तः। इष्यते सर्वैरिति इक्षुः। 'इषेः क्सुः' (उ० ३. १५८) ॥

तद्भेदाः पुण्ड्रकान्तारकाद्यः ॥ १६३ ॥

क्षीर०— पुण्ड्रदेशजत्वात्, पौण्ड्रोऽपि। कान्तमूषमियर्ति कान्तारकः। कान्तारका भोगा अस्य वा। आदिशब्दात् कोशकराद्याः। आह च—

---

१. 'वयवि' च., 'पिच' ज. पाठः. २. 'इमी' क. ख. घ. ङ. छ. पाठः. ३. 'बाष्प इ' क., 'बाल्ल इ' ख., 'बब्ब इ' झ., 'बाल्व इ' ज. पाठः. ४. 'मीरयति का' क. ग. घ. ङ. पाठः.

"इक्षुः कर्कटको वंशः कान्तारो वेणु[1]निस्मृतिः ।
इक्षुरन्यः पौण्ड्रकश्च रसालः सुकुमारकः ॥
अन्यः §कोशकरादिः स्यादिक्षुयोनीक्षु*पालिका ।
तथान्य इक्षुगन्धा स्यादिक्षुरः कोकिलाक्षकः" ॥

टीका०— इक्षुविशेषे प्रत्येकं पुण्ड्र(क?)द्वयम् । आदिना कोशकारग्रहणम् ॥

स्याद् वीरणं वीरतरं

क्षीर०— वीरयते[2] वीरणम् । तृणभेदः ॥

टीका०— वीरणद्वयं वीयण इति ख्याते ॥

मूलेऽस्योशीरमस्त्रियाम् ।

अभयं

क्षीर०— अस्य वीरणस्य मूलम् । उश्यते काम्यते उशीरम् । अभयं रोगहृत्त्वात् । आह च —

"उशी$रममृणालं स्यादभयं समगन्धिकम् ।
रणप्रियं वीरतरं वीरं वीरण¶मूलिका" ॥

नलदं सेव्यममृणालं जलाशयम् ॥ १६४ ॥

लामज्जकं लघुलयमवदाहेष्टकापथे ।

क्षीर०— न द्यति नडदम् । अपारुष्यात् । नलति वा । अत एवामृणालमहिंस्रम् । जले आशेते जलाशयम् । शीतवीर्यत्वात्[3] । लाति दो-

---

१. 'ति', २. 'द्वा ।' ख. पाठः.

---

† 'निस्वनः', § 'करकशाली स्या', * 'वालिका' $ 'रं च मृ', ¶ 'मूलकम्' इति धन्वन्तरिः ।

षान् ला मज्जा सारोऽस्य लामज्जकम्। लघुगुणेन लीयते लघुलयम्। अवलीयते दाहोऽनेनावदाहम्। इष्टं कापथमस्याधोवातकृत्त्वादिष्टकापथम्। आह च—

"लामज्जकं *[1]सरालं स्यादमृणालं लयं लघु।
इष्टकापथकं शीघ्रं दीर्घमूलं जलाशयम्" ॥

व्यर्थेऽमृणालं, लामज्जकमुशीरं च। तथा सेव्यं, लामज्जकमुशीरं चेति। अवदाहमवदत्तमाहुः। तच्चोशीरं नलदम्। यदिन्दुः—'अवदत्तं रणप्रियम्'। ग्रन्थकृत्तु सेव्यामृणालयोर्नलदोशीरैकार्थत्वाद् भ्रान्तः ॥

टीका०— उशीरदशकं वीरणमूले। 'वश कान्तौ'। 'वशः कित्' (उ० ४. ३१)। ईरन्। सम्प्रसारणम्। उशीरम्। 'बहुलवचनात् षत्वे मूर्धन्यषमपी'ति काचिदुणादिवृत्तिः। लघुलेयं[2] नामद्वयमिति केचित्। अवदाहमिष्टकापथमितिच्छेदः ॥

नलादयस्तृणं

क्षीर०— तृणजातीया इत्यर्थः। तृण्यतेऽद्यते पशुभिस्तृणम् ॥

टीका०— नलादयो नलकाशादिस्तृणजातिप्रभेदः ॥

गर्मुच्छ्यामाकप्रमुखा अपि ॥ १६९ ॥

क्षीर०— गर्मुच्छ्यामाकौ तृणधान्यविशेषौ। गीर्यते गर्मुत्। श्यामं वर्णमकति श्यामाकः। प्रमुखशब्दान्नीवाराद्याः। तृणगर्मुती एकार्थे इत्येके ॥

---

१. 'सु' ख. पाठः. २. 'द्व' घ. पाठः.

---

* 'सनालं' इति धन्वन्तरिः।

टीका० — न केवलमेते, गर्मुच्छ्यामाकप्रमुखा अपि **तृणम्**। गिरतेः 'ग्रो मुट् च' (उ०१. १००) इति उतिप्रत्ययमुडागमाभ्यां गर्मुत्। कानासिडा इत्यस्य प्रसिद्धिः। मयण इति केचित्। 'श्यैङ् गतौ'। 'बलाकादयश्च' (उ० ३. १७५) इत्याकन्मुडागमौ। श्यामाकः।

"तृणधान्यं तु नीवारः श्यामाकं श्यामको भवेत्"

इति शाश्वतः। प्रमुखशब्देन कोद्रवादीनां ग्रहणम्॥

अस्त्री कुशः कुथो दर्भः पवित्रम्

क्षीर० — कौ शेते **कुशः**। कोथति **कुथः**। दृणाति पारुष्याद् **दर्भः**। दृभ्यते वा। पूयतेऽनेन **पवित्रम्**। **'सग्रन्थिं पवित्रकम्' इति स्मृतिः॥**

टीका० — कुशचतुष्कं कुशे। वंशवत् कुशः। * 'दृदलिभ्यां भः' (उ० ३. १५२)। दर्भः। 'पुवः संज्ञायाम्' (३. २. १८५) इतीत्रः। पवित्रम्॥

अथ कत्तृणम्।

पौरं सौगन्धिकं ध्यामदेवजग्धकरौहिषम्॥ १६६॥

क्षीर०— कुत्सितं तृणं कत्तृणम्। 'तृणे च जातौ' (६. ३. १०३) इति कोः कत्। पुरे भवं पौरम्। सुग(न्धि?न्धः) प्रयोज(नं सुरभिः?नमस्य)। ध्यायते पशुभिर्ध्यामम्। धूसरवर्णं वा। देवैर्जग्धमिव जर्जरत्वात्। यत्र तत्र रोहति रौहिषम्। 'रुहेर्ट्टिद्धिश्चो‡दीचाम्' (उ० १. ५०)। आह च—

"कत्तृणं §शकलिर्भूरिर्भूतिकं रौहिषं नलम्।

---

१. 'न्थिकं पवित्रम् इ' ख. पाठः.

---

* 'दृदलिभ्यां दः', ‡ 'श्च' इति मुद्रितोणादिपाठः। § 'सकलं भूतिर्भूतिदं रोहिषं तृणम्। ध्यामकं श्यामकं पौरं पाटलं देवदंशकम्॥' इति धन्वन्तरिः।

व्यापकं क्रामकं पौरं पुद्गलं देवजग्धकम् ॥"

त्र्यर्थं **सौगन्धिकं, नीलपद्मं कत्तृणं गन्धपाषाणं च ॥**

टीका० — कत्तृणषट्कं **रामकर्पूराख्यतृणे**। कुत्सितं तृणं कत्तृणम्। 'तृणे च जातौ' (६. ३. १०३) इति कोः कद्भावः। 'रुहेर्वृद्धिश्च' (उ० १. ५०) इति टिषच्। रौहिषम्।

"कत्तृणे रौहिषं क्लीबं पुल्लिङ्गो हरिणान्तरे"

इति मूर्धन्ये रभसः ॥

छत्रातिच्छत्रवालघ्नौ मालातृणकभूस्तृणौ ।

क्षीर० — छत्राकारस्तृणविशेषश्छत्रा। अतिक्रान्तश्छत्रमतिच्छत्रः। छत्रातिच्छत्रमित्येके। पारुष्याद् वालं हन्ति वालघ्नः। मालारूपाणि तृणान्यत्र मालातृणकः। भुवस्तृणं भूस्तृणम्। पारस्करादित्वात् सुट्, भूरव्ययं वा। आह च —

*"भूस्तृणे रौहिणे भूतिर्भूर्तिकोऽथ कुटुम्बकाः।
मालातृ[1]णश्च वालघ्नश्छत्रातिच्छत्रकस्तथा" ॥

टीका० — छत्रातिच्छत्रद्वयं **छत्राकारे सुगन्धाख्ये द्रव्ये**। तदुक्तं—

"सुगन्धाख्यं च कटुकं छत्रातिच्छत्रकं तथा।
छत्रकार इति ख्यातो मूले छत्रेव चाकृतिः ॥"

इति।

"आतपत्रं मतं छत्रं छत्रा मधुरिका मता।
अतिच्छत्रोऽपिच्छत्रा स्याच्छत्रा धान्याकमप्यथ ॥"

---

१. 'रिकैथ' ग. घ. पाठः.

---

* 'भूतृणो रोहिषो भूतिर्भूतिकोऽथ कुटुम्बकः', ‡ 'णः प्रलम्बश्चच्छत्रोऽतिच्छ' इति धन्वन्तरिः।

इति रुद्रः । अतिच्छत्रेति पृथगपि । वालं केशं हन्तीति वालघ्नः । कृमिघ्नवत् । पृषोदरादित्वाद् घत्वम् । मालातृणकद्वयं गाडथेढ इति ख्याते इक्कडपत्त्रसमाने । रामकर्पूरं बहुपर्वकाण्डं कर्पूरगन्धि च । अतो भेदः । भूस्तृणमिति पारस्करादिः ॥

शष्पं बालतृणं घासो यवस

क्षीर०— शस्यते शष्पम् । 'शसु हिंसायाम्' । वालं नवम् । घस्यतेऽद्यते घासः । यूयते यवसम् ॥

टीका०— शष्पद्वयं नवतृणे । शष्पमिति । 'शसु हिंसायाम्' । *'खष्पशिष्पशष्पबाष्पपुष्पपर्परूपकूर्पशिल्पतल्पाः' (उ० ३. २८) इति पप्रत्ययः । अन्त्यस्य च षत्वम् । एवं तालव्यादिरोष्ठ्योपधश्च । अमरमालायां तु पुंस्युक्तः । घासद्वयं गवादीनामदनीये । अदेः कर्मणि 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः । घासः । यौतेर्वेतसवदसुच् । यवसः । द्वौ दन्त्यसौ । उणादौ यावसो वृद्धोऽपि दर्शितः ॥

तृणमर्जुनम् ॥ १६७ ॥

क्षीर०— अर्ज्यतेऽर्जुनम् । 'यवसं च तृणमर्जुनम्' इति भागुरिः ॥

टीका०— तृणद्वयं सामान्यतृणे । तिण इति ख्याते इति केचित् । 'तृण अदने' । 'घञर्थे कविधानम्' (वा० ३. ३. ९८) इति कर्मणि कः । तृणम् । 'अर्ज सर्ज अर्जने' । 'तृणाख्यायां †णित्' (उ० ३. ९९) इत्युनन् । अर्जुनम् ॥

तृणानां संहतिस्तृण्या

क्षीर०— पाशादित्वाद् यः ॥

---

१. 'गन्धथेढ इ' ज., 'गान्धथेथ इ' घ., 'गान्धिघ्ने इ' ञ. पाठः. २. 'ककड' ख., 'क्कड' ञ. पाठः. ३. 'अयं ता' घ. ङ. छ. पाठः.

---

* 'खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः', † 'चित्' इति मुद्रितोणादिपाठः ।

टीका० —तृणमेलके तृण्या। पाशादित्वाद् यः॥

नड्या तु नडसंहतिः।

क्षीर०— प्राग्वद् यः॥

टीका०— नडसंहतौ नड्या॥

तृणराजाह्वयस्तालः

क्षीर०— तृणराजस्तृणद्रुममध्ये मुख्यत्वात्। तलति प्रतिष्ठति बहुमूलत्वात् तालः। भूमिपिशाचो देश्याम्॥

टीका० —तृणराजद्वयं तालेे। तृणराजनामेत्यर्थः। 'तल प्रतिष्ठाकरणयोः'। घञ्। तालः॥

नालिकेरस्तु लाङ्गली॥ १३८॥

क्षीर० —नालिकान् नालयुक्तान् पुष्पादीन् ईरयति नालिकेरः। हलाकारपत्रशाखत्वाल्लाङ्गली। तत्फलं वा॥

टीका० —नालिकेरद्वयं नालिकेरे। 'नालिकेरजा जारकेलिना' इति विदग्धे गतप्रत्यागतम्। वासवदत्तायां तु—महावीरैरिव नारिकेलिधरैरुपवनपादपैः' उपशोभितम् इति सम्बन्धः। अथवा प्रथमो डकारः, द्वितीयो लकारः, तृतीयो रेफः। तथा च द्विरूपकोशः—'नारिकेलादिषु त्रैधम्' इति। लाङ्गली नान्तः॥

घोण्टा तु पूगः क्रमुको गुवाकैः[3] खपुरः

क्षीर०—घुणन्ति भ्रमन्त्यनया घोण्टा। पवनेन पूगः। क्रामति क्रमुकः। गुवन्त्यनेन स्रंसकत्वाद् गुवाकैः[3]। खानि प्रीणाति[4] खपुरः॥

---

१. 'इयः।', २., ३. 'कुः' क. ङ. घ. ज. झ. पाठः, ४. 'णयति' ख. पाठः,

टीका० — घोण्टापञ्चकं गुवाके । *'छापूञ्खलिभ्यः कित्' (उ० १. १२९) इति पुनातेर्गन्प्रत्ययः । पूगः । 'गुपू रक्षणे' । 'बलाकादयश्च' (उ० ३. १७९) इत्याकः, अन्तस्य च वत्वं गुणाभावश्च निपात्यते । 'गुवागोऽपि च गूवाक' इति तारपालः ॥

अस्य तु ।

फलमुद्वेगम्

क्षीर० — अस्य पूगस्य फलम् । उद्गतो वेगोऽस्योद्वेगम् । ‡स्रंसकत्वात् ॥

टीका०— उद्वेगं फलमेव, न तरुः । 'द्विहीनं प्रसवे सर्वम्' इति क्लीबत्वम् ॥

एते च

क्षीर० — पूगादयः शब्दाः फलवृत्तयोऽपि क्लीबे । 'फले लुक्' (४. ३. १६३) । घोण्टा तु 'हरीतक्यादिभ्यश्च' (४. ३. १६७) इति लुक् । 'लुपि युक्तवद् व्यक्तिवचने' (१. २. ५१) इति वृक्षे फले च स्त्रियाम् ॥

हिन्तालसहितास्त्रयः ॥ १६८ ॥

खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ॥ १६९[1] ॥

क्षीर० — एते तालनालिकेरपूगास्त्रयो हिन्तालेन चतुर्थेन सहिताः खर्जूराद्याश्चत्वारस्तृणप्रधाना वृक्षाः । ताली जात्यन्तरम् । एवं खर्जूरी

---

१. 'गूवाकोऽपि' अ. पाठः.

---

* 'छापूखडिभ्यः कित्' इति मुद्रितोणादिपाठः । ‡ 'पदादस्मादनन्तरं 'पूगादयः' इत्यादिन्यास्यावाक्यानि योजयित्वा 'एते च हिन्ताल' इति पठनीयं भाति ।

भूमिखर्जूरः । हिनोति वर्धते हिन्तालः । ख(र्जुरी ?र्जती)ति खर्जूरः । 'खर्ज व्यथने' । [1]केत्यते ज्ञायते गन्धेन केतकी । ताडयति ताडी ॥

इति वनौषधिवर्गः ॥

टीका० — एते तालनालिकेरगुवाक्कादयस्त्रयो हिन्तालसहिताश्चत्वारः । खर्जूरादयश्चत्वारः । एवमष्टौ तृणद्रुमा इत्युच्यन्ते । 'खर्ज मार्जने' । खर्ज-पिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९१) । खर्जूरः । [2]तेडेश्चौरादिकादच् । गौरादि ङीष् । [3]ताली । स्वल्पः खर्जूरः खर्जूरी । गौरादिः । इयं प्रसिद्धैव ॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे

वनौषधिवर्गः ॥

अथ सिंहादिवर्गः ।

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।

क्षीर० — हिनस्ति सिंहः । मृगाणां द्वीप्यादिशशान्तानामिन्द्रः । **पञ्चास्यो** विस्तृतास्यः । 'पाचि विस्तारवचने' । कर्मणि घञर्थे कः । मुख-पादैर्योद्धृत्वाद्वा । **हर्यक्षः** कपिलाक्षः । अत एव **हरिः** । हरत्याकर्षति वा । **कण्ठीरवो देश्याम्** ॥

टीका० — सिंहषट्कं सिंहे । हिनस्ति मृगानिति सिंहः । 'तृह हिसि हिंसायाम्' । पचादिः । पृषोदरादित्वाद् वर्णविपर्यासः । मृगाः पशवः, तेषामिन्द्रो राजा मृगेन्द्रः । विस्तृतमुखत्वात् पञ्चास्यः । 'पाचि विस्तारवचने' ।

---

१. 'कम्यते' ख. पाठः. २. 'न', ३. 'ना' ङ. छ. पाठः. ४. 'श्यः' घ. ङ. पाठः.

घञर्थे कः । हरिणी पिङ्गले अक्षिणी अस्येति हर्यक्षः । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (५. ४. ११३) इति समासान्तः षच् । के शिरसि सरतीति केसरः, सटा । तद्योगात् केसरी । अत इनिः । 'आपिङ्गललोलकेसरं रामबलम्' (स०१३. श्लो० ३१) इति भाषासमावेशे भट्टिः । हरति मृगानिति हरिः । §इः (उ० ४. १४०) इति इः ॥

शार्दूलद्वीपिनौ व्याघ्रे

क्षीर० — शृणाति शार्दूलः । द्वौ वर्णावीयते, द्वीपोऽस्त्यस्य वा तन्निवासित्वाद् द्वीपी । व्याजिघ्रति व्याघ्रः । चित्रकायः पञ्चशिखरश्च ॥

टीका० — शार्दूलत्रयं व्याघ्रे । शृणातीति शार्दूलः । 'शॄ हिंसायाम्' । 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९१) । 'कर्मेर्दुक् चे'त्यनुवर्तमाने शृणातेर्दीर्घश्च' इत्युलच् दुगागमो दीर्घश्च । द्वीपं चर्म, तद्योगाद् द्वीपी । अत इनिः । क्वचिद् व्याघ्रद्वीपिनोर्भेद उक्तः । व्याजिघ्रतीति व्याघ्रः । 'आतश्चोपसर्गे' (३. १. १३६) इति कः । 'द्वीपिव्याघ्रयोरल्पमहत्तया भेदः' इति चाणक्यटीकाकृतोक्तम् ॥

तरक्षुस्तु मृगादनः ॥ १ ॥

क्षीर०— तरं क्षिणोति मार्गं रुणद्धि तरक्षुः । अरण्यश्वा तरक्षुरित्येके । वृकोऽपि ॥

टीका० —तरक्षुद्वयं स्वल्पव्याघ्रे । अयं कुक्कुरप्रायो व्याघ्रपुच्छश्च । तरन् प्लवन् क्षिणोति हिनस्तीति तरक्षुः । 'तरिनम्योर्डुवः' इति बाहुलको डुः । मृगादनो नन्द्यादिः ॥

---

१. 'णो' ख. ग. पाठः. २. 'णौ पीय' ख. पाठः.

---

§ 'अच इः' इति मुद्रितोणादिपाठः ।

वराहः सूकरो घृष्टिः कोलः पोत्री किरः किटिः।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥ २ ॥

क्षीर०— वरमाहन्ति वराहः। सूयतेऽत्यर्थं सूकरः। घर्षति घृष्टिः। पीनत्वात् कोलः। 'कुल संस्त्याने'। पोत्रं मुखाग्रमस्य पोत्री। किरति क्ष्मां किरः। 'इगुपध—' (३. १. १३५) इति कः। केटति किटिः। 'किट गतौ'। 'कुड घनत्वे'। अस्मात् क्रोडः।

"कुद्दालः (पुंसि) मुस्तादो दंष्ट्रास्रो मुखलाङ्गलः"

इति मुग्धः ॥

टीका०— वराहद्वादशकं सूकरे। वरमाहन्तीति वराहः। 'अन्येभ्योऽपि—' (वा० ३. २. १०१) इति डः। 'शुचः करः शूकरः' इति पृषोदरादित्वाद् धातुप्रदीपे तालव्य उक्तः। 'नारायण इव सौकर्यसमासादितधरणीमण्डलः' इति वासवदत्तायां दन्त्यः।

"तालव्या अपि दन्त्याः स्युः शम्बशूकरपांशवः"

इति पुरुषोत्तमः। घर्षतीति घृष्टिः। 'क्तिच्क्तौ च संज्ञायाम्' (३. ३. १७४) इति कर्तरि क्तिन्। बदर्यां कोल उक्तः। पोत्रं सूकरमुखम्। तद्योगात् पोत्री। किरतीति किरः। 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५)। गिरिवत् किरिः। क्वचित् किटिरिति पाठः। सोऽपि 'इगुपधात् §किः' (उ० ४. १२१) इत्यनेन साधुरिति चान्द्राः। दंष्ट्रिघोणिनौ व्रीह्यादी। क्रोशतीति क्रोडः। पृषोदरादिः। कर्मण्यण् भूदारः॥

कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः।
मर्कटो वानरः कीशो वनौकाः

---

§ 'किन्' इति मुद्रितोणादिपाठः।

क्षीर०— कम्पते चलति कपिः । प्लुवैर्गच्छति प्लवङ्गः । 'गमेः सुपि खश्च डित्' । डे प्लवगः । 'गमश्च' (३. २. ४७) इति खचि प्लवङ्गमोऽपि । शाखासञ्चारी मृगः शाखामृगः । वलयो मुखेऽस्य वलीमुखः मृगयते मृगः । म्रियते मर्कटः, कुम्भकर्णनिगीर्यत्वात् । वा न रमते वानरः । पक्षे नरो वेति वा । चिकेति जानाति कीशः । कीशब्दमीष्टे वा । वने ओकोऽस्य वनौकाः । हरिर्नानार्थे । कृष्णमुखो गोलाङ्गूलः । कापेयं चापलादिकम् ॥

टीका०— कपिनवकं मर्कटे । चलस्वभावात् कपिः । '*अभिकम्प्योर्नलोपश्च' (उ० ४. १४५) इति किः । प्रवप्लवौ गतिविशेषौ । ताभ्यां गच्छतीति प्लवङ्गः प्लवगः । प्रवङ्गः प्रवगश्च भुजङ्गभुजगवद् व्युत्पन्नौ । शाखाप्रसक्तो मृगः शाखामृगः । शाकपार्थिवादिः । श्लथं चर्म वली । सा मुखेऽस्येति वलीमुखः । मर्केः सौत्राद् गत्यर्थात् 'शकादिभ्योऽटन्' (उ० ४. ८२) मर्कटः । नर इव वानरः । वाशब्द इवार्थे । मयूरव्यंसकादित्वात् समासः । को वातः । तदपत्यं किः । स एवेशोऽस्येति कीशः । दिवौकोवद् वनौकाः ॥

अथ भल्लुके ॥ ३ ॥

ऋक्षाच्छभल्लभालूकाः

क्षीर०— भल्लति हिनस्ति भल्लुकः । दीर्घमध्योऽपि । लक्ष्यं त्वत्र —'दधति कुहरभाजामत्र भल्लूकयूनाम्' । ऋक्ष्णोति ऋक्षः । अच्छ आभिमुख्येन भल्लति अच्छभल्लः । अच्छेत्याभिमुख्यार्थोऽव्ययम् । भलति भालूकः । भाल्लूकोऽपि ॥

टीका०— भल्लूकचतुष्कं भालूके । 'भल भल्ल परिभाषणहिंसादानेषु' ।

---

१. 'ङ्गमः प्रवङ्गमः । प्र' क. ख. पाठः. २. 'ङ्गमभुजङ्गव' क. ख. पाठः. ३. 'च—द' ङ. पाठः. ४. 'ल्ल' क. ख. घ. ङ. च. छ. पाठः.

---

* 'कुडिक.....' इति मुद्रितोणादिपाठः ।

'उल्लूकादयश्च' (उ० ४. ४१) इत्यूकञ्। 'उपधोपधत्वाद् वृद्ध्यभावः' इति धातुप्रदीपे भल्लूकोऽद्व(द्वौ ? द्धो)दीर्घमध्यो व्युत्पादितः। केचिच्छन्दोभङ्गभिया ह्रस्वमध्यमव्युत्पन्नं भल्लुकं पठन्ति। 'ऋषि गतौ'। 'ऋषेर्जातौ' (उ० ३. ६७) इति सः, किच्च। ऋक्षः। अच्छभल्लेति सङ्घातविगृहीतम्। तथा च हर्षचरिते— 'अच्छभल्लचर्मनिर्मितेन भल्लीप्रायप्रभूते'त्यादि। 'अच्छौ निर्मलभल्लूकावि'त्यन्यः। 'भल्लौ भाल्लूकबाणौ स्तः' इति धरणिश्च। भालूक इति। पूर्ववदूकञ्। 'अत उपधायाः' (७. २. ११६) इति वृद्धिः।

"खड्गी गण्डी गण्डकः स्याद् ऋक्षभालूकभल्लुकाः"

इति विक्रमादित्यः॥

गण्डके खड्गखड्गिनौ।

क्षीर०— गण्डति संहन्यते गण्डकः। खेडति भिनत्ति खड्गः। खड्गं शृङ्गमस्यास्ति खड्गी। वार्ध्राणसोऽपि॥

टीका०— गण्डकत्रयं गण्डके। 'गडि वदनैकदेशे'। कुन्। गण्डकः। अर्शआद्यच्चि खड्गः। अस्य शृङ्गं खड्गः। तद्योगात् खड्गी॥

लुलापो महिषो वाहद्विषत्कासरसैरिभाः॥ ४॥

क्षीर०— लुडति पङ्के लुलापः। महति मह्यां शेते वा महिषः। महोऽपि। वाहं हयसमूहं द्वेष्टि वाहद्विषत्। 'द्विषोऽमित्रे' (३. २. १३१) इति शतृप्रत्ययः। वाहं द्विषन्नित्येके। घर्मार्तः कं जलमासरति कासारः। ईषत् सरति वा महाकायत्वात्। सीरिभिर्दान्तैर्भाति सीरिभः कुटुम्बी, तस्यायं सैरिभः। रजस्वलोऽपि॥

टीका०— लुलापपञ्चकं महिषे। अप्सु लुलतीति लुलापः। 'लुठ संश्लेषणे'। लुड इत्येके। वर्णदेशनायां पवर्गान्त उदाहृतः। इगुपधलक्षणः कः।

---

१. 'ह्लू' घ. ङ. छ. झ. पाठः. २. 'भल्लूक' झ. पाठः. ३. 'ह्लू' ङ. छ. पाठः. ४. 'बाध्रण' ख., 'वार्ध्राण' घ. ङ. पाठः. ५. 'यो' ग. ङ. पाठः. ६. 'यः' ग. घ. ङ. पाठः.

लडयोरेकत्वस्मरणम् । पृषोदरादित्वादर्च् । राजदन्तादित्वात् परनिपातः । 'मह पूजायाम्' । 'अविमह्योष्टिषच्' (उ० १. ४८) । महिषः । मूर्धन्यषः । वाहोऽश्वः । तस्य द्विषन् अरिः । वाहद्विषन् । के जले सरतीति कासरः । 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः । वर्णदेशनायां सैरिभो दन्त्यादौ पठितः ॥

स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः ।
सृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥ ५ ॥

क्षीर० — शिनोति शिवा । शकुनावेदनी वा । सृगालेऽपि स्त्रीलिङ्गः । यच्छाश्वतः —

"शिवः कीलं शिवा क्रोष्टा भवेदामलकी शिवा" ।

गां मिनोति मीनाति वा गोमायुः । मृगान् धुर्वति मृगधूर्तकः । असृगालाति सृगालः । सरति सृजति वा । क्रोशति क्रोष्टा । फे इत्यव्यक्तं राति फेरुः । फेरवश्च । जमति जम्बुकः । †जम्बवश्च सर्वभक्षत्वात् । 'जमु अदने' । फेरुण्डोऽपि ॥

टीका० — शिवादशकं सृगाले । चतुष्पदजातीनां द्विलिङ्गतेति वक्ष्यति । तदपवादोऽयम् । शिवेति । मृगाल्यां सृगाले च शिवाशब्दः स्त्रियामित्यर्थः । भूरि अनन्ता मायास्येति भूरिमायः । गां मिनोतीति गोमायुः । गोः पूर्वा मायुर्गोमायुरित्यन्ये । 'कृवापा —' (उ० १. १) इत्यादिना उण् । 'मीनातिमिनोतिदीङां ल्यपि च' (६. १. ५०) इत्यात्वम् । आतो युक् । मृगेषु वन्यपशुषु धूर्तकः मृगधूर्तकः ।

"शृगालो वञ्चके दैत्यविशेषे ‡म + लुँ? स्त्रियाम्"

इति तालव्यादौ रभसः । "रणं सृगालीपरिगतमप्यसृगालीशोभितम्" इति कुमार

---

१. 'प्' क. ख. पाठः. २. कः । 'स' ख. पाठः. ३. 'यू' च. पाठः. ४. 'री' घ. ङ. छ. पाठः.

---

† 'जम्बूकश्च' इति भानुजिदीक्षितः । ‡ 'शृगालो वञ्चके दैत्यभेदे ना डमरे स्त्रियाम्' इति मेदिनी ।

चरिते दन्त्यादिः। 'वञ्चुकौटिल्ये'। ण्वुल्। वञ्चकः। क्रोष्टेति। 'क्रुश आह्वाने रोदने च'। सेतुवत् तुन्। तृज्वद्भावः। अनङादेशः। फे इति रवोऽस्य फेरवः॥

ओतुर्बिलालो मार्जारो वृषदंशक आखुभुक्।

क्षीर०—विशन् आलात्याखून् विलालः। विलान्यलति पर्याप्नोति वा, विलति भिनत्त्याखून् वा। विट आलमस्य। अशुचित्वाद्वा। 'बिड आक्रोशे' अस्माद्वा। आखुभ्यो गृहं मार्ष्टि मार्जारः। वृषानाखून् दशति वृषदंशः। आखुभोजी॥

टीका०—ओतुपञ्चकं बिडाले। 'अव रक्षणे'। सेतुवत् तुन्। 'ज्वरत्वरस्रव्यविमवामुपधायाश्च' (६. ४. २०) इति वकारस्योपधायाश्च ऊठ् आदेशः। गुणः। स्त्रियामप्योतुः। 'बिड आक्रोशे'। *'तमिबिडिमृणिविशिकुलकीलपञ्चिभ्यः' (उ० १. ११५) इति कालन्। 'मृजू शुद्धौ'। कजिमृजिभ्यां चित्' (उ० ३. १३७) इत्यारन्। 'मृजेर्वृद्धिः' (७. २. ११४) इति वृद्धिः। मार्जारः। वृषमाखुं दशतीति वृषदंशकः। कर्मण्यणन्तात् स्वार्थे कः। आखुभुग्। जान्तः॥

त्र्यो गौधेरगौधारगौधेया गोधिकात्मजे॥ ६॥

क्षीर०—जलेशयादन्ये बिलेशया गौधेयाः। अहेर्गोधायां जातो जात्यन्तरमित्येके। 'गोधाया ढक्' (४. १. १२९)। 'आरगुदीचाम्' (४. १. १३०)। शुभ्रादित्वाद् ढक्॥

टीका०—गौधेरत्रयं स्थूलगोधिकात्मजे। 'गोधाया ढक्' (४. १. १२९) इति ढक्। ढस्य एयः। 'लोपो व्योर्वलि' (६. १. ६६) इति यकारलोपः।

---

१. 'च' ज., 'चु' क. पाठः. २. 'हिनस्त्याखू' ख. पाठः. ३. 'जि' ङ. झ, 'जि' छ. पाठः. ४. 'तृ' घ. च. पाठः.

---

* 'तमिविशिबिडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्' इति मुद्रितोणादिपाठः।

'यस्येति च' (६. ४. १४८) इत्याकारलोपः । गौधेरः । 'आरगुदीचाम्'(४. १. १३०) इत्यारक् । गौधारः । शुभ्रादित्वाद् ढक् । गौधेयः ॥

श्वावित् तु शल्यः

क्षीर—श्वानं विध्यति श्वावित् । 'नहिवृतिवृषि—' (६. ३. ११६) इति दीर्घः । शलति शल्यानि किरति वा शल्यको बिलेशयः ॥

टीका०—श्वाविद्द्वयं [1]सेज्जके । श्वानं विध्यतीति श्वावित् । धान्तः । तालव्यादिश्च[2] । व्यधेः क्विप् । नहिवृति—' (६. ३. ११६) इत्यादिना दीर्घः । 'शल शल्ल आशुगमने' । सानसिधर्णस्यादिना यप्रत्ययेन[3] शल्यो निपातितः ॥

तल्लोम्नि शलली शललं शलम् ।

क्षीर०—तस्य लोम्नि शलल्याद्याख्या । यन्माला—'श्वाविच्छलाका शलली' । 'शल गतौ' ॥

टीका०—शललीत्रयं श्वाविल्लोम्नि । यत्र सोज्जकाठि इति प्रसिद्धिः । 'शल ह्रल पल्ल गतौ' । वृषादिकलच् । गौरादिङीष् । शलली । स्त्रीत्वाभावे शललम् । पचाद्यचि शलम् ॥

वातप्रमीर्वातमृगः

क्षीर०— वातं प्रमिमीते वाताभिमुखवर्धनात् ॥

टीका०—वातप्रमीद्वयं [4]वावटहरिण इति ख्याते । 'वातप्रमीः' (उ०४. १) इत्यनेनैव सूत्रेण वातोपपदात् प्रपूर्वान्माङो निपातितः । 'वातप्रमी-

---

१. 'सै' ख. पाठः. २. 'श्व । व्यायः व्य' ङ. छ. पाठः. ३. 'न नि' ङ. छ पाठः. ४. 'ज्जाकाशी इ' ज. 'पाठः. ५ 'र इ' ख., 'र' क. ख. घ. ङ. च. छ. झ. पाठः.

वातमृगः' इति पुंस्काण्डेऽमरमाला। 'वातप्रमीः स्त्रियां लक्ष्मीवद्' इति पुरुषोत्तमः।

"अमा वातप्रमीं विद्याच्छसा वातप्रमीरिति।
डौ तु वातप्रमी शेषं ग्रामण्या सदृशं स्मृतम्" ॥

कोक ईहामृगो वृकः ॥ ७ ॥

क्षीर० — कोकते गृह्णाति, कवते वा कोकः। ईहा[1] मृगस्येवास्य ईहामृगः। ईहां मृगयते वा। इडां वर्कते इडावृकः। एतदेवैकदेशेन वृक इत्युक्तः। आरण्यश्चेत्येके। 'कुक वृक आदाने' ॥

टीका० — कोकत्रयं कोके। अयं कुक्कुरप्रमाणः[2]। कपिलवर्णः। 'कुक वृक आदाने'। अचि कोकः। ईहते काङ्क्षते मृगानिति ईहामृगः। कर्मण्यण् (३. २. १)। राजदन्तादित्वात् परनिपातः। 'अन्येषामपि' (६. ३. १३७) इति दीर्घः। वृणातेः 'सृवृसि*भृशुषिमुषिभ्यः †कित्' (उ०३. ४१) इति कः। वृकः ॥

मृगे कुरङ्गवातायुहरिणाजिनयोनयः।

क्षीर० — मृग्यते व्याधैर्मृगः। कौ रङ्गति कुरङ्गः। वातमयते वातायुः। 'वानं शुष्कमयते वानायु'[3]रित्येके। ह्रियते गीतेन हरिणः। अजिनस्य योनिः अजिनयोनिः ॥

टीका० — मृगपञ्चकं हरिणे। व्याधैर्मृग्यत इति मृगः। 'मृग अन्वेषणे'। चुरादि[4]णिचि कर्मणि घञ्। अथवा 'एरच्' (३. ३. ५६)। अदन्तत्वान्निगुपधत्वाल्लघूपधगुणाभावः। 'कुरच्छेदने'। 'त्रादिभ्यश्च' (उ० १. १२५) इत्यङ्गच्। कुरङ्गः। वातमेतीति वातायुः। बाहुलको युण्। पाण्डौ हरिण

---

१. 'वा याति वा को' क. ग. घ. ङ. पाठः. २. 'ईहस्पृहस्ये' ख. पाठः. ३. 'ण-पिङ्गल' घ. ङ. छ. पाठः. ४. 'दिः। णि' ङ. छ. पाठः.

---

* 'भू', † 'कक् इ' इति मुद्रितोणादिपाठः।

उक्तः । हरिणस्य चर्मण[1] उपयुज्यमानस्य योनिः अजिनयोनिः । 'जिनो बुद्धो रुरुरूप उत्पत्तिस्थानमेषामिति (अ?) जिनयोनयः' इत्यन्यः ॥

ऐणेयमेण्याश्चर्मार्थम्

क्षीर०— विकारेऽवयवे च ('एण्याढञ्') (४. ३. १५९) इति ढञ् ॥

टीका० — एणो हरिणविशेषो वक्ष्यते । स्त्रियामेणी । तस्याश्चर्मादि ऐणेयम् । विकारार्थे 'एण्या ढञ्' (४. ३. १५९) इति ढञ ॥

एणस्यैणम्

क्षीर०— विकारादौ 'प्राणिरजतादिभ्योऽञ्' (४. ३. १५४) ॥

टीका० — एणस्य पुरुषस्य मांसादिकं विकार ऐणम् । 'प्राणिरजतादिभ्योऽञ्' (४. ३. १५४) ॥

उभे त्रिषु ॥ ८ ॥

क्षीर० — ऐणेयमैणं च वाच्यलिङ्गे ॥

टीका० — उभे ऐणेयैणे त्रिषु । ऐणेयं चर्म । ऐणेयी त्वक् । ऐणेयः पादः ॥

कदली कन्दली चीनश्चमूरुप्रियकावपि ।
समूरुश्चेति हरिणा अमी अजिनयोनयः ॥ ९ ॥

क्षीर०— के दलति कदली । कन्दे लीयते कन्दली । इ[2](अ?न)-न्तौ । चिनोति चीनः । चामति चमूरुः । प्रीयते प्रियकः । समूयते समूरुः । चित्रवर्णः । एते चर्मण्युपयुक्ताः ॥

टीका०— कदल्यादयः षड् मृगजातयः । यथा मृगशब्दः सामान्यपशौ हरिणे च वर्तते[3], यथावा लोहशब्दः सुवर्णादौ लोहे च, तथाजिनयोनिश-

---

१. 'च कर्म' ङ. छ. पाठः. २. 'लीङ् गतौ । चि' क. ग. घ. ङ. पाठः. ३. ते, त' घ. ङ. छ. पाठः.

ब्दोऽपि मृगसामान्ये मृगविशेषे च। अभक्ष्यत्वाद् अजिनार्थमेवोत्पत्तिरस्य। कदल्युक्ता। कन्दलीति। 'कन्दि क्रन्दि क्लन्दि आह्वाने रोदने च'। वृषादिकलच्। गौरादिङीष्।

"त्रिलिङ्गं कन्दलं चीनं समूरुः प्रियकस्तथा।
चमूरुः कन्दली नारी षडिमेऽजिनजन्तवः॥"

इत्यमरमाला। 'चिञ् चयने'। 'सुञो दीर्घश्च' (उ० ३. १३) इति बाहुलको नः[3] दीर्घश्च[2]। चीनः॥

कृष्णशाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः॥ १०॥

क्षीर०— अमी मृगविशेषाः। कृष्णेन शारः शबलः। रौतीति[3] रुरुः। न्यञ्चति न्यङ्कुः। न्यङ्क्वादित्वात् कुत्वम्। रमते रज्यते वा रङ्कुः। शं वृणोति शम्बरः। रोहिषाख्ये तृणे भवः रौहिषः। पृषतो बिन्दुभिश्चित्रः। मत्वर्थीयोऽच्। एत्येणः। इयर्त्यृश्यः। 'ऋष गतौ' इत्यस्मान्मूर्धन्यः षः स्यात्। रोहितो रक्तत्वात्। चामति चमरः॥

टीका०— कृष्णशाराद(यस्नयो ? यो द्वा)दश प्रत्येकं स्वनामप्रसिद्धा हरिणविशेषाः। कृष्णः शारो वर्णोऽस्येति कृष्णशारः। वर्णवाची शारशब्दस्तालव्यादिः। स च शॄर्णातेर्घञा साध्यः। न्यङ्कुः। नाडॅण्ण इति ख्यातः। 'नावञ्चेः' (उ० १. १७) इत्युः। 'न्यङ्क्वादीनां च' (७. ३. ५३) इति कुत्वम्। 'रञ्ज रागे'। न्यङ्कुवद् रङ्कुः। सम्बरो दन्त्यादिस्तालव्यादिश्चेति कामदेवनाम्नि व्युत्पादितः। एतस्य ककुदि लम्बमानं रोम भवति। 'रुहेर्बुद्धिश्च' (उ० १. ५०) इति टिषच्। रौहिषः। मूर्धन्यषः। गोरिव कर्णोऽस्य गोकर्णः। गोन इति ख्यातः। 'पृषिरञ्जिभ्यां कित्' (उ० ३. १११) इत्यतच्। पृषतः। 'पृषतो बिन्दुचित्रितः' इति माधवः।

---

१. 'ङ्नः' ङ. छ. पाठः. २. 'श्चेति ची' क. पाठः. ३. 'रौति' क. ग. घ. ङ. पाठः. ४. 'णो' क. ख. पाठः. ५. 'डुनाड इ' ज. पाठः. ६. 'द्वि' क. ख. पाठः.

"पृषन्मृग्गे †(++) क्लीबं पृषतोऽप्यनयोर्नरि"

इति रभसः। एणः सुनयनः स्वल्पमृगः। ऋश्यो नीलवर्णो घोटकप्रमाणः त्रिशृङ्गः। अस्य मृगी रोहिन्नामधेया। तथा च 'पुमान् स्त्रिया' (१. २. ६७) इत्यत्र भाष्यम्— 'हंसस्य वरटा, कच्छपस्य दुलिः, ऋश्यस्य रोहिद्' इति।

"गतो रोहिद्भूतां रिरमयिषुमृश्यस्य वपुषा"

इति माहिम्नः स्तोत्रं च। 'बलवदृश्यादृश्ये' इति बृन्दावने पादान्तयमकात् तालव्यवानृश्यः। रोहितो घोटकरूपोऽश्वमृगः। तथा च 'रोहितोऽश्वमृग' इति कोष्ठाध्यक्षप्रधानटीका। महिषाकृतिश्चमरः। यत्पुच्छं चामरम्। 'अर्तिक*मि-चमिभ्रमिदेविवाशिवंसिभ्यश्चित्' (उ० ३. १३२) इत्यरन्॥

गन्धर्वः शरभो रामः सृमरो गवयः शशः।
इत्यादयो मृगेन्द्राद्या गवाद्याः पशुजातयः॥ ११॥

क्षीर०— गन्धयत्यर्दयति गन्धर्वः। शृणाति शरभः। रमन्तेऽस्मिन् रामः। सरति सृमरः। गुवति गवते वा गवयः। शशति प्लुत्या गच्छति शशः। आदिशब्दाद् धुकयादयः। गवाद्या वक्ष्यमाणाः। पाश्यन्ते पाशैः पशवः॥

टीका०— गन्धर्वादयः षड्, मृगेन्द्राद्याः सिंहाद्याश्चमरान्ता अतिक्रान्ता ये, ये च वैश्यवर्गोक्ता गवोष्ट्रादयः, ते पशुशब्दवाच्याः। गन्धर्व उक्तः। शृणातेः 'कृशृशलिगर्दिभ्योऽभच्' (उ० ३. १२२)। शरभः।

"अष्टपादूर्ध्वनयनः शरभो वनगोचरः"

इति महाभारतेऽस्य रूपम्।

"उत्पादका न बहवः कवयः शरभा इव"

---

१. 'टप्र', २. 'क', ३. 'भिः' ङ. छ. पाठः. ४. 'तं' क. ख. पाठः. ५. 'ता' घ. ङ. छ. पाठः. ६. 'धुलुक' क. ग. ङ. पाठः. ७. 'ते च प' घ. ङ. छ. पाठः.

† 'पृषन्मृगे पुमान् विन्दौ न द्वयोः पृषतोऽपि ना' इति मेदिनी। * 'मिर्भ्रमिचमिदेविवासिभ्यश्चित्' इति मुद्रितोणादिपाठः।

इति बाणप्रयोगाद् ऊर्ध्वं पादचतुष्टयमस्येति। राम उक्तः। सर्तेः 'सृघस्यदः क्मरच्' (३. २. १६०)। सृमरः। यथा गौः, गवयस्तथा। 'शश प्लुतगतौ'। अच्। शशः। द्वितालव्यः॥

उन्दुरुर्मूषिकोऽप्याखुः

क्षीर० — उन्दयत्युन्दुरुः। अदन्तोऽपि। मूषति मूषिकः। आ खनत्याखुः। पुंध्वजोऽपि स्त्रियाम्। खनको गृहाशयो गर्ताटश्च।

"चुच्छुन्दरी गन्धमूषी दीर्घा चेति तु मूषिका।"

पृषो नानार्थे॥

टीका० — उन्दुरुत्रयमुन्दुरौ। 'उन्दुरुरुन्दूरुरुन्दरः' इति शब्दार्णवः। मुष्णातीति मूषिकः। 'मूषेर्दीर्घश्च' (उ० २. ४४) इति किकन् दीर्घत्वं च। 'खनु अवदारणे'। आङ्परयोः 'खनिशृभ्यां डिच्च' (उ० १. ३४) इत्युः। आखुः॥

गिरिका बालमूषिका।

क्षीर० — गिरति गिरिका। 'खटाखुर्बालमूषिका' इति भुग्नः॥

टीका० — गिरिकाद्वयं लिङ्गलीति ख्यातायाम्। मूषिकेति। अजादिषु चटका मूषिका इति ज्ञापकात् टाप्॥

सरटः कृकलासः स्यादू

क्षीर० — सरति सरटः। कृकं शिरोग्रीवं लासयति कृकलासः। कृकिलास इत्यपपाठः। प्रतिसूर्यः शयानकश्च जाहको गात्रसङ्कोची हलौ लाङ्गलिकेति च वाच्यम्॥

---

१. 'पदम' ङ. छ., 'पादम' घ. पाठः. २. 'उदुरूदरुन्दरः' घ. पाठः. ३. 'रूदू-दुरुन्दरः' ङ. छ. पाठः. ४. 'ति' च. पाठः. ५. 'सोऽथ मु' ख. ङ. पाठः. ६. 'ल' क. ग. पाठः. ७. 'ला लङ्गलिकेति वा' क. ग. घ. ङ. पाठः.

टीका० —सरटद्वयं कृकलासे । *'सर्तेरटन्' (उ० ४. ८१) । सरटः । कृकेण कण्ठेन[1] लसति क्रीडतीति कृकलासः । घञन्तः ॥

मुसली गृहगोधिका ॥ १२ ॥

क्षीर० — मुस्यति भिनत्ति मुसली । 'मुस खण्डने' । मुशलीति गौडः । शिखी कलाज्ञश्च । गृहगोलिकेति सभ्यः पाठः । यस्या घरघोली[2][3]ति प्रसिद्धिः ॥

टीका० — मुसलीद्वयं जेठि इति ख्यातायाम् । 'ज्येष्ठा स्याद् गृहगोधिका' इति वोपालितः । मुसली दन्त्यसा । ङ्यन्ता । वर्णदेशनायां 'मूर्धन्यमध्योऽपि मुषलो दृश्यत' इत्युक्तम् ॥

लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः ।

क्षीर० — लूयते लूता । तन्तून् वयति तन्तुवायः । ऊर्णा नाभावस्योर्णनाभः । मर्कट इवारोहावरोहणान्मर्कटकः । जालं[4]को जालकारश्च ॥

टीका० — लूताचतुष्कं कीटमर्कटे । लूतेति । 'हसिमृग्रिणवामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३. ८६) । तन्तून् वयत इति तन्तुवायः । 'ह्रावामश्च' (३. २. २) इति वेञः कर्मण्युपपदेऽण् । 'आतो युक्—' (७. ३. ३३) । ऊर्णाकृतिस्तन्तुरूर्णा । सा नाभावस्येत्यूर्णनाभः । 'ङ्यापोः —' (६. ३. ६३) इत्यादिना ह्रस्वत्वम् । समासान्तः 'अच्' (५. ४. ७५) इति योगविभागादच् । एतदुक्तं भाष्ये । तथा च माघः—'प्रजा इवाङ्गादरविन्दनाभा[5]द्[†]' (स० ३. श्लो० ६५) इति । मर्कटक इत्यल्पार्थे कन् ॥

---

१. 'न की' ङ. छ. पाठः. २. 'स्स' क. ग. घ. पाठः. ३. 'लिका जा' ख. पाठः. ४ 'विवृग्रि' छ. पाठः. ५. 'भेः इ' घ. ङ. च. छ. झ. पाठः.

---

* 'सर्तेरटिः' इति मुद्रितोणादिपाठः । † 'नाभेरिति' माघे पाठो दृश्यते ।

नीलङ्गुस्तु क्रिमिः

क्षीर० — नीलतीति नीलङ्गुः। क्रामति क्रिमिः। 'क्रमितमि-*स्तमिस्तम्बामत इच्च'। (उ० ४. १२३)। **कर्णजलूकोऽपि** ॥

टीका० — नीलङ्गुद्वयमतिक्षुद्रे जन्तुमात्रे। ‡ 'खरुशङ्कुपीसुनीलङ्गु-लिगुहिङ्गुः' (उ० १. ३७) इत्यनेन लगेर्धातोर्ह्रस्वमध्यो नीलङ्गुः कुप्रत्ययेन निपातितः। 'क्रमिगमिनमितमिस्तम्भामत इच्च' (उ० ४. १२३) इत्यनेन क्रमतेः किः। धात्वकारस्येकारः। क्रिमिः। साहचर्यात् पुलिङ्गौ। 'संसारपङ्केक्रिमेः' इति नारकस्तुतौ प्रयोगः।

"द्रुमामये भवेत् पुंसि कीटं च कृमि च क्रिमिः"

इति **रभसः**। तथा च

"लुम्पन्ति कीटकृमयः परितस्तथैते"

इति **शिष्टप्रयोगश्च** ॥

कर्णजलौका शतपद्युभे ॥ १३ ॥

क्षीर० — शतं पादा अस्याः शतपदी। 'कुम्भपदीषु च' (५. ४. १३९) इति साधुः। उभे द्वे स्त्रियाम्॥

टीका० — कर्णजलौकाद्वयं कानाजुन्तीति ख्यातायाम्। जलौकाशब्देन टाबन्तेन सकारान्तेन वा समासः। † शतपादिति। गोधापदीतिवत् कुम्भपद्यादिष्वभावाद् न ङीप्। 'शतपात् कर्णजलौके'ति भागुरिः॥

वृश्चिकः शूककीटः स्याद्

---

१. 'ह्री' घ. ङ. च. छ. पाठः. २. 'ङ्कः' ङ. छ. पाठः. ३. 'ञी' ज. पाठः.

---

* 'शतिस्तम्भामत', ‡ 'खरुशङ्कुपीयुनीलङ्गुलिगु' इति मुद्रितोणादिपाठः। † अयं शब्दः कुम्भपद्यादिषु परिगणितः। अनुसरति च परिगणनं भानुजिदीक्षितः।

क्षीर० — वृश्चति वृश्चिकः । 'ओव्रश्चू छेदने' । शूकः कण्टकः, तत्प्रधानः कीटः । भ्रमरभेदोऽयम् ॥

टीका० — वृश्चिकद्वयं शुआउड इति ख्याते । 'ओ व्रश्चू छेदने' । 'वृश्चिकृषोः किकन्' (उ० २. ४२) । 'स्तोःश्चुना श्चुः' (८. ४. ४०) इति श्चुत्वम् । ग्रहिज्यादिना सम्प्रसारणम् । वृश्चिकः । शूकाकारं लोम शूकः । तालव्यादिः । अभेदोपचारात् । शूकश्चासौ कीटश्चेति शूककीटः ॥

आलिद्रूणौ तु वृश्चिके ।

क्षीर० — आलमनर्थोऽस्त्यत्राली । द्रूणति द्रूणः । 'द्रूण हिंसायाम्' । द्रुण इत्येके । विषकीटोऽयम् ॥

टीका० — अलित्रयं वृश्चिके ।

"अलं वृश्चिकलाङ्गूलं द्रुण आडी तु वृश्चिकः"

इति हलायुधः । 'भृङ्गवृश्चिकयोरली' ति ह्रस्वादौ रभसः । अलयोगादली । इन्नन्तः । 'द्रुण हिंसागतिकौटिल्येषु' । इगुपधलक्षणः कः । द्रुणः ॥

पारावतः कलरवः कपोतः

क्षीर० — परापतोऽयं पारावतः । 'जपादित्वाद् वत्वम्(?) । रञ्जकश्च । केन पवते कपोतः । 'कस्य वायोः पोतः' इत्यागमः । आरण्योऽयम् । आद्यस्तु गृहकपोतः । अयं त्वभेदं मन्यते ॥

टीका० — पारापतत्रयं पारापते । पारादप्यापततीति पचाद्यच् । पारापतः । 'खगे द्वौ प्रथमे नलौ' इत्युत्पलिनी(?) । तदा पृषोदरादित्वात्

---

१. 'आड' ड. च. छ. ज. पाठः. २. 'याम् । कदु' क. ग. घ. ङ. पाठः. ३. 'व' क. घ. च. झ. पाठः, ४. 'ग' क. ख. घ. च. पाठः,

वत्वम्। कलरव इति बहुव्रीहिः। 'कबृ वर्णे'। 'कबेरोतच् पश्च' (उ० १. ६५) इत्योतच् पश्चान्तादेशः। कपोतः॥

अथ शशादनः॥ १४॥

पत्री श्येनः

क्षीर० — पत्री, सामान्यमपि विशेषे वर्तते। यच्छाश्वतः —

"श्येनाख्यो विहगः पत्री पत्रिणौ शरपक्षिणौ"।

माला च — 'श्येनः पत्री शशादनः'। श्यायते श्येनः॥

टीका० — शशादनत्रयं **श्येने**। श्येनशब्दश्च सञ्चारणसामलादौ प्रसिद्धः। तन्मध्ये कोऽपि शशमप्यत्तीति शशादनः। साहचर्यादन्येऽपि। पत्रं पक्षोऽस्यास्तीति पत्री। प्रशंसायामिनिः। 'श्यैङ् गतौ'। 'श्यास्त्याहृञविभ्य इनच्' (उ० २. ४८)। श्येनः॥

उलूकस्तु वायसारातिपेचकौ।

क्षीर० — उलति नेत्राभ्यां वहत्युलूकः। 'ऊर्ध्वोल्लोकनादि'ति निरुक्तम्। पेचयति पीयते वा पेचकः॥

टीका० — उलूकत्रयं **पेचके**। 'उच समवाये'। 'उलूकादयश्च' (उ० ४. ४१)। इत्यूकः चकारस्य च लकारः। उलूकः। पचतेश्छन्दस्यमिपच्योरलिट्येत्वं वक्तव्यम्[1]। पेचकः॥

व्याघ्राटस्तु भरद्वाजः

क्षीर० — व्याजिघ्रन्नटति व्याघ्राटः। भरद्वाजस्यापत्यं, भरद्वाजोऽस्य वा भरद्वाजः। चाटकेराख्यः॥

टीका० — व्याघ्राटद्वयं **कर्णचटके**। कचित् करटाख्यः। व्याघ्रमटतीति 'कर्मण्यण्' (३. २. १)॥

---

१. 'व्यम्॥' ङ. छ. पाठः.

खञ्जरीटस्तु खञ्जनः ॥ १५ ॥

क्षीर० — खं जनयति ॥

टीका० — खञ्जरीटद्वयं **खञ्जने** । खञ्जनो नन्द्यादिः ॥

लोहपृष्ठस्तु कङ्कः स्याद्

क्षीर० — लोहवर्णं पृष्ठमस्य । कङ्कते कङ्कः ॥

टीका० — लोहपृष्ठद्वयं कङ्के । दृढत्वाल्लोहमिव पृष्ठमस्य लोहपृष्ठः । 'ककि वकि गत्यर्थे' दण्डकः । पचादिः । कङ्कः ॥

अथ चाषः किकीदिविः ।

क्षीर० — चषति चाषः । किकीति दीव्यति वाशते किकीदिविः । द्वे नामनी इत्येके । किकिदिविरित्यन्ये ॥

टीका० — चाषद्वयं **सुवर्णचटके** । 'चष भक्षणे' । मूर्धन्यान्तः । कर्मणि घञ्। चाषः । 'इक्षुपक्षिभिदोश्वासः' इति तु दन्त्यान्ते रभसः । *'कृपिसृपिच्छविकिकिदीविः' (उ०४. ५७) इत्यनेन किकिदीविर्निपातितः । अत्र दीकार एव दीर्घः । तथा च रत्नकोशे आर्या— 'किकिदीविश्चासः स्याद्' इति । अन्यथार्याभङ्गः । 'किकिदिविसंज्ञश्चासः' इति वोपालितेन सर्वं ह्रस्वमुक्तम् । 'चाषः किकीदिविः स्मृतः' इति व्याडिना द्वितीयो दीर्घ उक्तः ॥

कलिङ्गभृङ्गधूम्याटाः

क्षीर० — के लिङ्गं चूडास्य कलिङ्गः । भृङ्गवत् कृष्णः । धूम्येवाटति धूम्याटः । धूम्य आटश्च पदैकदेशत्वात् ॥

---

१. 'रीति' ख. पाठः. २. 'स्येति लो' क. ख. च. झ. पाठः. ३. 'कीदीवि' ख. ग. ङ. पाठः. ४. 'ञ् । इ' घ. ङ. छ. पाठः. ५. 'षः' क. ख. झ. पाठः.

---

* 'कृविघृष्विच्छविस्थविकिकीदिविः' इति मुद्रितोणादिपाठः ।

टीका० — पिच्छेति ख्याते कलिङ्गत्रयम्। कलिं गहनं गच्छतीति कलिङ्गः। पृषोदरादिः। '‡भृञो नुम् च' (उ० १. १३०) इति नुम्। भृङ्गः। धूमसंहतिर्धूम्या। तामटतीति धूम्याटः। 'कर्मण्यण्' (३. २. १)॥

अथ स्याच्छतपत्रकः॥ १६॥

दार्वाघाटः

क्षीर० — शतं बहवः पत्राणि पक्षा अस्य शतपत्रकः। दार्वा-हन्ति दार्वाघाटः। 'दारावाहनोऽणन्तस्य च टः संज्ञायाम्' (वा० ३. २. ४९)॥

टीका० — काण्टोकेति[1] ख्याते शतपत्रकद्वयम्। उत्पतनसाधनं शतं पत्राण्यस्येति शतपत्रः। दारु आहन्तीति दार्वाघाटः। हन्तेराङ्पूर्वाद् दारूपपदे 'दारावाहनोऽणन्तस्य च टः संज्ञायाम्' (वा० ३. २. ४९) इत्युपसङ्ख्यानाद् अण् नकारस्य च टकारः॥

अथ सारङ्गः स्तोककश्चातकः समाः।

क्षीर० — सरति, सरणमङ्गति वा सारङ्गः। सह आरङ्गति वा। यूथचारित्वात्। स्तोकं कायति वाशते याचते वा स्तोककः। चतते याचते चातकः॥

टीका० — शारङ्गत्रयं चातके। 'शृ हिंसायाम्'। '†शृसृवृञां वृद्धिश्च' (उ० १. १२७) इत्यङ्गच्। एवमुणादौ तालव्यादिः शारङ्गः।

"वारणवराहहरिवरगोगणसारङ्गसङ्कुलमहासालम्" (स० १३. श्लो० ३८) इति भट्टिभाषासमावेशे दन्त्यादिः। स्तोकमेव कं शिरोऽस्येति स्तोककः। धातु-प्रदीपे तु — 'ष्टुच प्रसादे'। कर्मणि घञ्। इत्येवं स्तोकः साधितः। ततः स्वार्थे कः।

---

१. 'भुटोके' ङ., 'उटोके' छ., 'ङ्केटके' ज., 'टोखेति' च. पाठः. २. 'व' क. घ. ज. झ. पाठः.

---

‡ 'भृञः किबुट् च', † 'सवृजोर्वृद्धिश्च' इति मुद्रितोणादिपाठः।

"सारङ्गः स्तोककः स्तोकोऽहिवर्णो वाग्ग्रहोऽम्बुपः"

इति केसरमालापि। 'चदे चते याचने'। ण्वुल्। चातकः॥

कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः॥ १७॥

क्षीर०— कृकेण शिरोग्रीवेण वक्ति कृकवाकुः। कुगुच्चारणेन कुटति कुक्कुटः। शिखी कालश्च॥

टीका०— कृकवाकुचतुष्कं कुक्कुटे। कृकेन गलेन वक्तीति कृकवाकुः। 'कृके वचः कश्च' (उ०१. ६) इति ञुण्, कश्चान्तादेशः। ताम्रवच्चूडा अस्येति ताम्रचूडः। 'कुक वृक आदाने'। क्विप्। कुक्। 'कुट कौटिल्ये'। कुटतीति कुटः। पचाद्यच्। तस्य 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (१. २. १) इति ङिद्वद्भावान्न लघूपधगुणः। कुक् चासौ कुटश्चेति कुक्कुटः॥

चटकः कलविङ्कः[1] स्यात्

क्षीर०— चटति भिनत्त्याहारं चटकः। कं शिरो लुनाति चलति कलविङ्कः[2]॥

टीका०— गमडेति ख्याते चटकद्वयम्[3]। चटेः कुन् चटकः॥

तस्य स्त्री चटका

क्षीर०— 'अजाद्यतष्टाप्' (४. १. ४)। क्षिपकादित्वादित्त्वाभावः॥

टीका०— तस्य चटकस्य स्त्री चटका। 'अजाद्यतष्टाप्' (४. १. ४)॥

तयोः।

पुमपत्ये चाटकैरः

क्षीर०— चटकस्य चटकाया वा अपत्यं पुमान्। 'चटकाया ऐरक्' (४. १. १२८)। 'चटकाच्च' इत्युपसङ्ख्यानात्॥

१., २. 'पि' ग. ङ. पाठः. ३. 'चा' ङ. छ. पाठः.

टीका० — तयोश्चटकाचटकयोः पुमपत्ये चाटकैरः । 'चटकाया ऐरक्' (४. १. १२८) ॥

स्त्र्यपत्ये चटकैव हि ॥ १८ ॥

क्षीर० — स्त्री च तदपत्यं च तत् । 'स्त्रियामपत्ये लुग्वक्तव्यः। (वा० ४. १. १२८) । 'लुक् तद्धितलुकि' (१. २. ४९) इति टापो लुक्यपि स्त्रीत्वाट्टाप् ॥

टीका० — चटकाचटकयोः स्त्र्यपत्ये चटकेत्येव स्यात् । 'स्त्रियामपत्ये लुग् वक्तव्यः' (वा० ४. १. १२८) इत्यैरक्प्रत्ययस्य लुक् । ततष्टाप् ॥

कर्करेटुः करेटुः स्यात्

क्षीर० — कर्केति रेटते, केति रेटते वाशते ॥

टीका० — काङ्करेटु इति ख्याते कर्करेटुद्वयम् । कर्कः सिताश्च इव रेटतीति कर्करेटुः । वृक्षादीनां शिरासि रेटतीति करेटुः । 'रेट परिभाषणे' । 'कृपावा —' (उ० १. १) इत्यादिना बाहुलक उण् ।

"कर्करेटुः करेटुः स्यात् खद्योतो ज्योतिरिङ्गणः"

इति पुंस्काण्डेऽमरमाला।

"स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगा"

इति स्त्रीपुंसत्वमपि केचिन्मन्यन्ते ॥

कृकणक्रकरौ समौ ।

क्षीर० — कृकं नयति कृकणः । कृ इति कणति वा कृकणः । क्रेति करोति वाशते क्रकरः ॥

टीका० — कयरेति ख्याते कृकणद्वयम् । कृकेण गलेन अणतीति कृकणः । पचादिः । 'अण शब्दार्थः' ॥

वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ १९ ॥

क्षीर० — परभृतः काकीपुष्टत्वात् । कोकते चित्तं गृह्णाति कोकिलः । अपि कायति पिकः । जलकण्ठस्ताम्राक्षश्च ॥

टीका० — वनप्रियचतुष्कं कोकिले । 'वा प्रियस्य' (वा० २. २. ३५) इत्यनेन प्रियवण इत्यपि । विजातीयेन भृतः पुष्टः परभृतः । 'कुक अदने' । सलिलवद् बाहुलक इलच् । कोकिलः । अपिहितः कायतीति पिकः । कप्रत्ययान्तः । अपिरन्तर्धौ ॥

काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ।
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥ २० ॥

क्षीर० — काशब्दं कायति, ककते वा लौल्यात् काकः । केति रटति करटः । नास्ति रिष्टं हिंसास्य मृतभुक्त्वाद् वा अरिष्टः । बलिभिः पुष्टो वैश्वदेवभागभुक्त्वाद् बलिपुष्टः । सकृत् प्रजायते सकृत्प्रजः । एकाण्डप्रसवात् । ध्वाङ्क्षति काङ्क्षति ध्वाङ्क्षः । आत्मानं स्वं नाम घोषयत्यात्मघोषः । काकेति वाशनात् । परान् पिकान् बिभर्ति परभृत् । वय एव वायसः । प्रज्ञादित्वादण् वयते वा । एकदृष्टिश्चिरजीवी मौकलिकश्च ॥

टीका० — काकदशकं काके । का इति शब्दं कायतीति काकः । 'आतोऽनुपसर्गे कः' (३. २. ३) । कम् आत्मानं रटतीति करटः । अत एवात्मानं घोषयतीत्यात्मघोषोऽपि । 'कर्मण्यण्' (३. २. १) । रिष्टं मरणलक्षणम् । तदस्य नास्तीत्यरिष्टः । बलिना पुष्टो बलिपुष्टः । सकृदेकवारं प्रजा सन्ततिरस्येति सकृत्प्रजः । 'द्राक्षि ध्राक्षि ध्वाक्षि घोरवाशिते' । पचाद्यच् । ध्वाङ्क्षः । परं कोकिलं बिभर्ति पुष्णातीति परभृत् । 'अन्येभ्योऽपि दृश्यते' (वा० ३. २. १०१) इति क्विप् । वय एव वायसः । प्रज्ञादित्वादण् ॥

---

१. 'गार्ह्यत्वाद्' ख. पाठः.

द्रोणकाकस्तु काकोलः

क्षीर० — वृद्धकाकोऽद्रिकाको वा। यदाहुः —

"द्रोणकाको वृद्धकाकोऽप्यद्रिकाको वनाश्रयः"।

'द्रुण हिंसायाम्'। द्रोणोऽपि ॥

टीका० — डाँढकाकेति ख्याते द्रोणकाकद्वयम्। विषपर्याये काकोल उक्तः ॥

दात्यूहः कालकण्ठकः।

क्षीर० — द्वितीयं तृतीयं वा रूपं वहति दित्यवाट्। तस्यापत्यं दात्यूहः। 'देविकाशिंशपा —' (७. ३. १) इत्यात्वम्। कालः कण्ठोऽस्य कालकण्ठकः। कालाः कण्टका रोमोद्भेदा अस्य वा कालकण्टकः। जलरङ्गोऽपि ॥

टीका० — डाँऊकेति ख्याते दात्यूहद्वयम्। कल एव कालः। स्वार्थेऽण्। कालोऽव्यक्तध्वनिः कण्ठेऽस्येति कालकण्ठः ॥

आतापिचिल्लौ

क्षीर० — आतापिचिल्लौ सिंहावलोकितेन समाविल्येव। आतॉपयत्यातापिः। चिल्लति चिल्लः। 'चिल्ल शैथिल्ये' ॥

टीका० — आतापिद्वयं चिल्ले। 'तायृ पूजादौ'। आवश्यके णिनिः आतायी। 'चिल्ल शैथिल्ये'। अच्। चिल्लः ॥

दाक्षाय्यगृध्रौ

---

१. 'सा' च. ज., 'ढका' ङ. छ. पाठः. २. 'जो' क. ग. ङ. पाठः. ३. 'ढाके' ङ. छ., 'धातुके' ज. पाठः. ४. 'ण्ठो' ङ. छ. पाठः. ५. 'तपत्या' ख. पाठः.

क्षीर० — समावित्येव । दक्षते दाक्षाय्यः । †'हृदयदक्षिस्पृहिभ्य आय्यः' (उ०३. ९६) । ततोऽपत्येऽण् । गृध्यति मांसे गृध्रः ॥

टीका०— दाक्षाय्यद्वयं गृध्रे ॥

कीरशुकौ समौ ॥ २१ ॥

क्षीर० — कीशब्दमीरयति कीरः । शुको नीलत्वात् । शुवतीत्येके । प्रियदर्शनोऽपि ॥

टीका० — कीरद्वयं शुके । कीति शब्दं रायतीति कीरः । 'रै शब्दे' । 'आतोऽनुपसर्गे कः' (३. २. ३) । 'शुक गतौ' । तालव्यादिः । इगुपधलक्षणः कः । शुकः ॥

क्रुङ् क्रौञ्चः

क्षीर०— क्रुञ्चति क्रुङ् । प्रज्ञादित्वाद् वा अण् । स्त्रियामजादित्वात् क्रुञ्चा ॥

टीका०— क्रौञ्चे क्रुङ्द्वयम् । क्वचिद् ढेकेति[3] ख्यातः । क्रुङ् इति । 'क्रुञ्चु कौटिल्याल्पीभावयोः' । ऋत्विगादिर्नो किन्[4] । निपातनान्न नकारलोपः । संयोगान्तलोपः 'किन्प्रत्ययस्य कुः' (८. २. ६२) इति कुत्वं ङकारः । स्त्रियां क्रुञ्चा । हलन्तादप्यजादिगणपाठाट्टाप् । क्रुञ्चाया अपत्यं क्रौञ्चः । 'स्त्रीभ्यो ढक्' (४. १. १२०) इति ढकि प्राप्ते

"बडबाया वृषे वाच्ये अण् क्रुञ्चाकोकिलात् स्मृतः"

इत्यण् ॥

अथ बकः कहः

क्षीर०— वक्ति बकः । न्यङ्क्वादि । बकोटोऽपि । के जले, केन वा ह्वयते कहः ॥

---

१. 'द' क. ख. घ. ङ. छ. पाठः. २. 'करोति' ङ. छ., 'कारयती' च. ज. पाठः. ३. 'ङ्के' क. ख. च. पाठः. ४. 'त्वात् कि' क. ख. पाठः.

---

† 'श्रुदक्षिस्पृहिगृहिभ्यः' इति मुद्रितोणादिपाठः ।

टीका०— बकद्वयं बके। 'बक कौटिल्ये'। अच्। क इति शब्दं ह्वयत इति कहः। 'ह्वेञ् स्पर्धायामाह्वाने च'। 'सर्वत्र सम्प्रसारणिभ्यो डो वक्तव्यः' इति डः॥

पुष्कराह्वस्तु सारसः।

क्षीर०—सरसिभवोनाह्वयते सरसि(?) भवः सारसः। लक्ष्मण्यो, विलीनाङ्गो, दीर्घजङ्घश्च॥

टीका०— पुष्कराह्वद्वयं सारसे। पुष्कराह्वः पद्मनामा। 'सारसवत्ता विहता' इति वासवदत्ता। अतो द्विदन्त्यैः सारसः॥

कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः॥ २२॥

क्षीर०— कवते वाशते कोकः। चकते चक्रः। चक्रेति वाक आख्या अस्य चक्रवाकः। रथाङ्गश्चक्रमाह्वयो नामास्य रथाङ्गाह्वयः, रथाङ्गनामा च॥

टीका०— चक्रवाके कोकचतुष्कम्। पूर्ववत् कोकचक्रौ। चक्रेण चक्रशब्देनोच्यत इति चक्रवाकः। 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इति घञ्। चक्रं रथाङ्गमुच्यते। तस्याह्वयो रथाङ्गाह्वयः, स नामास्येति रथाङ्गाह्वयनामकः॥

कादम्बः कलहंसः स्याद्

क्षीर०— कदम्बस्यायं सङ्गचारित्वात् कादम्बः। कलो मधुरवाग् हंसः॥

टीका०— कायम्बेति ख्याते कादम्बद्वयम्। नीपे कादम्ब उक्तः॥

---

१. 'यां शब्दे च' क. ख. च., 'यां वाचि। स' ज. पाठः. २. 'दः सा' ख. पाठः. ३. 'ह्यो ली' ख. पाठः. ४. 'न्यः॥' क. ख. झ. पाठः.

उत्क्रोशकुररौ समौ ।

क्षीर०— उच्चैः क्रोशत्युत्क्रोशः । कुरति कुररः । 'कुर शब्दे' । कुरेति शब्दं राति वा ॥

टीका०— कुरलेति ख्याते उत्क्रोशद्वयम् । उच्चैः शब्दायत इत्युत्क्रोशः । पचादिः । 'कु शब्दे' । 'कुवः क्रन्' (उ० ३. १३३) कुररः ॥

हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥ २३ ॥

क्षीर०— हन्ति तमोऽच्छत्वाद् हंसः । अत एव श्वेतगरुतः । श्वेता गरुतः पक्षा अस्य श्वेतगरुत् । सामान्येनावयवान्तरस्य नानात्वात् । तद् वक्ष्यते राजहंसा इत्यादि । चक्रमिवाङ्गमेषां, चक्रवन्मण्डलीकृतपक्षा आसत इति । वक्राङ्ग इत्येके । मानसाख्ये देवसरसि ओकोऽस्य मानसौकाः ॥

टीका०— हंसचतुष्कं हंसे । हन्तेः 'वृतृवदिहनिकमिऽकषियुमुचिभ्यः सः' (उ० ३. ९२) । हंसः । दन्त्यसः । श्वेतगरुतः श्वेतपक्षाः । चक्रवाकस्येवाङ्गमस्येति चक्राङ्गः ॥

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।

क्षीर०— चञ्चुसहितैश्चरणैरिति लक्षणे तृतीया ॥

टीका०— ये लोहितैश्चञ्चुचरणैर्लक्षिताः, सिताश्च शरीरेण, ते राजहंसाः । चञ्चुचरणैरिति । प्राण्यङ्गत्वाद् बहुवचनस्याप्राप्तिः । अतः कृतद्वन्द्वैकवद्भावस्यैकशेषः । यथा—

---

१. 'क' झ. पाठः. २. 'गच्छति हंसः । श्वे', ३. 'चक्राङ्गो वृत्तत्वात् । वक्रा' ख. घ. पाठः. ४. 'सः । द' ङ. छ. पाठः.

---

§ 'कशिभ्यः सः' इति मुद्रितोणादिपाठः ।

"ग्रीवाकुक्षिललाटेषु नित्यं स्वेदः प्रशस्यते"

इति ॥

मलिनैर्मल्लिकाक्षास्ते

क्षीर०— मलिनैश्चञ्चुचरणैस्ते सिता मल्लिकाकाराक्षाः शुक्लापाङ्गत्वात् ॥

टीका०— ते हंसाः मलिनैः किञ्चिद् धूम्रैश्चञ्चुचरणैर्लक्षिता मल्लिकनामानः। 'मल मल्ल धारणे'। 'इन्' (उ० ४. ११९) इतीन्। ततः कन्।

"मल्लिको हंसभेदे ना तृणशूल्यां तु मल्लिका"

इत्यर्धनारीश्वरः। मल्लिकाक्षः क्षान्त इति केचित्।

"भूषिते परितो यस्य लोचने कृष्णराजिभिः।
कृष्णं च तारकामात्रं मल्लिकाक्षः स उच्यते ॥"

इत्यश्वभेदो हंसभेदश्च। एतच्छब्दार्णव उक्तम्।

"एतस्मिन् मदकलमल्लिकाक्षपक्ष"

इति भवभूत्यनुप्रासोऽपि ॥

धार्तराष्ट्राः सितेतरैः ॥ २४ ॥

क्षीर०— ते कृष्णैश्चञ्चुचरणैः। धृतराष्ट्रे अमात्ये भवाः धार्तराष्ट्राः। राजहंसेभ्यो न्यूनत्वात् ॥

टीका०— सितेतरैः कृष्णैश्चञ्चुचरणैर्लक्षिता हंसा धार्तराष्ट्राः। शिवादित्वादण् ॥

शरारिराटिरातिश्च

क्षीर०— शृणात्येनां[1] शरारिः[2]। अटत्याटिः[3]। अतत्यातिः[4]। एताः स्त्रियाम् ॥

---

१. 'न्यं' ज. पाठः. २. 'णो' ग. पाठः. ३. 'ल्यनेन वा श' ख. पाठः. ४. 'नादातिः' ङ. छ. पाठः.

टीका०— शरारित्रयं शरारौ । शृणोतेर्बाहुलक आरिः । शरारिः । 'सरमिव शरालिकम्पितमच्छोदं नाम सर' इति कादम्बरी । अटतेराङ्पूर्वाद् 'इन्' (उ० ४. ११९) इतीन् । आटिः । 'अत सातत्यगमने' । 'अज्यति-भ्यां च' (उ० ४. १३२) इतीण् । आतिः । स्त्रियां ङ्यन्तापीति केचित् ॥

बलाका बिसकाण्ठिका ।

क्षीर०— बलाहकान् कायति, बलेन अकति याति वा बलाका । बिसमिव कण्ठोऽस्या बिसकाण्ठिका । बिसकामुकेत्येके । शारिका[1] गौरा पीतपदेति वाच्यम् ॥

टीका०— स्वल्पबकजातौ बलाकाद्वयम् । 'वल वल्ल संवरणे' । 'बलाकादयश्च' (उ०४. १४) इत्याकः । मृणालवत् कण्ठोऽस्या इति बिसक-ण्ठिका । दन्त्यसा ॥

हंसस्य योषिद् वरटा

क्षीर०— व्रियते वरटा । स्त्रीविषयत्वाज्जातेर्ङीष् नास्ति । वरलापि ॥

टीका०— हंस्यां वरटा । वृणातेः 'शकादिभ्योऽटन्' (उ०४. ८२)

"वरला हंसकान्ता स्याद् वारला वरटा मता" ॥

इति हलायुधे त्रैरूप्यम् ॥

सारसस्य तु लक्ष्मणा ॥ २५ ॥

क्षीर०— योषिदित्येव । लक्ष्मणीत्येके । अत एव लक्ष्मणा-ख्यासौ ॥

टीका०— सारसयोषिति[2] लक्ष्मणा ।

"वाल्मीकेररहितरामलक्ष्मणानाम्"

---

१. 'शारिका गौरादि पिकप' ख. पाठः. २. 'स्य तु ल' ङ. छ. पाठः.

इति माघे मकारवान् । कादम्बर्यां तु — 'महापुरुषमिव प्रकटमीनमकरशङ्खलक्षणम्' इत्यच्छोदवर्णनायां मकाररहितोऽपि ॥

जतुकाजिनपत्त्रा स्यात्

क्षीर० — जत्विव कृष्णपिङ्गत्वाद् जतुका । अजिनं पत्त्राणि पक्षा अस्या **अजिनपत्त्रा** । चर्मचटकत्वात् ॥

टीका० — जतूकाद्वयं चर्मचटके ।

"रामठे जतुकं चर्मपत्त्राजतुकृतोः स्त्रियाम् "

इति चवर्गादौ रभसः ।

"निशाशश्वद्व्यापिस्थितघनजतूकापटलजम् "

इति विभाकरवर्मा । चर्मैव पक्षोऽस्या अजिनपत्त्रा ॥

परोष्णी तैलपायिका ।

क्षीर० — परमुष्णमस्याः परोष्णी । शीतासहत्वात् । परं वैरुद्धं वा तेजसान्धकार(चर)त्वात् । तैलं पिबतीव तैलपायिका । नित्यमायविकासात् । चतुःसंज्ञेत्येके[1] । मुखविष्ठा विगुदिका निशाटनी च ॥

टीका० — परोष्णीद्वयं तैलाम्बू इति ख्यातायाम् । नासाच्छिन्निकाया राजगुडीति ख्यातायां तैलाम्बूसदृशायां वेति केचित् ॥

वर्वणा मक्षिका नीला

क्षीर० — वृणोति वर्वणा । मक्ष्यन्ते रुष्यन्तेऽस्यै मक्षिका ॥

टीका० — नीलकाचवर्णा गोमयादिमक्षिका वर्वणाख्या । 'जानपद —' ४. १. ४२) इत्यादिना प्राणिवृत्तेर्ङीष्विधानान्नीलीति पाठः । नीलेति लेख-

---

१. 'ति तै', २. 'के । तैलस्यानेनपक्षत्वाद् मुखनिष्ठीवद् गुलिका' क. पाठः

कदोषः । 'वर्वणा नीलमक्षिका' इत्यमरमाला । अतो नीलमक्षिकेति सविशेषणं नाम ॥

सरघा मधुमक्षिका ॥ २६ ॥

क्षीर० — सरति घातयति सरघा ॥

टीका० — सरघाद्वयं मधुमक्षिकायाम् । सरघा दन्त्यादिः ॥

पतङ्गिका पुत्तिका स्याद्

क्षीर० — पतति पतनमङ्गति वा पतङ्गिका । पुत् कुत्सितं तनोति पुत्तिका । मधुमक्षिकाभेदोऽयम् । यन्निमिः —

"माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम् ।
भ्रामरं तु भवेच्छुक्लं क्षौद्रं तु कपिलं भवेत्" ॥

टीका० — पतङ्गिकाद्वयं पुत्तिकाख्यमधुमक्षिकाविशेषे । तथा च वैद्यके — 'पौत्तिकं भ्रामरं क्षौद्रं मधु' इत्युक्तम् ॥

दंशस्तु वनमक्षिका ।

क्षीर० — दशति दंशः ॥

टीका० — डाश इति ख्याते दंशद्वयम् । दशतीति दंशः । पचादिः ॥

दंशी तज्जातिरल्पा स्याद्

क्षीर० — दंशी दंशजातीया । जातेर्ङीप् ॥

टीका० — तज्जातिः क्षुद्रा कुजीति ख्याता दंशी ॥

गन्धोली वरटा द्वयोः ॥ २७ ॥

---

१ क ङ. छ. पाठः.

क्षीर० — गन्धयत्यर्दयति गन्धोली। गन्धालीत्येके। व्रणोति वरटा। तैलाटाख्या॥

टीका० — गन्धोलीद्वयं वरलीति ख्यातायाम्।

"वरटा वरटीदंश्योस्तत्पतौ वरटः स्मृतः"

इति तारपालः॥

भृङ्गारी चीरुका चीरी झिल्लिका च समा इमाः।

क्षीर० — आकृत्या भृङ्गमियर्ति भृङ्गारी। चीति रौति चीरुका। चीति रिणाति चीरी। झिल्लचाद्यभेदात् तत्तुल्यशब्दा झिल्लिका[1]। 'केऽणः' (७.४.१३) इति ह्रस्वः। 'झिल्लिकाझङ्कृतीनाम्' इति तु लक्ष्यम्॥

टीका०— भृङ्गारीचतुष्कं चिल्लीति ख्यातायाम्। 'चिरुका ह्रस्वादिर्दीर्घादिश्च' इति वर्णविवेकः। †'शुगिचिमिज्यां दीर्घश्च' (उ० २.२८) इति चिञो रक्, दीर्घश्च, ङीर् च। चीरी॥

समौ पतङ्गशलभौ

क्षीर० — शलति शर्म लभतेऽग्नौ वा शलभः॥

टीका० — पतङ्गद्वयं फैडिङ्ग[2] इति ख्याते। 'पतेरङ्गच् पक्षिणि' (उ० १.१२४) इत्यङ्गच्। पतङ्गः। 'शल गतौ'। तालव्यादिः। शरभवच्छलभः॥

खद्योतो ज्योतिरिङ्गणः॥ २८॥

क्षीर० — खे द्योतते खद्योतः। ज्योतिरियङ्गते चलतीति ज्योतिरिङ्गणः। इन्द्रगोपको ज्योतिर्माली कीटमणिश्च॥

---

१. 'चीरिकाद्य' क. ग. घ. ङ. पाठः. २. 'का। चक्राख्या घोषणा इन्दिन्दिरो लङ्कादेश्याम्। के' क. ग. घ. ङ. पाठः. ३. 'पल्लिङ्ग' च. पाठः.

† 'शुसिचिमीनां दीर्घश्च' इति मुद्रितोणादिपाठः।

टीका० — खद्योतद्वयं ज्योलङ्गणीति ख्याते । खे द्योतत इति खद्योतः । पचादिः । ज्योतिस्तारका, तद्वद् इङ्गति गच्छतीति ज्योतिरिङ्गणः[1] । 'चलनशब्दार्थादकर्मकाद् युच्' (३. २. १४८) । 'पूर्वपदात् संज्ञायामगः' (८. ४. ३) इति णत्वम् ॥

मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥ २९ ॥

क्षीर० — मधु व्रतयति भुङ्क्ते मधुव्रतः । अलत्यली, अलिश्च । द्वौ रेफौ स्तोऽस्य द्विरेफः । †भृजति, बिभर्ति वा भृङ्गः । 'भृजी भर्जने' । षट् पदानि चरणान्यस्य षट्पदः । भ्रमति भ्रमरः । चञ्चलीकभसलेन्दिन्दरलोलम्बा देश्याम् ॥

टीका० — मधुव्रताद्येकादशकं **भ्रमरे** । मधु करोतीति मधुकरः । तथाच वैद्यके — 'पौत्तिकं भ्रामरं क्षौद्रं मधु' इति । *मधु व्रतयति भुङ्क्ते इति मधुव्रतः । §व्रताद् भोजने तन्निवृत्तौ वा (वा० ३. १. २१) 'मुण्डमिश्र —' (३. १. २१) इति णिजन्तात् 'कर्मण्यण्' (३. २. १) । मधुलिट्पुष्पलिहौ हकारान्तौ, क्विबन्तौ च । अलति अवश्यं भूषयतीत्यली । नान्तः । ह्रस्वादिः । भ्रमर इति नाम्नि द्वौ रेफावस्येति द्विरेफः । भृञो गन्प्रत्ययेन भृङ्गः । 'अर्तिकमिचमिभ्रमिदेविवाशिवासिभ्यश्चित्' (उ० ३. १३२) इत्यरन् । भ्रमरः । अलिरिति ह्रस्वादिः । 'इन्' (उ० ४. ११८) इतीन् । स्वरार्थो नः ॥

मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥ ३० ॥

---

१. 'ज्योतिरिङ्गणी' क. ङ. छ पाठः. 'झइंहिणी' ज पाठः.

---

† 'भर्जत' इति स्यात् । * व्युत्क्रमेण व्याचष्टे । § 'व्रताद् भोजनतन्निवृत्त्योः' इति मुद्रितवार्त्तिकपाठः ।

क्षीर० — मीनात्यहिं मयूरः । बर्हमस्यास्ति । 'फलबर्हाभ्यामिनन्' (वा० ५. २. १२२) । इनिश्च । शिखा अस्यास्ति शिखावलः । 'दन्तशिखात् संज्ञायाम्' (५. २. ११३) । शिखी । व्रीह्यादित्वादिनिः । मेघनादमनुलसति नृत्यत्यवश्यं मेघनादानुलासी । चन्द्रकी शुक्लापाङ्गश्च ॥

टीका० — मयूरनवकं मयूरे । 'मय गतौ' । 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९१) । मयूरः । बर्हयोगाद् बर्हिणः । फलिनवदिनच् । वाधिकारादिनिः । बर्ही । नान्तः । 'दन्तशिखात् संज्ञायाम्' (५. २. ११३) वलच् । शिखावलः । शिखिकेकिनोर्व्रीह्यादित्वादिनिः । मेघनादानन्तरं नर्तितु शीलमस्येति मेघनादानुलासी । नान्तः ॥

केका वाणी मयूरस्य

क्षीर० — के मूर्ध्नि कायति केका ॥

टीका० — मयूरध्वनौ केका ॥

समौ चन्द्रकमेचकौ ।

क्षीर० — चन्द्रप्रतिकृतिश्चन्द्रकः[1] । मेचको मिश्रवर्णत्वात् । यत् कात्यः —

"बर्हिकण्ठसमं वर्णं मेचकं ब्रुवते बुधाः" ॥

टीका० — मेचकद्वयं मयूरपिञ्छस्थेऽक्षिसंस्थाने ॥

शिखा चूडा

क्षीर० — मयूरस्येत्येव । अन्यत्रोपचारात् ॥

टीका० — शिखाद्वयं मयूरशिरस्थचूडायाम् । ज्वालायां शिखोक्ता ॥

---

१. 'प्रकृतिराह्लादकत्वाच्चन्द्र' क. ग. घ. ङ. पाठः.

शिखण्डस्तु पिञ्छबर्हे नपुंसके ॥ ३१ ॥

क्षीर० — शिखाभिर्डयते शिखण्डः । पिञ्छति पिञ्छम् । बर्हते नृत्तेनोर्ध्वीभवति बर्हम् । प्रचलाकोऽपि । कलापो नानार्थे ॥

टीका० — शिखण्डत्रयं मयूरपिञ्छे ।

"मारुतयोगाद् गुणवन्नवशशिखण्डानां
शुक्लापाङ्गविलम्बिनवशशिखण्डानाम्"

इति वृन्दावनयमकम् । 'बर्ह बल्ह परिभाषणादौ' । घञ् । बर्हः ।

"सति कुसुमसनाथे[1] कं हरेदेष बर्हः[2]"

इति कालिदासः । अतः पुल्लिङ्गोऽपि ॥

खगे विहङ्गविहगविहङ्गमविहायसः ।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥ ३२ ॥
पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ।
नगौकोवाजिविकिरविष्किरपतत्रयः ॥ ३३ ॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः ।

क्षीर० — खे गच्छति खगः । 'अन्यत्रापि दृश्यते' (वा० ३. २. ४८) इति डः । विहायसा गच्छति । 'गमेः सुपि खज् वक्तव्यः' (वा० ३. २. ३८) 'विहायसो विह च' । 'डे च' । ख(श्च?च) डित्' । विजिहीते विहायाः । यच्छाश्वतः—

"विदुर्विहायसं व्योम पक्षिणश्च विहायसः" ।

शक्नोतीति । 'शकेरुनोन्तोन्त्युनयः' (उ० ३. ४२) । पतत्यनेन पतत्रं पत्रं पक्षः । 'पुंसि संज्ञायां घः' (३. ३. ११८) पतैर्गच्छति पतगः । पततीति पतत् । पत्राणि पक्षा रथोऽस्य पत्ररथः । नग ओकोऽस्य नगौकाः । वाजो वेगोऽस्यास्ति वाजी । विकिरति पक्षं विकिरः । 'विष्किरः शकुनिर्विकिरो वा' (६. १. १५०) । वाति, वयति वा विः । 'वेञो डिर्त्*' ।

---

१. 'ड' क. ख. पाठः. २ 'तं' ख. झ. पाठः. ३. 'नाथः इ' ड. छ. पाठः. ४. 'डिः ।' क. ग. घ पाठः.

'डिच्च' इति मुद्रितोणादिपाठः ।

(उ० ४. ७३) । पतत्राणि सन्त्यस्य पतति वा पतत्री । * 'पतेरत्रिनिः' (उ० ४. ७०) । पतेरत्रिरिति भ्रान्त्या ग्रन्थकृदिदन्तं मन्यते । पतितुमिच्छन् पित्सन् । 'सनि मीमा —' (७. ४. ५४) इतीसभ्यासलोपौ । नभसा गच्छति नभसङ्गमः । गमेः सुप्युपसङ्ख्यानात् खच् । 'वाचंयमपुरन्दरौ च' (६. ३. ६९) इति चकारान्मुमागमः । 'अत्यमिचमितमिराभिलभिन§भिपनिपणिभ्योऽसच्' (उ० ३. ११७) इति नभसशब्दोऽस्तीत्येके । पतङ्गो नानार्थे ॥

टीका० — खगादयः सप्तविंशतिः **सामान्यपक्षिणि** । खे गच्छतीति खगः । डप्रकरणे 'अन्यत्रापि—'(वा० ३. २. ४८) इति डः । 'विहायसो विह च' (वा० ३. २. ३८) इति खच् । 'खच्च डिच्च¶ भवतीति वक्तव्यम्' (वा० ३. २. ३८) इति खचो डित्त्वम् । विहङ्गः । 'डे च विहायसो विहादेशो वक्तव्यः' (वा० ३. २. ३८) इति विहादेशः । विहगः । 'विहायसो विह च' इति खच् । विहङ्गमः । विहायाः सान्तः । विपूर्वाज्जहातेः 'वहिहाधाभ्यश्छन्दसि णिच्च' (उ० ४. २२२) इत्यसुन् । णित्त्वाद् युगागमः । 'शकृ शक्तौ' । 'शकेरुनोन्तोन्त्युनयः' (उ० ३. ४९) इति उन, उन्त, उन्ति, उनिप्रत्ययाः कर्तव्याः । अतः शकुनशकुन्तशकुन्तिशकुनयः । प्रथममण्डेन जायते, ततः शाबकेन । अतो द्विजः । (पतत्र)पत्रयोगात् पतत्रिपत्रिणौ । अत इनिः । पतन् उड्डयमानो गच्छति पतगः । पृषोदरादिः । पतन् शत्रन्तः । पत्रमेव रथ इवास्येति पत्ररथः । नगाः वृक्षाः, तदोकसो नगौकसः । वजत्यनेनेति वाजः । 'वज व्रज गतौ' । घञ् । वाजः । तद्योगाद् वाजी । किरतेः इगुपधलक्षणः कः । विकिरः । विरिति । 'वेञो डिः'‡ (उ० ४. ७३) 'विष्किरः शकुनिर्विकिरो वा' (६. १. १५०) इति पक्षे सुट् । 'परिनिविभ्यः सेवसित —' (८. ३. ७०) इति षत्वम् । विष्किरः । 'पतेरत्रिन्' (उ० ४. ७०) । पतत्रिः । इदन्तः । गरुत्मान् उक्तः । पित्सन्त इति । पतेः सन् शतृप्रत्ययश्च । 'सनिमीमाघुरभलभशकपतपदामच इस्' (७. ४. ५४) इतीस् । अभ्यासलोपश्च ।

---

* 'पतेरत्रिन्', § 'भितपिपतिपनिपणिमाहिभ्य' इति मुद्रितोणादिपाठः । ¶ 'डिद्वाच्यः' इति मुद्रितवार्त्तिकपाठः । ‡ 'डिच्च', इति मुद्रितोणादिपाठः । $ 'नौ वा' इति मुद्रितपाण्यायीपाठः ।

नभसोऽकारान्तोऽप्युणादावुक्तः । तस्माद् 'गमेः सुप्युपसङ्ख्यानम्' (वा० ३. २. ३७) इति खच् । नभसङ्गमः ॥

तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ॥ ३४ ॥
तित्तिरिः कुक्कुटो लावो जीवञ्जीवश्चकोरकः ।
कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः ॥ ३५ ॥

क्षीर०— पक्षिविशेषाः । हारिणं वर्णमितो हारीतः । मज्जति मद्गुः । जलकाकः । न्यङ्क्वादिः । करण्डे भवं कारण्डं पञ्जरवन्तं वाति कारण्डवः । प्लवते प्लवः । तित्तिशब्दं राति तित्तिरिः । कुक्शब्दं कोटति कुक्कुटः । लाति लूयते वा लावः । जीवेन सहचरेण जीवति जीवञ्जीवः । बाहुलकत्वात् खच् । चकते ज्योत्स्नया तृप्यति चकोरः । को यजते कोयष्टिकः । पक्षिविशेषः । टिट्टिशब्दं भाषते टिट्टिभकः । वर्तत इति वर्तकः । ‡'शकुने साधुः (?) प्राचाम्' (७. ३. ४५) इति । पक्षे वर्तिका । आदिशब्दात् कपिञ्जलादयः ॥

टीका०— हारीतत्रयोदशकं प्रत्येकं **स्वनामप्रसिद्धेषु पक्षिषु** । हारीतो हरिआल इति ख्यातः । मज्जतीति मद्गुः । पानीयका*(रि ? कि)का । 'टुमस्जो शुद्धौ' । तरुवद्गुः । कारण्डवः । प्लवः पिल इति ख्यातः । तित्तिरिरिति । 'तरतेः सन्वत् तुक् चाभ्यासस्य' इति किः । तित्तिराचित्रपक्षकपिञ्जला अप्यस्य नामानि । कुगिति कुभति शब्दायत इति कुक्कुभः । कुभिः सौत्रो[२] धातुः । लावः प्रसिद्धः । 'जीवन् जीवो जीवजीवः' इति शुभाङ्ककोषः । 'कठिचकिभ्यामोरन्' (उ० १. ६७) । चकोरः । कोयष्टिकः कोण्डेति ख्यातः । टिट्टीति शब्देन भातीति टिट्टिभः । 'आतोऽनुपसर्गे कः' (३. २. ३) ततः स्वार्थे कः । वर्तिकाद्वयं **वाटहीति** ख्यातायाम् । 'वृतेस्तिकन्' (उ० ३.

---

१. 'शिखरिन्निट्टि' क. ग. घ. ङ. पाठः. २. 'त्र' क. ख. च. ज. पाठः.

---

‡ 'वर्तका शकुनौ प्राचाम्' इति मुद्रितवार्त्तिकपाठः । * 'मद्गुः पलिलवायसे' 'मद्गुस्तु जलकाकः स्यात्' इति केशवयादवौ ।

१४७) इति तिकन्। वर्त्तिका। 'वर्त्तिका शकुनौ प्राचाम्' (वा०७. ३. ४५) इति विभाषा इत्त्वनिषेधेन वर्त्तका। उभयोरुपादानं रूपभेदेन प्रदर्शनार्थमात्रम्। आदिना शारिकादयः॥

गरुत् पक्षच्छदः पत्रं पतत्रं च तनूरुहम्।

क्षीर०— गिरति खं गरुत्। 'मृग्रोरुतिः' (उ०१. ९९)। 'पक्ष परिग्रहे'। छाद्यतेऽनेनाङ्गं छदः। 'छादेर्घे—' (६. ४. ९६) इति ह्रस्वः। पतत्यनेन पत्रम्। पतन्तं त्रायते पतत्रम्॥

टीका०— गरुदादिषट्कं पक्षे। मरुद्भद् गरुत्। छाद्यतेऽनेनेतिच्छदः। घः। 'छादेर्घेऽद्व्युपसर्गस्य' (६. ४. ९६) इति ह्रस्वः। 'गरुत्पक्षौ नरौ छदे' इति क्लीबकाण्डे वोपालितः। 'दाम्नीशस—' (३. २. १८२) इत्यादिना ष्ट्रन्। पत्रम्। 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' (उ० ३. १०५)। पतत्रम्। तन्वा रोहते जायत इति तनूरुहम्॥

स्त्री पक्षतिः पक्षमूलं

क्षीर०— मूले 'पक्षात् तिः' (५. २. २५)॥

टीका०— पक्षतिद्वयं पक्षमूले। 'पक्षात् तिः' (५. २. २९) पक्षतिः॥

चञ्चुस्त्रोटिरुभे स्त्रियौ॥ ३६॥

क्षीर०— चञ्चति चलति चञ्चुः। त्रोटयति त्रोटिः। तुण्डं च॥

टीका०— चञ्चुद्वयं खोट इति ख्यातायाम्। 'वञ्चु तञ्चु चञ्चु गत्यर्थाः'। राहुवदुण्। 'स्फुरति शुकचञ्चुपुटः' इत्यतो दीर्घोऽपि। 'त्रुटच्छेदने'। इन्। त्रोटिः। ङीपि त्रोटी॥

प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ।

क्षीर०— प्रकृष्टमूर्ध्वं संहतं च डयनम् । 'स्वादय ओदितः' इति निष्ठानत्वम् । एता इति विडीनाद्युपलक्षणार्थम् ॥

टीका०— प्रडीनत्रयं पक्षिणामेकैकं गमनविशेषे । प्रथममुड्डयनाय क्रमः प्रडीनम् । वियद्गमनमुड्डीनम् । वृक्षादिषु पतनं संडीनम् । प्रादिपूर्वाद् डीङो भावे क्तः । 'ओदितश्च' (८. २. ४५) इति नत्वम् । ओदितां मध्ये पाठसामर्थ्यादनिट् ॥

पेशीकोषो द्विहीनेऽण्डं

क्षीर०— पेशीनां मांसखण्डानां कोषः । अमति निःसरत्यस्माद् अण्डम् । तिस्रः संज्ञा इति गौडः ॥

टीका०— पेशीत्रयं पक्षिडिम्बेति[1] ख्याते । 'पिश अवयवे' । घञ् । गौरादिङीष् । एवं तालव्यवती । 'कुष निष्कर्षे' । कर्मणि घञ् । एवं मूर्धन्यषः । कोषः ।

"भावानुरक्तवनितासुरभौ शयेय-
मालभ्य चाम्बु तृषितः करकोशपेयम् ॥"

इति तु तालव्यानुप्रासे घटकर्परः । 'अण रण गतौ' । 'अमन्ताड्डः' (उ० १. ११९) अण्डम् ॥

कुलायो नीडमस्त्रियाम् ॥ ३७ ॥

क्षीर०— कौ लीयते, कुलमिति[2] वा कुलायः । नीयतेऽस्मिन्[3] नीडम् ॥

टीका०— पक्षिवासे कुलायद्वयम् । कुलान्यायन्तेऽत्रेति कुलायः । 'ईड स्तुतौ' । निपूर्वाद् घञ् । नीडः ॥

---

१. 'डिम्बेति' ज. पाठः. २. 'लं तदिति कु', ३. 'निडीय' क. ग. घ. ङ. पाठः.

पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः।

क्षीर०— पुनाति पोतः[1]। पात्येनं[2] स्तनौ पिबति वा पाकः। ऋभ्यतेऽर्भकः। डयते[3] डिम्भः[4]। प्रथते वर्धते, पृथु कायति वा पृथुकः। (श्ये? श्य)ति शवति वा शावः। शेतेऽत्यर्थं शिशुः॥

टीका०— पोतसप्तकं सामान्यशिशौ। पोत उक्तः। पिबतीति पाकः। भेकवत् कन्। 'ऋ गतौ'। 'अर्तिगृभ्यां भन्' (उ० ३. १५३)। ततः कन्। अर्भकः। शाव एव शावकः। 'शव गतौ'। घञ्।

"नवनमेरुफलावलिरावभौ सुकपिशा कपिशाबमुखादपि"

इति कप्फिणाभ्युदयः। 'शो तनूकरणे'। 'शः कित् सन्वच्च' (उ० १. २०) इति उः। द्वितालव्यः शिशुः॥

स्त्रीपुंसौ मिथुनं द्वन्द्वं

क्षीर०— स्त्री च पुमांश्च तौ स्त्रीपुंसौ। 'अचतुरविचतुर—' (५. ४. ७७) इति साधुः। मेथते सङ्गच्छते मिथुनम्। द्वौ द्वौ इति द्वन्द्वम्। 'द्वन्द्वं रहस्य—' (८. १. १५) इति साधुः। यत् कालिदासः—'द्वन्द्वानि भावं क्रियया विवव्रुः' (कुमा० स० ३. श्लो० ३५)॥

टीका०— स्त्रीपुंसयोर्युग्मे मिथुनम्। मिथिः सौत्रो धातुर्हिंसार्थः। 'क्षुधिविशिमिथिभ्यो[5] उनन्' (उ० ३. ५५)॥

युग्मं तु युगलं युगम्॥ ३८॥

क्षीर०— युज्यते धर्मिवृत्त्या युग्मम्[6]। धर्मवृत्तौ तु युगम्। 'तल्लाति युगलम्। मत्वर्थीयो वा लच्॥

---

१. 'तः। पचत्यस्मिन् नमति तन्मात्रं वा स्त' क. पाठः. २. 'ने पिबति स स्त' ख. पाठः. ३. 'ति' ख. पाठः. ४. 'म्भः अन्योढत्वात्। प्र' क. ग. घ. ङ. पाठः. ५. 'भ्यः क्युन्' ङ. छ. पाठः. ६. 'गः। ध' ख. पाठः.

† 'भ्यः कित्' इति मुद्रितोणादिपाठः।

टीका०— द्वन्द्वचतुष्कं सामान्येन युग्ममात्रे । द्वौ द्वौ[1] इति द्वन्द्वम् । 'द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' (८. १. १९) इत्यनेन द्वन्द्वमन्तःस्थोपधं निपात्यते । 'द्वन्द्वं द्वन्दं युगलं युग्मं युगं मिथुनं मिथः' इति व्याडिः । तथा च पृषोदरादित्वाद् वकारविकल्पः । तिग्मवद् युग्मम् । युगलमिति । पृषोदरादित्वात् कलच् । युजेः इगुपधलक्षणः कः । युगम् ॥

समूहनिवहव्यूहसन्दोहविसरव्रजाः ।
स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः ॥ ३९ ॥
समुदायः समुदयः समवायश्चयो गणः ।
स्त्रियां तु संहतिर्वृन्दं निकुरुम्बं कदम्बकम् ॥ ४० ॥

क्षीर०— समूह्यते ढौकते समूहः । निवहति निवहः । व्यूह्यते व्यूहः । सन्दुह्यते सम्पूर्यते सन्दोहः । विस्रियते विसरः । व्रज्यते व्रजः । 'गोचरसञ्चर —' (३. ३. ११९) इति साधुः । स्तूयते स्तोमः । उह्यते ओघः । न्यङ्क्वादिः । निकीर्यते निकरः । व्रियते व्रातः । वारः । सञ्चीयते सञ्चयः । समुदयनं समुदायः । अयतेर्घञ् । समुदय इति । इणोऽच् । सम(वय[2]वाय्य)ते समवायः । चीयते चयः । गण्यते गणः । वृणोति वृन्दम् । निकुरति निकुरुम्बम् । कदम्बप्रतिकृ[3]तिकेसरसञ्चयात्मकत्वात् कदम्बकम् । कुत्सितमम्बते वा ॥

टीका०— समूहादयो द्वाविंशतिः समूहे । समूहव्यूहयोः कर्मणि घञ् । निवहसन्दोहविसराः पचाद्यजन्ताः । गोचरसंचरादिना व्रजो निपातितः । स्तोम इति । 'ष्टुञ् स्तुतौ' । स्तोमवन्मन् । 'उच समवाये' । घ[4]ञ् । 'चजोः कु घिण्यतोः' (७. ३. ५२) इति कुत्वम् । 'यथासङ्ख्यमत्र नेष्यते' इति वचनाद् घकारः । ओघः । किरतेः, निकरः । 'ऋदोरप्' (३. ३. ५७) । निपूर्वः । 'व्रातेन जीवति' (५. २. २१) इत्यत्र व्रातः साधुः । दुहेर्वृणातेरयतेश्च गत्यर्थाद् घञि सन्दोहवारसमुदायाः । सङ्घात इति । 'हन्त्यर्थाश्च'

---

१. 'द्वौ द्व' ङ. छ. पाठः. २. 'ह', ३. 'तेः' क. ग. घ. ङ. पाठः. ४. 'घः ।' क, ख. च. ज. पाठः.

इत्यस्माद् हनश्चौरादिकात् पचाद्यच्। 'हनस्तोऽचिण्णलोः' (७. ३. ३२) इति तत्वम्। 'हो हन्तेः —' (७. ३. ५४) इति घत्वम्। हन्तेः क्तिन्। संहतिः। तुशब्दः स्त्रीलिङ्गं निवर्तयति, न नाम। वृन्दम् इति। 'अब्दादयश्च' (उ० ४. ९८) इत्यनेन दन् नुमागमगुणाभावौ च निपात्येते। 'कदिकडिभ्योऽम्बच्' कदम्बः। ततः कन्॥

वृन्दभेदाः

क्षीर० — **समूहविशेषाः। वक्ष्यन्त इति शेषः॥**

टीका० — इदानीं वर्गादयो वृन्दभेदाः॥

समैर्वर्गः

क्षीर० — **सजातीयैः प्राणिभिरप्राणिभिश्च समूहो वर्गः। वृज्यते विजातीयेभ्य इति वर्गः॥**

टीका० — तत्र समानैः प्राणिभिरप्राणिभिर्वा वृन्दं वर्गः। यथा कवर्गः[1]। 'वृजी वर्जने'। घः॥

सङ्घसार्थौ तु जन्तुभिः।

क्षीर० — **प्राणिभिः समूहः। संहन्यते सङ्घः। 'सङ्घोद्धौ गणप्रशंसयोः' (३. ३. ८६) इति साधुः। यथा गोसङ्घः। मेघसङ्घाद्युपचारात्। सरति सार्थोऽध्वगवृन्दम्॥**

टीका० — सङ्घद्वयं **प्राणिसमूहे**। यथा भिक्षुसङ्घः। वणिक्सार्थः। अन्यत्रोपचारात्। 'सङ्घोद्धौ गणप्रशंसयोः' (३. ३. ८६) इत्यप्, टिलोपघत्वे च। सङ्घः। 'सर्तेर्णित्[2]' (उ० २. ५) इति थक्। सार्थः॥

सजातीयैः कुलं

---

१. 'गयिः। वृ', २. 'दथन्। सा' ङ. छ. पाठः।

क्षीर० — जन्तुभिरित्येव । कुलं[1] बन्धुषु विप्रकुलम् ॥

टीका० — सजातीयैरेव जन्तुभिर्बृन्दं कुलम् । यथा ब्राह्मणकुलम् । 'कुल संस्त्याने' । इगुपधलक्षणः कः । अन्यत्रोपचारात् ॥

यूथं तिरश्चां पुन्नपुंसकम् ॥ ४१ ॥

क्षीर० — वृन्दमित्येव । यथा मृगयूथः । 'यु मिश्रणे' ॥

टीका० — तिरश्चामेव बृन्दं यूथम् । यथा हास्तियूथम् । 'यु मिश्रणे' । 'तिथपृष्ठगूथयूथप्रोथाः' (उ० २. १२) इत्यनेन थक् दीर्घत्वं च निपात्यते । 'रथयूथेन महता' इत्यादिप्रयोगो गौणः ॥

पशूनां समजः

क्षीर० — संवीयते समजः । **'समुदोरजः पशुषु' (३. ३. ६९) इत्यप्** ॥

टीका० — गवादिपशूनां वृन्दे समजः । 'समुदोरजः पशुषु' (३. ३. ६९) इत्यजेरप् । 'अजिव्रज्योश्च' (७. ३. ६०) इति कुत्वनिषेधः । अघञपोरिति प्रतिनिषेधान्न वीभावः ॥

अन्येषां समाजः

क्षीर० — पशुभ्योऽन्येषां वृन्दम् । यथा श्रोत्रियसमाजः ॥

टीका० — पशुभ्योऽन्येषां वृन्दं समाजः । यथा नृपसमाजः । घञ् । अन्यत्रोपचारात् ॥

अथ सधर्मणाम् ।

स्यान्निकायः

क्षीर० — समूह इत्येव । यथा श्रमणनिकायः । निचीयते निकायः । **'निवासो*पचिति—' (३. ३. ४१) इति घञ् । कत्वं च** ॥

---

१. 'मूलब' क. ग. घ. पाठः.

---

* 'साचिति' इति मुद्रिताष्टाध्यायीपाठः ।

टीका० — समानधर्मणामेव[1] प्राणिनां वृन्दं निकायः। यथा भिक्षुनिकायः। 'सङ्घे चानौत्तराधर्ये' (३. ३. ४२) इति चिनोतेर्घञ्। आदेश्च कादेशः॥

पुञ्जराशी तूत्करः कूटमस्त्रियाम्॥ ४२॥

क्षीर० — धान्यादेरुच्छ्रितं वृन्दम्। पुञ्ज्यते पुञ्जः। राश्यते राशिः। राशिः सौत्रो दीप्त्यर्थः। उत्कीर्यते उत्करः। कूट्यते कूटः॥

टीका० — पुञ्जचतुष्कं धान्यादिकूटे। पुंसो जातः पुञ्जः। राशिरिति। 'अशिपणा*यत्यो रुड्लुकौ च' (उ० ४. १३४) इति इण् रुडागमश्च। राशिर्द्वयोरिति त्रिकाण्डे पठ्यते। किरतेः 'ऋदोरप्' (३. ३. ५७)। उत्करः। कूट उक्तः॥

कापोतशौकमायूरतैत्तिरादीनि तद्गणे।

क्षीर० — कपोतादीनां समूह एतानि वर्तन्ते। 'अनुदात्तादेरञ्' (४. २. ४४)। आदिशब्दात् काकादिः॥

टीका० — कपोतशुकतित्तिरीणां गणे यथायोगं कापोतादयः स्युः। 'अनुदात्तादेरञ्' (४. २. ४४)। कापोतम्। अन्यत्र 'तस्य समूहः' (४. २. ३७) इत्यण्॥

गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते॥ ४३॥

क्षीर० — छा[2](दय?घ)न्ते छेकाः। पञ्जरादौ स्थाप्यन्ते। गृह्यन्ते गृह्यकाः। 'पदास्वैरि —' (३. १. ११९) इति क्यप्[3]। स्वार्थे कन्॥

इति सिंहादिवर्गः॥

---

१. 'र्मा' ङ. छ. पाठः. २. 'छाय' क. ग. घ. ङ. पाठः. ३. 'प्॥' ख., 'प्। सिं' क. ङ. पाठः.

---

* 'य्यो रुडायतु' इति मुद्रितोणादिपाठः।

टीका० — क्रीडार्थं योषितां मृगपक्षिणो गृहासक्ता गृहसंलग्नाः । तत्र छेकद्वयम् । 'स्थेका' इति पाठे तिष्ठतेः 'क्रिय इकन्' (उ० २. ४६) इति बाहुलक इकन् । गृह्यका इति । 'पदास्वैरिबाह्यापक्ष्येषु च' (३. १. ११९) इति क्यप् । अनुकम्पायां कन् ॥

इति वन्द्यघटीयसर्वानन्दकृतौ टीकासर्वस्वे

सिंहादिवर्गः ॥

अथ मनुष्यवर्गः ।

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥

क्षीर० — मनोरपत्यं मानुषो मनुष्यश्च । 'मनोर्जातावञ्यतौ षुक् च' (४. १. १६१) । म्रियते मर्त्यः । स्वार्थे यत् । मानव इतीदमर्थेऽण् । अपत्यार्थेऽञ्यद्भ्यां बाधितत्वात् । नृणाति नरः । 'नृ नये' । पाति पुमान् । पञ्चभिर्भूतैर्जायते पञ्चजनः । पुरि शयनात्, पूरणाद्वा पुरुषः । 'अन्येषामपि—' (६. ३. १३७) इति वा दीर्घः । नयति ना । 'नयतेर्डिच्च' (उ० २. १००) इत्यृन् ॥

टीका०— मनुष्यैकादशकं **मानुषे** । मनोरपत्यानि मनुष्याः । मानुषाश्च । 'मनोर्जातावञ्यतौ षुक् च' (४. १. १६१) । मर्तो भूलोकः, तत्र भूता मर्त्याः । दिगादित्वाद्[1] यत् । दितिजा इव मनुजाः । मनोरिमे मानवाः । 'तस्येदम्' (४. ३. १२०) इत्यण् । 'नृ नयने' । पचाद्यच् । नराः । पुमांसं[2] इति । पुनातेः 'पूजः सुनुमुग्रस्वश्च'[3] । पञ्चाभिः पृथिव्यादिभिर्महाभूतैर्जायन्त इति पञ्चजनाः । 'जन

---

१. 'दिय' क. ख. ज. झ., 'दिभ्यो य' च. पाठः. २. 'सः पु' ङ. छ. पाठः. ३. 'प्मु' क. ख. पाठः.

जनने'। पचाद्यच्। 'पॄ पालनपूरणयोः'। 'पुरः कुषन्' (उ० ४. ७५)। पुरुषाः। बाहुलकाद् 'हलि च' (८. २. ७७) इति दीर्घाभावः। 'वोरुपधाया दीर्घ इकः' (८. २. ७६) इति वर्तमाने 'हलि च' इति दीर्घत्वे पूरुषाः। 'नयतेर्डिच्च' (उ० २. १००) इति ऋन्। डित्त्वाट्टिलोपः। ना नरौ नरः॥

स्त्री योषिद्बला योषा नारी सीमन्तिनी वधूः।
प्रतीपदर्शिनी वामा वनिता महिला तथा॥ २॥

क्षीर०—स्त्यायत्यस्यां गर्भः स्त्री। योषति पुमांसं योषित्। 'हसॄरुहियुपिभ्य इ(ती?तिः)' (उ० १. १०२) (तञ् तन्यञ्जीति?) योषा। नारीति। 'नृनरयोर्वृद्धिश्च' (ग० ४. १. ७३) इति वृद्धिः। शार्ङ्गरवादिपाठाद् ङीन्। केशपक्षयोः सीमाप्रदेशः सीमन्तः। तद्वत्त्वात् सीमन्तिनी। उह्यतेऽसौ, वध्यतेऽनया भर्ता वा वधूः। प्रतीपं वक्त्रं पश्यत्यपाङ्गनिरीक्षणात् प्रतीपदर्शिनी। वामाद् विपरीतलक्षणया, शृङ्गारिवेदनत्वाद् वा पुंसां वामो भागोऽस्या इति वा। वन्यते दीयते प्रार्थ्यते वा वनिता। मह्यते महिला। महती ईडा स्तुतिरस्या महेला महिला च। मही भूः, तत्स्वभावं बीजधारणवर्धनकरत्वं लाति वा महिला। तथाशब्दान्महेलापि। यल्लक्ष्यम्—

"अजयद् द्विपतः पूज्यनयः परमहेलया।
स्वप्नेऽपि मनसि स्पृष्टो नं यः परमहेलया॥"

टीका०—स्त्येकादशकं स्त्रियाम्। 'स्त्यै ष्टयै सङ्घातशब्दयोः'। संस्त्याने 'स्त्यायतेर्ड्टट्' (उ० ४. १६९)। टिलोपः। ङीप्। स्त्री। युषेः सौत्राद् 'हसॄरुहियुपिभ्य इतिः' (उ० १. १०२) इतीतिः। योषित्। अन्तःस्थादिः।

---

१. 'न्युतन्यञ्जीति' क. ग. घ. ङ. पाठः. २. 'न्। सीमन्तः केशरेखास्त्यस्याः सीमन्ति' ख. पाठः. ३. 'वध्यते' ग. ङ. पाठः. ४ 'पं द्रष्टुं शीलमस्याः प्र', ५. 'नी। वक्त्रं पश्यत्यपाङ्गनिरीक्षणात्। पुंसां वामो भागोऽस्या इति वामा। विपरीतलक्षणया शृङ्गारिवेदनाद् वा। वनते' क. ग. घ. ङ. पाठः. ६. 'ते प्रार्थ्यते व' ख. पाठः. ७. 'द्युसदः पू', ८. 'स्तया प', ९. 'नरः प' ग. घ. ङ. पाठः. १० 'दिति इति यो' ङ. छ., 'दिति यो' च. पाठः.

टापि योषितेति केचित् । 'स्त्री वधूर्योषिता रामा' इति त्रिकाण्डशेषश्च । अल्पबलत्वादबला । अल्पार्थे नञ् । 'जुष परितर्कणे' । घञ् । जोषा चवर्गादिः । यौतेर्बाहुलकात् सम्प्रत्ययेनान्तःस्थादिरपि । उभयमेवेति वर्णदेशना । नृशब्दान्नरशब्दाच्च 'नृनरयोर्वृद्धिश्च' (ग०४. १. ७३) । ङीन्वृद्धी । नारी । सीमन्तः केशरचना, तद्योगात् सीमन्तिनी । '*वहेर्धश्च' (उ०१. ८६) इत्यूः, धश्चान्तादेशः । वधूः । प्रतीपमसम्मुखं द्रष्टुं शीलमस्या इति प्रतीपदर्शिनी । ताच्छील्ये णिनिः । वमतेः, 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०) । वामा । 'वन ध्वन शब्दे' । कर्तरि क्तः । वनिता । 'मह पूजायाम्' । सलिलवदिलच् । महिला ॥

विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥

क्षीर०—प्रकृष्टान्यङ्गान्यस्या अङ्गना । 'अङ्गात् कल्याणे' (ग०५. २. १००) इति[1] यामादित्वात् नः । बिभेति तच्छीला भीरुः । 'भियः कुकुकनौ' (३. २. १७४) । कामयते कामिनी । वामे पुंबाधके लोचने अस्या वामलोचना । प्रकृष्टो मदः कामवेगोऽस्त्यस्याः[3] प्रमदा । मानः प्रणयकोपोऽस्त्यस्या मानिनी । काम्यते कान्ता । ललति, लाल्यते[4] वा ललना । 'लल विलासे' । 'लल ईप्सायाम्' । नितम्बिनी गुरुनितम्बा ॥

सुन्दरी रमणी रामा

क्षीर०— विशेषा इत्येव । सुष्ठु द्रियते सुन्दरी । रमन्तेऽस्यां रमणी । रमते रामा । ज्वलादित्वाण्णः ॥

टीका०— अङ्गनाद्वादशकं प्रत्येकं स्त्रीविशेषे । प्रशस्ताङ्गयोगादङ्गना । 'लोमादिरामादिपिच्छादिभ्यः शनेलचः' (५. २. १००) इति वर्तमाने, 'अङ्गात्

---

१. 'नि रुन्त्यस्या' ख. पाठः. २. 'ति लोमादीति नः' ग. घ. ङ. पाठः. ३. 'गोऽस्याः' ग. घ. ङ. पाठः. ४. 'ल' ख. पाठः.

---

* 'वहो धश्च' इति मुद्रितोणादिपाठः ।

कल्याणे' (ग०५. २. १००) इति पामादिगणसूत्रेण नप्रत्ययः। भयशीला भीरुः। बिभेतेः 'भियः क्रुक्रुकनौ' (३. २. १७४) इति ताच्छीलिकः क्रुः। तत 'ऊङुतः' (४. १. ६६) इत्यूङ्। एवं दीर्घान्तः। तथाच — 'त्वं रक्षसा भीरु! यतोऽपनीता' इति प्रयोगः। ह्रस्वान्तोऽपपाठ इति श्रीकण्ठादयः। बहुकामा कामिनी। 'संज्ञायां मन्माभ्याम्' (५. २. १३७) इति इनिः। चारुनेत्रा वामलोचना। प्रकृष्टो रूपादिमदो यस्याः सा प्रमदा। भावः शृङ्गारचेष्टा, तद्युक्ता भाविनी। प्रशंसायामिनिः। कमनीयमूर्तिः कान्ता। 'कमु कान्तौ'। 'मतिबुद्धिपूजार्थेभ्यश्च' (३. २. १८८) इति वर्तमाने क्तः। सुकुमाराङ्गी ललना। 'लल ईप्सायाम्'। ण्यन्ताद् युच्। पृथुनितम्बा नितम्बिनी। रूपलावण्ययुक्ता सुन्दरी। गौरादिः। या वपुर्गुणोपचारेण कान्तं रमयति, सा रमणी। 'रमु क्रीडायाम्'। नन्द्यादिल्युः। या गीतकलाभी रमते, सा रामा। 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०)॥

कोपना सैव भामिनी।

क्षीर०— 'भाम क्रोधे'॥

टीका०— कोपनाद्वयं क्रोधवत्याम्। 'कुप क्रोधे'। 'क्रुधमण्डार्थेभ्यश्च' (३. २. १५१) इति ताच्छीलिको युच्। 'भाम क्रोधे'। आवश्यके णिनिः॥

वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी॥ ४॥

क्षीर०— उत्तमस्त्रीपर्यायाः। व्रियते वरः, आरुह्यतेऽस्मिन् आरोहो नितम्बः। वर आरोहोऽस्या वरारोहा। मत्ता क्षीबेव काशते भाति मत्तकाशिनी। 'कर्तर्युपमाने च' (३. २. ७९) इति णिनिः। वरो वर्णोऽस्त्यस्या वरवर्णिनी॥

टीका०— वरारोहाचतुष्कमुत्तमायाम्। वर आरोहः कटिर्यस्याः सा वरारोहा। श्रोणीगौरवान्मत्तगजवन्मन्थरगामिनी मत्तकासिनी। 'कस गतौ'।

---

१. 'पि' च. पाठः. २. 'याः आ', ३. 'म्बः। स वरोऽस्या' ख. पाठः, ४. 'नेणि' ख. पाठः.

दन्त्यान्तः । 'कर्तर्युपमाने' (३. २. ७९) इति णिनिः । उत्तमेति । उच्छब्दादतिशायने तमप् । उत्कृष्टवर्णा वरवर्णिनी ॥

'शीते सुखोष्णसंहिता ग्रीष्मे यो[1] सुखशीतला ।
भर्तृभक्ता च या नारी नीचा च वरवर्णिनी ॥'

इति रुद्रः ॥

कृताभिषेका महिषी

क्षीर०— नृपस्त्रीत्येव । श्रीमहादेवीत्वे[2] कृताभिषेका । यथा वासवदत्ता । मह्यते पूज्यते महिषी ॥

टीका० — कृताभिषेका बद्धपट्टा नृपस्त्री महिषी ॥

भोगिन्योऽन्या नृपस्त्रियः ।

क्षीर० — पद्मावत्याद्याः । भोगोऽस्त्यस्यां भोगिनी[3] । ता महिषीत इतराः ॥

टीका० — महिषीतोऽन्याः नृपस्त्रियो भोगिन्यः । भोगयोगादिनिः ॥

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाथ पुंभूम्नि दाराः

क्षीर० — 'पत्युर्नो यज्ञसंयोगे' (४. १. ३३) इति पत्नी । पाणिगृहीतोऽस्याः । 'बहुव्रीहेश्चान्तोदात्तात्' (४. १. ५२) इत्यत्र *'पाणिगृहीतादीनां विशेषे' (वा०४. १. ५२) इति ङीप् । द्वितीया धर्मसहाया । सह

---

१. 'सर्वाङ्गी' क. ख. च. ज. झ. पाठः. २. 'चा' ख. पाठः. ३. 'त्वेन कृ' क. ग. घ. ङ. पाठः. ४. 'नी । प' ख. पाठः.

---

* 'पाणिगृहीती भार्यायाम्' इति मुद्रितवार्तिकपाठः । पाणिगृहीत्यादीनामर्थविशेषे इति तु काशिका ।

धर्मोऽस्त्यस्याः सहधर्मिणी । यज्ञादौ सहाधिकारात् । भरणाद् भार्या । †'संज्ञायां भृतृवृजीत्यादेः' 'ऋहलोर्ण्यत्' (३. १. १२४) । जायतेऽस्यां पतिः जाया । यन्मनुः —

"जायायास्तद्धि जायात्वं यदस्यां जायते पुनः" ।

दारयन्ति दाराः । 'दारजारौ कर्तरि णिलुक्' (वा०३. ३. २०) । अथशब्दात् पुमूभून्नोर्न पूर्वभाक्त्वम् । सहचरी च ॥

टीका० — पत्नीसप्तकमग्निसाक्षिकं कृतपाणिग्रहणायाम् । 'पत्युर्नो यज्ञसंयोगे' (४. १. ३३) इति पतिशब्दस्य नकारः । नकारान्तत्वाद् ङीप् । पत्नी । शूद्रपत्नीत्युपचारात । 'गृह्णामि ते सौभगत्वाय —' (अथर्व० का० १४. अ०१. सू० ५०) इत्यादिमन्त्रे(ण) विवाहे पाणिर्गृहीतोऽस्या इति पाणिगृहीती । 'पाणिगृहीत्यादीनां विशेषे ङीप् वक्तव्य' (वा०४. १. ५२) इति ङीप् । द्वयोः पूरणीति द्वितीया । 'द्वेस्तीयः' (५. २. ५४) । टाप् । सहधर्मयोगात् सहधर्मिणी । 'समानस्य' (६. ३. ८४) इति योगविभागात् सभावे सधर्मिणी च । 'धर्मशीलवर्णान्ताच्च' (५. २. १३२) इतीनिः । भार्येति । 'ऋहलोर्ण्यत्' (३. १. १२४) । पतिरस्यां पुनर्जायत इति जाया । 'जनेर्यक्' (उ०४. ११२) इति यक् । 'ये विभाषा' (६. ४. ४३) इत्यात्वम् । 'दृ विदारणे' । 'दारजारौ कर्तरि णिलुक् च' (वा०३. ३. २०) इति घञ् । टाबन्तोऽपीति हडुचन्द्रः । तथा च शुभाङ्गः—

"क्रोडा हारा तथा दारा त्रय एते यथाक्रमम् ।
क्रोडे हारेषु दारेषु शब्दाः प्रोक्ता मनीषिभिः" ॥

स्यात्तु कुटुम्बिनी[2] ।

पुरन्ध्री

क्षीर०— कुटुम्बं पुत्रभृत्याद्यस्त्यस्याः कुटुम्बिनी । पुरं धत्ते पुरन्ध्री ॥

---

१. 'ति म' ङ. छ. पाठः. २. 'स्त्र' क. ख. ङ. छ. ज. झ पाठः. ३., ४., ५. 'डु' ग. घ. ङ. पाठः.

---

† संज्ञायां भृतः इति स्वामीति तु भानुजिदीक्षितः ।

टीका० — कुटुम्बिनीद्वयं पुत्रादिमत्याम् । पुरं गृहं धरतीति । 'इक् कृष्यादिभ्यः' (वा०३. १. ३०८) इतीक् । पृषोदरादित्वान्नुमि पुरन्धिः । पक्षे ङीष् । पुरन्ध्री ॥

सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥

क्षीर० — पतिसेवैव व्रतं यस्याः सा पतिव्रता । यत् स्मृतिः — 'नास्ति स्त्रीणां पृथग् यज्ञो न व्रतम्' इति । सैव सुचरित्रत्वात् सती साध्वी च ॥

टीका०— सुचरित्राचतुष्कमखण्डितचारित्रायाम् । सतीति । 'अस भुवि' । शतृ । 'उगितश्च' (४. १. ६) इति ङीप् । साध्वीति 'वोतो गुणवचनाद्' (४. १. ४४) इति ङीष् । ङीषभावे साधुः । पतिः व्रतमिव कमनीयोऽस्या इति पतिव्रता ॥

कृतसापत्नकाध्यूढाधिविन्ना

क्षीर० — कृतं सापत्नकं सपत्नीभावोऽस्याः । अधि उपर्युह्यते द्वितीयास्या अध्यूढा । अधिविन्दत्यस्यामधिविन्ना ॥

टीका० — कृतसापत्निकात्रयं प्रथमपरिणीतायाम् । कृतमुत्पादितं सापत्न्यं नाम आत्मनो यस्याः सा कृतसापत्निका । धिद्वौरादिङीष् । केऽणो ह्रस्वादि । 'हलस्तद्धितस्य' (६. ४. १५०) इति यलोपः । अधिशब्दः प्रागर्थः । प्रागूढा अध्यूढा । 'विदिर्लाभे'[1] । निष्ठानत्वादधिविन्ना । 'अधिपूर्वो विन्दतिः प्रागूढत्वापवादने वर्तते' इति केचित् । तन्मते कनिष्ठानामधिविदेः कर्तृत्वम् । तथा च रघुः —

"अधिविविदुरमात्यैराहृतास्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः" ।

(स० १८. श्लो० ५३)

---

१. 'द्रु लाभे' ज्ञ. पाठः.

अथ स्वयंवरा।

पतिंवरा च वर्या(च?)

क्षीर०— स्वयं वृणीते स्वयंवरा। 'संज्ञायां भृतृवृजी'—(३. २. ४६) ति खच्। पतिं वृणीते पतिंवरा। खच्। व्रियतेऽनया वर्या। 'अवद्यपण्य—' (३. १. १०१) इति साधुः। वरमर्हति वा॥

टीका०— स्वयंवरात्रयं स्वेच्छया **पत्यन्वेषिण्याम्**। स्वयं वृणीते पतिमिति स्वयंवरा। पचाद्यच्। विश्वम्भरावत् खच्। पतिंवरा। पतिवरणेऽनिरुद्धा वर्या। 'अवद्यपण्य—' (३. १. १०१) इत्यादिना यत्।

अथ **कुलस्त्री कुलपालिका**॥ ७॥

क्षीर०— कुलस्य सम्पादयित्री स्त्री॥

टीका०— कुलस्त्रीद्वयमव्यभिचारेण **कुलरक्षिकायाम्**। कुलं पालयतीति कुलपालिका। कर्मण्यणन्तात् स्वार्थे कः॥

कन्या कुमारी

क्षीर०— कनति कन्या। 'कन दीप्तौ'। अध्न्यादिः। 'कन्यायाः कनीन च' (४. १. ११६) इति लिङ्गाद् ङीष् नास्ति। कुमारयति क्रीडति कुमारी। कुत्सितो मारोऽस्या वा। अनूढत्वात्॥

टीका०— प्रथमे वयसि वर्तमानायां कन्याद्वयम्।

"अष्टवर्षा भवेद् गौरी दशवर्षा तु कन्यका।
सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते॥"

इह त्वभेदोपचारादेकत्वम्। 'कन दीप्तिकान्तिगतिषु'। 'अध्न्यादयश्च' (उ० ४. १२३) इति यत्। 'कन्यायाः कनीन च' (४. १. ११६) इति निपातनान्न

---

१. 'प्यवर्षा गर्ह्यपणितव्यानिरोधेषु इति य' क. ख. च. ज. झ. पाठः।

'वयसि प्रथमे' (४. १. २०) इति ङीप्। कुमार उक्तः। 'वयसि प्रथमे' इति ङीपि कुमारी ॥

गौरी तु नग्निकानागतार्तवा।
स्यान्मध्यमा दृष्टरजाः

क्षीर०—

"अष्टवर्षा भवेद् गौरी दशमे नग्निका भवेद्"

इति स्मार्तो विशेषो नाश्रितः। गौरते(?)गौरी। न लज्जते नग्निका। 'ओलस्जी व्रीलने*'। ऋतौ भवमार्तवम् रजः। ‡'अजाद्यतष्टाप्' (४. १. ४)। 'वयसि प्रथमे' (४. १. २०) ङीप् स्यात् ॥

टीका०— गौरीत्रयमष्टवर्षायाम्। 'ओलस्जी व्रीले*'। निष्ठा। 'श्वीदितो निष्ठायाम्' (७. २. १४) इतीडभावः। 'ओदितश्च' (८. २. ४५) इति नत्वम्। पृषोदरादित्वादादेर्नत्वम्। अल्पार्थे कः। टाबादि। अन्तरनागतमार्तवमस्या इत्यनागतार्तवा। मध्यमाद्वयं प्रथमं दृष्टरजसि। भवार्थे 'मध्यान्मः' (४. ३. ८) मध्यमा। दृष्टरजाः सान्तः ॥

तरुणी युवतिः समे ॥ ८ ॥

क्षीर०— 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानाम्' (वा० ४. १. १५) इति ङीप्। 'यूनस्तिः'। (४. १. ७७) ॥

टीका०— तलुनीद्वयं त्रिंशद्वर्षाणि यावत् प्राप्तयौवनायाम्। तरतेः 'कृवृदारिभ्य उनन्' (उ० ३. ९३) इति वर्तमाने 'त्रो रश्च लो वा' (उ० ३. ५४) इत्युनन्। पक्षे तरुणी च। 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम्' (वा०४. १. १९) इति ङीप्। युवन्शब्दाद् 'यूनस्तिः' (४. १. ७७)। ङीषि युवती च। युवतिशब्दः स्त्रीमात्रेऽपि। तथाच वात्स्यायनः— 'धर्मार्थविद्यानां कालाननुपरोधयन् कामसूत्रं तदङ्गविद्याश्च पुरुषोऽधीयीत; प्राग् यौवनाद् युवतिः' ॥

---

१. 'रुणद्' च. पाठः.

---

‡ अत्र 'स्यान्मध्यमा' इति पाठ्यम्। * 'व्रीडायाम्' इति मुद्रितधातुपाठः।

स्नुषाजनीवध्वः

क्षीर०—स्नौति स्नुषा। जायतेऽस्यां जनी। वधूटी च। ग्रामटिकावत्॥

टीका०—स्नुषात्रयं पुत्रादिभार्यायाम्। 'ष्णु प्रस्रवणे'। 'ष्णु-त्रश्चिकृत्यृषिभ्यः कित्' (उ० ३. ६६) इति सः। स्नुषा। मूर्धन्यान्ता। जनी गौरादिः। भार्यापर्यायोऽपि जनीशब्दः। तथाच हर्षचरिते—'परागपिञ्जरीसंयुज्यमानमधुपजनीजनितमुद' इति॥

चिरण्टी तु सुवासिनी।

क्षीर०—चिरिणोति चिरण्टी। चरति चरण्टीत्येके। 'वयस्यचरमे' (वा० ४. १. २०) इति ङीप्। सुष्ठु वसति सुवासिनीति द्रमिडैः॥

टीका०—चिरण्टीद्वयं परिणीतायामपरिणीतायां वा पितृगेहस्थायां दुहितरि। चिरण्टी। 'वयस्यचरम इति वक्तव्यम्' (वा० ४. १. २०) इति ङीप्। स्वा ज्ञातयः, तत्र वस्तुं शीलमस्या इति स्ववासिनी। ताच्छीलिको णिनिः। सुपूर्वात् सुवासिनीत्यपि सोमनन्दी॥

इच्छावती कामुका स्याद्

क्षीर०—'लषपतपद—' (३. २. १५४) इत्युकञ्॥

टीका०—इच्छावतीद्वयं धनगीतनृत्तादीच्छायुक्तायाम्। कामयत इति कामुकी। 'कमु कान्तौ'। लषपतादिना उकञ्। 'अत उपधायाः' (७. २. ११६) इति वृद्धिः। 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (७. ३. ३४) इति वृद्ध्यभावस्य 'अवमिकम्याचमीनामिति वक्तव्यम्' (वा० ७. ३. ३४) इति निषेधः॥

वृषस्यन्ती तु कामुकी॥ ९॥

क्षीर०—वृषमिच्छत्यात्मनः। क्यच्। 'अश्वक्षीरवृषलवणाना-

---

१. 'धूः। वधूटी', २. 'लाः।' ग. घ. ङ. पाठः. ३. 'का। ल' ङ. छ. झ. पाठः.

मात्मप्रीतौ क्यचि' (७. १. ५१) इत्यत्र 'अश्ववृषयोर्मैथुनेच्छायाम्' (वा० ७. १. ५१) इत्यसु(न्?क्) । 'जानपदकुण्ड—' (४. १. ४२) इति मैथुनेच्छायां ङीषि कामुकी ॥

टीका० — वृषस्यन्तीद्वयं मैथुनेच्छायुक्तायाम् ।

"शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः"

इत्यमरः । बीजधातृवचनो वा वृषशब्दः । तथाच 'वृषो यो गर्भमाधत्त' इति न्यासः । 'बन्धौ वा बीजधातरि बीजघोटके वृष' इति शालिहोत्रेऽपि ।

"वृषो न देयो गर्भिण्या अश्वाया नापि तर्दनम्"

इति कामशास्त्रेऽप्यसकृद्बीजनिषेकसमर्थो वृष उच्यते । अतश्च शुक्रलं बीजधातारं वा पुरुषमिच्छन्ती वृषस्यन्ती । क्यच् । 'अश्ववृषयोर्मैथुनेच्छायाम्' (वा० ७. १. ५१) इत्यसुक् । ततः शतृङीन्नुगागमाः । जानपदादिङीषि कामुकी ॥

कान्तार्थिनी तु या याति सङ्केतं साभिसारिका ।

क्षीर० — यद् भरतः —

"हित्वा लज्जाभये श्लिष्टा मदनेन मदेन या ।
अभिसारयते कान्तं सा भवेदभिसारिका ॥"

ण्वुलन्तोऽयम् । वासकसज्जा विरहोत्काण्ठिता विप्रलब्धा कलहान्तरिता प्रोषितभर्तृका स्वाधीनपतिकेत्येता नायिका अन्वर्थत्वान्न लक्षिताः ॥

टीका० — सङ्केते या प्रियार्थं व्रजति साभिसारिका । तथाच भारतीये —

"हित्वा लज्जां समाकृष्टा मदेन मदनेन वा ।
याभिसारयते कान्तं सा भवेदभिसारिका ॥"

सर्तेर्ण्वुल् ॥

---

१. 'त्रो' क. ख. च. ज. पाठः. २. 'त्यन्या नायिकाः सप्तान्व' क. ग. घ. ङ. पाठः.
३. 'दनेन मदेन च ।' ङ. छ. पाठः.

पुंश्चली धर्षणी बन्धक्यसती कुलटेत्वरी ॥ १० ॥
स्वैरिणी पांसुला च स्याद्

क्षीर० — पुमांसं चलति पुंश्चली । धर्षति धर्षणी । बध्नाति बन्धकी । कुलान्यटति कुलटा । पचाद्यच् । शकन्ध्वादिः । कुत्सितं लटतीत्येके । एति तच्छीला इत्वरी चपला । 'इण्नशिजिसर्तिभ्यः क्वरप्' (३. २. १६३)। स्वेन ईर्ते तच्छीला स्वैरिणी । स्वस्येरेरिणोर्वृद्धिः । पांसुर्मालिन्यहेतुरस्त्यस्याः पांसुला ॥

टीका० — पुंश्चल्यष्टकमसत्याम् । परिणेतृपुंसश्चलतीति पुंश्चली । पचादिषु टिदयं पठ्यते । अतः 'टिड्ढाणञ्' — (४. १. १५) इत्यादिना ङीप् । 'पुमः खय्यम्परे' (८. ३. ६) इति सकारः । 'जिधृषा प्रागल्भ्ये' । *'ग्रहेरणिः' (उ० ५. ६८) इति बाहुलकोऽणिः । ङीष् । धर्षणी । बन्धमनुबन्धं कारयतीति बन्धकी । 'आतोऽनुपसर्गे कः' (३. २. ३) । गौरादिः । सती उक्ता । नञा असती । कुलान्यटतीति कुलटा । पचादिः । शकन्ध्वादिः । स्वेच्छाप्रसरणशीलत्वाद् इत्वरी । 'इण् गतौ' । 'इण्नशिजिसर्तिभ्यः क्वरप्' (३. २. १६३) स्वेनेरितुं शीलमस्या इति स्वैरिणी । 'स्वादीरेरिणोर्वृद्धिर्वक्तव्या' (वा० ६. १. ८९) इति वृद्धिः । 'पंसि नाशे' । 'अर्जिदृशिकम्यमिपंसिवाधामृजिपशितॄडुबुग्दीर्घहकाराश्च' (उ० १. २७) इति कुप्रत्ययः । षण्णां धातूनां यथासङ्ख्यमृज्यादयः षट् भवन्ति । ततश्च पंसेर्दीर्घः । पांसुः, पापम् । दन्त्यसः । तथाच

"कणिकाभिरपां सुखरा बृन्दावनमारुताश्च ववुरपांसुखराः"

इति बृन्दावनयमकम् । ततः सिध्मादिलच् । पांसुला ।

"तालव्या अपि दन्त्याः स्युः शम्बशूकरपांशवः"

इति शब्दभेदः ॥

---

१. 'री । इ' ग. घ. ङ. पाठः. २. 'तष्टित्त्वान्ङीप्' ङ. छ. पाठः. ३. 'चादि' ज. पाठः. ४. 'दिङी' च. पाठः. ५. 'णिः धर्षणिः ङी' क. ख. झ. पाठः. ६. 'श' क. ख. च. झ. पाठः.

---

* 'ग्रहेरनिः', § 'धुग' इति मुद्रितोणादिपाठः ।

अशिश्वी शिशुना विना ।

क्षीर० — 'सख्यशिश्वीति भाषायाम्' (४. १. ६२) इति साधुः ॥

टीका० — अनपत्यायामशिश्वी । 'सख्यशिश्वीति भाषायाम्' (४. १. ६२) इति ङीष् ॥

अवीरा निष्पतिसुता

क्षीर० — न विद्येते वीरौ पतिपुत्रौ यस्याः सा अवीरा ॥

टीका० — पतिपुत्ररहितायामवीरा । 'वीरा पतिपुत्रवती' इति नाममाला । नञा अवीरा । निष्पतिसुता नामेति केचित् ॥

विश्वस्ताविधवे समे ॥ ११ ॥

क्षीर० — विश्वसिति स्म विश्वस्ता । विगतो धवो भर्तास्या विधवा ॥

टीका० — विश्वस्ताद्वयं विधवायाम् । 'श्वस प्राणने' । 'निष्ठा' (३. २. १०२) इति कर्तरि क्तः । विगतभर्तृका विधवा ॥

आलिः सखी वयस्या च

क्षीर० — अलत्यालिः । यच्छाश्वतः —

"आलिः सखी सेतुरालिरालिरावलिरिष्यते" ।

समानं ख्याति सखी । वयसा तुल्या वयस्या । 'नौवयोधर्म—' (४. ४. ९१) इति यत् । सध्रीची च ॥

टीका० — आलित्रयं सख्याम् । 'अल भूषणादौ' । आङ्पूर्वाद् 'इन्' (उ० ४. ११९) इति इन् । 'निवार्यतामालि ! किमप्यसौ वटुः' (कु० स० ५. श्लो० ८३) इति कालिदासोऽपि । अशिश्वीवद् ङीषि सखी । वयसा तुल्या वयस्या । 'नौवयोधर्म—' (४. ४. ९१) इत्यादिना यत ॥

पतिवत्नी सभर्तृका।

क्षीर० — 'अन्तर्वत्पतिवतोर्नुक्' (४. १. ३२)। ङीप् च ॥

टीका० — पतिवतीद्वयं जीवद्भर्तृकायाम्। पतियोगान्मतुप्। 'अन्तर्वत्पतिवतोर्नुक्' (४. १. ३२) इति नुक्। नान्तत्वाद् ङीप्। पतिवती। सभर्तृकेति। 'शेषाद् विभाषा' (५. ४. १५४) इति कप्। पतिभर्तृशब्दाभ्यामग्निसाक्षिकपाणिग्रहणकर्तोच्यते, न तु प्रभुमात्रम् ॥

वृद्धा पलिक्नी

क्षीर० — असितपलितयोः 'छन्दसि क्रमेके', 'भाषायामपीष्यते' (वा० ४. १. ३९) इति ङीप् ॥

टीका० — वृद्धाद्वयं वृद्धायाम्। पलिक्नीति। पलितशब्दाद् असितपलितयोः 'छन्दसि क्रमेके', 'भाषायामपीष्यते' (वा० ४. १. ३९) इति तकारस्य क्नादेशः, ङीप् च ॥

प्राज्ञी तु प्रज्ञा

क्षीर० — प्रजानातीति प्रज्ञा। 'इगुपधज्ञा —' (३. १. १३५) इति कः। प्रज्ञादिभ्यः स्वार्थे वाण् ॥

टीका० — प्राज्ञीद्वयं, या किमपि सप्रकर्षं जानाति, तत्र। प्रज्ञादित्वात् स्वार्थेऽण्। प्राज्ञी। प्रज्ञेति। 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) ॥

प्राज्ञा तु धीमती ॥ १२ ॥

क्षीर० — प्रज्ञास्त्यस्याः प्राज्ञा। *'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१) ॥

टीका० — प्रज्ञाद्वयमतिशयितबुद्धियुक्तायाम्। *'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१)। टाप्। प्राज्ञा ॥

---

* 'प्रज्ञाश्रद्धार्चाभ्यो णः' इति मुद्रिताष्टाध्यायीपाठः।

शूद्री शूद्रस्य भार्या स्यात्

क्षीर०—'पुंयोगादाख्यायाम्' (४. १. ४८) ङीष् ॥

टीका०—भिन्नजातिरपि या शूद्रभार्या, सा शूद्री। 'पुंयोगादाख्यायाम्' (४. १. ४८) इति ङीष् ॥

शूद्रा तज्जातिरङ्गना।

क्षीर०—शूद्रजातीया स्त्री शूद्रा। 'शूद्रा चामहत्पूर्वा जातिः' (वा० ४. १. ४) इत्यजादित्वात् टाप् ॥

टीका०—या पुनः शूद्रस्य सुता द्विजातेरपि भार्या, सा शूद्रा। 'शूद्रा चामहत्पूर्वा जातिः' (वा० ४. १. ४) इति जातिविवक्षायां टाप् ॥

आभीरी तु महाशूद्री जातिपुंयोगयोः समा ॥ १३ ॥

क्षीर०—आभीरजातीया, महाशूद्रस्य स्त्री च, जातिलक्षणे पुंयोगे च ङीष्। (शूद्रा तज्जाति?) वैश्यभेद एवाभीरो गवाद्युपजीवी। अन्यत्र महती चासौ शूद्रेति महाशूद्री ॥

टीका०—आभीरी गवाम्बूपजीविनी वैश्यजातिप्रभेदः। तत्र आभीरीद्वयम्। जातौ पुंयोगे च समा समानरूपेत्यर्थः। पुंयोगविवक्षायां, 'पुंयोगादाख्यायाम्' (४. १. ४८) इति ङीष्। जातिविवक्षायां, 'जातेरस्त्रीविषयादयोपधात्' (४. १. ६३) इति ङीष् ॥

आर्याणी स्वयमार्या स्यात्

क्षीर०—स्वयं पुंयोगेन विना। †'आर्यक्षत्रियाभ्यां स्वार्थे वा'

---

१. 'तिरङ्गना वै' ख. पाठः. २. 'विषु। अ' क. ग. घ. ङ. पाठः.

---

† 'अर्य' इति मुद्रितवार्तिकपाठः।

(वा० ४. १. ४९) इति ङीषानुकौ। पक्षे टाप्। योपधत्वाज्जातिलक्षणो ङीप् नास्ति ॥

टीका० — या स्वयमार्या वैश्यजातिर्यस्यकस्यचिद् भार्या, तत्रार्याणी-द्वयम्। †'आर्यक्षत्रियाभ्यां वा' (वा०४. १. ४९) इति ङीषानुकौ। आर्याणी। पक्षे टाप्। योपधत्वाद् 'जातेरस्त्री—' (४. १. ६३) इत्यादिना ङीष् न भवति। स्वयमिति जातिद्वारेण, न पुंयोगेन। अन्यथा शूद्रापि वैश्यभार्या आर्याणी स्यात् ॥

क्षत्रिया क्षत्रियाण्यपि।

क्षीर०— स्वयमित्येव ॥

टीका० — या स्वयं क्षत्रियजातिर्यस्यकस्यचिद् भार्या, तत्र क्षत्रि-याद्वयम्। पूर्ववद् ङीषादि ॥

उपाध्यायाप्युपाध्यायी

क्षीर०— उपेत्याधीयतेऽस्याः। अपादाने स्त्रियामुपसङ्ख्यानाद् घञ् वा च ङीप् ॥

टीका० — उपाध्यायीद्वयं स्वतो विद्योपदेशिन्याम्। 'इङश्च' (३. ३. २१) इत्यत्र 'अपादाने स्त्रियामुपसङ्ख्यानम्' इति घञ्। 'तदन्ताच्च वा ङीप्' (वा० ३. ३. २१) इति पक्षे ङीप् च ॥

स्यादाचार्यापि च स्वतः ॥ १४ ॥

क्षीर०— स्वयमत्र व्याख्याकृदाचार्या। (स्वेत? स्वतो) जाता-वित्यर्थः। योपधत्वाद् जातेः ङीप् नास्ति ॥

टीका० — स्वतो या मन्त्रव्याख्याकृत्, सा आचार्या। 'चरेराङि चागुरौ' (वा०३. १. १००) इति ण्यत्। स्वत इति क्रियाद्वारेण, न पुंयोगेन ॥

---

१. 'म', २. 'अ' च. पाठः. ३. 'यादिद्व' ङ. छ. पाठः. ४. 'स्वत इतरेयं जा' ख. पाठः.

---

† 'अर्यक्षत्रियाभ्यां स्वार्थे वा' इति मुद्रितवार्त्तिकपाठः।

आचार्यानी तु पुंयोगे

क्षीर०— 'इन्द्रवरुण —' (४. १. ४२) इति ङीषानुकौ। अत्र, 'आचार्यादणत्वं च इति वक्तव्यम्' ॥

टीका०— आचार्यस्य भार्या मूर्खाप्याचार्यानी। 'आचार्यादणत्वं चेति वक्तव्यम्' (वा० ४. १. ४९) इति ङीषानुकौ णत्वाभावश्च। एतत्तु पुंयोगेन, न क्रियाद्वारेण ॥

स्यादार्यी क्षत्रियी तथा।
उपाध्यायान्युपाध्यायी

क्षीर०— पुंयोग इत्येव। †'उपाध्यायमातुलाभ्यां वा' (वा०४. १. ४९) इति पक्षे ङीषानुकौ ॥

टीका०— आर्यस्य वैश्यस्य भार्या शूद्रापि आर्यी। क्षत्रियस्य भार्या वैश्यापि क्षत्रियी। उपाध्यायानीद्वयं मूर्खायामप्युपाध्यायभार्यायाम्। 'मातुलोपाध्यायाभ्यां वा' (वा० ४. १. ४९) इति ङीषानुकौ। पक्षे 'पुंयोगादाख्यायाम्' (४. १. ४८) इति ङीष् ॥

पोटा स्त्रीपुंसलक्षणा ॥ १५ ॥

क्षीर०— 'पुट संश्लेषणे'। उभयव्यञ्जना पोटा नपुंसकाख्या।

टीका०— पुंसः स्त्रियाश्च चिह्नं वहति स्त्री पोटा। 'पोटायुवतिस्तोक —' (२. १. ६५) इत्यत्र साधुः ॥

वीरपत्नी वीरभार्या

क्षीर०— 'नित्यं सपत्न्यादिषु' (४. १. ३५) इति नान्तत्वाद् 'ऋन्नेभ्यो ङीप्' (४. १. ५) इति ङीप् ॥

१, २. 'अ' च. पाठः.

---

† 'मातुलोपाध्याययोरानुग्' इति मुद्रितवार्तिकपाठः।

टीका० — वीरपत्नीद्वयं वीरभार्यायाम्। वीरः पतिरस्या इति वीरपत्नी। 'नित्यं सपत्न्यादिषु' (४. १. ३५) इति नुक्। 'ऋन्नेभ्यो ङीप्' (४. १. ५) ॥

वीरमाता तु वीरसूः।

क्षीर०— 'सत्सूद्विष—' (३. २. ६१) इति क्विप्। 'वीरप्रसूर्जगति भार्गव! रेणुकैव' (अङ्क० २. श्लो० २९) इति बालरामायणे। वीरस्य प्रसूरितित्यर्थः ॥

टीका०— वीरमातृद्वयं वीरजनन्याम्। वीरसूरिति। 'सत्सूद्विष—' (३. २. ६१) इत्यादिना क्विप् ॥

जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥

क्षीर०— जनयितुं प्रवृत्ता प्रजाता। प्रसूतिका। 'सूतकापुत्रकाबृन्दारकाणाम्—' (वा० ७. ३. ४५) इति पक्षे इत्त्वम्। आख्याग्रहणात् पुंयोगेऽपि ङीप् नास्ति ॥

टीका०— जातापत्याद्यतुष्कं प्रसूतायाम्। प्रपूर्वो जनिर्गर्भविमोचने। 'गत्यर्थाकर्मक—' (३. ४. ७२) इत्यादिना कर्तरि क्तः। प्रजाता। प्रसूतैव कना प्रसूतिका। 'वा सूतकापुत्रकाबृन्दारकाणामुपसङ्ख्यानम्' (वा० ७. ३. ४५) इति इत्वविकल्पः। तेन प्रसूता च ॥

स्त्री नग्निका कोट्टवी स्याद्

क्षीर०— 'विवस्त्रा योषिन्मुक्तकेशी' इत्यागमः। कोट्टेन लज्जावेशात् कुटिलत्वेन वेत्ति याति कोट्टवी ॥

टीका०— नग्नस्त्रीसामान्ये कोट्टवी। गौरादिः ॥

दूती सञ्चारिका समे।

क्षीर०— दूयन्तेऽस्यां मौर्ख्यधिया दूती। सञ्चारयति सन्देशं प्रापयति सञ्चारिका ॥

टीका०— दूतीद्वयं दूत्याम्। 'दुतनिभ्यां दीर्घश्च' (उ०३. ९०) इति क्तः। दूती। सञ्चारयति यथाभिलषितमिति सञ्चारिका। ण्वुल् ॥

---

१. 'शत्वात्' ख. ग. घ. ङ. पाठः. २. 'नाभित्या' क. पाठः.

कात्यायन्यर्धवृद्धा या काषायवसनाथवा ॥ १७ ॥

क्षीर०— कात्यस्यापत्यमिव कात्यायनी । ऋषिपत्न्याकारत्वात् । त्रिलक्षणेयम् । कषायेण रक्तं वस्त्रं शुद्धत्वादस्याः काषायवसना अथवा । पुंस्काण्डः(?) ॥

टीका०— या अर्धजरती काषायवसना विधवा चेति विशेषणत्रयापता सा कात्यायनी ।

"कात्यायनी भवेद् गौर्या भिक्षुकाधवयोषिति"

इत्यजयः ॥

सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका ।

क्षीर०— शिल्पं प्रसाधनादि । तेन या परवेश्मान्युपजीवति । स्ववशा स्वायत्ता । एकायत्ता भवतीत्यर्थः । सहच(रं?र)प्रेरणं धरते सैरन्ध्री ।

"चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी ।
प्रसाधनोपचारज्ञा सैरन्ध्री"

इति कात्यः ॥

टीका०— या परगृहस्था स्वतन्त्रा प्रसाधनतर्पणादिशिल्पिका चेति विशेषणोपेता, सा सैरन्ध्री ।

"सैरन्ध्री परवेश्मस्थशिल्पकृत्स्ववशस्त्रियाम्"

इति दन्त्यादौ रमसः ॥

असिक्नी स्यादवृद्धा या प्रैष्यान्तःपुरचारिणी ॥ १८ ॥

क्षीर०— असितपलितयोः क्नः ङीब् वा । प्रस्यैषैष्ययोर्वृद्धिः । द्वे वाक्ये इत्येके । तन्न । यन्नुनिः—

"असिक्नी स्यादवृद्धा सा प्रेष्या यान्तःपुरोचिता" ॥

टीका०— या अवृद्धा, महादेवीभिश्च कार्यार्थं प्रेष्यते, अन्तःपुरे च स्थितेत्युपाधित्रयोपेता, सा असिक्नी । पलिक्नीवत् ॥

१, २. 'र्ल्या' क. ख. छ. पाठः. ३. 'प्रेण' क. ग. घ. ङ. पाठः. ४. 'द', ५. 'भजा चे' ज. पाठः. ६. 'क्ने च ङी' ख. पाठः.

वारस्त्री गणिका वेश्या रूपाजीवी

क्षीर०—वारे राजदेवादिसेवाक्रमे स्त्री वारस्त्री। गणः पेटको-ऽस्त्यस्याः, गणयतीश्वरानीश्वरौ वा गणिका। वेशे वेश्यावाटे भवा वेश्या। पण्यस्त्री पणस्त्री च ॥

टीका०—वारस्त्रीचतुष्कं वेश्यायाम्। वारो गणिकाध्यक्षः, तत्प्रतिबद्धा स्त्री वारस्त्री। 'गण सङ्ख्याने'। ण्वुल्। उपधोपधत्वान्न वृद्धिः। वेशो नैपथ्यम्। तेन शोभत इति वेश्या तालव्यशा, मूर्धन्यषा च। 'कर्मवेषाद् यत्' (५. १. १००) इति यत्। रूपमेवाजीव्यमस्या इति रूपाजीवी ॥

अथ सा जनैः।

सत्कृता वारमुख्या स्यात्

क्षीर०—वारे सेवाक्रमे मुख्या ॥

टीका०—वेश्यागणातिरेकात् सा जनैः सत्कृता वारमुख्या।

"स्त्रीवारः स्त्रीगणो वेश्यावारो वेश्यागणः स्मृतः।
वेश्या वारस्य मुख्या स्याद् वारमुख्येति शब्दिता ॥"

इति निगमाभिधानम् ॥

कुट्टनी शम्भली समे ॥ १९ ॥

क्षीर०—कुट्टयति कुट्टनी। शं श्रेयो भालयति, शम्भं श्रेयोयुक्तं लाति वा शम्भली। चुन्दी देश्याम् ॥

टीका०—कुट्टनीद्वयं कुट्टन्याम्। कुट्टयति वाक्प्रपञ्चेनेति कुट्टनी। 'कुट्टच्छेदनकुत्सनयोः'। ल्युट्। 'भल भल्ल परिभाषणे'। सम्भलनात् सम्भली। पचादिः। शं कल्याणं भलत इति तालव्यादिरित्यजयः ॥

विप्रश्निका त्वीक्षणिका दैवज्ञा

---

१. 'प' क. ग. घ. ङ. पाठः, २. 'शा' क. ख. च. ज्ञ. पाठः. ३. 'व' ख. पाठः.

क्षीर० — विप्रश्नो दैवप्रच्छनम्, शुभाशुभेक्षणं वास्त्यस्याः । दैवं शुभाशुभं कर्म जानाति दैवज्ञा । अन्तःपुरस्यापुंस्प्रवेश्यत्वात् ॥

टीका० — विप्रश्निकात्रयं **शुभाशुभनिरूपिकायां शबरिकायाम्** । विविधः प्रश्नो विप्रश्नः । ईक्षणं शुभाशुभदर्शनम् । उभयत्रैव मत्वर्थे ठन् । दैवं शुभाशुभं जानातीति दैवज्ञा । 'आतोऽनुपसर्गे कः' (३. २. ३) ॥

अथ रजस्वला ।

स्त्रीधर्मिण्यपि चात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥
ऋतुमत्यप्युदक्यापि

क्षीर० — रजोऽस्त्यस्या रजस्वला । 'रजःकृष्यासुति—' (५. २. ११२) इति वलच् । स्त्रीधर्मो रजोऽस्त्यस्याः स्त्रीधर्मिणी । अव्यपत्यमात्रेयी । मलिनाद् रजसि ङीष् । मलादिनन्ताद् वा ङीष् । ऋतुः रजोऽस्त्यस्याः ऋतुमती । उदकात् संज्ञायां यति उदक्या । 'उदकमर्हति पुष्पिता' इति माला । 'पुष्पवत्यवीः' इति प्राच्याः पेटुः । अव्यते रक्षोभ्योऽवीः । 'अवितृस्तृतन्त्रिभ्य ईः' (उ० ३. १५९) 'अविरात्रेयी' इत्येके । यत् कात्यः — 'अविं स्त्रीधर्मिणीं विद्यात्' ॥

टीका० — रजस्वलाष्टकं **रजस्वलायाम्** । 'रजःकृष्यासुतिपरिषदो वलच्' (५. २. ११२) । रजस्वला । स्त्रीधर्मः ऋतुः, तद्योगादिनिः । स्त्रीधर्मिणी । अवीरिति । 'अवितृस्तृतन्त्रिभ्य ईः (उ० ३. १५९) । शुभ्रादित्वाद् ढक् । आत्रेयी । दिगादिषु 'उदकात् संज्ञायाम्' (ग० ४. ३. ५४) इति पाठाद् यत् । उदक्या ॥

स्याद् रजः पुष्पमार्तवम् ।

क्षीर० — पुष्पं सुतफले हेतुत्वात् । रजः । ऋतुरेवार्तवम् । ऋतुः स्त्रीरजः । ऋतौ गर्भग्रहणकाले भवं वा । ऋतुः प्राप्तोऽस्य वा ॥

टीका० — रजस्त्रयं **स्त्रीरजसि** । ऋतुरेवार्तवम् । प्रज्ञाद्यण् ॥

---

१. 'व्युक्तरवेरन्योऽविः ।' क. ग. घ. ङ. पाठः. २. 'र्षदो' क. ख. ङ. छ. पाठः.

श्रद्धालुर्दोहदवती

क्षीर० — 'निद्रातन्द्राश्रद्धाभ्य आलुच्' (३. २. १५८) । दोहदं गर्भिण्यभिलाषोऽस्त्यस्या दोहदवती ॥

टीका० — श्रद्धालुद्वयं गर्भवशादन्नपानाद्यभिलाषिण्याम् । श्रद्धा स्पृहोच्यते । 'स्पृहिगृहि —' (३. २. १५८) इत्यादिना साच्छीलिक आलुच् ॥

निष्कला विगतार्तवा ॥ २१ ॥

क्षीर० — निष्क्रान्ता कलाभ्योऽशुद्धिभ्यो निष्कला । क्षीणर्तुः ॥

टीका० — निष्कलाद्वयं हीनरजस्कायाम् । कलो रजः । 'गौरादिङीषि निष्कली' इति धातुप्रदीपादिः । 'विकली चास्या नाम' इति गोवर्धनः ॥

आपन्नसत्त्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी ।

क्षीर० — आपन्नं गृहीतं सत्त्वं गर्भोऽनया आपन्नसत्त्वा । गुरुर्गर्भोऽस्त्यस्या गुर्विणी । व्रीह्यादित्वादिनिः । गुर्वीति च भागुरिः । अन्तर्विद्यतेऽस्या अन्तर्वत्नी । 'अन्तर्वत्पतिवतोर्नुक्' (४. १. ३२) ॥

टीका० — आपन्नसत्त्वाचतुष्कं गर्भवत्याम् । आपन्ना सत्त्वं गर्भम् आपन्नसत्त्वा । 'प्राप्तापन्ने च द्वितीयया' (२. २. ४) इति समासः । गुरुः इनोऽस्या इति गुर्विणी । चान्द्राणां पिप्पल्यादिः । 'पूर्वपदात् —' (८. ४. ३) इत्यादिना णत्वं केचिदाहुः । आपन्नसत्त्वा गुर्वी स्यादिति पाठः । पुरुषोत्तमदेवेन† गुर्विणीत्यस्य दुर्घटेऽसाधुत्वमुक्तम् । तन्त्रान्तरेषु च गुर्वीत्येव पाठो दृश्यते । पतिवत्नीवदन्तर्वत्नी । मतुव् निपातनादिति तु विशेषः ॥

गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥

---

१. 'नु' च. पाठः.

---

† दुर्घटवृत्तिकारस्तु शरणदेवः ।

क्षीर०—गणिकानां समूहो गाणिक्यम्। 'गणिकाया†श्च वक्तव्यम्' (वा० ४. २. ४०) इति यञ्। गर्भिणीनां समूहो गार्भिणम्। 'इनण्यनपत्ये' (६. ४. १६४) इति प्रकृतिभावः। 'नस्तद्धिते' (६. ४. १४४) इति टिलोपः प्राप्तः। युवतीनां समूहो यौवतम्। 'युवत्या अ(णि?)पुंवद्' इति गणपाठाद् 'भ(स्य टेस्त?स्याढे त)द्धिते' (वा० ६. ३. ३५) इति पुंवद्भावो नास्ति॥

टीका०—गणिकागर्भिणीयुवतीनां समूहो गाणिक्यादिः। 'गणिकाया†श्च यञ् वक्तव्यः' (वा० ४. २. ४०) इति यञ्। गाणिक्यम्। गार्भिणमिति। 'भिक्षादिभ्योऽण्' (४. २. ३२)। 'भस्याढे तद्धिते' (वा० ६. ३. ३५) इति पुंवद्भावो वक्तव्यः। 'सिद्धश्च प्रत्ययविधौ' इति वचनात् पुंवद्भावे ई-कारानिवृत्तिः। 'इनण्यनपत्ये' (६. ४. १६४) इति प्रकृतिभावाद् 'नस्तद्धिते' (६. ४. १४४) इति न टिलोपः। यौवतमिति। युवतिशब्दस्य प्रत्ययान्तत्वादा-द्युदात्ते कृते णित्त्वात् शेषमनुदात्तमिति 'अनुदात्तादेरञ्' (४. २. ४४) इत्यञ्-बाधनार्थं भिक्षादिषु युवतिपाठादण्। भिक्षादिषु युवतिपाठसामर्थ्यादेवात्र पुंवद्भावो न भवतीति जयादित्यः। तेन यौवतमेव भवति। भाष्ये तु भिक्षादिपाठोऽस्य प्रत्याख्यातः। तदा च यौवनमिति पाठः। तथा च प्रयोगः—

"स्वरूपमिति नेपथ्यं कलाकुशलयौवनम् (?)।
यस्य पुण्यकृतः प्रेष्यं[1] सफलं तस्य यौवनम्॥"

इति॥

पुनर्भूर्दिधिषूरूढा द्विः

क्षीर०—पुनर्भवति पुनर्भूः। देधेष्टि वाच्या भवति दिधिषूः। द्वौ वारौ द्विः ऊढा संस्कृता। यदाह—

"अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः"

मनुस्त्वन्यथाह—

---

१. 'प्रै' इ. च. छ. पाठः.

---

† 'या यञ्' इति मुद्रितवार्त्तिकपाठः।

"ज्येष्ठायां यद्यनूढायां कन्यायामुद्वहेऽनुजा ।
सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता ॥"

टीका० — पुनर्भूद्वयं वारद्वयं विवाहितायाम् । पुनः परिणेतारं भूता प्राप्तेति पुनर्भूः । 'भू प्राप्तावात्मनेपदी' इति क्विप् । 'अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः (उ० १. ९६) इत्यनेन दिधिषूर्वार्ते स्यतेः ऊप्रत्ययेषत्वाभ्यां दिधिषूर्निपातिता ॥

तस्या दिधिषुः पतिः ।

क्षीर० — तस्याः पुनर्भ्वाः पतिर्दिधिषुः । किञ्च,

"पुनर्भूपतिरुक्तश्च पुनर्भूर्दिधिषूस्तथा"

इत्येषोऽप्यृदन्तः । दिधि(षु ? षू)मिच्छत्यात्मन इति क्यच् । क्विप् ॥

टीका० — दिधिष्वाः स्वामी दिधिषुः । षूषोदरादित्वाद्ध्रस्वत्वम् ॥

स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥ २३ ॥

क्षीर० — अग्रे अनन्यभार्यत्वात् प्रधाना दिधिषूर्यस्य सोऽग्रेदिधिषूः । समासान्तविधिरनित्यः ॥

टीका० — पुनर्भूरेव यस्य कुटुम्बिनी पुत्रपौत्रप्रतिष्ठिता सः अग्रेदिधिषुः षूषोदरादिः । द्विजस्यैव पुनर्विवाहोपदेशात् । तेन द्विज इत्युक्तम् । 'परपूर्वा स्त्री दिधिषूरग्रेदिधिषु (स्न ? स्तु त)त्पुरन्ध्रीकः' इति नाममालायां सामान्यनिर्देशः ॥

कानीनः कन्यकाजातः सुतः

क्षीर० — 'कन्यायाः कनीन च' (४. १. ११६) अण् च कानीनः ॥

टीका० — कानीनोऽनूढायां जातपुत्रे । 'कन्यायाः कनीन च' (४. १. ११६) इत्यण् कनीनादेशश्च ॥

अथ सुभगासुतः ।

---

१. 'न सूतेस्य' ख. पाठः. २. 'ये षत्वाभ्यां' ङ. छ. पाठः.

सौभागिनेयः स्यात्

क्षीर० — 'कल्याण्यादीनामिनङ्' (४. १. १२६) इति ढगिनङौ। **सौभागिनेयः**। एवं दौर्भागिनेयाद्युन्नेयम्। 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' (७. ३. १९) इत्युभयपदवृद्धिः। उत्तरत्र 'अनुशतिकादीनां च' (७. ३. २०) इति ॥

टीका० — सुभगासुतद्वयं **सुभगासुते**। सौभागिनेय इति। 'कल्याण्यादीनामिनङ्' (४. १. १२६) इति ढक् इनङ् चान्तादेशः। 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च (७. ३. १९) इत्युभयपदवृद्धिः ॥

पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥

क्षीर० — सुत इत्येव। परस्त्री कल्याण्यादि ॥

टीका० — कस्यचित् **परस्त्रिया जातः** पारस्त्रैणेयः। पूर्ववद् ढक् इनङ् च। अनुशतिकादिपाठादुभयपदवृद्धिः ॥

पैतृष्वसेयः स्यात् पैतृष्वस्रीयश्च पितृष्वसुः।
सुतः

क्षीर० — 'पितृष्वसुश्छण्' (४. १. १३२), 'ढकि लोपः' (४. १. १३३) इति ज्ञापकाद् ढक् अन्तलोपश्च ॥

टीका० — **पितृष्वसुः सुते** पैतृष्वसेयद्वयम्। 'ढकि लोपः' (४. १. १३३) इत्यनेन ऋकारलोपः। 'ढकि लोपः' (४. १. १३३) इत्यस्मादेव ज्ञापकाद् ढक्प्रत्ययश्च। पैतृष्वस्रीय इति। 'पितृष्वसुश्छण्' (४. १. १३२) इति छण्। 'मातृपितृभ्यां स्वसा' (८. ३. ८४) इति प्रथमसकारे षत्वम् ॥

मातृष्वसुश्चैवं

क्षीर० — सुत इत्येव। 'मातृष्वसुश्च' (४. १. १३४) इति छणि **मातृष्वस्रीयः**। 'ढकि लोपः' (४. १. १३३) इति **मातृष्वसेयः** ॥

---

१. 'द्विः। अपत्यार्थे उ' क. ग. घ. ङ. पाठः. २ 'श्च इति छण्' ख. ज. झ. पाठः.

टीका० — मातृष्वसुश्चैवमिति। पूर्ववद्ढगादि। 'मातृष्वसुश्च' (४. १. १३४) इति छणपि। मातृष्वसेयो मातृष्वस्रीयश्चेति मातृष्वसुः सुते॥

वैमात्रेयो विमातृजः॥ २५॥

क्षीर० — विरुद्धाया मातुरपत्यं वैमात्रेयः। असोदर्यो भ्राता। मातुः शुभ्रादित्वाड्ढक्। 'स्त्रीभ्यो ढक्' (४. १. १२०) इत्यत्र स्त्रीप्रत्ययग्रहणात्। द्वैमातुरस्तूभयमातृकः॥

टीका० — वैमात्रेयद्वयं मातुः सपत्नीसुते। विरुद्धा विभिन्ना माता विमाता, तस्या अपत्यं 'शुभ्रादिभ्यश्च' (४. १. १२३) इति ढक्॥

अथ बान्धकिनेयः स्याद् बन्धुलश्चासतीसुतः।
कौलटेयः कौलटेरः

क्षीर० — बन्धक्या अपत्यं बान्धकिनेयः। 'कल्याण्यादीनामिनङ्' (४. १. १२६) इति ढकि इनङादेशः। बन्धून् लाति बन्धुलः। कुलटाया अपत्यम्। 'स्त्रीभ्यो ढक्' (४. १. १२०) 'क्षुद्रा(याः) भ्यो वा' (४. १. १३३) इति ढक् च॥

टीका० — बान्धकिनेयपञ्चकमसतीसुते। कल्याण्यादित्वाड्ढगिनङौ। बान्धकिनेयः। बन्धून् लातीति बन्धुलः। कौलटेय इति। 'स्त्रीभ्यो ढक्' (४. १. १२०)। कौलटेर इति। 'कुलटाया वा' (४. १. १२७) इत्यस्य कुलाटनयोगात् प्रयुक्तः कुलटाशब्दोऽवकाशः। 'क्षुद्राभ्यो वा' (४. १. १३१) इत्यस्य दासीप्रभृतयः शीलरहिता अङ्गहीनाश्च। अतः कुलाटनात् प्रयुक्तकुलटाशब्दात् असतीवचनस्य कुलटाशब्दस्य परत्वादस्मात् 'क्षुद्राभ्यो वा' (४. १. १३१) इति ढक्। तेन मुक्ते 'स्त्रीभ्यो ढक्' (४. १. १२०) इति ढक्। तेन कौलटेरकौलटेयौ। क्षुद्रा अङ्गहीनाः शीलहीनाश्च। अङ्गहीनाभ्यो यथा, काणेरकाणेयौ। शीलहीनाभ्यो यथा, दासेरदासेयौ॥

भिक्षुकी तु सती यदि॥ २६॥

---

१. 'न्। स्यान् सङ्ख्यावशतो द्वै' क. ग. घ. ङ. पाठः. २. 'द्वा भि' ङ. छ. पाठः.

तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः ।

क्षीर० — सा हि यदि भिक्षार्थिनी कुलान्यटति । 'कुलटाया वा' (४. १. १२७) इति ढगिनङौ । पक्षे ढगेव क्षुद्रात्वाभावात् । अङ्गशील-हीना हि क्षुद्राः ॥

टीका० — सती या भिक्षार्थिनी कुलान्यटति, न तु जारार्थं, सापि कुलटा । तत्सुते कौलटिनेयद्वयम् । 'कुलटाया वा' (४. १. १२७) इति ढकि बान्धकिनेयवत् कौलटिनेयः ॥

आत्मजस्तनयः सूनुः सुतः पुत्रः

क्षीर०— तनोति कुलं तनयः । सूयते सूनुः । सुवति सुतः । पुतो नरकात् त्रायते पुत्रः । पुनाति वा । 'पुवो ह्रस्वश्च' (उ० ४. १६६) इति क्रन् । दारकदायादौ च ॥

टीका० — आत्मजपञ्चकं पुत्रे । आत्मनो जायते पुत्र इत्यात्मजः । 'अन्येष्वपि दृश्यते'(३. २. १०१) इति डः । तनोति मुदमिति तनयः । 'वलि-मलितनिभ्यः कयन्' (उ० ४. १०१) । 'सुवः कित्' (उ० ३. ३९) इति नुः । सूनुः । 'षु प्रसवैश्वर्ययोः' । कर्मणि क्तः । सुतः । 'पुवो ह्रस्वश्च' (उ० ४. १६६) इति क्रः । पुत्रः । पुन्नाम्नो नरकाद् घोरात् त्रायत इति वा ॥

स्त्रियां त्वमी ॥ २७ ॥

आहुर्दुहितरं सर्वे

क्षीर० — आत्मजादयः स्त्रियां वृत्ताः सर्वे दुहितृवाचकाः । गौरादि । पुत्री । दोग्धि पितरौ दुहिता ॥

---

१. 'क् । वा' क. ख. ज. झ. पाठः. २. 'त्मेव जा' क. ख., 'त्मैव जा' च., 'त्मा वै जा' ज. पाठः.

टीका० — आत्मजाद्याः पञ्च स्त्रीलिङ्गे वर्तमाना दुहितरमाहुः । तत्रात्मजसुततनयानाम् अजादिटाप् । सूनोर्लक्षणाभावान्न स्त्रीविधिः । पुत्रीति 'गौरादिः' केचिच्छार्ङ्गरवादिषु पुत्रं पठन्ति । तदा ङीन् । अन्यस्त्वाह 'पुत्राद् वे'ति पुत्रा पुत्री चेति ॥

अपत्यं तोकं तयोः समे ।

क्षीर० — **पुत्रे दुहितरि च सामान्ये वर्तेते । अपतनमपत् । अपति साधु अपत्यम् । तूयते तोकम् । सन्ततिः सन्तानः प्रजा च ॥**

टीका० — तयोरिति । दुहितरि पुत्रे चापत्यद्वयम् । समे क्लीबे । नरके अपतनादपत्यम् । अध्न्यादियत् । 'तु' इति सौत्राद् बाहुलकः कन् । तोकम् ॥

स्वजाते त्वौरसोरस्यौ

क्षीर० — **उरसा निर्मिते 'उरसोऽण् च'** (४.४.९४) **इत्यण्यतौ ॥**

टीका० — औरसद्वयं स्ववर्णादूढायां[1] स्वयं जनिते पुत्रे । उरसा निर्मित इत्यर्थे 'उरसोऽण् च' (४. ४. ९४) इत्यण्यतौ । संज्ञाधिकारनियमादात्मनैव पुत्रे जाते भवति, न तूरसा निर्मितं मुखमिति ॥

तातस्तु जनकः पिता ॥ २८ ॥

क्षीर० — **तनोति कुलं तातः । स्वार्थेऽण् । जनयति जनकः । पाति पिता । वप्ता च ॥**

टीका० — तातत्रयं पितरि । '† द्युतनिभ्यां दीर्घश्च' (उ० ३. ९०) इति क्तः । तातः । पातीति पिता । पातेः नप्तृनेष्टृत्वऽष्टृक्षत्तृहोत्रादिना निपातितः ॥

---

१. 'धर्मपत्न्यां स्व' ङ. छ. पाठः. २. 'र्णायामूढा' झ., र्णायां स्व' ञ. पाठः.

---

† 'द्युत—', § 'ष्टृहो' इति मुद्रितोणादिपाठः ।

जनयित्री प्रसूर्माता जननी

क्षीर० — **'या जनित्री त्रिलोक्याः'** इत्यन्तर्भावितण्यर्थत्वात् । **प्रसूयते प्रसूः । मात्यस्यां गर्भो माता ॥**

टीका० — जनयित्रीचतुष्कं **मातरि** । ऋन्नेभ्यो ङीपि जनयित्री । 'सत्सूद्विषं —' (३. २. ६१) इत्यादिना क्विप् । प्रसूः । 'माङ् माने' । 'तृन्-तृचौ *शंसिशसिशासिक्षदादिभ्यः संज्ञायां चानिटौ' (उ० २. ९४) इति तृच् । 'न षट्स्वस्रादिभ्यः' (४. १. १०) इति निषेधाद् ङीब् न भवति । जनेर्[1]नीति कर्तरि ल्युट् ॥

भगिनी स्वसा ।

क्षीर० — **भगं कल्याणमस्त्यस्या भगिनी । सुष्ठु अस्यते स्वसा । ‡ 'सुञ्यसेर्ऋन्' (उ० २. ९६) 'न षट्स्वस्रादिभ्यः' (४. १. १०) इति ङीब् नास्ति ॥**

टीका० — भगिनीद्वयं **भगिन्याम्** । भगो यत्नः तद्योगाद् भगिनी । सुपूर्वाद् 'असु क्षेपणे' इत्यतः 'सावसेर्ऋन्' (उ० २. ९६) इति ऋन् । स्वसा द्विदन्त्या । तथा च —'

"स्वसारमवलम्ब्याशु स्वसारमुपजप्यताम्"

इति कीचकवधः । एकत्र स्वं सारं बलमित्यर्थः ॥

ननान्दा तु स्वसा पत्युः

क्षीर० — **न नन्दति भ्रातृजायया ननान्दा । नन्दिनी च । नन्देर्ऋन् ॥**

टीका० — पत्युः **स्वामिनः स्वसा** ननान्दा । नञ्युपपदे 'नञि च नन्देः' (उ० २. ९८) इति ऋन् । वृद्धिश्च धातोः । बहुलवचनान्न नञो नलोपः ।

---

१. 'षादिकि' ख. च. ज. पाठः. २. 'नयतीति क' ङ. छ. पाठः.

---

* 'शंसिक्ष —', ‡ 'सावसे' इति मुद्रितोणादिपाठः ।

"न(ना ? न)न्दा तु स्वसा पत्युर्ननान्दा नन्दिनी च सा"
इति शब्दार्णवः ॥

नप्त्री पौत्री सुतात्मजा ॥ २९ ॥

क्षीर० — न पतत्यनया कुलम्। पुत्रस्यापत्यं पौत्री। सुतात्मजा ॥

टीका० — सुतस्य सुतायाश्चात्मजायां नप्त्रीद्वयम्। 'णमु प्रह्वत्वे शब्दे'। पितृवन्नप्तृ। 'ऋन्नेभ्यो ङीप्' (४. १. ५)। केचित् स्वस्रादिषु नप्तृशब्दं पठन्ति। तदा नप्तेति पाठः। तथा च रभसः — 'नप्ता नप्त्री च पौत्रिका' इति। पौत्रीति। बिदादित्वादनन्तरापत्येऽञ्॥

भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्।

क्षीर० — यतते स्पर्धया याता। 'यतेर्वृद्धिश्च' (उ० २. ९७) इति ऋन्॥

टीका० — भ्रातृवर्गस्येति। रूढिवशात् पतिभ्रातृवर्गस्य भार्या यातर उच्यन्ते, जाव इति यासां प्रसिद्धिः। 'यती प्रयत्ने'। 'यतेर्वृद्धिश्च' (उ० २. ९७) इति ऋन् वृद्धिश्च ॥

प्रजावती भ्रातृजाया

क्षीर० — 'ऋतो विद्यायोनिसम्बन्धेभ्यः' (६. ३. २३) इति षष्ठ्या अलुङ् नास्ति सप्तमीसमासात्। यथा 'द्रक्ष्यसि भ्रातृजायाम्' ॥

टीका० — प्रजावतीद्वयं भ्रातृभार्यायाम्। जायाशब्दस्यायोनिसम्बन्धवाचित्वाद् भ्रातृजायेत्यत्र 'ऋतो विद्यायोनिसम्बन्धेभ्यः' (६. ३. २३) इति षष्ठ्या अलुङ् न भवति। भ्रातृभुक्ता जाया भ्रातृजाया। शाकपार्थिवादिः इति केचित्॥

मातुलानी तु मातुली ॥ ३० ॥

क्षीर० — 'इन्द्रवरुण—' (४. १. ४९) इति ङीषानुकौ। *'उपा-

* 'मातुलोपाध्याययोरानुग् वा' इति मुद्रितवार्त्तिकपाठः।

ध्यायमातुलाभ्यां वा' (वा० ४. १. ४९) इति पक्षे ङीप् ॥

टीका० — मातुलानीद्वयं **मातुलजायायाम्** । उपाध्यायान्युपाध्यायीवन्मातुलानी मातुली च ॥

पतिपत्न्योः प्रसूः श्वश्रूः

क्षीर० — पत्युर्माता पत्न्याः श्वश्रूः । पत्न्या माता पत्युः श्वश्रूः । 'श्वशुरस्योकाराकारयोर्लोपश्च' (वा० ४. १. ६८) इत्यूङ् ॥

टीका० — पत्युः स्वामिनः पत्न्या **भार्यायाश्च** प्रसूर्माता श्वश्रूः । द्वितालव्याच्छ्वशुरशब्दात् 'श्वशुरस्योकाराकारयोर्लोपश्चेति वक्तव्यम्' (वा० ४. १. ६८) इत्यूङ् ॥

श्वशुरस्तु पिता तयोः ।

क्षीर० — तयोः पतिपत्न्योरन्योन्यं पिता श्वशुरः । शु पूजितं कृत्वा अश्नुते ॥

टीका० — पतिपत्न्योः पिता श्वशुरः । शुपूर्वात् 'अशू व्याप्तावि'त्यतः ¶'शावशेरातौ' (उ० १. ४७) इत्युरन् । 'श्वश्रूस्तथा श्वशुरशाश्वतिशिशपाश्च' इति द्वितालव्ये शभेदः ॥

पितुर्भ्राता पितृव्यः स्याद्

क्षीर० — 'पितृव्यमातुल—' (४. २. ३६) इति साधुः ॥

टीका० — **पितुर्भ्राता** पितृव्यः । पितृशब्दात् 'पितृव्यमातुलमातामहपिता महाः' (४. २. ३६) इति व्यन् निपात्यते ॥

मातुर्भ्राता तु मातुलः ॥ ३१ ॥

---

१. 'माता च श्वश्रूः । श्वशु' ख. पाठः.

¶ 'से' इति मुद्रितोणादिपाठः ।

टीका०—**मातुर्भ्रातरि** मातुलः। पितृव्यादिसूत्रेण मातृशब्दाद् लच्॥

श्यालाः श्युर्भ्रातरः पत्न्याः

क्षीर०—* श्यायति श्यालः। 'श्यमु वितर्के'। अस्माद् वा। पत्युः श्याला इत्यर्थः॥

टीका०—**पत्न्याः भ्रातरः** श्यालाः। 'श्याल वितर्के'। दन्त्यादिः चौरादिकश्च। ण्यन्तात् पचाद्यच्। '**श्यालसालसमसूरसूरयः**' इति सभेदः। श्यां मधुपर्कं लातीति श्यालस्तालव्यादिरपीति केचित्॥

स्वामिनो देवृदेवरौ।

क्षीर०—**स्वामिनः** पत्युर्भ्राता कनिष्ठः पत्न्याः। दीव्यति देवा। 'दिवेर्कनिन्' (उ० २. ९९)। '**अर्तिकमिभ्रमिदेविवासिभ्यश्च**' (उ० ३. १३२) इति देवरः॥

टीका०—भर्तुः **स्वामिनः कनिष्ठभ्रातरि** देवृद्वयम्। ज्येष्ठस्तु श्वशुर एव। 'दिवेर्कनिन्' (उ० २. ९९) इति कनिन्। देवृ। अमरवद् देवरः। 'देवृदेवरदेवना' इति शब्दार्णवः॥

स्वस्रीयो भागिनेयः स्याद्

क्षीर०—**स्वसुरपत्यं स्वस्रीयः**॥

टीका०—स्वस्रीयद्वयं **भागिनेये**। 'स्वसुश्छः' (४. १. १४३)। स्वस्रीयः। ढकि भागिनेयः॥

जामाता दुहितुः पतिः॥ ३२॥

क्षीर०—**जायां मिमीते जामाता**॥

---

*'स्यै' इति 'ष्यै' इति वा कञ्चन धातुं स्थितं मन्यते। ततः कालन् स्यात्।

टीका०— जामातृद्वयं **जामातरि** । 'माङ् माने' । जापूर्वः । जामाता 'नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृजामातृपितृदुहितृ—' (उ० २. ९९) इति निपातितः । दुहितुःपतिरिति समासोऽयम् । 'विभाषा स्वसृपत्योः' (६. ३. २४) इति षष्ठ्या अलुक् ॥

पितामहः पितृपिता

क्षीर०— 'पितृव्य—' (४. २. ३६) इत्यादिना साधुः ॥

टीका०— पितुः पिता पितामहः । ब्रह्मपर्याये उक्तः ॥

तत्पिता प्रपितामहः ।

क्षीर०— प्रगतः पितामहात् ॥

टीका०— पितामहस्य पिता प्रपितामहः । प्रकृष्टः पितामहः । प्रादि-समासः ॥

मातुर्मातामहाद्येवं

क्षीर० — मातुः पिता मातामहः । तत्पिता प्रमातामहः ॥

टीका० — एवमिति । यथा पितुः पिता पितामहः, तथा मातुः पिता मातामहः, तत्पिता च प्रमातामहः । पूर्ववद् डामहच् ॥

सपिण्डास्तु सनाभयः ॥ ३३ ॥

क्षीर० — **समानः पिण्डो येषां ते सपिण्डाः । यत् स्मृतिः—**

"सपिण्डता तु पुरुषे सप्तमे विनिवर्तते" ।

सप्तमादूर्ध्वं सगोत्राः । समाना नाभिर्मूलमेषां सनाभयः । 'ज्योतिर्ज-नपद—' (६. ३. ८५) इति सत्वम् ॥

टीका० —सपिण्डद्वयं **सप्तपुरुषावधिकेषु निकटज्ञातिषु** । समानः

---

१. 'पिण्डाव' ङ. पाठः.

पिण्डो येषां ते सपिण्डाः। 'वान्यस्मिन् सपिण्डे—' (४. १. १६५) इति निपातनात् समानस्य सभावः। नाभिः सप्तपुरुषावधिकं कुलम्। समाना नाभिर्येषामिति सनाभयः। 'ज्योतिर्जनपदरात्रिनाभि—' (६. ३. ८५) इत्यादिना सभावः॥

समानोदर्यसोदर्यसगर्भ्यसहजाः समाः।

क्षीर०—**समाने उदरे शयितः समानोदर्यः। 'समानोदरे शयित—'(४. ४. १०८) इति यत्। सोदर[1]शब्दात् 'सोदराद् यः' (४. ४. १०९) 'विभाषोदरे' (६. ३. ८८) इति सत्वं च। समाने गर्भे भवः सगर्भ्यः। 'सगर्भसयूथसनुताद् यत्' (४. ४. ११४) छान्दसोऽपि लोकेऽप्यभिधानात्। सह जायते सहजो भ्राता॥**

टीका०—समानोदर्यचतुष्कमेकोदरभ्रातरि। 'समानोदरे शयित ओ चोदात्तः' (४. ४. १०८) इति यत्। समानोदर्यः। अस्मिन्नेवार्थे 'सोदराद् यः' (४. ४. १०९)। सोदर्यः। समाने गर्भे भवः सगर्भ्यः। 'सगर्भसयूथसनुताद् यत्' (४. ४. ११४)। 'समानस्यच्छन्दसि—' (६. ३. ८४) इत्यादिना सः। संज्ञाशब्दत्वाद् भाषायामप्यस्य प्रयोगः। समाने उदरे जातः सहजः। 'अन्येष्वपि—' (३. २. १०१) इति डः। सहशब्दोऽत्र समानार्थे। सोदरशब्दोऽप्यत्र। तथा च भट्टिः—'त्वं सोदरस्यातिमदोद्धतस्य' (स० १२. श्लो० २) इति॥

सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः॥ ३४॥

क्षीर०—समानं गोत्रमस्य सगोत्रः। 'ज्योतिर्जनपद—'(६. ३. ८५) इति सत्वम्। ज्ञायते ज्ञातिः। बध्नाति बन्धुः। स्वार्थेऽण्। बान्धवः। एकः स्वो ज्ञातिवचनोऽन्य आत्मीयार्थः॥

टीका०—सगोत्रषट्कं ज्ञातिसामान्ये। सनाभिवत् सगोत्रः। बन्धुरेव बान्धवः। प्रज्ञाद्यण्। जानातेः क्तिच्। ज्ञातिः। 'बन्ध बन्धने'। स्वरुवद्[2]दुः।

---

१. 'राद् यति वि' क. ग. घ. पाठः. २. 'द् व' क. पाठः.

बन्धुः । स्वशब्दो दन्त्यसः । 'स्वमज्ञातिधनाख्यायाम्' (१. १. ३५) इत्यत्र साधुः । स्वजन इति कर्मधारयः ॥

ज्ञातेयं बन्धुता तेषां क्रमाद् भावसमूहयोः ।

क्षीर० — ज्ञातेर्भावो ज्ञातेयम् । 'कपिज्ञात्योर्ढक्' (५. १. १२७) । बन्धूनां समूहो बन्धुता । 'ग्रामजनबन्धुसहायेभ्यस्तल्' (४. २. ४३) । तलि स्त्रीलिङ्गवचनम् ॥

टीका० — ज्ञातीनां भावे ज्ञातेयम् । 'कपिज्ञात्योर्ढक्' (५. १. १२७) । बन्धुसमूहे बन्धुता । 'ग्रामजनबन्धुसहायेभ्यस्तल्' (४. २. ४३) ॥

धवः प्रियः पतिर्भर्ता

क्षीर०— धुनोति धवः । प्रीणाति प्रियः । 'इगुपधज्ञा—' (३. १. १३५) इति कः । पाति पतिः । 'पातेर्डतिः' (उ० ४. ५८) सेक्ता वरयिता वरश्च ॥

टीका० — धवचतुष्कं पत्यौ । 'धूञ् कम्पने' । पचादिः । धवः । 'कृतादयश्च' इति वा अच्प्रत्ययः । प्रीणाति प्रियः । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) । 'पा रक्षणे' । 'पातेर्डतिः' (उ० ४. ५८) इति डतिः । पतिः । बिभर्तीति भर्ता तृजन्तः ॥

जारस्तूपपतिः समौ ॥ ३५ ॥

क्षीर० — जरयति जारः । 'दारजारौ कर्तरि णिलुक् च' (वा० ३. ३. २०) । उपजातः पतिरुपपतिः ॥

टीका० — जारद्वयं जारभर्तरि । जीर्यतेः 'दारजारौ कर्तरि णिलुक् च' (वा० ३. ३. २०) इति घञ् । 'या जारवती तीवरजाये'ति गतप्रत्यागताच्चवर्गादः । पत्या उपमित उपपतिः । 'अवादयः क्रुष्टाद्यर्थे तृतीयया' (वा० २. २. १८) इति समासः ॥

अमृते जारजः कुण्डः

क्षीर० — भर्तरीत्येव। कुण्ड्यते दह्यतेऽनेन कुलमिति कुण्डः। 'कुडि दाहे'॥

टीका० — जीवति भर्तरि जारजातः पुत्रः कुण्डः। 'कुण शब्दोपकरणयोः'। 'कुणादिभ्यः कित्' इति डः॥

मृते भर्तरि गोलकः।

क्षीर० — जारज इत्येव। गुड्यते लज्जाकरत्वाद् गोप्यते गोलः।

"परनार्यां प्रजायेते द्वौ सुतौ कुण्डगोलकौ।
पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलकः॥"

इति स्मृतिः॥

टीका० — मृते भर्तरि जारजः पुत्रो गोलकः॥

भ्रात्रीयो भ्रातृजः

क्षीर० — भ्रातुरपत्यं भ्रात्रीयः। 'भ्रातुर्व्यच्च' (४. १. १४४) इति वा छः। भ्रातृव्यस्तु नानार्थे॥

टीका० — भ्रात्रीयद्वयं भ्रातुष्पुत्रे। 'भ्रातुर्व्यच्च' (४. १. १४४) इति चकाराच्छः। भ्रातृज इति पूर्ववड्डः॥

भ्रातृभगिन्यौ भ्रातरावुभौ॥ ३६॥

क्षीर० — भ्राता च भगिनी चेति। 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' (१. २. ६८) इत्येकशेषः। एवं पुत्रौ॥

टीका० — भ्रातृभगिन्यौ द्वे भ्रातरावित्युच्येते। 'भ्रातृपुत्रौ स्वसृदुहितृ§भ्यामन्यतरस्याम्' (१. २. ६८) इत्येकशेषः॥

मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ।

क्षीर० — 'आनङृतो द्वन्द्वे' (६. ३. २५)। 'पिता मात्रा' (१. २. ७०) इत्येकशेषो वा। 'मातरपितरावुदीचाम्' (६. ३. ३२)

§ 'भ्याम्' इति मुद्रिताष्टाध्यायीपाठः।

इत्यदन्तपूर्वपदः साधुः । प्रसूर्माता जनयिता पिता चेति द्वौ त्रिसंज्ञौ ॥

टीका० — मातापितरौत्रयं मातापित्रोरेकवाच्यत्वे । माता च पिता च मातापितरौ । 'आनङृतो द्वन्द्वे' (६. ३. २५) इत्यानङ् । पितराविति 'पिता मात्रा' (१. २. ७०) इत्येकशेषः । 'मातरपितराविति । 'मातरपितरावुदीचाम्' (६. ३.३२) इति पूर्वोत्तरपदयोररङ् ॥

श्वश्रूश्वशुरौ श्वशुरौ

क्षीर० — 'श्वशुरः श्वश्रूा' (१. २. ७१) इत्येकशेषो वा ॥

टीका०— श्वश्रूश्वशुरौ द्वौ श्वशुरावुच्येते । श्वशुराविति 'श्वशुरः श्वश्रूा' (१. २. ७१) इत्येकशेषविकल्पः ॥

पुत्रौ पुत्रश्च दुहिता च ॥ ३७॥

टीका०— पुत्रश्च दुहिता च पुत्राविच्युच्येते । भ्रातराविवैकशेषविकल्पः ॥

दम्पती जम्पती जायापती भार्यापती च तौ ।

क्षीर० — राजदन्तादौ जायायाः पत्यौ दंभावो जम्भावश्च निपात्येते । 'दं भार्या' इति निघण्टुः ॥

टीका० — दम्पतीचतुष्कं पतिपत्न्योर्युग्मे, जम्पती दम्पती भार्यापती जायापती इति राजदन्तादिगणपाठात् पक्षे जायाशब्दस्य जम्भावो दम्भावश्च निपात्येते परनिपातश्च ॥

गर्भाशयो जरायुः पुंस्युल्बं च

क्षीर० — गर्भ आशेतेऽत्र गर्भाशयः । जरामेति जरायुः । उल्वत्यावृणोत्युल्बम् ॥

कललोऽस्त्रियाम् ॥ ३८॥

क्षीर० — कलयति के ललति वा कललः शुक्रशोणितसमवायः । प्रसिद्धचास्य पर्यायो नोक्तः । अस्त्रीत्वविधानार्थं विधिः । उल्वपर्यायः कलल इत्येके । यन्मुनिः — "तदुल्वं कललं च तत्" ॥

टीका० — गर्भाशयचतुष्कं **मलं** इति ख्याते। गर्भ आशेतेऽस्मिन्निति गर्भाशयः। 'पुंसि संज्ञायाम्—' (३. ३. ११८) इति घः। 'किञ्जरयोः श्रिणः' (उ० १. ४) इति श्रुण्। जरायुः।

"वाद्यभेदे गृहे कुक्षौ सम्भवेऽग्नौ जरायुषि"

इति केसरमालायां सान्तोऽपि। 'उच समवाये'। 'उल्बादयश्च' (उ० ४. ९६) इति बन्प्रत्ययः चकारस्य लकारः गुणाभावश्च निपात्यते। चकारादुल्बं चास्त्रियाम्। तथा च "कललो जरायुरुल्ब" इति पुंस्काण्डे रत्नकोशः। 'कड मदे'। वृषादिकलच्। लडयोरेकत्वस्मरणम्। कलः। कलयतेर्वा कलः। कलतिः कामधेनुः।

"लोक एष तिमिरोल्बवेष्टितो गर्भवास इव वर्तते निशि"

(कुमा० स० ८. श्लो० ९६) इति कालिदासः। अत उल्बोऽपि गर्भाशय एव। उल्बद्वयं गर्भप्रकृतिभूते द्रवात्मके कलल इत्यन्यः। तथा च "कललघनाङ्कुरास्थिचर्माङ्गजचेतनतो[1]" इत्यादि निषेके वराहः। प्रयुक्तं च —

"मेरुरुल्बमभूत् तस्य जरायुश्च महीधराः"॥

सूतिमासो वैजननः

क्षीर० — **'दशमे मासि सूतवे' इति श्रुतेः**

"नवमे दशमे वापि प्रबलैः सूतिमारुतैः।
निस्सार्यते बाण इव यन्त्रच्छिद्रेण सज्वरः॥"

इति स्मृतेश्च नवमो दशमो वा मासो विजनने भवो वैजननः॥

टीका० — सूतिमासद्वयं **नवमे दशमे वा प्रसवमासे**। विजननं गर्भविमोचनं तदस्मिन्नस्तीति वैजननो मासः। ज्योत्स्नादित्वादण्॥

गर्भो भ्रूण इमौ समौ।

क्षीर० — **गीर्यते गर्भः। भ्रियते भ्रूणः। कुक्षिस्थः॥**

---

१. 'तां' ज. पाठः. २. 'दा' ख. पाठः.

टीका० — कुक्षिगतसत्त्वे गर्भद्वयम्। 'गृ निगरणे।' 'अर्तिगृभ्यां भन्' (उ० ३. १५३) गर्भः। 'भ्रूण †आशायाम्।' चुरादिः। पचाद्यच्। कृतादित्वाद् वाच्। भ्रूणः॥

तृतीयाप्रकृतिः शण्डः क्लीबः पण्डो नपुंसकम्॥ ३९॥

क्षीर० — **स्त्रीपुंभ्यां तृतीया प्रकृतिर्लिङ्गम्। शाम्यति शण्डः[1] षण्डोऽपि। क्लीबते क्लीबः। पण्डति पण्डः पण्डुश्च। न स्त्रीपुंसौ नपुंसकम्। 'नभ्राण्नपाद् —' (६. ३. ७५) इति साधुः। 'नपुंसको भवेदि'ति भाष्यात् पुंस्यपि॥**

टीका० — तृतीयाप्रकृतिपञ्चकं **नपुंसके**। तृतीयाप्रकृतिः तृतीयप्रकार इत्यर्थः। समानजातीयौ स्त्रीपुंसावपेक्ष्य प्रथमा प्रकृतिः स्त्री। द्वितीया प्रकृतिः पुमान्। तथा च वररुचिप्रयोगः —

"घटाजटासटानां प्रथमा प्रकृतिः शिफानां च"

इति। कर्मधारयस्य पाक्षिकत्वाद् वाक्यमपि। तथा च —

"प्रकृतेश्च तृतीयायाः स्त्रियाश्चैवोपरिष्टके"

इति वाक्यप्रयोगश्च स्त्रीत्वं व्यनक्ति। पुंवद्भावपक्षे स्त्रीत्वं न गम्येत[2]। 'न कोपधायाः' (६. ३. ३७) इत्यत्र नेति योगविभागान्न पुंवद्भाव इति केचित्। तथा च वररुचिलिङ्गसूत्रं — "शैलायुधमङ्गलनगरबिम्बमुकुटानि विद्धि तृतीयाप्रकृतौ[3]" इति। शाम्यति लिङ्गाभावादिति शण्डः। 'शमु उपशमे।' 'शमेर्डः' (उ० १. १०४)। अथवा 'वन षण सम्भक्तौ'। 'अमन्ताड्डः' (उ० १. ११९)। बहुलवचनात् सत्वाभावः। षण्डः। बहुलवचनादेव डकारस्य 'चुटू' (१. ३. ७) इतीत्संज्ञापि न भवति। 'क्लीबृ अधाष्टर्ये'।

---

१. 'ण्ठः। शण्डोऽपि' ग. ङ. पाठः. २. 'म्यते। न' ङ. छ. ज. पाठः. ३. 'ल्या' ख. ङ. छ. पाठः. ४. 'थ' ख. ञ. पाठः.

---

† 'आशाविशङ्कयोः' इति मुद्रितधातुपाठः।

इगुपधलक्षणः कः। क्लीबः। नपुंसके 'नञ्राड्'—(६. ३. ७९) इत्यादिसूत्रेण निपातितम्॥

शिशुत्वं शैशवं बाल्यं

क्षीर०—शिशोर्भावः शैशवम्। 'प्राणभृज्जाति—' (५. १. १२९) इत्य(ण्?ञ्)॥

टीका०—शिशुत्वत्रयं बालभावे शिशुकर्मणि च। शिशोर्भावः शिशुत्वम्। 'तस्य भावस्त्वतलौ' (५. १. ११९)। 'इगन्ताच्च लघुपूर्वात्' (५. १. १३१) इत्याणि शैशवम्। 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५. १. १२४) इति ष्यञ्। बाल्यम्॥

तारुण्यं यौवनं समे।

क्षीर०—यूनो भावो यौवनम्। 'हायनान्तयुवादिभ्योऽण्' (५. १. १३०)॥

टीका०—तारुण्यद्वयं यौवने। पूर्ववत् ष्यञ्। तारुण्यम्। 'हायनान्तयुवादिभ्योऽण्' (५. १. १३०)। यौवनम्॥

स्यात् स्थाविरं तु वृद्धत्वं

क्षीर०—स्थविरस्य भावः स्थाविरम्। 'हायनान्त—' (५. १. १३०) इत्यण्॥

टीका०—स्थाविरद्वयं वृद्धभावे। युवाद्यणि स्थाविरम्। शिशुत्ववद् वृद्धत्वम्॥

वृद्धसङ्घेऽपि[1] वार्द्धकम्॥ ४०॥

क्षीर०—'गोत्रोक्षोष्ट्र—' (४.२.३९) इत्यत्र 'वृद्धाच्च' इति वक्तव्याद् वुञ्। मनोज्ञादित्वाद् भावकर्मणोरप्याहुः। यथा—"वार्द्धके मुनिवृत्तीनाम्" (रघु० स० १. श्लो० ८)॥

---

१. 'तु' ख. पाठः.

टीका० — वृद्धमेलककर्मभावेषु वार्द्धकम् । सङ्घेऽपीत्यपिशब्देन कर्मभावौ समुच्चीयेते ।

"भावे कर्मणि वृद्धस्य वार्द्धकं निकुरुम्बके"

इति वोपालितः। तत्र भावकर्मणोः 'द्वन्द्वमनोज्ञादिभ्यश्च' (५. १. १३२) इति वुञ् । समूहे तु 'वृद्धाच्चेति वक्तव्यम्' (वा० ४. २. ३९) इति वुञ् ।

"वार्द्धक्यं श्लथसन्धिबन्धनतया निःस्थाननिर्धाम च"

इति शिष्टप्रयोगो ब्राह्मणादेराकृतिगणत्वात् कुत्साकप्रत्ययान्तात् ष्यञि यथाकथञ्चिद् व्युत्पादनीयः ॥

पलितं जरसा शौक्ल्यं केशादौ

क्षीर० — **पलति शोभानेन पलितम् । 'पल गतौ' । आदिशब्दाद् रोमादौ च ॥**

टीका० — केशे लोम्नि च यज्जरसा शौक्ल्यं, **तत्** पलितम् । 'फल निष्पत्तौ'। 'लोष्टपलितौ' (उ०३. ९२) इति क्तप्रत्ययः फकारस्य पकारः इडागमश्च निपात्यते ॥

विस्रसा जरा ।

क्षीर० — **विस्रंसतेऽनया रुजा अङ्गं विस्रसा । जीर्यन्त्यनया जरा । 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) ॥**

टीका० — विस्रसाद्वयं **जरायाम्** । 'स्रन्सु अधःपतने' । भिदाद्यङ् । 'गुरोश्च हलः' (३.३. १०३) इत्यकारप्रत्ययो वा । विस्रसा द्विदन्त्या । 'जॄष् वयोहानौ । षित्त्वादङ् । 'ऋदृशोऽङि गुणः' (७. ४. १६) । जरा ॥

स्यादुत्तानशया डिम्भा स्तनपा च स्तनन्धयी ॥ ४१ ॥

क्षीर० — **उत्ताना शेते उत्तानशया । 'अधिकरणे शेतेः' (३. २. १५) इत्यत्र 'उत्तानादिषु कर्तृषु' इत्युक्तम् । डिम्भेति । प्राक् पक्षिक्रमे-**

---

१. 'ष् जॄष् व' क. ख. च ज्ञ. पाठः. २. 'ल्यच् । डि' ख. पाठः.

णोक्तम् इह तु मानुषक्रमात्। स्तनं पिबति स्तनपा। 'सुपि' (३. २. ४) इति योगविभागात् कः। स्तनं धयति स्तनन्धयी। 'नासिकास्तनयोर्धमा-धेटोः' (३. २. २९)। खश्। धेटष्टित्त्वाद् ङीप्। स्त्रीलिङ्गेन[1] निर्देशः स्त्रीप्रत्ययप्रदर्शनार्थः॥

टीका०— उत्तानशयाचतुष्कमतिबालायाम्। 'त्रिषु जरावराः' इति वक्ष्यमाणवचनात् त्रिलिङ्गत्वम्। स्त्रीलिङ्गनिर्देशस्तु कामचारात्। उत्ताना शेत इत्युत्तानशया। 'उत्तानादिषु कर्तृषूपसङ्ख्यानम्' (वा०३. २. १५) इत्यच्। 'पुंवत् कर्मधारय—' (६. ३. ४२) इति पुंवद्भावः। डिम्भेति। 'डभि डिभि सङ्घाते'। डम्भ डिम्भ इत्येके। चुरादिपचादी। सिंहादिवर्गे पोतसामान्यपठितस्यापि डिम्भशब्दस्य पुनर्मनुष्यवर्गेऽभिधानमुत्तानशय एव मनुष्यशिशावस्य प्रवृत्तिः अन्यत्र प्रौढे मा भूदिति, अण्डजादीनां तूत्तानशयेऽनुत्तानशयेऽपि वृत्तिरिति सूचनार्थम्। स्तनपेति। 'आतोऽनुपसर्गे कः' (३. २. ३)। स्तनौ धयति पिबतीति स्तनन्धयी। 'नासिकास्तनयोर्धमाधेटोः' (३. २. २९) इति खश्। धेटष्टित्त्वात् 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप्॥

बालस्तु स्यान्माणवकः

क्षीर०— बलति प्राणिति बालः। ज्वलादित्वाण्णः। 'बाडृ आप्लाव्ये'। अस्माद्वा।

"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः"॥

स्वार्थे कन्॥

टीका०— बालद्वयं षोडशवर्षपर्यन्ते। तथा च मनुः—
"आ षोडशाद् भवेद् बालस्ततस्तरुण उच्यते"।

---

१. 'ङनि' ख. पाठः.

'वल वल्ल सवरणे'। 'अकर्तरि च—' (३. ३. १९) इति घञ्। ववयोरेकत्वस्मरणम्। बालः। 'बल भृताविं'ति चौरादिकाद् वा पचाद्यजन्तः।

"अज्ञाते कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य तु मूर्धन्यस्तेन सिध्यति माणवः" ॥

माणव एव माणवकः। स्त्रियां माणविका।

"हारभेदे माणवको बाले कुपुरुषेऽपि च"

इति रभसः ॥

वयःस्थस्तरुणो युवा।

क्षीर०—वयसि प्रत्यग्रे तिष्ठति वयःस्थः। तरति तरुणः। यौति मिश्रीभवति स्त्रिया युवा ॥

टीका०— वयःस्थत्रयं तरुणे।

"वयो बाल्यादि पक्षी च यौवनं च क्वचिद् वयः"

इति रुद्रः। अतो वयसि यौवने तिष्ठतीति वयःस्थः। 'सुपि स्थः' (३. २. ४) इति कः। 'स्थे च भाषायाम्' (६. ३. २०) इति सप्तम्या अलुङ् न भवति। तरतेः 'त्रो रश्च लो वा' (उ० ३. ५४) इत्युनन्। रेफस्य वा लत्वम्। तरुणः। यौतेः वृषन्शब्दवत् कनिन्। युवा नान्तः ॥

प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ ४२ ॥

क्षीर०— प्रगतं वयोऽस्य प्रवयाः। तिष्ठति स्थविरः। वर्धते स्म वृद्धः। एवमादौ गर्ह्यारिकाप्रत्ययेन भूते क्तः। वर्तमाने तु युक्तः। शीलितादिवत्। जिनाति स्म जीनः। ग्रहिज्यादिना सम्प्रसारणम्। ल्वादित्वान्निष्ठानत्वम्। जीर्यते स्म जीर्णः। 'श्रयुकः किति' (७. २. ११) इत्यनिट्। 'जीर्यतेरतृन्' (३. २. १०४)। जरन् ॥

टीका०— प्रवयष्षट्कं वृद्धे। प्रगतं वयो यौवनमस्येति प्रवयाः सान्तः। तिष्ठतेः शिशिरवन्निपातनात् स्थविरः। 'वृधु वृद्धौ'। क्तः। वृद्धः। 'ज्या वयोहा-

---

१. 'च। अ', २. 'का' ङ. छ. पाठः. ३. 'श्रयति', ४. 'ठसारिका' क. ग. घ. ङ. पाठः.

नौ'। 'ल्वादिभ्यश्च' (८.२.४४) इति निष्ठानत्वम्। ग्रह्यादिसम्प्रसारणम्। 'हलः' (६. ४. २) इति दीर्घः। जीनः। 'जॄष् ज्रष् वयोहानौ'। गत्यर्थादिना क्तः। 'ऋत इद्धातोः' (७. १. १००) इतीकारः। रपरत्वम्। 'हलि च' (८. २. ७७) इति दीर्घः। जीर्णः। 'जीर्यतेरतृन्' (३. २. १०४) जरन्। स्त्रियां जरती॥

वर्षीयान् दशमी ज्यायान्

क्षीर०—अतिशयेन वृद्धो वर्षीयान्। ईयसुनि 'प्रियस्थिर—'(६. ४. १५७) इति वर्षिआदेशः। दशमोऽवस्थाविशेषोऽस्यास्ति दशमी। 'वयसि पूरणात्' (५. २. १३०) इतीनिः।

"इष्टो वयोदशोपेतः पञ्चमी सप्तमीति च"।

अतिशयेन वृद्धो ज्यायान्। 'ज्य च' (५. ३. ६१) 'वृद्धस्य च' (५. ३. ६२) इति ज्यादेशः। 'ज्यादादीयसः' (६. ४. १६०) इत्यात्वम्॥

टीका०— वर्षीयस्त्रयमतिवृद्धे। 'प्रियस्थिर—' (६. ४. १५७) इत्यादिना वृद्धस्य वर्षिआदेशः ईयसुन्प्रत्ययोऽपि। नवतेरूर्ध्वं दशमोऽवस्थाविशेषोऽस्यास्तीति दशमी नान्तः। 'वयसि पूरणात्' (५. २. १३०) इतीनिः। ज्यायानिति। 'वृद्धस्य च' (५. ३. ६२) इति वृद्धशब्दस्य ज्यादेशः ईयसुन् च[1]। 'ज्यादादीयसः' (६. ४. १६०) इत्यात्वम्। स्त्रियां दशमिनी ज्यायसी च॥

पूर्वजस्त्वग्रियोऽग्रजः।

क्षीर०—अग्रे जातोऽग्रियः। 'अग्राद् यत्' (४.४. ११६)। 'घच्छौ च' (४.४.११७) इति घः। अग्रचाग्रीयौ च। अग्रिमपाठे '*अग्रपश्चाड्डिमच्' (वा० ४. ३. २३)॥

---

१. 'प्रत्ययोऽपि। ज्या' ङ. च. छ. पाठः.

---

‡ 'भ्यः' इति मुद्रिताष्टाध्यायीपाठः। * 'अग्रादिप' इति मुद्रितवार्त्तिकपाठः।

टीका०— पूर्वजत्रयं ज्येष्ठभ्रातरि । पूर्वस्मिन् काले जातः पूर्वजः । 'सप्तम्यां जनेर्डः' (३. २. ९७)। अग्रे भवोऽग्रियः । अग्रादित्यनुवर्तमाने 'घच्छौ च' (४. ४. ११७) इति घः । छान्दसोऽप्ययं कविभिर्नियुक्तत्वाद् भाषायां निबद्धः ॥

जघन्यजे स्युः कनिष्ठयवीयोवरजानुजाः ॥ ४३ ॥

क्षीर०— **जघन्यजः पश्चाज्जातः । अत्यर्थं युवा कनिष्ठः यवीयांश्च । 'युवाल्पयोः कनन्यतरस्याम्' (५. ३. ६४)। 'स्थूलदूर—' (६. ४. १५६) इति यणादिलोपः पूर्वस्य च गुणः । एवं कनीयान् यविष्ठश्च । अवरे जायतेऽवरजः ॥**

टीका०— जघन्यजपञ्चकं **कनिष्ठे** । जघन्ये अर्वाचीने काले जातो जघन्यजः । कनिष्ठ इति । अतिशयार्थे युवशब्दस्य इष्ठनि परतः 'युवाल्पयोः कनन्यतरस्याम्' (५. ३. ६४) इति कनादेशः । यवीय इति युवन्शब्दस्य ईयसुन्। 'स्थूलदूरयुव—' (६. ४. १५६) इत्यादिना वन्शब्दलोपः पूर्वस्य च गुणः । अवरस्मिन् काले जातोऽवरजः । अनु पश्चाज्जातोऽनुजः । 'अन्येष्वपि दृश्यते' (३. २. १०१) इति डः ॥

अमांसो दुर्बलश्छातः

क्षीर०— **छ्यति स्म छातः । 'छो छेदने'** ॥

टीका०— अमांसत्रयं **दुर्बले** । अल्पमांसोऽमांसः । अल्पार्थे नञ् । दुः निन्दितं बलमस्येति दुर्बलः । 'छो छेदने' । बहुलवचनात् हसिमृग्रिण्वादिना तन् । छातः । शात इति क्वचित् पाठः । तदा श्यतेः क्तः । तथा च—

"दुर्बले निशिते स्यातां शितशातावितौ त्रिषु"

इति तालव्यादौ रभसः ॥

---

१. 'रो जातोऽव' ख. पाठः.

बलवान् मांसलोंऽसलः ।

क्षीर० — सिध्मादित्वाल्लच् । अंसावस्य स्तोंऽसलः । 'वत्सांसाभ्यां कामबले' (५. २. ९८) इति लच् ॥

टीका० — बलवत्त्रयं स्थूले । बलं स्थौल्यं तद्योगान्मतुप् । मांसयोगान्मांसलः । सिध्मादिलच् । 'वत्सांसाभ्यां कामबले' (५. २. ९८) इति मत्वर्थे लच् । अंसलः दन्त्यवान् ॥

तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिलः ॥ ४४ ॥

क्षीर० — तुन्दं पिचण्डोऽस्यास्ति । 'तुन्दादिभ्य इलच्च' (५. २. ११७) इति चादिनिठनौ । उदरिलोऽपि । तुन्दिरस्यास्ति तुन्दिभः । 'तुन्दिवलिवटेर्भः' (५. २. १३९) ॥

टीका० — तुन्दिलपञ्चकं बृहत्कुक्षौ । तुन्दयोगात् 'तुन्दादिभ्य इलच्च' (५. २. ११७) । तुन्दिलः । चकारादिनिठनौ मतुप् च । तेन तुन्दिकः तुन्दी च । प्रसिद्धत्वान्मतुपा न दर्शितः वृत्तावुक्त एव । पिचण्डमुदरं तद्योगात् तुन्दादिपाठादिलच् । पिचण्डिलः ॥

अवटीटोऽवनाटश्चावभ्रटो नतनासिके ।

क्षीर० — 'नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः' (५. २. ३१) नतनासिकश्चिपिटघोणः । नतायां नासायां नासानमनेऽप्येते वर्तन्ते[1] ॥

टीका० — अवटीटत्रयं नासिकासम्बन्धिनि नमने । तद्योगान्नासिकाप्येभिरुच्यते । तथा च — "अवनाटनासिकम्" इति बाणः । तद्योगान्नतनासिकेऽपि पुरुषेऽमी । 'नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः' (५. २. ३१) । अवटीटः अवनाटः अवभ्रटः । नतनासिक इति बहुव्रीहिः ॥

केशवः केशिकः केशी

---

१. 'वै' ख. पाठः.

क्षीर०—प्रशस्ताः केशाः सन्त्यस्य केशवः। 'केशाद् वोऽन्यतरस्याम्' (५.२.१०९)॥

टीका०—केशवत्रयं बहुकेशे। 'केशाद् वोऽन्यतरस्याम्' (५.२.१०९) इति मत्वर्थीयो वः। केशवः। पक्षे इनिठनौ। केशी केशिकः॥

वलिनो वलिभः समौ॥ ४५॥

क्षीर०—वलिस्त्वक्सङ्कोचोऽस्यास्ति। पामादित्वान्नः। 'तुन्दिवलिवटेर्भः' (५.२.१३९)॥

टीका०—वलिनद्वयं **जराश्लथचर्मयुक्ते**। पामादित्वान्मत्वर्थीयो नः। 'तुन्दिवलिवटेर्भः' (५.२.१३९)। वलिभः॥

विकलाङ्गस्तु पोगण्डः

क्षीर०—**पूयते अपसार्यते पोगण्डः**॥

टीका०—विकलाङ्गद्वयं **न्यूनाधिकाङ्गे**। "पोगण्डो विकलाङ्गः स्यात्" इति हलायुधः। "पोगण्डो विकलाङ्गकः" इति रत्नकोशश्च। अतः पकारादिः।

"अपोगण्डस्तु वलिभिर्व्याप्तदेह उदीरितः।
शिशुर्दश समा यावदपोगण्डः स्मृतो बुधैः॥"

इति तु धरणिः। अपकृष्टं गण्यत इत्यपोगण्डः। 'गण गणने'। 'अमन्ताड्डः' (उ० १.११९)। पक्षे पृषोदरादित्वादवर्णलोपः ओत्वं च॥

खर्वो ह्रस्वश्च वामनः।

क्षीर०—**खर्वति खर्वः। ह्रसति ह्रस्वः। वामोऽस्यास्ति वामनः। 'निखर्वः खर्दनः खर्वा' इति नाममाला॥**

टीका०—खर्वत्रयं **वामने पुरुषे**। विशेष्यनिघ्ने खर्वत्रिकं ह्रस्वमात्र इति न पुनरुक्तिः। 'कर्व खर्व गर्व दर्पे'। 'अकर्तरि च—' (३.३.१९) इति घञ्।

खर्वः । 'तुस ह्रस ह्रस रस शब्दार्थाः' । 'अशूप्रुषि'—(उ० १. १५७) इत्यादिना बाहुलकः कन् ह्रस्वः । मन इव वामनः वाशब्द उपमार्थः । पृषोदरादित्वात् सकारस्य अकारः ॥

खरणाः स्यात् खरणसः

क्षीर०—खरा तीक्ष्णा खरस्येव वा नासिकास्य खरणाः *'खरखुराभ्यां नस् वा वक्तव्यः' (वा० ५. ४. ११८) । पक्षे 'अञ् नासिकायाः संज्ञायां नसं चास्थूलात्' (५. ४. ११८) । 'पूर्वपदात् संज्ञायाम्—'(८. ४. ३) णत्वम् । क्षुद्रः क्षुद्रनासिकः ॥

टीका०—खरणोद्वयं **गर्दभसमाननासिके** । *'खरखुराभ्यां नस् वक्तव्यः' (वा० ५. ४. ११८) इति नासिकाया नस्भावः । 'पूर्वपदात् संज्ञायामगः' (८. ४. ३) इति णत्वम् । खरणाः सान्तः । पक्षे 'अचप्रत्ययोऽपीष्यते' इत्यच् ॥

विग्रो विगतनासिकः ॥ ४६ ॥

क्षीर०—'वेग्रों वक्तव्यः' (वा० ५. ४. ११९) ॥

टीका०—छेदनादिना **गतनासिके** विग्रद्वयम् । 'वेग्रों वक्तव्यः' (वा० ५. ४. ११९) इति नासिकाया ग्रभावः । कवर्गद्वितीयादिरित्यन्यः ।

"खरणाः स्यात् खरणसो विग्रो विख्रो विनासिकः"

इति रभसश्च । कवर्गद्वितीयादिरुदन्तश्चेति शाकटायनः । कातन्त्रटीकायां च दुर्गसिंहेनोक्तं—

"विशब्दादापि खुख्राः स्युर्मतान्तरचोदिताः ।
विख्रुर्विख्रस्तथा विग्रो नासाया विगमादिति ॥"

यत्तु "विनसा हतबान्धवा" (स०५. श्लो०८) इति भट्टिः । 'णस कौटिल्ये' विपूर्वात् पचाद्यचि साधुः । अपरे तु नासिकापर्यायो नसाशब्दोऽस्तीति वर्णयन्ति ॥

---

* 'खुरखराभ्यां वा नस्' इति मुद्रितवार्त्तिकपाठः ।

खुरणाः स्यात् खुरणसः

क्षीर०—खुराकारा नासिका अस्य खुरणाः विकटघोणः ॥

टीका०—खुरणआदिद्वयं तीक्ष्णनासिके । पूर्ववत्नसादेशादि ॥

प्रज्ञुः प्रगतजानुकः ।

ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात् संज्ञुः संहतजानुकः ॥ ४७ ॥

क्षीर०—प्रगते विरले वातादिदोषात्, तथा ऊर्ध्वे संहते च जानुनी अस्य । 'प्रसंभ्यां जानुनो ज्ञुः' (५. ४. १२९) । 'ऊर्ध्वाद् विभाषा' (५. ४. १३०) ॥

टीका०—यस्य नित्यं कादाचित्कं वा जानुनोर्मध्ये महदन्तरालं स प्रज्ञुः । प्रगते परिणाहेन गते जानुनी अस्येति प्रज्ञुः । 'प्रसंभ्यां जानुनो ज्ञुः' (५. ४. १२९) इति ज्ञुः । अदन्तोऽयमित्येके । तथाच शाकटायनसूत्रं—'संप्राज्जानुनो ज्ञुज्ञौ' इति ।

"संप्राभ्यां जानुनो ज्ञुज्ञावूर्ध्वे तु स्याद् विभाषया ।
संहते जानुनी यस्य संज्ञुः संज्ञः स उच्यते" ॥

इति कातन्त्रटीकापि । ऊर्ध्वे तिष्ठतो यस्य दूरमुखे जानुनी भवतः, असावूर्ध्वज्ञुः । 'ऊर्ध्वाद् विभाषा' (५. ४. १३०) इति ज्ञुः । संग्राडाओ इति ख्याते संज्ञद्वयम् । प्रज्ञुवद् रूपम् ॥

स्यादेडे बधिरः

क्षीर०—एडः पशुरिव एडः । बद्धौ कर्णावस्य बधिरः ॥

टीका०—एडद्वयं बधिरे । शब्दमगृह्णन् कर्णो बधिरः । 'बध बन्धने' । तिमिरवत् किरच् । तथा महाभारते—"कर्णौ मे बधिरीकृतौ" । तद्योगात् पुरुषोऽपि

---

१. 'था ज्ञा' क. ख. ङ. च. छ. झ. पाठः. २. 'अण्ड इ' क. ख. ज. झ. पाठः.

बधिरः। 'स्वाङ्गाद्धीनात्' (ग० सू. २. १२७) इत्यर्शआदिगणसूत्रेण अच्॥

कुब्जे गडुलः

क्षीर०—कुत्सित उब्जः कुब्जः। पृषोदरादिः। गडुरस्यास्ति गडुलः। सिध्मादित्वाल्लच्॥

टीका०—कुब्जद्वयं **कुब्जे**। 'उब्ज आर्जवे'। कुत्सितमुब्जतीति कुब्जः। शकन्ध्वादिः। पृष्ठगुडको गडुः तद्योगात् सिध्मादिलच्। गडुलः॥

कुकरे कुणिः।

क्षीर०—'कुण शब्दे'। 'कुपाणिः कुणिरि'ति नैरुक्ताः।
"कलम्बकस्त्ववाकर्णः खलतिस्त्वैन्द्रलुप्तिकः"॥

टीका०—कुकरद्वयं **कुम्प** इति ख्याते। कुत्सितः करः कुकरः। अर्शआद्यच्। 'कुण शब्दोपकरणयोः'। 'इगुपधात् †किः' (उ० ४. १२१) इति किः। कुणिर्ह्रस्वादिरिति गोवर्धनीयोणादिवृत्तिः।

"नन्दीवृक्षे कुणिः पुंसि कुकरेऽप्यन्यलिङ्गकः"

इति कोशान्तरम्। 'कूण सङ्कोचने'। चुरादिर्दीर्घादिरिति धातुप्रदीपः। तथा च—"कूणं बाहुयुगमि"ति भासकविः॥

पृश्निरल्पतनौ

क्षीर०—स्पृश्यते पृच्छ्यते वा पृश्निः॥

टीका०—पृश्निद्वयमल्पदेहे। 'स्पृश संस्पर्शे'। 'घृणिपृश्निपार्ष्णि-*भूर्णिचूर्णिः' (उ० ४. ९३) इत्यनेन निप्रत्ययेगुणाभावसलोपौ[2] निपात्यन्ते[3]। 'पृषु सेचने'। पृश्निरिति गोवर्धनः। षकारस्य शकारः। शेषं समानम्॥

---

१. 'यः', २. 'पौ', ३. 'ते' ङ. छ. पाठः.

---

† 'कित्', * 'चूर्णिभूर्णि' इति मुद्रितोणादिपाठः।

श्रोणः पङ्गौ

क्षीर० — 'श्रोणृ सङ्घाते' । कुटिलजङ्घापादः ॥

टीका० — श्रोणद्वयं जङ्घाविकले । 'श्रु श्रवणे' । 'धातृवस्यज्यतिभ्यो नः' (उ० ३. ६) इति बाहुलको नः । श्रोणः । 'स्पदि किञ्चिच्चलने' । 'बहुलमन्यत्रापि' (उ० १. ११६) इति कुप्रत्ययः सकारलोपः दकारस्य च गकारः । पङ्गुः । स्त्रियां 'पङ्गोश्च' (४. १. ६८) इत्यूङि पङ्गुरिति रूपम ॥

मुण्डस्तु मुण्डिते ॥ ४८ ॥

क्षीर० — मुण्ड्यते मुण्डः ॥

टीका०—मुण्डद्वयं मुण्डितमस्तके । 'मुडि मार्जने' । पचाद्यच् । मुण्डः । स्त्रियां मुण्डा । क्तप्रत्ययेन मुण्डितः ॥

वलिरः केकरे

क्षीर० — वलते वेष्टते वलिरं नेत्रं तद्योगाद् वलिरः । के मूर्ध्नि करोत्यक्षिणी चलत्तारकत्वात् केकरः । एनमुपाध्यायः काचरु इत्याख्यत् ॥

टीका० — वलिरः केकरे[1] । वर्तत इति शेषः । वलते स्वरश्मिभिः स्वविषयं चेष्टत इति वलिरशब्देन चक्षुरभिधीयते, अत्र तु नेत्रतारकमपाङ्गं प्रत्याकुप्यावेक्षके पुरुषे मत्वर्थलक्षणया वलियोगाद् वर्तते । के शिरोन्तिके कर्णाभ्यर्णभागे करोत्यक्षिरश्मिसञ्चारमिति केकरः । 'डुकृञ् करणे' इति धातुः ॥

खोडे खञ्जः

क्षीर०— 'खुड प्रतिघाते' । 'खञ्ज गतिवैकल्ये' । खञ्जः । दुश्चर्मा दुश्चर्मोऽपि ॥

---

१. 'ते वलिरः । व' क. ग. घ. ङ. पाठः. २. 'त्यत्राक्षाणि च' ख. पाठः. ३. 'खचर इ' ख. पाठः. ४. 'रे । वलिरद्वयं टेरे । 'टेरे वलिरकेकरौ' इति रभसः । व' क. ख. झ. पाठः. ५. 'दि' क. ग. घ. ङ. पाठः.

टीका० — खोडद्वयं **खोडे**। 'खुडि गतिवैकल्ये'। 'खजि गतिवैकल्ये'। कृतादित्वादुभयत्राच्प्रत्ययः। बहुलवचनात् खुडेर्नुमागमाभावो गुणश्च। खोडः खञ्जः तद्योगादुभयत्र बधिरवदच्। "अथ खञ्जके। खोडखोरौ" इति रभसः॥

त्रिषु जरावराः।

क्षीर०— जराशब्दादुत्तरा उत्तानशयादयः खञ्जान्तास्त्रिलिङ्गाः॥

टीका० — जराशब्दादवरा अर्वाचीना उत्तानशयाद्याः खञ्जान्तास्त्रिषु॥

जड़ुलः कालकः पिप्लुस्तिलकस्तिलकालकः॥ ४९॥

क्षीर०— जडेति जडुलः ज(न्तुलोमज?टुलो लोमश)त्वाद् वा। **काल एव कालकः**। **देहे कृष्णं लक्ष्म**॥

टीका० — जटुलत्रयं **जरुड इति ख्याते**। पञ्चापीत्यन्ये। 'जट झट सङ्घाते'। 'हृषेरुलच्' (उ० १. १०१) इति बाहुलक उलच्। जटुलः। काल इव कालकः। इवार्थे कः। पिप्लुः खरुशङ्कादौ द्रष्टव्य इति कलिङ्गः। साहचर्याच्च पुंस्त्वम्। तिलकद्वयं तिलकाकृतौ देहकालके। तथा च—

"कृष्णानि तिलमात्राणि नीरुजानि समानि च।
वातपित्तमलोत्सेकात् तान् विद्यात् तिलकालकान्॥"

इति। तिलवत् कालकस्तिलकालकः। तदुक्तं—'न हि गौरपिप्लुना तिलकालकेन[3] वा कुष्ठं भवति'॥

अनामयं स्यादारोग्यं

क्षीर०— आमयस्याभावोऽनामयम्। 'अव्ययं विभक्ति—' (२. १. ६) इत्यर्थाभावेऽव्ययीभावः॥

---

१. 'तु', २. 'तुलो जतुमत्त्वा' ग. घ. पाठः. ३. 'नापि वा' ङ. छ. पाठः.

टीका० — अनामयद्वयं रोगाभावे । न विद्यते आमयोऽस्मिन्निति बहुव्रीहिः । अरोगभाव आरोग्यम् ॥

चिकित्सा रुक्प्रतिक्रिया ।

क्षीर० — कितेर्व्याधिप्रतीकारे सन् ॥

टीका० — रुजो व्याधेः प्रतिक्रिया चिकित्सा । 'कित निवासे' । 'गुप्तिज्किद्भ्यः सन्' (३. १. ५) इति व्याधिप्रतीकारे सन् । 'अ प्रत्ययात्' (३. ३. १०२) इत्यकारप्रत्ययः । टाप् च ॥

भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥

क्षीर०— भिषज्यन्त्यनेन भिषज इति भेषजम् । भिषज् कण्ड्वादिः । 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५. ४. २३) इति ञ्याभावे भेषजम् । भेषं रोगं जयतीति दुर्गः । 'ओषधेरजातौ' (५. ४. ३७) स्वार्थेऽण् । 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५. ४. २३) स्वार्थे । भैषज्यम् । अविद्यमानो गदोऽस्यागदः । जयति रोगान् जायुः ॥

टीका० — भेषजपञ्चकमौषधे । भिषग् वैद्यः, 'तस्येदम्' (४. ३. १२०) इत्यण् । पृषोदरादित्वादेत्वम् । भेषजम् । औषधमिति । ओषधेरजातौ' (५. ४. ३७) इत्यण् । 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५. ४. २३) । भैषज्यम् । नास्ति गदोऽस्मिन्नित्यगदः । जयति रोगानिति जायुः । 'कृवापाजि —' (उ० १. १) इत्यादिना उण् ॥

स्त्री रुग् रुजा चोपतापरोगव्याधिगदामयाः ।

क्षीर० — रुज्यन्तेऽनया रुक् । क्विप् । रुजा । भिदाद्यङ् । व्याधीयतेऽपथ्यैर्व्याधिः । गदति व्यथां गदः । आमिनोत्यामयः । 'अम रोगे' अस्माद् वा । आमोऽपि ॥

टीका० — रुक्सप्तके रोगसामान्ये । 'रुजो भङ्गे' । सम्पदादिपाठाद् अकर्तरि च कारके क्विप् । रुजेति । भिदादिपाठाद् अकर्तरि च कारके

अङ् । उपतापयति मानसमित्युपतापः । पचादिः । अकर्तरि च कारके घञि वा पचाद्यचि वा रोगः । विविधा आधयो मनसः पीडा अत इति व्याधिः । गद इति । 'गद व्यक्तायां वाचि' । 'खनो घ च' (३. ३. १२५) इति घित्करणाद(न्य)त्रापि घः । 'स्तन गदी देवशब्दे' इत्यतः कृताद्यकारप्रत्ययान्तो वा । 'अम रोगे' । चुरादिः । पचाद्यच् । आमयो दीर्घादिः । अनित्यत्वाद् 'णेरनिटि' (६. ४. ५१) इति न णिलोपः । तथा(च) "पीते यूष्णि निरामयः" इति ॥

पुमान् यक्ष्मा क्षयः शोषः

क्षीर० — यक्ष्यते पूज्यते रोगराजत्वाद् यक्ष्मा । राजयक्ष्मापि । क्षीयतेऽनेन क्षयः । शुष्यन्त्यनेन शोषः ॥

टीका० — क्षयत्रयं क्षयरोगे । 'क्षीष् हिंसायाम्' । पचादिः । क्षयः । शुषेः पचाद्यच् । शोषः । 'यक्ष पूजायाम्' । चुरादिः । *'मनिन्' (उ० ४.१४६) इति मनिन् । यक्ष्मा ॥

प्रतिश्यायस्तु पीनसः ॥ ५१ ॥

क्षीर० — प्रतिश्यायते स्रवति प्रतिश्यायः । 'श्याद्व्यधा —' (३. १. १४१) इति णः । पीनं स्यति अन्तं नयति पीनसः ॥

टीका० — प्रतिश्यायद्वयं पलिस इति ख्याते । 'श्यैङ् गतौ' रुजत्यर्थः । 'श्याद्व्यधा —' (३. १. १४१) इत्यादिना णः । आतो युक् । प्रतिश्यायः । पीनमवसाययति श्यति तनूकरोति वा पीनसो दन्त्यसस्तालव्यशो वा । वैद्यके तु पृथगेवेदं नामद्वयम् ॥

स्त्री क्षुत् क्षुतं क्षवः पुंसि

क्षीर० — क्षवणं क्षुत् । क्विप् । क्तः । अप् ॥

टीका० — क्षुत्त्रयं भाङ्गि इति ख्यातायाम् । 'टुक्षु शब्दे' । सम्पदादिक्विप् । क्षुत् । 'नपुंसके भावे क्तः' (३, ३. ११४) । क्षुतम् । 'ऋदोरप्' (३. ३. ५७) । क्षवः ॥

---

* सर्वधातुभ्यो मनिन् इति मुद्रितोणादिपाठः ।

कासस्तु क्षवथुः पुमान् ।

क्षीर० — कासतेऽनेन कासः । क्षौत्यनेन क्षवथुः ॥

टीका० — कासद्वयं **कासे** । 'कास शब्दकुत्सायाम्' । दन्त्यान्तः । भावे घञ् । कासः । पचाद्यचि वा । क्षवथुरिति । 'टु क्षु शब्दे' । 'ट्वितोऽथुच्' (३. ३. ८९) ॥

शोफस्तु श्वयथुः शोथः

क्षीर० — शवति विसर्पति शोफः शोथश्च । शूयतेऽनेन श्वयथुः ॥

टीका० — शोफत्रयं **शोफे**[1] । 'शुप शुन्फ ग्रन्थे' । तालव्यशः । 'अकर्तरि च—' (३. ३. १९) इति घञ् । शोफः । 'टुओश्वि गतिवृद्ध्योः' । 'ट्वितोऽथुच्' (३. ३. ८९) । श्वयथुः । 'शु गतौ' । बाहुलकस्थन् । शोथः ॥

पादस्फोटो विपादिका ॥ ५२ ॥

क्षीर० — 'पादशतस्ये त्यन्यत्रापि' (वा०५. ४. १) इति वक्तव्याद् वुन्लोपौ वा ॥

टीका० — पादस्फोटद्वयं **पावाभट्ट** इति ख्याते । विपूर्वात् पदेः 'रोगाख्यायां ण्वुल् बहुलम्' (३. ३. १०८) इति ण्वुल् । विपादिका ॥

किलाससिध्मे

क्षीर० — समे इति शेषः । के लसति किलासम् । सिध्यति सिध्मम् । श्वित्राख्यम् । सिध्मेति नान्तोऽपि ॥

टीका० — किलासद्वयं **सिहुल्ली**[2]ति ख्याते । कुत्सितं लस्यते श्लिष्य-

---

१. 'थ', २. 'थे' ङ. छ. पाठः. ३. 'गु' ङ. छ, 'भु' क. ख. च, 'हुल्मीति' ज. पाठः

तेऽनेनेति किलासम् । पृषोदरादिः । ‡'षिधू हिंसासंराध्योः' । मनिन् । सिध्म नान्तम् । "सिध्मं शुष्मं कुट्टिमं युग्मम्" इत्यदन्तेऽप्यरुणः । सद्वयं दन्त्यम् ॥

कच्छ्वां तु पाम पामा विचर्चिका ।

क्षीर० — कषति कच्छूः । पिबत्यङ्गं पाम । पामा । 'डाबुभाभ्यामन्यतरस्याम्' (४. १. १३) । विचर्चयति विचर्चिका । गुल्फादिसन्धिषु सूक्ष्मपिटकः ॥

टीका० — कच्छूचतुष्कं खसुरोगे । 'कष शिष जष झष हिंसार्थाः' । 'कषेश्छश्च' (उ० १. ८७) इत्यूप्रत्ययः छश्चान्तादेशः । कच्छूर्दीर्घान्ता । 'पा पाने' । मनिनि पामा नान्ता । पक्षे 'डाबुभाभ्यामन्यतरस्याम्' (४. १. १३) इति पामा डाबन्ता । 'चर्च सङ्कथाने' । चुरादिः । 'रोगाख्यायां ण्वुल् बहुलम्' (३. ३. १०८) इति ण्वुल् । विचर्चिका ॥

कण्डूः खर्जूश्च कण्डूया

क्षीर० — कण्डूतिः[1] कण्डूः । भावे क्विप् । 'अ प्रत्ययात्' (३. ३. १०२) । खर्जयति खर्जूः ॥

टीका० — कण्डूत्रयं कण्डूयायाम् । 'कड मदे' । 'कडेर्नुम् च' इत्यूप्रत्ययः । कण्डूर्दीर्घान्ता । कण्डौ कण्डूः इति रूपम् । 'खर्ज मार्जने' । 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उ० १. ८४) । खर्जूर्दीर्घान्ता । कण्डूयेति । कण्डूर्नामधातुः[2] । 'कण्ड्वादिभ्यो यक्' (३. १. २७) । 'अ प्रत्ययात्' (३. ३. १०२) इति भावे अकर्तरि कारके वा अप्रत्ययः । कण्डूतिरसाधुरिति भागवृत्तिः । बहुलवचनात् क्तिना साधुरिति रक्षितः । तथा च — "कण्डूतिर्वपनादपैति शिरसः" इति माधुराजः ॥

विस्फोटः पिटकस्त्रिषु ॥ ५३ ॥

---

१. 'मा सडा' ख. २. 'ण्डूः कण्डूया भा' ख. ३. 'ण्ड्वादिर्नाम' क. ख. च. झ.

‡ 'षिधु संराद्धौ' इत्येव मुदितधातुपाठे दृश्यते ।

क्षीर० — विस्फोटति विस्फोटा । पिटति संश्लिष्यति पिटकः ।

टीका० — विस्फोटद्वयं स्फोटा इति ख्याते । स्फुट 'विकसने' । घञ् । स्फोटः । 'पिट शब्दसङ्घातयोः' । वुन् । पिटकः पवर्गप्रथमादिः । "विस्फोटे विटिका स्त्रियाम्" इत्यमरमालायां वकारादिरपि ॥

व्रणोऽस्त्रियामीर्मरुः क्लीबे

क्षीर० — व्रणयति व्रणः । ईरयत्यङ्गमीर्मम् । इयर्त्यरुः । उस् ॥

टीका० — व्रणत्रिकं व्रणमात्रे । 'व्रण गात्रविचूर्णने' । पचादिः कृतादिर्वा । व्रणोऽस्त्रियामिति सम्बन्धः । 'ईर प्रेरणे' । बाहुलको मन् । ईर्मस्त्रियामिति केचित् । 'ऋ गतौ' । 'अर्तिपृवपियजितनिधनि[1]त्रपिभ्यो नित्' (उ०२. ११७) इत्युसि अरुः सान्तं क्लीबे ॥

नाडिव्रणः पुमान् ।

क्षीर० — नाड्या व्रणम् । नाड्याः समासे पुंस्त्वम् ॥

टीका०— यो व्रणः सदा गलति, स नाडीव्रणः ॥

कोठो मण्डलकं

क्षीर० — कूयते शब्द्यते कोठः । मण्डलाकृतिमण्डलकम् ॥

टीका० — कोठद्वयं मण्डलाकोड्डे इति ख्याते । 'कुठ आलस्ये' । अच् । कोठः । मण्डलमुक्तं प्राक् । ततः 'कुत्सिते' (५. ३. ७४) इति कन् । मण्डलकम् ॥

कुष्ठश्वित्रे

क्षीर० — समे इति शेषः । कुष्णात्यङ्गं कुष्ठम् । कुत्सिते तिष्ठति वा । 'अम्बाम्बगोभूमि —' (८. ३. ९७) इति षत्वम् । श्वेतते श्वित्रम् ॥

---

१. 'फोड इ' क. ख. च. ज. झ. पाठः. २. 'ट्' ज. पाठः.

---

† 'तपि' इति मुद्रितेषणादिपाठः. ।

टीका० — कुष्ठद्वयं **श्वेतकुष्ठे**। 'कुष निष्कर्षे'। 'हनिकुषि*नीरमिकाशिभ्यः क्थन्' (उ० २. २.)। सामान्यत्वग्विकारेऽपि कुष्ठम्। तथाच 'श्वित्रिकुष्ठकुलानि च' इति मनुः। 'श्विता वर्णे'। 'स्फायितञ्चिवञ्चिशकिक्षिपि†क्षुदिघृवितृवितृपिवन्युन्दिश्विति—' (उ० २. १३) इत्यादिना रक्। श्वित्रम्॥

दुर्नामकार्शसी॥ ५४॥

क्षीर० — **पापरोगत्वाद् दुर्नाम। इयर्त्यर्शः। गुदजं गुदकीलकं च॥**

टीका० — दुर्नामकद्वयमर्शोरोगे। अमङ्गलतया दुः निन्दितं नाम अस्येति दुर्नामकम्।

"स्याद् दीर्घकोषिकायां स्त्री दुर्नाम क्लीबमर्शसि।"

'ऋ गतौ'। 'व्याधौ शुट् च' (उ०. ४. १९७) इत्यसुन् शुडागमश्च। अर्शः। एवमुणादौ तालव्यवत् सान्तम्॥

आनाहस्तु विबन्धः स्याद्

क्षीर० — **आनहनं विण्मूत्रविरोधः॥**

टीका० — आनाहद्वयं **मूत्रपुरीषयोर्विबन्धने**। 'णह बन्धने'। आङ्पूर्वः। 'अकर्तरि च—'(३. ३. १९) इति घञ्। आनाहः। 'बन्ध बन्धने'। पूर्ववद् घञ्। विबन्धः॥

ग्रहणीरुक् प्रवाहिका।

क्षीर० — **गृह्णाति ग्रहणी जाठरोऽग्निः[1]। तच्छैथिल्याद् रुग् रोगः। मलप्रवहणं प्रवाहिका। 'रोगाख्यायां ण्वुल्—' (३. ३. १०८)॥**

टीका० — ग्रहणीद्वयं **ग्रहणीरोगे**। 'ग्रहेरणिः'‡ (उ० ९. ६८)

---

१. 'ग्निः। रु' ग. पाठः.

---

* 'मरिका', † 'क्षुदिसृषितृपिहपिवन्युन्दि', ‡ 'निः' इति मुद्रितौणादिपाठः।

ग्रहणिः । ङीषि ग्रहणी च । रुगिति स्पष्टार्थम् । प्रवाहिकेति । 'रोगाख्यायां ण्वुल् बहुलम्' (३. ३. १०८) इति ण्वुल् ॥

प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥ ५५ ॥

क्षीर० — प्रच्छर्दनं प्रच्छर्दिका । 'रोगाख्यायां ण्वुल्—' (३. ३. १०८) । वमनं वमिः । छर्दी च ॥

टीका० — प्रच्छर्दिकाचतुष्टयं वान्तौ । 'छर्द वमने' पूर्ववद् ण्वुल् । 'टुवम उद्गिरणे' । कृप्यादित्वादिक् । वमिः । छर्दिश्च । द्वितोऽथुचि वमथुः ॥

व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगन्दराः ।

क्षीर० — विद्रात्यनया विद्रधिः विद्रो धीयतेऽस्यां वा । मेहति मूत्रयतेऽनेन मेहः । प्रमेहोऽपि । दीपप्रदीपवत् । भगं दारयति भगंदरः स्फिक्सन्धौ पिटकम् । 'पूस्सर्वयोर्दारिसहोः' (३. २. ४१) इत्यत्र 'भगे च दारेः' (वा० ३. २. ४१) इति वक्तव्यात् खश् ।

"श्लीपदं पादवल्मीकं केशघ्नं त्विन्द्रलुप्तकम्" ॥

टीका० — विद्रध्यादयश्चत्वारः प्रत्येकं व्याधिभेदाः । विद्रधिरुदरान्तर्गतगण्डविशेषः । विद्रो द्रवो धीयतेऽ(स्मिन्नि?स्यामि)ति विद्रधिः । 'कर्मण्यधिकरणे च' (३. ३. ९३) इति किः । ज्वरः प्रसिद्धः । 'ज्वर रोगे' । कृतादिः । मेहो बहुमूत्रता । 'मिह सेचने' । घञ् । 'भगे च दारेरिति वक्तव्यम्' (वा० ३. २. ४१) इति खच् । 'खचि ह्रस्वः' (६. ४. ९४) इति ह्रस्वः । भगन्दरः । असौ गुदसन्निधौ भवति ॥

अश्मरी मूत्रकृच्छ्रं स्यात्

क्षीर० — व्याधिभेद इत्येव । अश्माभं शुक्रं राति ददात्यश्मरी ॥

टीका० — अश्मरीद्वयं मूत्रकृच्छ्रे । अ(श्म?श्मानं) शिलां राति ददातीत्यश्मरी । 'आतोऽनुपसर्गे कः' (३. १. ३) । गौरादिङीष् । मूत्रकृच्छ्रं मूत्रविबन्धमात्रम् । इह तु मूत्रविबन्धाविशेषादेकत्वम् ॥

पूर्वे शुक्रावधेस्त्रिषु ॥ ५६ ॥

क्षीर० — इत ऊर्ध्वं शुक्रात् पूर्वे मूर्छितान्ता वाच्यलिङ्गाः ॥

टीका० — अतःपरं शुक्रावधेः पूर्वे शब्दास्त्रिषु ॥

रोगहार्यगदङ्कारो भिषग् वैद्यश्चिकित्सके ।

क्षीर० — अगदः क्रियतेऽनेन अगदङ्कारः । 'कारे सत्यागदस्य' (६. ३. ७०) इति मुम् । भिषज्यति भिषक् । विद्यामधीते वेद वा वैद्यः । आद्यौ सामान्येनौषधादावपीत्येके ॥

टीका० — रोगहारिपञ्चकं वैद्ये । रोगहारीति ताच्छील्ये णिनिः[1] । 'कारे सत्यागदस्य' (६. ३. ७०) इति मुम् । अगदङ्कारः । भिषक्छब्दः कण्ड्वादिः चिकित्सावचनो मूर्धन्यवान् । भिषज्यति चिकित्सत इति भिषक् । 'अन्येभ्योऽपि —' (३.२.१७८) इति क्विप् । 'यस्य हलः' (६. ४. ४९) इति यशब्दस्य लोपः । अकारसहितस्य यकारस्य लोपात् 'ह्रस्वस्य पिति कृति तुक्' (६. १. ७१) इति तुगभावः । आयुर्वेदात्मिकां विद्यां वेत्ति तदधीत इति वा वैद्यः । 'तदधीते तद् वेद' (४. २. ५९) इत्यण् । स्त्रियां वैद्यी । ङीष् । योपधा । चिकित्सा उक्ता । ततो ण्वुल् ॥

वान्तो निरामयः कल्य उल्लाघो निर्गतो गदात् ॥ ५७ ॥

क्षीर० — वमति वान्तः । वार्त इति तु युक्तं, यद् वक्ष्यति 'वार्तं फल्गुन्यरोगे (तु ? च) त्रिषु' । वृत्तिरस्यास्ति वार्तः । 'प्रज्ञाश्रद्धा†चार्थवृत्तिभ्यो णः' (५. २. १०१) । कलासु साधुः कल्यः । उल्लङ्घते स्मोल्लाघः । क्तः । 'अनुपसर्गात् फुल्लक्षीब—' (८. २. ५५) इति साधुः ॥

---

१. 'लिको णि' ङ. छ. पाठः.

---

† 'चाभ्यो णः' इत्येवाष्टाध्यायीपाठः.

टीका० — रोगादनन्तरनिर्गते **नीरुजे** वार्तचतुष्कम्। वृत्तिः जीवितं प्रशस्तमस्येति वार्त्तः। 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१)। कलतिः कामधेनुः। 'अध्न्यादयश्च' (उ० ४. ११३) इति यः। कल्यः। ('वाःरा)घृ लाघृ सामर्थ्ये'। 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (८. २. ५५) इति निष्ठायां उल्लाघः साधुः॥

ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः।
आतुरोऽभ्यमितोऽभ्यान्तः

क्षीर० — ग्लायति स्म ग्लानः। 'संयोगादेरातो धातोः—' (८. २. ४३) इति निष्ठानत्वम्। ग्लायति तच्छीलो ग्लास्नुः। 'ग्लाजिस्थश्च * क्स्नुः' (३. २. १३९)। आमयोऽस्त्यस्यामयावी। सर्वत्र आमयस्योपसङ्ख्यानाद् विनिर्दीर्घश्च। व्याधिः सञ्जातोऽस्य व्याधितः। अपटुर्मन्दः। आतोरत्यातुरः आतर(न्ति? ति) रोगं वा। अभितोऽभ्यतेऽस्मादभ्यमितः अभ्यान्तः। 'रुष्यमत्वर —' (७. २. २८) इति वेट्।

"सङ्घातमृत्युर्मरको मरिर्मारी च देवता।"

इति श्रीहर्षः॥

टीका० — ग्लानद्वयं **क्षीणदेहे**। 'ग्लै हर्षक्षये'। 'संयोगादेरातो धातोर्यण्वतः' (८. २. ४३) इति निष्ठानत्वम्। ग्लानः। 'ग्लाजिस्थश्च क्स्नुः' (३. २. १३९)। ग्लास्नुः। आमयाविसप्तकं **रोगिणि**। 'सर्वत्रामयस्योपसङ्ख्यानम्' (वा० ५. २. १२२) इति विनिः दीर्घश्च। आमयावी नान्तः। विकृत इति व्याधिसंयोगवृत्तेः कृञो हिंसार्थात् कर्मणि क्तः। 'तदस्य सञ्जातं तारकादिभ्य इतच्' (५. २. ३६)। व्याधितः। पटुर्न भवतीत्यपटुः। आतुर इति 'अत सातत्यगमने'। मद्गुरादित्वादुरच् दीर्घश्च। तथाच 'अभ्यमितोऽपटुरातुरः' इति रभसः। 'अम गत्यादिषु'। 'रुष्यमत्वरसङ्घुषास्वनाम्' (७. २. २८) इतीड्विकल्पः। अभ्यमितः। इडभावे 'अनुनासिकस्य —' (६. ४. १५) इत्यादिना दीर्घत्वेन अभ्यान्तः॥

---

* 'स्नुः' इति मुद्रिताष्टाध्यायीपाठः।

समौ पामनकच्छुरौ ॥ ५८ ॥

क्षीर० — पामास्यास्ति पामनः। पामर इत्येके। द्वावपीति श्रीभोजः। कच्छूरस्यास्ति कच्छुरः। 'कच्छ्वा ह्रस्वत्वं च' (वा० ५. २. १०७) इति रः ॥

टीका० — पामनद्वयं पटुरोगयुते। 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' (५. २. १००) इति यथाक्रमं नः। पामनः। 'कच्छ्वा ह्रस्वत्वं च' (वा० ५. २. १०७) इति मत्वर्थे रः। ह्रस्वत्वम्। कच्छुरः ॥

दद्रुणो दद्रुरोगी स्याद्

क्षीर० — पामादित्वात् 'शाकी*पलाकीदद्रूणां ह्रस्वश्च' (वा० ५. २. १००) इति नः। दीर्यतेऽनया दद्रुः ॥

टीका० — दद्रुणद्वयं दद्रुयुक्ते। †'दरिद्रायालोपश्च' (उ० १. ९३) इत्यूप्रत्ययः धातोरिकाराकारयोर्लोपश्च। दद्रूः रेफयुक्तो दीर्घान्तश्च। ततो ‡'दद्रूा ह्रस्वश्च' (ग० ५. २. १००) इति मत्वर्थीयो नः। दद्रुणः। 'द्वन्द्वोपतापगर्ह्यात्—' (५. २. १२८) इति मत्वर्थीय इनौ 'इको ह्रस्वोऽङ्यो गालवस्य' (६. ३. ६१) इति ऊकारस्य ह्रस्वत्वे दद्रुरोगी ॥

अर्शोरोगयुतोऽर्शसः।

क्षीर० — अर्शांसि सन्त्यस्यार्शसः। 'अर्शआदिभ्योऽच्' (५. २. १२७) ॥

टीका० — अर्शोरोगयुते अर्शसः। मत्वर्थे अर्शआद्यच् ॥

वातकी वातरोगी स्यात्

---

* 'पलाली' इति मुद्रितगणपाठः। † 'दरिद्रातेर्यालोपश्च' इति मुद्रितोणादिपाठः। ‡ 'शाकीपलालीदद्रूणां ह्रस्वत्वं च' इति मुद्रितगणपाठः।

क्षीर० — वातो विद्यतेऽस्य वातकी । 'वातातिसाराभ्यां कुक् च' (५. २. १२९) इतीनिः ॥

टीका० — वातकिद्वयं **वातरोगिणि** । 'वातूलो वातकी' इति त्रिकाण्डशेषः । 'वरतनुर्वीतूलतां लङ्घिता' इति राजशेखरश्च । 'वातातिसाराभ्यां कुक् च' (५. २. १२९) इति मत्वर्थे इनिः, कुक् च । वातकी ॥

सातिसारोऽतिसारकी ॥ ५९ ॥

क्षीर० — **एकदेशविकृतत्वादतीसारक्यपि ॥**

टीका० — सातिसारद्वयमतिसारयुक्ते । अतिसारेण युक्तः सातिसारः । वातकीवदतिसारकी । 'उपसर्गस्य घञि—' (६. ३. १२२) इति दीर्घत्वे सति अतीसारकीत्यपि ॥

स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः

क्षीर० — **'क्लिन्नस्य ‡ चुलचिलपिलो लश्च' (वा० ५. २. ३३) इति वक्तव्यात् साधवः ॥**

टीका० — क्लिन्नाक्षे **रोगादिना गलिताक्षे**[1] चिल्लत्रयम् । 'क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी' (वा० ५. २. ३३) इति वक्तव्येन क्लिन्नस्य चिल्पिलावित्येतावादेशौ भवतः । लश्च प्रत्ययः । चिल्लः पिल्लः । 'चुलादेशश्च वक्तव्य' (वा० ५. २. ३३) इति क्लिन्नस्य चुल् आदेशः लश्च प्रत्ययः । चुल्लः । उपचारेण पुरुषेऽप्येतेषां वृत्तिः ॥

क्लिन्नेऽक्षिण चाप्यमी ।

क्षीर० — चक्षुःक्लेदेऽपि । तेन चक्षुर्गतः क्लेदश्चुल्लो नाम रोगः तद्योगाच्चुल्लं चक्षुः । चुल्लचक्षुष्ट्वाच्चुल्लः पुमान् ॥

---

१. 'क्षे पुरुषे चि' क. ख. ङ. छ. ज. पाठः.

---

‡ 'चिल्पिल् लश्चास्य चक्षुषी', इति मुद्रितवार्तिकपाठः ।

टीका० — अमी चिल्लादयो न केवलं तद्युक्ते, किन्तु क्लिन्नेऽप्यक्षिणि ॥

उन्मत्त उन्मादवति

क्षीर० — उन्मादो वातभूतातिदोषाच्चित्तविभ्रमः ॥

टीका० — उन्मत्तद्वयमुन्मादयुक्ते। 'न ध्याख्यापृमूर्छिमदाम्' (८. २. ५७) इति निष्ठातकारे नत्वाभावः। उन्मत्तः ॥

श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥

क्षीर० — श्लेष्मास्यास्ति सिध्मादित्वाल्लच्। पामादित्वान्नः ॥

टीका० — श्लेष्मलत्रिकं श्लेष्मयुक्ते। सिध्मादिलच्। श्लेष्मलः। पामादित्वान्नः। श्लेष्मणः। कफीति 'द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः' (५. २. १२८) ॥

न्युब्जो भुग्ने रुजा[1]

क्षीर० — न्युब्जनान्न्युब्जः। घञ्। 'भुजन्युब्जौ पाण्युपतापयोः' (७. ३. ३१) इति साधुः। भुग्नः कुब्जः। न्युब्जेन भुग्नत्वेन योगान्न्युब्जः पुमान्। यच्छाश्वतः —

"विद्यादधोगतं न्युब्जं न्युब्जः कुब्ज उदाहृतः" ॥

टीका० — रुजा व्याधिना वक्रे न्युब्जः 'उब्ज आर्जवे'। पचादिः। 'भुजन्युब्जौ पाण्युपतापयोः' (७. ३. ६१) इति कुत्वाभावनिपातः ॥

वृद्धनाभौ तुन्दिलतुन्दि[2]भौ।

क्षीर० — तुन्दिरुन्नता नाभिः। तुन्दस्तु जठरम्। इत्थं लच्। 'तुन्दिवलि —' (५. २. १३९) इति भः। तच्चैकदेशविकृतस्यानन्यत्वात् (?) ॥

---

१. 'जा भु' ख. पाठः. २. 'न्द' ङ. पाठः.

टीका० — वृद्धनाभित्रयं **गोण्डनाभौ** । सिध्मादित्वाल्लच् । तुन्दिलः । 'तुन्दिवलिवटेर्भः' (५. २. १३९)। तुन्दिभः ॥

किलासी सिध्मलः

क्षीर० — सिध्मादित्वाल्लच् ॥

टीका० — किलासिद्वयं **सिध्मयुक्ते** । कफिवत् किलासी । सिध्मादित्वाल्लच् । सिध्मलः ॥

अन्धोऽदृक्

क्षीर० — 'अन्ध दृष्ट्युपसंहारे' । नास्ति दृगस्यादृक् ॥

टीका० — अन्धद्वयमन्धे । 'अन्ध दृष्ट्युपघाते' । चुरादिः । पचाद्यच् । अन्धं चक्षुरस्यास्ति अन्धः । खञ्जवदर्शआद्यच् । अदृक् शान्तः । 'दृशिर् प्रेक्षणे' करणे सम्पदादिक्विप् । नञ्समासः ॥

मूर्छाले मूर्तमूर्छितौ ॥ ६१ ॥

क्षीर० — मूर्छास्त्यस्येति 'प्राणिस्थादातो लच् —'(५. २. ९६)। 'क्षुद्रजन्तूपतापाच्चेष्यते' । मूर्छतीति मूर्तः । 'राल्लोपः' (६. ४. २१) इति छलोपः । 'न ध्याख्या'—(८. २. ५७) इति नत्वाभावः । मूर्छा सञ्जातास्य मूर्छितः । चुरादित्वान्मूर्छेः क्तो वा ॥

टीका० — मूर्छालत्रयं **मूर्छायुक्ते** । 'क्षुद्रजन्तूपतापाच्च' इति सिध्मादिगणसूत्रेण लच् । मुर्छालः । 'मुर्छा मोहसमुच्छ्राययोः' । क्तः । 'राल्लोपः' (६. ४. २१) इति छलोपः । उन्मत्तवन्नत्वाभावः । मूर्तः । व्याधितवन्मूर्छितः । त्रिष्वित्यधिकारो गतः ॥

शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ।

क्षीर०—शोकति स्रवति शुक्रम्। तेजयति तेजः। असुन्। रीयते रेतः। 'रीङ् स्रवणे'। वीज्यते वीजम्। वीजिवल्लौकिकः। वीरे अक्लीबे साधु वीर्यम्। 'वीरवीर्यौ च' इति गणपाठाद् वा भावे यः। इन्द्रस्यात्मनो लिङ्गमिन्द्रियम्। 'इन्द्रियमिन्द्रलिङ्गम्—' (५. २. ९३) इति साधुः॥

टीका०—शुक्रषट्कं रेतसि। शुक्र उक्तः। 'तिज निशाने'। असुन्। तेजः। 'री गतिरेषणयोः'। 'स्रुरीभ्यां तुट् च' (उ० ४. २०३) इत्यसुन् प्रत्ययस्य तुडागमश्च। रेतः। हेतौ बीजमुक्तम्। 'शूर वीर विक्रान्तौ'। चुरादिः। 'अचो यत्' (३. १. ९७)। वीर्यम्।

"नृबीजमिन्द्रदैवत्यं तस्मादिन्द्रियमुच्यते"

इति मोक्षधर्मे। 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' (५. २. ९३) इतीन्द्रियं निपातितम्। तत्रेतिकरणस्य प्रकारार्थत्वादिन्द्रदैवत्यमिन्द्रियमित्यपि सिध्यति॥

मायुः पित्तं

क्षीर०—मिनोति मलान् स्रंसकत्वान्मायुः। पतति स्रंसति पित्तम्॥

टीका०—मायुद्वयं पित्ते। मिनोतेर्वायुवन्मायुः। अपिददातीति पित्तम्। 'डुदाञ् दाने'। क्तः। स च 'आदिकर्मणि क्तः कर्तरि च' (३. ४. ७१) इति कर्तरि। 'अच उपसर्गात् तः' (७. ४. ४७) इत्याकारस्य तकारः।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः"

इत्यकारलोपः॥

कफः श्लेष्मा

क्षीर०—कात् फलति कफः। श्लिष्यति श्लेष्मा॥

---

१. 'ते वेति वा वी' क. ग. घ. ङ. पाठः. २. 'वीर्यमि' क. पाठः.

टीका० — कफद्वयं **श्लेष्मणि** । केन तोयेन स्फातिर्वृद्धिरस्येति कफः । पृषोदरादिः । 'श्लिष आलिङ्गने' । मनिन् । श्लेष्मा ॥

स्त्रियां तु त्वगसृग्धरा ॥ ६२ ॥

क्षीर० — 'त्वच संवरणे' । असृजो धरा ॥

टीका० — त्वगादिद्वयं **चर्माणि** । वल्कले त्वगुक्ता ।

"त्वचवेष्टितमस्थिपञ्जरं यदि कायं समवैषि[1] योषिताम्[2]"

इत्यदन्तोऽप्यश्वघोषेणोक्तः । असृजं वृणातीत्यसृग्धरा । पचादिः । केचिद् (वृ?धृ)ञ् धारणे साधयन्ति ॥

पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।

क्षीर० — 'पिश अवयवे' । तरो बलमस्त्यत्र तरसं, तरत्यनेन कार्श्यं वा । मन्यते मांसम् । 'मां स भक्षयितामुत्र' इति नैरुक्ताः । पल्यतेऽनेन पललम् । यच्छाश्वतः —

"पललं तिलमिश्रं स्यात् पललं पिशितेऽपि च" ।

क्रव्यते क्रव्यम् । 'क्रुङ् गतौ' । आमिष्यते आमिषम् । जाङ्गलं च । पलं नानार्थे ॥

टीका० — पिशितषट्कं **मांसे** । 'पिश अवयवे' । तालव्यान्तः । क्तः । पिशितम् । तरतेः 'अर्त्यातिमिचमि—'(उ० ३. ११७) इत्यादिना बाहुलकोऽसच् । तरसम् । 'मन ज्ञाने' । 'मनेर्दीर्घश्च' (उ० ३. ६४) इति सः । मांसम् । 'पल गतौ' । वृषादिकलच् । पललम् । 'क्रव्ये च' (३. २. ६९) इति प्रतिषेधदर्शनान्मांसशब्दस्य पृषोदरादित्वात् क्रव्यभावः । क्रव्यम् । 'अम रोगे' । 'अमेर्दीर्घश्च' इति टिषच् दीर्घत्वं च । आमिषं मूर्धन्यवत् । चान्द्रलिङ्गानुशासने मांसामिषौ

---

१. 'वेषयो' ङ. छ. पाठः. २. 'ति' क. पाठः. ३. 'पृषोदरादि' ङ. छ. पाठः.

---

† 'वि' इति मुद्रितोणादिपाठः ।

पुन्नपुंसकयोरुक्तौ ।

"आमिषाशनं प्रयत्नात् प्रमदां[1] परिवर्जयेत् ततःप्रभृति[2]"

इति ज्योतिषे ह्रस्वादिरपि ॥

उत्तप्तं शुष्कमांसं यत् तद् बल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥

क्षीर० — उत्तप्यते शोष्यते उत्तप्तम् । बलं लुनाति बल्लूरम् । बलिः सौत्रो वा ॥

टीका० — उत्तप्तत्रयं **शुष्कमांसे** । ऊर्ध्वं तप्तं उत्तप्तम् । 'वल वल्ल संवरणे' । 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४.९१) । वल्लूरं दीर्घमध्यम् ॥

रुधिरेऽसृग्लोहितास्रक्तक्षतजशोणितम् ।

क्षीर० — रुणद्धि स्रोतांसि रुधिरम् । अस्यतेऽनेन सृज्यते वा-सृक् । लोहितं रक्तं च वर्णतः । अस्यतेऽस्रम् । शोणति शोणितम् । 'शोणृ वर्णे' ॥

टीका० — रुधिरसप्तकं **रक्ते** । मिहिरवद् रुधिरम् । असृग् जान्तम् । सृगालीपर्याये सकारो निरूपितः । 'असु क्षेपणे' । 'स्फायितञ्चिवञ्चि—'(उ० २.१३) इत्यादिना रक् । अस्रम् । क्षताज्जातं क्षतजम् । पूर्ववद् डः । 'शोणृ वर्णगत्योः' । क्तः । शोणितम् ॥

बुक्काग्रमांसं

क्षीर० — बुक्कयते स्वादुत्वान्मृग्यते बुक्का । नान्तः । पुंस्ययम् । स्त्रीत्येके । वृक्कापीति वैद्याः । अग्रं मुख्यम् ॥

टीका० — वृक्कद्वयं **बुक्क** इति ख्याते । वृक्क नान्तं क्लीबं च ।

"अग्रमांसं मतं वृक्कं मण्डल(कोऽग्रे? के) मलाशये"

इत्यन्ये ।

"शोणितान्त्रे स्त्रियां वृक्का बृक्कं तु (समर?) द्वयोः"

इति रभसः । 'बुक्क परिभाषणे' । पचाद्यचि बुक्कमित्यन्ये । 'बुक्को नरेऽग्रमांसे स्याद्' इति वोपालितः ॥

---

१. 'मादात् प' ङ. छ., 'यतां प' ज. पाठः. २. 'वृत्तिरिति' च. ज. पाठः.

हृदयं हृद्

क्षीर०— ह्रियते हृत् । जीवाधारपद्मम् । दान्तं प्रकृत्यन्तरम् ॥

टीका०— हृदयद्वयं हृदये । चित्ते हृदयमुक्तम् । हरतीति हृत् । क्विप् । केचित्तु वृक्कादिचतुष्कमपि हृदये मन्यन्ते ॥

मेदस्तु वपा वसा ॥ ६४ ॥

क्षीर०— मेद्यति स्निह्यति मेदः । असन्तत्वात् क्लीबे । उप्यते वपा । वस्ते मांसं वसा । शुद्धस्य मांसस्य यः स्नेहः सा वसेति वैद्याः[1] ॥

टीका०— मेदस्त्रिकं मेदांसि । 'ञिमिदा स्नेहने' । 'असुन्' इत्यसुन् । मेदः । शुषौ वपोक्ता । वसन्त्यत्र क्रिमय इति वसा । भिदादिपाठादङ् । 'जवसादनं वसादनम्' (स० १९. श्लो० ७८) इति माघयमकम् ॥

पश्चाद्ग्रीवासिरा मन्या

क्षीर०— पश्चाद्भागे ग्रीवायां कृकाटिकायां सिरा मन्यते मन्या । 'संज्ञायां समज—' (३. ३. ९९) इति क्यप् ॥

टीका०— ग्रीवायाः पश्चाद्भूता सिरा मन्या । 'मन ज्ञाने' । 'संज्ञायां समजनिषद—' (३. ३. ९९) इत्यादिना क्यप् । अञ्चलादित्वान्नानुनासिकलोपः ॥

नाडी तु धमनिः सिरा ।

क्षीर०— नडस्येयं नाडी, सौषिर्यात् । धम्यते धमनिः । धमिः सौत्रः । सिनोति कायं सिरा । 'षिञ् बन्धने' ॥

टीका०— नाडीत्रयं सामान्यसिरायाम् । नह्यतेऽनयेति नाडी ।

---

१. 'द्याः । यच्छाश्वतः—पलं तिलमिश्रं स्यात् पलं पिशितेऽपि च ॥ प' ख, पाठः,

पृषोदरादिः। 'धम' इति सौत्रो धातुः। 'अर्तिसृधृधम्यशॅयवि‡तरिभ्यो निः' (उ० २. १०२) धमनिः। ङीषि धमनी। 'षिञ् बन्धने'। बाहुलको रक्। सिरा। दन्त्यसा। तथा च भारविः—

"निशितासिरतोऽभीको ह्वेजतेऽमरणा रुचा" (?) (स० १५. श्लो० २२) इति।

"शिरो ना पिप्पलीमूले स्याद्धमन्यां च योषिति"

इति तालव्यादौ रभसः॥

तिलकं क्लोम

क्षीर०— तिलति तिलकम्। क्लाम्यति क्लोम। उदर्यो जलाधारः। हृदयस्य दक्षिणे यकृत् क्लोम च, वामे प्लीहा पुष्कॅरसश्रुतिरिति(?) वैद्याः॥

टीका०— तिलकद्वयं फफुस इति ख्याते वृक्कप्राये। क्लोम नान्तम्। तथा च—'विगलत्क्लोम्नामरीणामसृग्' इति प्रयोगः। अदन्तमपि सिध्मनामन्युक्तम्॥

मस्तिष्कं गोर्दं

क्षीर०— मस्तं मज्जा, मस्तमिष्यति मस्तिष्कम्। 'इष गतौ'। गुद्यते गोर्दम्। 'गुद परिवेष्टने'॥

टीका०— मस्तिष्कद्वयं घिवीति ख्याते॥

किट्टं मलोऽस्त्रियाम्॥ ६५॥

क्षीर०— (कि?के)टेति किट्टम्। 'किट गतौ'। निःस्नेहत्वाद् गच्छति रसात् किट्टम्। 'मल धारणे'। मलते धॅारयते कायं मलः॥

---

१. 'ष्पस' क. ग. घ. ङ. पाठः. २. 'ट्ट', ३. 'तौ। मलयते' ख. पाठः. ४. 'ध्रियते' क. ग. घ. पाठः.

---

‡ 'तृभ्यो' इति मुद्रितोणादिपाठः।

टीका० — किट्टद्वयं मले । तदुक्तं—

"वसा शुक्रमसृङ् मज्जा कर्णविण्मूत्रविण्णखाः ।
श्लेष्माश्रु दूषिका स्वेदो द्वादशैते मला नृणाम्" ॥

'मल मल्ल धारणे' । अच् । मलम् ॥

अन्त्रं पुरीतद्

क्षीर० — अमत्यनेनान्त्रम् । पूर्यते पुरीतत् । तान्तोऽयम् ॥

टीका० — अन्त्रद्वयमन्त्रे । 'अम रोगे' । 'अमिचिमिदिशसिभ्यः कित्' (उ० ४. १६९) इति त्रन्प्रत्ययः । अन्त्रम् । पुरीं शरीरं तनोतीति पुरीतत् । तान्तम् । पुर्युपपदात् तनोतेः क्विप् । 'गमः क्वौ' (६. ४. ४०) इत्यत्र 'गमादीनामिति वक्तव्यम्' (वा० ६. ४. ४०) इति वक्तव्येनानुनासिकलोपः । तस्य च 'अचः परस्मिन् पूर्वविधौ' (१. १. ५७) इति सूत्रे अच इति विशेषणेन हलः पर्युदासात् स्थानिवद्भावाभावात् 'ह्रस्वस्य पिति कृति तुक्' (६. १. ७१) इति तुगागमः । 'अन्त्रं पुरीतदस्त्रियाम्' इति शब्दार्णवः ॥

गुल्मस्तु प्लीहा पुंसि

क्षीर० — गुल्यते[1] रक्ष्यते माँवाधिष्ठेति गुल्मः । प्लेहति प्लीहा नान्तः ॥

टीका० — गुल्मद्वयं प्लीहनि । 'प्लीह गतौ' । श्वनुक्षन्नादिसूत्रे प्लीहा नान्तो निपातितः ॥

अथ वल्लसा ।

स्नायुः स्त्रियां

क्षीर० — वस्ते छादयति कायं वल्लसा । स्नावा नभाकुश्च । स्नाय-

---

१. 'त् इ' ङ. छ. पाठः. २. 'घ' क. ग. घ. ङ. पाठः. ३. 'मधिष्वधि गु' क. ग. ङ., 'मधुष्वधि' घ. पाठः.

त्यङ्गं स्नायुः। 'स्नै वेष्टने'। महास्नायुस्तु कण्डुरा स्नायुसङ्घात इति वैद्याः॥

टीका०—वस्रसाद्वयं नहर इति ख्याते। वसां न्यस्यति स्वीकरोतीति वस्रसा। पृषोदरादिः। द्विदन्त्यसा। 'स्रसा स्नायुश्च कथिता' इत्यमरमालायां द्व्यक्षरः। तदा 'ष्णसु अदने'। पचादिः। स्नातेर्बाहुलक उण्। 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युक्। स्नायुः॥

कालखण्डयकृती तु समे इमे॥ ६६॥

क्षीर०—दक्षिणपार्श्वे कृष्णमांसांशः[3] कालखण्डः। कालखञ्जमित्येके। यमं करोति यकृत्॥

टीका०—कालखण्डद्वयमुदरदक्षिणपार्श्वस्थे कालजेति ख्याते। 'कालिंजं[3] कालखण्डम्' इति रभसः। कृष्णत्वात् कालखण्डम्। यकृत् तान्तम् अन्तस्थादि॥

सृणिका स्यन्दिनी लाला

क्षीर०—सरति सृणिका। स्यन्दते स्यन्दिनी। ललति लाला।

टीका०—सृणिकात्रयं लालायाम्। 'सर्तेर्नुट् च' (उ० ४. २३) इति इकन् किच्च नुडागमश्च प्रत्ययस्य। सृणिका। दीर्घमध्येति केचित्। 'स्यन्दू प्रस्रवणे'। आवश्यके णिनिः। स्यन्दिनी। 'लल ईप्सायाम्'। चुरादिः। 'एरच्' (३. ३. ५६)। लाला॥

दूषिका नेत्रयोर्मलम्।

क्षीर०—दूषयत्यक्षि दूषिका। दूषीकापि॥

टीका०—पिच्छोर्ढं[4] इति ख्याते दूषिका। 'दुष वैकृत्ये'। हेतुमण्णिच्। 'दोषो णौ' (६. ४. ९०) इत्युपधाया ऊत्वं, ततः 'कषिदूषिभ्यामिकन्' (उ०

---

१. 'म्बुका स्रा' क. घ. ङ. पाठः. २. 'साशयः का' ख. पाठः. ३. 'ले' ख. पाठः. ४. 'डि' क. ख. ग. च. पाठः.

४. १६)। दूषिका। केचिदीकन्प्रत्ययान्तं मन्यन्ते। तथा च—

"दूषीकापटलनिरुद्धलोचनान्ता दुर्गन्धा बहलमलोपलिप्तगात्रा"

इति गोपदत्तः। अत्र पक्षे अलीकादिरिति द्रष्टव्यम्। 'आः कीदृगत्रि-मुनिलोचनदूषिकायाम्' इति मुरारिः।

"अत्र पिञ्छोडकं नेत्रमलं दूषी च दूषिका"

इति शब्दार्णवः। 'पञ्चडी दूषिका' इति संसारावर्तः॥

मूत्रं प्रस्रावः

क्षीर०—'प्रे द्रुस्तुस्रुवः (३. ३. २७) घञ्'॥

टीका०—मूत्रद्वयं **मूत्रे**। 'मूत्र प्रस्रवणे'। [1]पैचादिः। मूत्रम्। 'सु स्रु' गतौ। 'प्रे द्रुस्तुस्रुवः' (३. ३. २७) इति अकर्तरि च कारके घञ्। प्रस्रावः॥

उच्चारावस्करौ शमलं शकृत्॥ ६७॥

पुरीषं गूढवर्चस्कमस्त्री विष्ठाविषौ स्त्रियौ।

क्षीर०—उच्चार्यते प्रेर्यते उच्चारः। अव अधः क्रियत इति 'वर्चस्केऽवस्करः' (६. १. १४८) इति साधुः। शाम्यति शमलम्। शक्नोत्यनेन शकृत्। पिपर्त्यन्त्रं पुरीषम्। गूयते उत्सृज्यते गूढम्। वर्च एव वर्चस्कम्। [2]विष्यतेऽनया विष्ठा। वेवेष्टि विट्। विशतीति सभ्याः॥

टीका०—उच्चारनवकं **विष्ठायाम्**। 'चरतेः घञ्' उच्चारः। किरतेः 'ऋदोरप्' (३. ३. ५७)। 'वर्चस्केऽवस्करः' (६. १. १४८) इति निपातनात् सुट्। अवकीर्यत इत्यवस्करः। 'शमु उपशमे'। 'शकिशम्योर्नित्' (उ० १. ११७) इति कलः। शमलम्। तालव्यादि। 'शक्लृ शक्तौ'। 'शकेर्ऋ-†तन्' (उ० ४. ५९) इति ऋतन्। शकृत्। 'पॄ पालनपूरणयोः'। 'शॄपॄभ्यां

---

१. 'चुरादिः। अचि मू' ख. पाठः. २. 'विपृच्यते वि' क. ग. घ. ङ. पाठः.

---

† 'तिन्' इति मुद्रितोणादिपाठः।

केत्' § (उ० ४. २७) इति ईषन्। 'उदोष्ठ्यपूर्वस्य' (७. १. १०२) इत्युत्त्वम्। पुरीषम्। मूर्धन्यवत्। 'गु पुरीषोत्सर्गे'। 'ति*थयूथगूढ—' (उ० २. १२) इत्यादिना ढगूदीर्घत्वे। गूढम्। वर्च एव वर्चस्कः। कुत्सायां कन्। गूढवर्चस्कमस्त्रीति सम्बन्धः। 'विष विप्रयोगे'। बाहुलकः क्थन्। विष्ठा। तिष्ठतेर्विपूर्वात् 'आतश्चोपसर्गे' (३. १. १३६) इत्यङि वा विष्ठा। विषेरेव क्विपि विट्। षान्ता॥

स्यात् कर्परः कपालोऽस्त्री

क्षीर०—कल्प्यते कर्परः। कृपो रो लो नास्ति, बाहुलकात्। कं पालयति कपालः। मूर्धोर्ध्वास्थि। घटादिखण्डोऽप्युपचारात्॥

टीका०—कर्परद्वयं शिरोस्थिखण्डे। 'कृपू सामर्थ्ये'। शीकरवद् बाहुलको रन्। कर्परः। कं वायुं पालयतीति कपालः। 'कर्मण्यण्' (३. २. १)॥

कीकसं कुल्यमस्थि च॥ ६८॥

क्षीर०—कीति कसति कीकसम्। कुले शरीरे साधु कुल्यम्। कोलति संस्त्यायति वा। अस्यते अस्थि॥

टीका०—कीकसत्रयमस्थनि। किं नाम न कसति गच्छतीति कीकसम्। पृषोदरादि। दन्त्यवत्। 'कुल संस्त्याने'। अध्न्यादि। कुल्यम्। 'असु क्षेपणे'। 'असिसञ्जिभ्यां क्थिन्' (उ० ३. १९९)। अस्थि॥

स्याच्छरीरास्थि कङ्कालः

क्षीर०—कङ्कानलति कं कालयति वा कङ्कालः। देहारम्भोऽस्थिपञ्जरः करङ्कोऽपि॥

टीका०—समुदितशरीरास्थिसङ्घातस्त्वङ्मांसरहितः कङ्कालः। कं शिरः को वायुः तावालाति बध्नातीति कङ्कालः॥

---

§ 'किच्च', * 'थपृष्ठयूथ' इति मुद्रितोणादिपाठः.

पृष्ठास्थि तु कशेरुका ।

क्षीर० — कशारुकेति मुनिः । कश्यत इति । पृष्ठग्रन्थौ गडुः पुमान् ॥

टीका० — कङ्कालोपरि पृष्ठस्यास्थि कशेरुका । के शरीरे शेत इति कशेरुका ॥

शिरोस्थनि करोटिः स्त्री

क्षीर० — के रटति करोटिः करोटी[1] च ॥

टीका० — समुदितशिरोस्थि करोटिः । ङीषि दीर्घान्तापि ॥

पार्श्वास्थनि तु पर्शुका ॥ ६९ ॥

क्षीर० — पूर्यते पर्शुः ॥

टीका० — पाशोलीति ख्याते पर्शुका । 'स्पृश संस्पर्शने' । स्पृशेः श्वण्शुनौ पृ च' (उ० ९. २७) इति सूत्रम् । अकारानुबन्धरहितं द्वितीयप्रत्ययमप्यनुमन्यन्ते[2] 'स्पृशेः श्वण्शुनौ पृ च' इति । तेन शुन्प्रत्ययः । धातोश्च पृ इत्यादेशः । ततः स्वार्थे कः । पर्शुका । एवं तालव्यशः ॥

अङ्गं प्रतीकोऽवयवोऽपघनः

क्षीर० — अङ्गत्यङ्गम् । प्रत्येति प्रतीकः । अवयौत्यवयवः । अपहन्यतेऽपघनः । 'अपघनोऽङ्गम्' (३. ३. ८१) इति साधुः ॥

टीका० — अङ्गचतुष्कं हस्ताद्यवयवे । 'अगि गतौ' । अच् । अङ्गम् । प्रतिपूर्वादिणो बाहुलकात् किकन् । प्रतीकः । अवपूर्वाद् यौतेरचि अवयवः । हन्तेः, 'अपघनोऽङ्गम्' (३. ३. ८१) इति करणे अप्प्रत्ययान्तो निपातितः । अपघनः ॥

अथ कलेवरम् ।

---

१. 'टीति वा ॥' घ. ङ., 'टश्च' ख. पाठः. २. 'ते' क. ख. ग. च. पाठः.

गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥

कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः।

क्षीर०—कल्यते कलेबरम्। गाते गच्छति गात्रम्। उप्यते वपुः। संहन्यन्ते सङ्घट्यन्तेऽङ्गान्यस्मिन् संहननम्। शीर्यते शरीरम्। वृष्यते सिच्यते, वर्षति मलान् वा वर्ष्म। विगृह्यते विग्रहः। 'ग्रहवृदृनिश्चि—' (३. ३. ५८) इत्यप्। चीयते कायः। 'निवासोपचितिशरीरसमाधानेष्वादेश्च कः' (३. ३. ४१)। दिह्यते देहः। मूर्छति वर्धते मूर्तिः। तन्यते तनुः। तनूश्च ॥

टीका०—कलेबरद्वादशकं शरीरे। कले रेतसि बरः कलेबरः। 'गमेरा च' (उ० ४. १७०) इति त्रन्। गात्रम्। 'अर्तिपृवपि—' (उ० २. ११७) इत्यादिना उसि वपुः। पृथिव्यादिपञ्चमहाभूतानि संहन्ति संहतान्यत्र भवन्तीति संहननम्। अधिकरणे ल्युट्। 'कृपृशृकटिपटिशौटिभ्य ईरन्' (उ० ४. ३०)। शरीरम्। 'वृषु सेचने'। मनिन्। वर्ष्म। 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यप्। विग्रहः। चिनोतेः 'निवासचितिशरीरोपसमाधानेष्वादेश्च कः' (३. ३. ४१) इति घञ्। कायः। 'दिह उपचये'। कर्मणि घञ्। देहः। मूर्छेः क्तिन्। 'राल्लोपः' (६. ४. २१) इति छलोपः। मूर्तिः। तनोतेः 'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' (उ० १. ७)। तनुः। 'तनुषे तनुषे कम्' इति वासवदत्तायां सकारान्तापि। कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उ० १. ८४)। तनूः। मूर्त्यादयस्त्रयः स्त्रिय इति सम्बन्धः ॥

पादाग्रं प्रपदं

क्षीर०—प्रारम्भः पदस्य प्रपदम्। पदशब्दः पादपर्यायोऽस्ति ॥

टीका०—पादाग्रे प्रपदम्। 'अङ्घ्रेः पूर्वं प्रपदम्' इति नाममाला ॥

पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् ॥ ७१ ॥

क्षीर०—पद्यतेऽनेन पादः । पदिति लक्ष्यलक्षणयोर्नास्ति । यस्तु—'गौः पदा न स्पष्टव्या' 'पद्भ्यामेव यथा तथा' इत्यादौ, स 'पद्दन्नोमास्हृद्—' (६. १. ६३) इति पदादेशः। अतः पदोऽङ्घ्रिश्चरणोऽस्त्रियाम् इति पाठ्यम् । क्रमणे तु पदम् । अंहत्यनेनाङ्घ्रिः । चरन्त्यनेन चरणः॥

टीका०—पादचतुष्कं **पादे** । पद्यतेऽनेनेति पादः । करणे घञ् । †पदं नपुंसकमिति । तथा च शाश्वतः—

"व्यवसाये परित्राणे पादतच्चिह्नयोरपि ।
वस्तुस्थानापदेशेषु पदं स्याद् वाक्यशब्दयोः ॥"

इति । 'अन्येभ्योऽपि—' (३. २. १७८) इति क्विपि पत् । 'अधिरधिमधिगत्यर्थाः' । 'भूञः क्विः' इति बाहुलकः क्विः । अङ्घ्रिः । 'अहि गतौ' हकारवान् इति हडुचन्द्रः । 'चर गतिभक्षणयोः' ल्युट् । चरणः ॥

तद्ग्रन्थी घुटिके गुल्फौ

क्षीर०—पादग्रन्थी पार्श्वे निस्सृतौ । घोटते घुटिका । 'घुट परिवर्तने' । गुह्यते गुल्फः ॥

टीका०—**पादग्रन्थौ** घुटिकाद्वयम् । 'घुट परिवर्तने' कुन् । घुटिका । घुट एव वा घुटिका । तथा च रत्नमाला—'पादग्रन्थिर्घुटो गुल्फः' इति । 'गल अदने' । 'गलेश्च' इति फक् अकारस्य उकारः । गुल्फः ॥

पुमान् पार्ष्णिरधस्तयोः ।

क्षीर०—गुल्फादधः पश्चाद्भागे पार्ष्णिः । पुमानिति प्रायिकम् । स्त्रीत्वेऽपि । पर्ष्यते स्नेह्यते विपादिकाचिकित्सार्थं पार्ष्णिः ॥

१, २. 'र्ष्णि' ३. 'र्घ्य', ४. 'र्ष्णिः' ख. पाठः.

---

† पादपर्यायप्रसङ्गात् पदशब्द इह स्मर्यत इति प्रतिभाति ।

टीका० — गुल्फयोरधो **गडिर** इति ख्यातः पार्ष्णिः। 'पार तीर कर्म-परिसमाप्तौ'। घृणिवद् निः, षुगागमश्च।

"प्रत्यासारे पुमान् पार्ष्णिः पादग्रन्थ्यधरेऽपि च"

इति रभसः।

"पार्ष्णिः स्त्रीपुंसयोः पादमूले स्याद् ध्वजिनीवटौ"

इति च।

"पार्ष्ण्यैव प्रोषितासुं सुररिपुमवतात् कुर्वती पार्वती वः"

इति स्त्रीप्रयोगोऽपि। अतः पुमानिति पाठो मतभेदात्॥

जङ्घा तु प्रसृता

क्षीर० — **जङ्घन्यते कुटिलं गच्छति जङ्घा। प्रसरति प्रसृता॥**

टीका० — जङ्घाद्वयं **जङ्घायाम्**। 'जनी प्रादुर्भावे' 'तस्याच् जङ्घश्च' (उ० ५. ३१) इति तस्य जनेरच् जङ्घादेशश्च धातोः। 'सृ गतौ'। क्तः। प्रसृता॥

जानूरुपर्वाष्ठीवदस्त्रियाम्॥ ७२॥

क्षीर० — **जायते जानु (ः?)। ऊर्वोः पर्व ग्रन्थिः। अस्थि विद्यतेऽत्र अष्ठीवत्। 'आसन्दीवदष्ठीवत्—' (८. २. १२) इति साधुः॥**

टीका० — जानुत्रयमण्डू इति ख्याते। जनेः 'दृसनिजनिचरिचटिभ्यो ञुण्' (उ० १. ३)। जानु जानुनी जानूनि। 'जानुमस्य मृद्नीयात्' इति सुश्रुतः। ऊरोः पर्व ऊरुपर्व। अतिशयितास्थियोगादष्ठीवत्। अस्थिशब्दात् मतुप्। 'आसन्दीवदष्ठीवद्—' (८. २. १२) इत्यादिना वत्वं, अष्ठीभावनिपातश्च। पक्षे अष्ठीवान् अष्ठीवन्तौ॥

सक्थि क्लीबे पुमानूरुः

क्षीर० — **सजति सक्थि। ऊर्वत्यूरुः॥**

टीका — सक्थिद्वयमूरौ। 'सञ्ज सङ्गे'। दन्त्यादिः। अस्थिवत् क्थिन्। सक्थि। 'ऊर्णुञ् आच्छादने'। 'ऊर्णोतेर्णुलोपश्च' (उ० १. ३१) इत्युः। ऊरुः। दीर्घादिः॥

तत्सन्धिः पुंसि वङ्क्षणः ।

क्षीर० — वस्त्यधः[1] ऊरुसन्धिः । वङ्कत इति वङ्क्षणः ॥

टीका० — वाडोशीति ख्याते वङ्क्षणः ॥

गुदं त्वपानं पायुर्ना

क्षीर० — गवते गूयते वा अनेन गुदम् । 'गुद परिवेष्टने' वा । अपानित्यनेनापानम् । पाति मलोत्सर्गात् पायुः । पिबति वा स्नेहम् ॥

टीका० — गुदत्रयं गुदे । 'गुद पुरीषोत्सर्गे' । इगुपधलक्षणः कः । गुदं[2]म् । अपानवायुयोगादपानम् । पातेर्वायुवद् उण् । पायुः ॥

वस्तिर्नाभेरधो द्वयोः ॥ ७३ ॥

क्षीर० — वसत्यस्मिन् मूत्रं वस्तिः । मूत्रपु[3]टकम् ॥

टीका० — मूत्रपुटके नाभेरधोभागे वस्तिः । 'वसेस्तिः' (उ० ४. १८१) इति तिः ॥

कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती ।

क्षीर० — कट्यते आव्रियते कटः ॥

"शवे श्रोणौ किलिञ्जे च गजगण्डे भृशे कटः"

इति शाश्वतः । कटी[4]रोऽपि । श्रोण्यते संहन्यते श्रोणिः फलकमिव । ककु-(द्मात् स्वा ? द् मांसा)न्निस्मृतोंऽशोऽस्त्यस्याः ककुद्मती ॥

टीका०— एकं श्रोणिफलकं कटः, न तु कटिरेव । तथा च भागुरिः—

"कटो नितम्बफलकमपानं पायुरुच्यते"

इति । कट्यते आ(द्रि ? त्रि)यत इति कटः । 'कटे वर्षावरणयोः' । घः । श्रोण्याः फलकाकृतित्वाच्छ्रोणिफलकम् । अन्ये कटषट्कमेव कट्यां मन्यन्ते । कटित्रयं

---

१. 'धि' क. ग. घ. ङ. पाठः. २. 'दः ।' ङ. छ. पाठः. ३. 'पि' क. ग. घ. ङ. पाठः. ४. 'टि' ख. पाठः.

कट्याम्। 'इन्' इति इन्। ङीषि कटी च। शृणातेर्वह्निवद् निः। श्रोणिः। ङीषि श्रोणी॥

"कटिः श्रोणिर्नितम्बो ना जघनं तु नपुंसकम्"

इति क्लीबकाण्डेऽमरमाला। वृषाङ्कः ककुद्, तदाकारत्वान्मांसपिण्डोऽपि। तद्योगाद् मतुप् ककुद्मती। यवादिपाठाद् वत्वं न भवति॥

पश्चान्नितम्बः स्त्रीकट्याः

क्षीर० — पश्चाद्भागः नितम्यति सुरतसम्मर्दान्नितम्बः॥

टीका० — स्त्रीकट्याः पश्चाद्भागो नितम्बः। तम्यतेः, 'कृगृशृदृभ्यो वः' (उ० १. १६१) इति बाहुलको वः॥

क्लीबे तु जघनं पुरः॥ ७४॥

क्षीर० — स्त्रीकट्याः पुरोभागः। जङ्घन्यते जघनम्॥

टीका० — स्त्रीकट्या अग्रभागो जघनम्। 'हन्तेः शरीरावये द्वे च' (उ० ५. ३२) इति हन्तेरच् द्विर्वचनम् अभ्यासस्य चुत्वं जश्त्वं च। 'अभ्यासाच्च' (७. ३. ५५) इति धातुहकारस्य कुत्वम्॥

कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे।

क्षीर० — कुत्सितं कुं दृणाति कुकुन्दरम्। द्वयेन हीने क्लीबे॥

टीका० — नितम्बे यौ कूपकौ पृष्ठवंशादधोगतौ, ते कुकुन्दरे द्वयहीने क्लीबे। कुकुन्दरे इति प्रथमाद्विवचनम्॥

स्त्रियां स्फिचौ कटिप्रोथौ

क्षीर० — स्फायते स्फिक्। प्रथते उद्भिद्यते प्रोथः। पूतोऽपि॥

टीका० — स्फिगुद्वयं पूलके।

"स्त्रियां स्फिचौ कटीप्रोथौ कटिप्रोथौ च पूलके"

इति रभसः । स्फिक् चान्ता । जान्तेत्यरुणः । कट्याः प्रोथो मांसपिण्डः कटिप्रोथः ॥

उपस्थो वक्ष्यमाणयोः ॥ ७५ ॥

क्षीर० — **उपतिष्ठते सङ्गच्छते उपस्थः । वक्ष्यमाणौ भगशिश्नौ ॥**

टीका० — वक्ष्यमाणयोर्भगशिश्नयोरुपस्थशब्दो वर्तते । उपतिष्ठन्ति जना अनेन अस्मिन् वेत्युपस्थः । क्लीबेऽप्ययम् । तथा हि — 'वाक्पाणिपाद-पायूपस्थानि कर्मेन्द्रियाणि' इति ईश्वरकृष्णः ॥

भगं योनिर्द्वयोः

क्षीर० — **भज्यते भगम् । 'खलो भगः पदं च' (वा० ३. ३. १२५) इति वक्तव्याद् घः । यौति योनिः । स्त्रीचिह्नं गुह्यं च ॥**

टीका० — भगद्वयं **वनितोपस्थे** । भजेः 'खनो घ च' (३. ३. १२५) इति घित्करणादितोऽपि घः । भगः । यौतेः श्रोणिवद् निः । योनिः । स्त्रियां योनौ च ॥

शिश्नमेढ्रौ मेहनशेफसी ।

क्षीर० — **शिनोति घर्षति भगं शिश्नः । शेफश्च । मेहत्यनेन मेढ्रः ॥**

टीका० — शिश्नचतुष्कं **पुरुषलिङ्गे** । 'शिषॢ विसरणे' । बाहुलको नक् वर्णविपर्ययश्च । शिश्नो द्वितालव्यो वर्णदेशनाम्नाम् । 'मिह सेचने' । 'दाम्नी—' (३. २. १८२) इत्यादिना करणे ष्ट्रन् । 'हो ढः' (८. २. ३१) मेढ्रम् । ल्युटि मेहनम् । 'वृङ्शीङ्भ्यां रूपस्वाङ्गयोः फुट् च' (उ० ४. २०२) इत्यसुन्, फुटागमश्च प्रत्ययस्य । शेफः सान्तम् । पकारवच्चेत्युणादिः । अकारान्तोऽपीत्यनु-न्यासः । 'शेषपुच्छलाङ्गूलेषु शुनः संज्ञायाम्' (वा० ६. ३. २१) इत्यत्रा-प्यदन्ततोक्ता । असुन्नन्ते हि सत्यन्यपदार्थसमासे शुनश्शेफा इति स्यात् ।

---

१. 'फ' ख पाठः.

शुनश्शेप इति च नामधेयम्। चान्द्रैरप्येतदुक्तम्। उणादौ तु 'इण्शीङ्भ्यां वन्' (उ० १. १५८) इत्यत्र शेपो मेढ्र इत्युक्तम्।

"भगस्मराद् गेहकूपौ शेफो मेहनलिङ्गलः।
शेफो मेढ्रशिश्नाः कामलतापि च" (?)

इति रभसः। शेपः शेफः सान्ते। शेवशेपशेफा अदन्ता इति पञ्च रूपाणि॥

मुष्कोऽण्डकोशो वृषणः

क्षीर०—मुष्णाति गोपायति शुक्रं मुष्कः। अण्डयोः कोशोऽण्डकोशः। वर्षति शुक्रं वृषणः। फेलं च॥

टीका०—मुष्कत्रयमण्डकोषे। 'मुष खण्डने'। 'सृवृ*भूशुषिमुषिभ्यः ‡कित्' (उ० ३. ३१) इति कः। मुष्कः। 'वृष सेचने'। कृपृवृजिमदि$निधाञ्भ्यः क्युः' (उ० २. ८३) इति बाहुलकः क्युः। वृषणः॥

पृष्ठवंशाधरे त्रिकम्॥ ७६॥

क्षीर०—पृष्ठास्थ्नोऽध ऊर्वोः सन्धौ त्रिसङ्घट्टस्त्रिकम्॥

टीका०—पृष्ठवंशस्याधरस्त्रिकम्। 'सङ्घाया अतिशदन्तायाः कन्' (५. १. २२)॥

पिचण्डकुक्षी जठरोदरतुन्दं

क्षीर०—पचत्यन्नं पिचण्डः अपिचामत्याहारं वा। कुष्यते कुक्षिः। जमत्याहारं जठरः। उदियर्त्याहारमुदरम्। तुन्दति तुन्दम्। तुन्दिश्च॥

---

१. 'फ', २. 'वो' ख., 'फो' च. पाठः. ३. 'प' क. ख. ग. पाठः ४. 'लश्च॥' ख. पाठः.

---

* 'भू', ‡ 'कक्', $ 'न्दिनिधाञ्भ्यः' इति मुद्रितोणादिपाठः।

टीका०—पिचण्डपञ्चकमुदरे। अपिचिनोतीति पिचण्डः। 'अमन्ताडुः' (उ० १. ११९) इति बाहुलको डः। पृषोदरादित्वाद् वर्णागमलोपौ। 'कुष निष्कर्षे'। 'प्लुषिशुषिकुषिभ्यः किसः' (उ० ३. १५६) कुक्षिः। द्वौ पुल्लिङ्गौ। 'जनी प्रादुर्भावे'। 'जनेररन् ठश्च' (उ० ५. ५८) इत्यरन् ठश्चान्तादेशः। जठरम्। उदि इणातेरजलौ पूर्वपदान्तलोपश्च' (उ० ५. ३९)। उदरम्॥

स्तनौ कुचौ।

क्षीर०—स्तन्यते बालैः स्तनौ। कूयते कुचौ, कुञ्च्यते वा। वक्षोरुहावुरसिजौ च॥

टीका०—स्तनद्वयं स्तने। 'स्तनगदी देवशब्दे'। अच्। स्तनः। कुचेः इगुपधलक्षणः कः। कुचः॥

चूचुकं तु कुचाग्रं स्यात्

क्षीर०—चूचू इत्यव्यक्तं कायति पीयमानं चूचुकम्।

टीका०—कुचाग्रे चूचुकम्। 'चूचुको ना कुचाननम्' इति रत्नकोशः॥

न ना क्रोडं भुजान्तरम्॥ ७७॥

क्षीर०—क्रुड घनत्वे। न ना पुल्लिङ्गं न भवति। वक्षोमध्योद्भिन्नास्थि क्रोडम्॥

उरो वत्सं च वक्षश्च

क्षीर०—उरस्यति वि(सं?ष)हते उरः। कण्ड्वादि। वेस्यत छाद्यते वत्सम्। वक्ष सङ्घाते। असुन्। पञ्चैकार्था इत्येके॥

टीका०—क्रोडपञ्चकं वक्षसि। स्त्रियां क्रोडा। भुजयोरन्तरं मध्यं भुजान्तरम्। 'अर्तेरुच्च' (उ० ४. १९६) इत्यसुन्। उरः। 'वृतृ-

---

१. 'चि' ख. ज. पाठः. २. 'चि' ज. पाठः. ३. 'सं' ख. पाठः.

वदि—' (उ० ३. ६२) इत्यादिना वदेः सः । वत्सम् । 'वक्ष रोषे' । असुन् । वक्षः ।

पृष्ठं तु चरमं तनोः ।

क्षीर० — पृष्यते सिच्यते पृष्ठम् । देहस्य चरमं पश्चाद्भागः । पश्चान्मात्रे तूपचारात् ॥

टीका० — शरीरपश्चाद्भागे पृष्ठम् । 'पृषु सेचने' । 'तिथपृष्ठ—' (उ० २. १२) इत्यादिना थक् । पृष्ठम् ॥

स्कन्धो भुजशिरोंऽसोऽस्त्री

क्षीर० — स्कन्धते[1] भारेण स्कन्धः । अस्यते भारेण[2] अंसः ॥

टीका० — स्कन्धत्रयं स्कन्धे । कं मस्तकं दधातीति स्कन्धः । पारस्करादिः । भुजशिरः सान्तम् । 'अंस समाघाते' । दन्त्यान्तः । चुरादिपचादी । 'कंसमंसमधीतसम्' (?) इति दन्त्ये चन्द्रगोमी च । 'वृभृवॅमिकृभ्यः शक्' इति तालव्यशमंशमिति काचिदुणादिवृत्तिः ॥

सन्धी तस्यैव जत्रुणी ॥ ७८ ॥

क्षीर० — अंसकक्षयोः सन्धिः । उद्भिन्नोंस्थि जायते इति जत्रु ॥

टीका० — अंसवक्षसोः सन्धिर्मध्यं जत्रु । 'जनी प्रादुर्भावे' । 'जन्वादयश्च' (उ० ४. १०४) इति रुः तश्चान्तादेशः ॥

बाहुमूले उभे कक्षौ

क्षीर० — कक्ष्येते कक्षौ ॥

टीका० — बाहुमूलद्वयं कक्षे । 'कष हिंसार्थः' । 'वृतृवदि—' (उ० ३. ६२) इत्यादिना सः । कक्षः ॥

---

१. 'ते स्क' क, २. 'णाहारेण अं' क. पाठः. ३. 'वद्यमि' ज. ञ. पाठः. ४. 'न्नाद् जा' क. ग. घ. ङ. पाठः.

पार्श्वमस्त्री तयोरधः ।

क्षीर० — पर्शूनां समूहौ पार्श्वे इति द्विवचनं न्याय्यम् । जातौ चैकत्वम् ॥

टीका० — कक्षयोरधः पार्श्वम् । 'स्पृश संस्पर्शे' । 'स्पृशेः श्वण्-शुनौ पृ च' (उ० ५. २७) इति श्वण् पृ च धातोरादेशः । पार्श्वं तालव्यान्तम् ॥

मध्यमं चावलग्नं च मध्योऽस्त्री

क्षीर० — मध्यभवं मध्यमम् । मध्यान्मः (४. ३. ८) । अवलगत्यवलग्नम् । अतिकृशत्वात् । वलग्नं च । मध्यते (?) मध्यम् । मध्यो वा । अस्त्रीत्वात् ॥

टीका० — मध्यमत्रयं तनुमध्ये माझौ इति ख्याते । चकाराभ्यां मध्यमावलग्ने चास्त्रियौ । अवपूर्वाद् ओलस्जीतः क्तः । अवलग्नम् ॥

द्वौ परौ द्वयोः ॥ ७९ ॥

भुजबाहू प्रवेष्टो दोः

क्षीर०— परौ भुजो बाहुश्च । भुज्यतेऽनया भुजा । 'भुजन्युब्जौ—' (७. ३. ६१) इति साधुः । वहति वाहते प्रयतते वा बाहुः । 'बाह प्रयत्ने' । प्रवेष्टते प्रवेष्टः । द्यति ददाति वा दोः । सान्तः । वाहापि ॥

टीका० — द्वौ परौ भुजबाहू द्वयोः । भुजचतुष्कं बाहौ । भुज्यतेऽनेनेति भुजः । 'हलश्च' (३. ३. १२१) इति घञ् । 'भुजन्युब्जौ पाण्युपतापयोः' (७. ३. ६१) इति कुत्वगुणाभावौ निपात्येते । 'अर्जिद्दशिकम्यमिपसिबाधामृजिपाशितुग्धुग्दीर्घहकाराश्च' (उ० १. २७) इति बाधतेः उः हश्चान्तादेशः । बाहुः । 'वेष्ट वेष्टने' । अच् । प्रवेष्टः । 'दमु उपशमे' । 'दमेर्डोस्$'

---

१. 'ध्यान्मः ।' क., २. 'ध्य' क. पाठः. ३. 'सा' ज. पाठः.

$ 'सिः' मुद्रितोणादिपाठः ।

(उ० २. ७२) इति डोः। दोः। सान्तः। 'आदेशप्रत्यययोः' (८. ३. ५९) इति षत्वे दोषौ दोषः। 'दोर्दोषा च भुजो बाहुः' इति धनञ्जयः। 'बहुदोषो गुरुध्वंसी' इति विदग्धमुखमण्डनम्॥

स्यात् कपोणिस्तु कूर्परः।

क्षीर०—कं *पुणोति कपोणिः। कुरति कूर्परः, बाहूपबाहुसन्धेररत्निसंज्ञस्य पश्चाद्भागः। तथा च—'कपोणिः कूर्परोऽरत्नेः पृष्ठम्' इति नाममाला॥

टीका०—कपोणिद्वयं भुजमध्यग्रन्थौ। 'कपोणिः कूर्परः, पुमान्' इति त्रिकाण्डेऽमरमाला।

"†कफोणिस्तु बाहुमध्ये कट्मरः कफणिर्द्वयोः"

इति शब्दार्णवः॥

अस्योपरि प्रगण्डः स्यात्

क्षीर०—अस्य कूर्परस्योर्ध्वे। प्रगण्यते प्रगण्ड्यते वा प्रगण्डः। उपबाहुः॥

टीका०—कपोणेरूर्ध्वमाकक्षं प्रगण्डः। गमेः 'अमन्ताडुः' (उ० १. ११९)॥

प्रकोष्ठस्तस्य चाप्यधः॥ ८०॥

क्षीर०—कूर्पराधः प्रकुष्यते प्रकोष्ठः, उपबाहुः। यत् कात्यः—

"प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः"॥

---

१. 'न्धि' क. पाठः. २. 'ज्ञो' क. ग. घ. ङ. पाठः. ३. 'फो' ग. ञ. पाठः. ४. 'फो' ञ. पाठः. ५. 'पो' ङ. छ. ञ. पाठः. ६. 'फो' क. ख. ग. च. ञ. पाठः.

---

* अस्य तनादित्वं मन्यते। † 'कफोणिः कफणिर्द्वयोः' इति शब्दार्णव इति भानुजिदीक्षितः।

टीका० — आमणिबन्धं कर्पोरधः प्रकोष्ठः । 'उषिकुषि—' (उ० २. ४) इत्यादिना थन् । ष्टुत्वम् ॥

मणिबन्धादाकनिष्ठं करस्य करभो बहिः ।

क्षीर० — मणेर्बन्धोऽत्र मणिबन्धः, भुजपाण्योः सन्धिः । तस्मादारभ्य आ कनिष्ठायाः करभः । करे भातीति करभः । आङभिविधौ ॥

टीका० — मणिबन्धो हस्तग्रन्थिः । तमारभ्य कनिष्ठापर्यन्तं हस्तबहिर्भागः करभः । शरभवत् ॥

पञ्चशाखः शयः पाणिः

क्षीर० — शेतेऽस्मिन् सर्वं शयः । शस इत्येके । नाममाला तूभयं पपाठ 'पाणिः शसः शयो हस्त' इति । पणन्तेऽनेन पाणिः । हस्तकरौ नानार्थे । मणिबन्धः पाणिमूले ॥

टीका० — पञ्चशाखत्रयं हस्ते । पञ्च अङ्गुल्यः शाखा इवास्येति पञ्चशाखः । शेतेः 'एरच्' (३. ३. ५६) । शयः । 'पण व्यवहारे स्तुतौ च' । करणे †'इञजादिभ्यः' (३. ३. १०८) । पाणिः ॥

तर्जनी स्यात् प्रदेशिनी ॥ ८१ ॥

क्षीर० — तर्जन्त्यनया तर्जनी । प्रदिशत्यवश्यं प्रदेशिनी ॥

टीका० — तर्जनीद्वयमङ्गुष्ठपार्श्वस्थाङ्गुल्याम् । 'तर्ज भर्त्सने' । करणे ल्युट् । तर्जनी । 'दिश अतिसर्जने' । णिनिः । प्रदेशिनी ॥

अङ्गुल्यः करशाखाः स्युः

---

१. 'फो' क. ख. ग. च. ज. पाठः.

---

† 'इणजादिभ्यः' इति मुद्रितवार्तिकपाठः ।

क्षीर० — अङ्गं पाणिपादं लाति अङ्गुली ॥

टीका० — अङ्गुलीद्वयं सामान्येनाङ्गुल्याम् । अगिर्गत्यर्थः । 'ऋतन्यञ्जि—' (उ० ४. २) इत्यादिना उलिः । अङ्गुलिः । 'कृदिकारात्—' (ग० ४. १. ४५) इति ङीषि अङ्गुली च । 'वा नाङ्गुलोऽङ्गुलीमानम्' इत्यमरमालायामङ्गुलीमाने पुन्नपुंसकलिङ्गोऽप्युक्तः । तथा च — 'भूमेरप्यर्धमङ्गुलम्' इति प्रयोगः ॥

पुंस्यङ्गुष्ठः प्रदेशिनी ।

मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ ८२ ॥

क्षीर० — अङ्गौ[1] तिष्ठत्यङ्गुष्ठः । 'सुपि स्थः' (३. २. ४) इति कः । 'अम्बाम्ब —' (८. ३. ९७) इति षत्वम् । नामग्रहणायोग्या अनामिका, ब्रह्मणोऽनया शिरश्छेदनात् । अत एवास्यां पवित्रकं क्रियते । कनिष्ठा अत्यल्पा । ताः अङ्गुष्ठाद्याः पञ्चाङ्गुल्यः ॥

टीका० — अङ्गुष्ठपञ्चकं वृद्धाङ्गुष्ठादारभ्य प्रत्येकं यथाक्रममङ्गुलीपञ्चके । अङ्गे तिष्ठतीत्यङ्गुष्ठः । गोष्ठवत् षत्वम् । पृषोदरादिह्रस्वत्वम् । प्रदिश्यतेऽनयेति प्रदेशिनी । प्राक् पर्यायत्वेनोक्ता सम्प्रति स्वरूपप्रतिपादनार्थमित्यपौनरुक्त्यम् । मध्ये जाता मध्यमा । नास्ति नामास्येत्यनामिका ॥

पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।

क्षीर० — नास्ति खमस्य नखः । 'न भ्राण्नपाद्—'[2] (६. ३. ७५) इति साधुः । नखं राति नखरः । न खन्यते वा । 'डडरे*कवकाः' (वा० ३. ३. १२५) । 'पुनर्नवः कररुह' इत्येके पेठुः । त्रिभुवनवण्णत्वाभावः । कामाङ्कुशोऽपि ॥

---

१. 'ङ्गे' ग. घ. ङ. पाठः. २. 'धुः । नखति याति वा नखः । नखं रा' क. ख. ग. घ. ङ. पाठः.

---

* 'केकवकाः' मुद्रितवार्तिकपाठः ।

टीका० — पुनर्भवचतुष्कं **नखे**। लूनोऽपि पुनर्भवतीति पुनर्भवः। नास्ति खमिन्द्रियमस्येति नखः। नाकवत् प्रकृतिवद्भावः। *'नखनगकुञ्जेभ्यो रो वक्तव्यः' (वा० ५. २. १०७) इति मत्वर्थीयो रः। नखरः। नखशब्दो नखैकदेशे[1] वर्तते। 'समुदायेषु प्रवृत्ताः शब्दाः क्वचिदवयवेऽपि वर्तन्त' इति वचनात्। अरुणेन नखरं त्रिषूक्तम्॥

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते॥ ८३॥
अङ्गुष्ठे

क्षीर० — **तर्जन्या युक्ते तते प्रसारितेऽङ्गुष्ठे मध्यं प्रादिश्यते प्रादेशः। मध्यमया युतेऽङ्गुष्ठे तते तालः। 'तल प्रतिष्ठायाम्'। अनामिकया युते ततेऽङ्गुष्ठे गोकर्णः। गोकर्णाकृतिर्गोकर्णः॥**

टीका० — प्रादेशत्रयं **तर्जन्यादियुते** तते **विस्तृतेऽङ्गुष्ठे**। (तर्जनीयुते विस्तृते) प्रादेशः। मध्यमायुते विस्तृते तालः। अनामिकायुते विस्तृते गोकर्णः। तथा च —

"प्रादेशस्तर्जन्या विततते तालोऽथ मध्यमया"

इति नाममाला। दिशेः घञ् प्रपूर्वः। 'उपसर्गस्य—' (६. ३. १२२) इत्यादिना दीर्घः। प्रादेशः। ताल उक्तः॥

सकनिष्ठे स्याद् वितस्तिर्द्वादशाङ्गुलः।

क्षीर० — **सह कनिष्ठया ततेऽङ्गुष्ठे वितस्तिः। वितस्यतीति। दिष्टिश्च। द्वादशाङ्गुल इति सिद्धस्यानुवादः॥**

टीका० — वितस्तिद्वयं **सकनिष्ठे विस्तृतेऽङ्गुष्ठे**। 'तसु क्षेपणे'। 'वौ तसेः' (उ० ४. १८३) इति तिप्रत्ययः। 'वितस्तिः स्त्री कनिष्ठया' इत्यमर-

---

१. 'शेऽपि। स' ख. पाठः.

---

* 'रप्रकरणे खमुखकुञ्जेभ्य उपसङ्ख्यानम्, 'नगपांसुपाण्डुभ्यश्च' इति मुद्रितवार्तिकपाठः।

माला। द्वादश अङ्गुलयः प्रमाणमस्या इति द्वादशाङ्गुला। 'तद्धितार्थोत्तरपद-समाहारे च' (२. १. ५१) इति समासः। 'प्रमाणे द्वयसज्—' (५. २. ३७) इत्यादिना मात्रच्। 'द्विगोर्नित्यम्' इति मात्रचो लुक्। ततः 'तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः' (५. ४. ८६) इत्यच्॥

पाणौ चपेटप्रतलप्रहस्ता विस्तृताञ्जलौ॥ ८४॥

क्षीर०—चप्यतेऽनेन चपेटः चपेटापि। प्रसृतं तलमस्य प्रतलः। प्रसृतो हस्तोऽस्य प्रहस्तः॥

टीका०—चपेटत्रिकं विस्तृताञ्जलिहस्ते। प्रकृष्टं तलं प्रतलः। एवं प्रहस्तः॥

द्वौ संहतौ सिंहतलप्रतलौ वामदक्षिणौ।

क्षीर०—द्वौ प्रसृततलौ संहतौ सिंहतलाख्यौ। सिंहो हि मिलिताभ्यां चपेटाभ्यां हन्ति। संहतलाख्य इत्येके। संहतं सङ्घट्टं लातीति॥

टीका०—द्वौ वामदक्षिणौ प्रतलौ चपेटौ संहतौ संहतलः।

"स च।

संहतलः प्रतलयुक् प्रसृतावञ्जलिः पुमान्॥"

इति रभसः। संहतं लातीति संहतलः। 'आतोऽनुपसर्गे कः' (३. २. ३)॥

पाणिर्निकुब्जः प्रसृतः

क्षीर०—सङ्कुचितो हस्तस्तालादिना प्रसियते प्रसृतः। प्रसृतिश्च। प्रकुब्ज इत्यपपाठः। कुब्जस्त्वर्धप्रसृतिः॥

टीका०—निश्शेषेण कुब्जीकृतः पाणिः प्रसृतः। सर्तेः क्तः॥

तौ युतावञ्जलिः पुमान्॥ ८५॥

---

१. 'हतलप्रत' ख. पाठः।

क्षीर० — तौ प्रसृतौ युतौ पार्श्वश्लिष्टौ लौकिकोऽञ्जलिः । अङ्क्तेऽनेनेति । अम्यते जलमनेनेति नैरुक्ताः । नाट्ये तु—

"पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः" ॥

टीका० — तौ पाणी युतौ मिलितौ अञ्जलिः । 'ऋतन्यञ्जि—' (उ० ४. २) इत्यादिना अलिः ॥

प्रकोष्ठे विस्तृतकरे हस्तः

क्षीर० — बाहौ प्रसारितपाणौ हस्तः, चतुर्विंशत्यङ्गुलं प्रमाणम् ॥

टीका० — कफोणेरधः[1] प्रकोष्ठः । तत्र विस्तृतकरे हस्तः । हसेः गर्तवत् तन् ॥

मुष्टया तु बद्धया ।
स रत्निः स्याद्

क्षीर० — सः हस्तः । रमन्तेऽस्मिन् मल्ला रत्निः । सह रत्न्या मुष्ट्या वर्तत इत्येके ॥

टीका० — स हस्तो बद्धया मुष्ट्या लक्षितो रत्निः ॥

अरत्निः स निष्कनिष्ठेन मुष्टिना ॥ ८६ ॥

क्षीर० — नास्ति रत्निर्मुष्टिरस्या अरत्निः । निष्क्रान्ता कनिष्ठा अस्मिन् निष्कनिष्ठो मुष्टिः, तेनोपलक्षितः स हस्तः अरत्न्याख्यः ॥

टीका० — निर्गता कनिष्ठा यस्मात्, तेन मुष्टिना विस्तृतकनिष्ठेनेत्यर्थः । स हस्तः अरत्निः ।

"रत्न्यरत्नी स्त्रियौ हस्तौ बद्धमुष्टितलाङ्गुलौ"

इत्यमरमाला ।

---

१. 'का' क. ग. घ. ङ. पाठः. २. 'पो' ङ. छ. पाठः.

"नारलिः कफणौ हस्ते सप्रकोष्ठे* तलौ"

इति रुद्रः । मुष्ट्या मुष्टिनेति रूपभेदाद् द्वयोः ॥

व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।

क्षीर० — व्यामीयते रज्ज्वाद्यनेन, व्यर्मति वा व्यामः । स्वे स्वे पार्श्वे प्रसारितयोर्बाह्वोरन्तरं मध्यम् ॥

टीका० — तिर्यक् पार्श्वविस्तृतयोर्बाह्वोरन्तरं व्यामः । 'माङ् माने' । घञर्थे कः ।

"परिश्रमार्थे व्यायामो व्यायामं पौरुषं विदुः"

इति शाश्वतेन व्यक्षर उक्तः ॥

ऊर्ध्वविस्तृतदोःपाणिनृमाने[1] पौरुषं त्रिषु ॥८७॥

क्षीर० — ऊर्ध्वविस्तृतो दोः पाणिश्च नुः पुंसो यत्र, तद् मानं[2] पौरुषं नाम मानम् । ऊर्ध्वं विस्तृतदोःपाणिनृमानं पुरुषमानं तत् पौरुषमित्येके । 'पुरुषहस्तिभ्यामण् च' (५. २. ३८) । द्वादशाङ्गुलं तु पौरुषं छायामानम् ॥

टीका० — ऊर्ध्वं यद् विस्तृतबाहुपाणिपुरुषप्रमाणं, तत् पौरुषम् । पुरुषः प्रमाणमस्येति 'पुरुषहस्तिभ्यामण् च' (५. २. ३८) इत्यण् । पौरुषं जलं, पौरुषी यष्टिः, पौरुषः सेतुः ॥

कण्ठो गलः

क्षीर० — कणति कण्ठते वा कण्ठः । गिरति गलः । ग्रीवाग्रभागः ॥

---

१. 'य' ख. पाठः. २. 'नमध्ये पौ' क. ग. घ. ङ. पाठः.

---

* 'ष्ठे चाङ्गुलौ इति रुद्रः' इति भानुजिदीक्षितः ।

टीका०—कण्ठद्वयं **कण्ठे** । 'कण्ठेष्टः' (उ० १. १०८) इति टः । बहुलवचनादिकत्वं न भवति । गिरन्त्यनेनेति गलः । 'पुंसि संज्ञायां घः—' (३. ३. ११८) इति व्यवस्थितविभाषया प्राण्यङ्गे लत्वम् । अन्यत्र गर एव ॥

अथ ग्रीवायां शिरोधिः कन्धरेत्यपि ।

क्षीर०—गृणाति गिरति वा ग्रीवा । शिरो धीयतेऽस्यां **शिरोधिः** । **कं धारयति कन्धरा** । 'संज्ञायां भृतृवृजि—' (३. २. ४६) इति खच् ॥

टीका०—ग्रीवात्रयं **ग्रीवायाम्** । 'शेवयह्वजिह्वाग्रीवाप्वामीवाः' (उ० १. १६०) इत्यनेन गिरतेर्वन् ग्रीभावश्च निपात्यते । शिरो धीयतेऽस्यामिति शिरोधिः । 'कर्मण्यधिकरणे च' (३. ३. ९३) इति किः ।

"बिभ्राणमायतिमतीमवृथा शिरोधिम्" (स० ५. श्लो० ६५)

इति माघप्रयोगात् स्त्रियाम् । कं शिरो धरतीति कन्धरा । पचादिः ॥

कम्बुग्रीवा त्रिरेखा सा

क्षीर०—शङ्खाकृतिग्रीवा **कम्बुग्रीवाख्या** असौ त्रिवलेः(या) चेत् ॥

टीका०—सा कन्धरा तिसृभी रेखाभिर्युक्ता कम्बुग्रीवा । इदं महापुरुषलक्षणम् ॥

अवटुर्घाटा कृकाटिका ॥ ८८ ॥

क्षीर०—न वटत्यवति वा अवटुः । घटयति घाटा । कृकं शिरोग्रीवमटति **कृकाटिका** । ग्रीवापश्चाद्भागः ॥

टीका०—अवटुत्रयं घाट्ट इति ख्याते । 'अवटुः पुरुषे कृकाटिका घाटा' इति वोपालितः । घाटेश्चौरादिकाद् अच् । घाटा । कृकं कण्ठमटतीति कृकाटिका । अथवा कृकस्य अटिका कृकाटिका प्वुलादिः । अन्यत्र 'कर्मणि—'

---

१. 'को न' ग. पाठः. २. 'लयाख्या चे' क. ग. घ. ङ. पाठः. ३. 'ट्ट' क. ख. पाठः,

(३. २. १) इत्यण्। ङीप्। गलपृष्ठप्रदेशत्वेन कुत्सितत्वात् कन्। स्वार्थिको वा कः। 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम्। 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २. ३५) इति क्वुन् वा ॥

वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्।

क्षीर०—उच्यतेऽनेन वक्त्रम्। अस्यतेऽस्मिन् आस्यम्। 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ण्यत्।

"मुखं मुखान्तरालं च द्वयमास्यमिति स्मृतम्"

इति शाश्वतः। उद्यतेऽनेन वदनम्। तुण्ड्यतेऽनेन तुण्डम्। 'तुडि तोडने'। आ अनिति श्वसित्यनेन आननम्। लप्यतेऽनेन लपनम्। मुत् खन्यते मुखम्[1]। 'डित् खनेर्मुट् स चोदात्तः' (उ० ५. २०)। मुदितानि खान्यत्र इत्येके ॥

टीका०—वक्त्रसप्तकं मुखे। मुखं च विवरम्। समुदाये चोपचारात् कवयः प्रयुञ्जते। उच्यतेऽनेनेति वक्त्रम्। 'गुधृवीपचिवचियमिसदिक्षदिभ्यश्च†' (उ० ४. १६८) इति त्रन्। वक्त्रम्। अस्यते क्षिप्यते भक्ष्यमनेनास्मिन् इति वा आस्यम्। 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ण्यत्। आङ्पूर्वादस्यतेः 'अन्नाद्यादयश्च' (उ० ४. ११३) इति यत्प्रत्ययो वा। वदनलपने करणे ल्युडन्ते। 'तुडि तोडने'। चुरादिः। 'अकर्तरि च—'(३. ३. १९) इति घञ्। 'एरच्' (३. ३. ५६) वा। 'खनो घ च' (३. ३. १२१) इति घित्करणसामर्थ्याद् घो वा। तुण्डम्। मुखं निस्सरणमित्यत्रोक्तम् ॥

क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥ ८९ ॥

क्षीर०—जिघ्रत्यनेन घ्राणम्। घुणति[2] भ्रमति गन्धार्थं घोणा।

---

१. 'खम्। मु' ख. पाठः. २. 'ति घोणा वहति गन्धं वा ग' क. ग. घ. ङ. पाठः.

---

† 'स्रः' इति मुद्रितोणादिपाठः।

नासते नासिका ।

"कुल्या गन्धवहा घोणा घ्राणा नासा च नासिका"

इति मुनिः कुल्यामप्याह । ‡शङ्खिनी च ॥

टीका० — घ्राणपञ्चकं **नासायाम्** । घ्रातेः करणे ल्युट् । घ्राणम् । गन्धं वहति प्राप्नोतीति गन्धवहा । पचादिः । 'घुण घूर्ण भ्रमणे' । अच् । घोणा । 'णास नास शब्दे' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः, पचादिर्वा । नासा । 'णस कौटिल्ये' । अच् । नसा । ण्वुलि नासिका । 'नसा नासा च नासिका' इति बृहदुत्पलिनी ॥

ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।

क्षीर० —उष्यते तीक्ष्णाहारेणौष्ठः । ओष्ठ इत्युभयार्थोऽपि अधरसान्निध्यादुत्तरोष्ठेऽत्र वर्तते । अधो भवोऽधरः । ओष्ठाभ्यां सहितावधरौ वा । अधरोऽप्योष्ठमात्रे वर्तते । दन्ताश्छाद्यन्ते ताभ्याम् । तद्वद् दशनानां वाससी च तावेव ॥

टीका० — ओष्ठचतुष्कमोष्ठे । तत्रोपरितनोऽधोवर्ती च ओष्ठः । अधरस्त्वधर एव ।

"अधरोष्ठेऽधरः पुमानधस्ताद्धीनयोस्त्रिषु"

इति बलशर्मा । इह तु गोबलीवर्दन्यायेनाधरशब्दसन्नियोगादुपरितनौष्ठ एव ओष्ठशब्दो वर्तते । अर्थस्य च द्वित्वाद् द्विवचनम् । यथा — 'तिथयो द्वयोः' इति बहुत्वाद् बहुवचनम् । 'प्रवेपमानाधरलक्ष्यकोपया' (स० ५. श्लो० ७४) इति कुमारसंभवे प्रवेपमानाभ्यामधराभ्यां लक्ष्यः कोपो यस्या इति वल्लभेन विवृतम् । ओष्ठेन सहितोऽधर ओष्ठाधर इति केचित् । द्वन्द्वे तु नपुंसकं स्यात् । 'उप दाहे' । 'उषिकुषिगायत्यर्तिभ्यस्थन्' (उ० २. ४) ओष्ठः ॥

अधस्ताच्चिबुकं

---

१. 'शिम्बिनी' ख. पाठः.

---

‡ 'शिङ्घाणी नासिका चाथ' इति यादवः ।

क्षीर० — अस्मिन्नोष्ठाधश्चीयते चिबुकं हन्वग्रसन्धिः ॥

टीका० — अधरादधश्चिबुकम् ॥

गण्डौ कपोलौ

क्षीर० — गण्डति संहन्यते गण्डः। कम्पते कपोलः ॥

टीका० — गण्डद्वयं कपोले। 'गडि वदनैकदेशे'। अच्। गण्डः। कपोल इति। *कपिकलिकण्डिगडिगण्डिकटिपटिभ्य ओलच्' (उ० १. ६९)। अस्मादेव निर्देशान्नुमभावः ॥

तत्परा हनुः ॥ ९० ॥

क्षीर० — तत्परा तत्पश्चाद्भागे कपोलाधः। हन्त्याहारं हनुः। पुंस्यपि ॥

टीका० — तत्परा कपोलोपरिभागो हनुः, यत्र जम्भास्थ्या दन्ता जायन्ते। हन्तेः 'शृस्वृण्णिहितृप्यासिवसिहनिक्लिदि‡खण्डिमनिभ्यश्च' (उ० १. १०) इति उप्रत्ययः। हनुः। तत्परेति रूपभेदात् स्त्रीत्वम्। 'पुंयोगे कर्णहनू' इति वररुचिः ॥

रदना दशना दन्ता रदाः

क्षीर० — रद्यते विलिख्यतेऽमीभिः रदनाः। दश्यते दम्यते वामीभिः दशना दन्ताश्च। रदन्ति विलिखन्ति रदाः ॥

टीका० — रदनचतुष्कं दन्ते। 'रद विलेखने'। करणे ल्युट्। रदनः। 'दंश दंशने'। ल्युट्। संज्ञावशादनुनासिकलोपः। दशनः। 'दमु उपशमे'। गर्तवत् तन्। दन्तः। 'वयसि दन्तस्य दतृ' (५. ४. १४१) इति निर्दे-

---

१. 'कृहनुभ्यां क्नुः। हनुः' ङ. छ., 'शरुवदुः हनुः' क. ख. ग. च. पाठः.

---

* 'कपिगडि', ‡ 'बन्धिम' इति च मुद्रितोणादिपाठः।

शात् पुंसि सुदन् । 'सुदती दतो धावती'ति प्रयोगाद् दच्छब्दोऽपि । रदः पचादिः ॥

तालु तु काकुदम् ।

क्षीर०— तलत्याहारोऽस्मिंस्तालु । ईषत् कवते काकु, तद् ददाति काकुदम् ॥

टीका० — तालुद्वयं **तालुके** । 'त्रोरश्च लः' (उ० १. ५) इति ञुण् रेफस्य च लः । तालुः । नान्तोऽपि (१) तालु । काकुर्जिह्वा सास्मिन् विद्यते इति काकुदम् । नैरुक्तोऽत्र शब्दलोप इति भाष्य उक्तम् ॥

रसज्ञा रसना जिह्वा

क्षीर०— रस्यतेऽनया रसना । लेढि ह्वयते वानया जिह्वा । लोला च । घण्टिका तु गलशुण्डिका ॥

टीका० — रसज्ञात्रयं **जिह्वायाम्** । रसं जानातीति रसज्ञा । रसनेति । 'रस आस्वादने' । नन्द्यादिल्युः । एवं दन्त्यमध्या । जयतेः[1] ग्रीवावज्जिह्वा निपातिता ॥

प्रान्तावोष्ठस्य सृक्कणी ॥ ९१ ॥

क्षीर० — **ओष्ठस्येति जातावेकत्वम् । सृजति लालां सृक् । सृक्कणी इत्यपि, कन्नन्तत्वात् ॥**

टीका० — ओष्ठस्य वामदक्षिणौ पर्यन्तौ सृक्कणी क्लीबे ।

"वामं लिहन् सृक् *वरास्यपूर्णे महानसेऽप्यावरणं ददाति"

इति वसन्तराजे अन्नन्तक्लीबे । 'सक्थ्यस्थिदधिसृक्व्यक्षि' इत्यादिना इदन्तमपि शबरस्वामी पठति । द्वयमपीति रामदासः ॥

---

१. 'जि जये ग्री' ङ. छ. पाठः.

---

* 'वरास्यपूर्णे' इति स्यात् ।

ललाटमलिकं गोधिः

क्षीर० — ललत्यत्रालङ्करोति, ललश्चटुलस्तिलकोऽटत्यत्र वा ललाटम्। अल्यते भूष्यते अलिकमलीकं च। गुध्यते पटादिना वेष्ट्यते गोधिः। फालं च ॥

टीका० — ललाटत्रयं ललाटे। 'लल ईप्सायाम्'। बहुलवचनाद् आटन्। 'अल भूषणादौ'। बाहुलक इकन्। अलिकम्। मृषार्थे तु दीर्घमध्यम्। गावौ ने(त्रौ? त्रे) धीयेते अस्मिन्निति गोधिः। त्रिकाण्डशेषे गोधिर्ना ॥

ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियाम्।

क्षीर० — भ्रमति भ्रूः। नेत्रोर्ध्वे रोमराजिः ॥

टीका० — लोचनयोरूर्ध्वभागौ भ्रुवौ। 'भ्रमेश्च ङूः' (उ० २. ७१) ॥

कूर्चमस्त्री भ्रुवोर्मध्यं

क्षीर० — कूर्पमिति भागुरिः। तन्न, लक्ष्यादर्शनात्। एवं कूर्चम्[1] ॥

टीका० — नासिकाया उपरि भ्रुवोर्मध्यं कूर्चम् ॥

तारकाक्ष्णः कनीनिका ॥ ९२ ॥

क्षीर० — तारयति तमस्तारका। कन्। 'तारका ज्योतिषि'(वा० ७. ३. २४९) इतीत्त्वाभावः। अक्ष्णः[2] इति खे तारकाव्यवच्छेदः। 'कन दीप्तौ' ॥

टीका० — अक्षिपुत्तलिका तारका नक्षत्रे प्रागुक्ता ॥

---

१. 'र्मम्' क. ग. घ. ङ. पाठः. २. 'क्षाः कर्नानिकेति खे(दृ?च)रीव्य' ग. पाठः.

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी।
दृग्दृष्टी च

क्षीर० — **लोच्यतेऽनेन लोचनं विलोचनं च। नीयतेऽनेन दृश्यं नयनं नेत्रं च। ईक्षतेऽनेनेक्षणम्। चष्टे वक्ति चक्षुः। अक्ष्णोत्यक्षि। द्वन्द्वाच्चक्षुः क्लीबे। दृश्यतेऽनया दृक्। द्वन्द्वात् स्त्रियाम्॥**

टीका० —लोचनाष्टकं **नेत्रे**। 'लोचृ दर्शने'। करणे ल्युट्। लोचनम्। नयतेर्ल्युटि नयनम्। 'दाम्नी—' (३. २. १८२) इत्यादिना ष्ट्रन्। नेत्रम्। 'ईक्ष दर्शने'। ल्युट्। ईक्षणम्। 'चक्षेः शिच्च' (उ० २. ११९) इत्युसिः। चक्षुः। शित्त्वादार्धधातुकाश्रयः ख्याञादेशो न भवति। 'अशू व्याप्तौ'। 'अशेर्नित्' (उ० ३. १५७) इति क्सिः। अक्षि। दृशेः सम्पदादिक्विप्। 'क्विन्प्रत्ययस्य कुः' (८. २. ६२) इति कुत्वम्। दृक्। दृशेः करणे क्तिन्। दृष्टिः॥

अस्रु नेत्राम्बु रोदनं चास्रमश्रु च॥ ९३॥

क्षीर० — **अस्यतेऽस्रु अस्रं च। अश्नुते आकण्ठमश्रु। बाष्पो नानार्थे॥**

टीका० —अश्रुपञ्चकं **लोचनतोय**। अस्रु अश्रु इति 'असु क्षेपणे', 'अशू व्याप्तौ' *'अस्रेवादयश्च' (उ० ५. २९) इति [1]रुन्प्रत्ययान्तौ निपातितौ। एवं यथाक्रम दन्त्यतालव्यावित्युणादिः।

"प्रावर्तयन्नदीरस्रैर्द्विषां तद्योषितां च सः"
(स० १९. श्लो० ११५)

इति माघे शोणितवाचिना श्लेषाद् दन्त्यसम्।

"उपशान्तौ शमः शीरोऽजगरे वाश्रमश्रुणि"

इति तालव्ये शभेदः॥

---

१. 'श्रु' क. ङ. च. छ. पाठः. २. 'त्रुप्र' ङ. छ., 'क्विप्र' च., 'क्विन्' क. ग., 'क्रन्' ख. पाठः.

---

* 'अश्रु' इति मुद्रितोणादिपाठः।

अपाङ्गौ नेत्रयोरन्तौ

क्षीर० — बाह्याविति शेषः। अपकृष्टावङ्गादपाङ्गौ ॥

टीका० — वामदक्षिणौ नेत्रान्तावपाङ्गौ। अगिर्गत्यर्थः। अच्। अपाङ्गः। अपकृष्टमङ्गति गच्छतीत्यपाङ्गः ॥

कटाक्षोऽपाङ्गदर्शने।

क्षीर० — कटे क्षीयते कटाक्षः। अपाङ्गेन दर्शनं नेत्रत्रिभागाख्यम् ॥

टीका० — अपाङ्गदर्शने कटाक्षः। कटमसदृशमक्षि यत्र स कटाक्षः। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्—' (५. ४. ११३) इति षच् समासान्तः ॥

कर्णशब्दग्रहौ पुंसि श्रुतिः स्त्री श्रवणं श्रवः ॥ ९३ ॥

क्षीर० — शब्दस्य ग्रहोऽनेन शब्दग्रहः। श्रूयतेऽनया श्रुतिः। शृणोति श्रवोऽसन्तः, क्लीबे। श्रोत्रं च ॥

टीका० — कर्णषट्कं **कर्णे**। किरतेः कृवृजि*ष्वृसिद्रुपन्यपिस्वपिभ्यो नित्' (उ० ३. १०) इति नः। कर्णः। 'ग्रहवृदृनिश्चि—' (३. ३. ५८) इत्यादिना करणे अप्। ग्रहः। शब्दस्य ग्रहः शब्दग्रहः। 'हुयामा$श्रुस्रुभसिभ्यस्नन्' (उ० ४. १६९) श्रोत्रम्। 'श्रुयजीषिस्तुभ्यः करणे' (वा० ३. ३. ९५) इति क्तिन्। श्रुतिः। करणे ल्युटि श्रवणम्। करणेऽसुन्। श्रवः ॥

उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्।

क्षीर० — शीर्यते जरया शिरः[1]। 'कुमारशीर्षयोः—'(३. २. ५१) इति लिङ्गाच्छीर्ष प्रकृत्यन्तरम्। मूर्च्छति मूर्धा पुमान्। मस्यते परिणमते मस्तकम्। कं वराङ्गं च नानार्थे ॥

---

१. 'केशनाडीभिः शिरः। एवं कु' ग. घ., 'केशनाडीति शिर.। एवं कु' क. पाठः.

---

* 'जृसिद्रुपन्यविस्वपि', $ 'श्रुसिभ्य' इति मुद्रितोणादिपाठः।

टीका० — उत्तमाङ्गपञ्चकं **शिरसि** । 'श्रयतेः स्वाङ्गे शिरः किच्च' (उ० ४. १९५) इत्यसुन् शिरादेशश्च धातोः । शिरः । 'कुमारशीर्षयोः—' (३. २. ५१) इति निपाताच्छिरसः शीर्षभावः ।

"शिरोवाची शिरोऽदन्तो रजोवाची रजस्तथा ।
विचकर्त शिरान् द्रौणी रथोत्पादरजोपमान् ॥"

इति कण्ठभूषणालङ्कार उक्तम् । 'श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्—' (उ० १. १६५) इत्यादिना मूर्पूर्वाद् दधातेर्मूर्धा निपातितः । 'मसी परिमाणे' । बाहुलकस्तन् । ततः स्वार्थे कः । मस्तकोऽस्त्रियामिति सम्बन्धः ॥

चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥ ९५ ॥

क्षीर० — चीयते चिकुरः । चिहुरः, प्राकृते कस्य हादेशात् । संस्कृतमपीति भुजः(?) —

"कुन्तला मूर्धजास्तूग्राश्चिकुराश्चिहुराः कचाः"

इति । कुन्ताकारं लाति कुणति वा कुन्तलः । वल्यते वालः । (ज्वाऽज्व) लादिणो वा । कचति कचः । के शेते केशः । शिरसिजश्च ॥

टीका० — चिकुरषट्कं केशे । 'चिञ् चयने' । 'कुरच्छेदने' । चिन्वन् वर्धमानः छिद्यत इति चिकुरः । पृषोदरादिः । बल्यते संव्रियत इति बालः । कर्मणि घञ् । 'कच बन्धने' । 'घञर्थे कः' (वा० ३. ३. ५८) । कचः । 'क्लिशू विबाधने' । 'क्लिशेरन् ललोपश्च' (उ० ५. ३३) इत्यन्ललोपौ ॥

तद्वृन्दे कैशिकं कैश्यम्

क्षीर० — केशानां समूहे 'अचित्तहस्तिधेनोष्ठक' (४. २. ४७) । कैशिकम् । केशाश्वाभ्यां यञ्छावन्यतरस्याम्' (४. २. ४८) ॥

---

१. 'स्त्रस्राश्चि' क. ग. ङ. पाठः.

टीका० — कैशिकद्वयं केशसमूहे। 'अचित्तहस्तिधेनोष्ठक्' (४. २. ४७) 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' (४. २. ४८) इति यञ्। कैश्यम्॥

अलकाश्चूर्णकुन्तलाः।

क्षीर० — चूर्णकाराः केशाः खर्जूराख्याः कुरलाश्च॥

टीका० — अलकद्वयमलके। 'अल भूषणादौ'। 'बहुलमन्यत्रापि' (उ० २. ५१) इति क्वुन्। अलकः। 'स्वभाववक्राण्यलकानि तासाम्' इति कस्यचित् प्रयोगः। अतः क्लीबे च। चूर्णः कुटिलः कुन्तलश्चूर्णकुन्तलः॥

ते ललाटे भ्रमरकाः

क्षीर० — भ्राम्यन्ति भ्रमरप्रकृतयो वा॥

टीका० — अलका एव लम्बतया ललाटान्तगता भ्रमरकाः। इवार्थे कः॥

काकपक्षः शिखण्डकः॥ ९६॥

क्षीर० — काकस्येव पक्षः। शिखेव डयते शिरसि खण्ड्यते वा शिखण्डः। क्षत्रियाणां चूडा काकपक्ष इति गौडः॥

टीका० — काकपक्षद्वयं घोटाचूड इति ख्याते। क्षत्रियकुमाराणामुपनयनकृते शिखापञ्चक इत्यन्यः। 'शिखण्डौ तु शिखा बर्हः' इति तालव्यादौ रभसः॥

कबरी केशवेशाः

क्षीर० — कृष्णवर्णकं वृणोति कबरी। 'जानपदकुण्ड—' (४. १. ४२) इति ङी। वेशो रचना॥

---

१. 'बर्बरा' क. ग. घ. ङ. पाठः. २. 'कुला' ग. ङ. पाठः. ३. 'न्त' घ. पाठः. ४. 'ते अस्र आस्रं च पुल्लिङ्गो केशे च रुधिरेऽश्रुणि। इति वै शि' (?) ख. पाठः. ५. 'षो' ख. घ. पाठः.

टीका० — केशवेशे केशरचनामात्रे खोप्यकादौ कबरी। 'जानपद—' (४. १. ४२) इत्यादिना ङीष् ॥

अथ धम्मिल्लः संयताः कचाः ।

क्षीर० — संयता बद्धाः। ऊर्ध्वं मिलन्ति धम्मिल्लो जूटाख्यः। धम्मिः[1] सौत्रो[2] वा[3]। धम्मल्ल[4] इति सभ्याः।

टीका० — कुसुमगर्भेषु बहिर्मौक्तिकलतिकादिना संयतेषु केशेषु धम्मिल्लः ॥

शिखा चूडा केशपाशी

क्षीर० — शेते मूर्ध्नि शीयते वा शिखा। †'शीङः खनिग्घस्वश्च' (उ० ५. २४) चोद्यते[5] चूडा। प्रशस्ताः केशाः केशपाशी ॥

टीका० — शिखात्रयं चूडायाम्। शिखोक्ता। केशपाशी गौरादिः।

व्रतिनस्तु सटा जटा ॥ ९७ ॥

क्षीर० — शिखेत्येव। 'सट अवयवे' 'जट सङ्घाते' ॥

टीका० — व्रतिनां चूडाविशेषे जटाद्वयम्। 'जट सट सङ्घाते'। 'सट अवयवे'। दन्त्यादि। उभयत्र भिदाद्यङ् ॥

वेणिः प्रवेणी शीर्षण्यशिरस्यौ विशदे कचे ।

क्षीर० — 'वेण गतौ'। शिरसि भवः शीर्षण्यः। शरीरावयवाद् यत्। 'ये च तद्धिते' (६. १. ६१) इत्यत्र 'वा केशेषु शिरसः शीर्षन्

---

१. 'मि सौ' ख. पाठः. २. 'त्रः पाठः। ध' क. ग. पाठः. ३. 'वा पाठः। ध' घ. ङ. पाठः. ४. 'ल्ल', ५. 'चू' ख. पाठः.

---

† 'शीङो ह्रस्वश्च' इति मुद्रितोणादिपाठः।

वक्तव्यः' (वा० ६. १. ६१) । विशदेऽन्योन्यासम्पृक्ते विकृते स्नानादिनिर्मले वा । 'शद्लृ शातने' ॥

टीका० — प्रोषितभर्तृकादिभिर्या बध्यते तत्र वेणिद्वयम् । 'वेणृ गतिज्ञानादौ' । 'इन्' इतीन् । वेणिः । प्रवेणीत्यन्योपसर्गनिवृत्तिः । विशदे परस्परासंसक्ते कचे शीर्षण्यद्वयम् । शिरसि भवाः शीर्षण्याः शिरस्याः । 'शरीरावयवाच्च' (४. ३. ५५) इति यत् । 'ये च तद्धिते' (६. १. ६१) इति शीर्षन्नादेशविकल्पः । 'ये चाभावकर्मणोः' (६. ४. १६८) इति प्रकृतिवद्भावः ॥

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे ॥ ९८ ॥

क्षीर० — कचादित्यर्थनिर्देशः । केशपाशः केशपक्षः केशहस्तः । 'प्रशंसावचनैश्च' (२. १. ६६) इति समासः ॥

टीका० — केशपर्यायात् परतः पाशादयस्त्रयः प्रयुज्यमानाः कलापार्थाः समूहवाचकाः । यथा केशपाशः केशपक्षः केशहस्त इत्यादि ॥

तनूरुहं रोम लोम

क्षीर० — शिरसोऽन्यत्र रोहति रोम । रलयोरैक्याल्लोम । लूयते वा ॥

टीका० — तनूरुहत्रयं शरीरभवे रोमणि । मूलविभुजादित्वात् कः । तनूरुहम् । 'व्यानशे तनुरुहाण्यपि हर्षः' इति ह्रस्वान्तेऽपि । रोमलोमनी *'दामन्सीमन्लोमन् —' (उ० ४. १५२) इत्यादौ नकारान्ते निपातिते ॥

तद्वृद्धौ श्मश्रु पुम्मुखे ।

क्षीर० — रोमवृद्धिः श्मश्रु । शमश्नुते श्मश्रु । द्राडिकापि । व्यञ्जनं नानार्थे ॥

टीका० — चोड इति ख्याते श्मश्रु । 'श्मनि श्रयतेर्डुन्' (उ० ५.

---

* 'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्' इति मुद्रितोणादिपाठः ।

२८) इति श्मन्शब्द उपपदे श्रयतेर्डुन्। डकारष्टिलोपार्थः। 'श्मशानशिश्वीति' शभेदः॥

आकल्पवेषौ नेपथ्ये

क्षीर०—आकल्प्यते आकल्पः। वेवेष्ट्यङ्गं वेषः। विशति चेत इत्येके तालव्यं शमाहुः। 'कर्मवेशाद्यत्' (५. १. १००) इत्यत्र तथा विचारात्[1]। नेत्रयोः पथ्यं नेपथ्यम्। वस्त्रादिशोभा॥

प्रतिकर्म प्रसाधनम्॥ ९९॥

क्षीर०—प्रत्यङ्गं कर्म प्रतिकर्म। प्रसाध्यतेऽनेनाङ्गं प्रसाधनम्। पञ्चैकार्था इत्येके। तच्चासत्। वेषो हि वस्त्रालङ्कारमाल्यप्रसाधनैरङ्गशोभा। प्रसाधनं तु समालम्भनं तिलकपत्रभङ्गादिना॥

टीका०—आकल्पपञ्चकं सुवर्णादिकृतशोभायाम्। 'कृपू सामर्थ्ये'। घञ्। आङ्पूर्वः। आकल्पः। 'विप्ल व्याप्तौ'। 'हलश्च' (३. ३. १२१) इति करणे घञ्। वेषः। 'वेषतुषाररोषा' इति षभेदः।

"नेपथ्ये गृहमात्रे च वेशो वेश्यागृहेऽपि च"

इति तालव्यान्ते रभसः। तदा च 'विश प्रवेशने' साध्यः। नाथीयधातुवृत्तावपि कोषवन्मूर्धन्यषत्वं तालव्यशत्वं चोक्तम्। प्रकृष्टं कर्म प्रतिकर्म, नान्तम्। करणे ल्युटि प्रसाधनम्॥

दशैते त्रिषु

क्षीर०—एते वक्ष्यमाणा रोचिष्णवन्ताः॥

अलङ्कर्तालङ्करिष्णुश्च

क्षीर०—'अलंकृञ्—' (३. २. १३६) इतीष्णुच्॥

मण्डितः।

---

१. 'पाठात्। ने' ख. पाठः.

प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृते ॥ १०० ॥

क्षीर०— परिष्क्रियते 'संपर्युपेभ्य' (६. १. १३७) इति सुट् ॥

विभ्राड् भ्राजिष्णुरोचिष्णू

क्षीर०— भ्राजते तच्छीलो भ्राजिष्णुः। 'भुवश्च' (३. २. १३८) इति वा इष्णुच् ॥

भूषणं स्यादलंक्रिया।

क्षीर०— अलङ्कारसाध्या शोभा ॥

टीका०— दशैते त्रिष्वलङ्कर्तालङ्करिष्णुश्च मण्डनः।
प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृतः ॥
विभ्राड् भ्राजिष्णुरोचिष्णू भूषा तु स्यादलङ्क्रिया।
इति पाठः सुगम एव ॥

अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥

मण्डनं च

क्षीर०— **करणे घञ्ल्युटौ** ॥

टीका०— अलङ्कारपञ्चकं **हाराद्याभरणे**। अलङ्क्रियत इत्यलङ्कारः। 'अकर्तरि च—' (३. ३. १९) इति घञ्। आभ्रियत इत्याभरणम्। ल्युट्। 'संपर्युपेभ्यः करोतौ भूषणे' (६. १. १३७) इति सुट्। परिष्कारः। 'परिनिविभ्यः सेवासित—' (८. ३. ७०) इत्यादिना षत्वम्। भूषेर्ल्युटि भूषणम्। 'मडि भूषायाम्'। 'करणाधिकरणयोश्च' (३. ३. ११७) इति ल्युट्। मण्डनम् ॥

अथ मुकुटं किरीटं पुन्नपुंसकम्।

क्षीर०— **मौलिर्नानार्थे। मुखे कुट्यते मुकुटम्। मङ्क्यतेऽनेन वा। कीर्यते किरीटम्** ॥

टीका०— मकुटद्वयं **मउड** इति ख्याते। 'मकि मण्डने' 'मङ्केः उटन् नलोपश्च'। एवमकारादिर्मकुटः। 'अन् मुकुटादिषु' (परिच्छे० १. सू० २२) इत्यत्र प्राकृतशास्त्रे वररुचिना उकारश्च मकारवान्। किरतेः कॄ*पॄकृपिभ्यः कीटन्' (उ० ४. १८६)। किरीटः ॥

---

* 'तॄ' इति मुद्रितोणादिपाठः।

चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ १०२ ॥

क्षीर० — मणिरिति शेषः । तरतीव तरलः । नायको नानार्थे ॥

टीका० —चूडामणिद्वयं **शिरोमणौ**। हारमध्यगो विशिष्टमणिस्तरलः। तारं लातीति पृषोदरादिः ॥

वालपाश्या पारितथ्या

क्षीर० — वालपाशे साधुर्वालपाश्या । वालबन्धनार्थं मुक्तावलयं पुलतलकादि । वालेषु पाशसमूहो वा । परितस्तथा भवा पारितथ्या ॥

टीका० — मस्तकसीमन्तीतोऽन्या वाले स्थिता या सुवर्णादिरचिता हंसपादिकादिः । **तत्र** वालपाश्याद्वयम् । वालपाशाय हिता वालपाश्या । 'तस्मै हितम्' (५. १. ५) इति यत् ॥

पत्रपाश्या ललाटिका ।

क्षीर० — सीमन्तादिकः[1] । पत्रपाशानां समूहः पत्रपाश्या । अलङ्कारो ललाटिका । 'कर्णललाटात् कनलङ्कारे' (४. ३. ६५) ॥

टीका० — पत्रपाश्याद्वयं सुवर्णादिरचितललाटाभरणे । ललाटिकेति । 'कर्णललाटात् कनलङ्कारे' (४. ३. ६५) इति कन् ॥

कर्णिका तालपत्रं स्यात्

क्षीर० — कर्णालङ्कारस्तालपत्रवत् सौवर्णोऽपि ॥

टीका० — कर्णिकाद्वयं ताडङ्काख्ये कर्णाभरणे । एतत् सौवर्णं च तालपत्राख्यं च । ललाटिकावत् कर्णिका ॥

कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥

क्षीर० — कुण्डं लाति वृत्तत्वात् कुण्डलम् । कर्णो वेष्ट्यते कर्णवेष्टनम् । भिन्नरूपास्त्रयः कर्णालङ्कारा इत्येके ॥

---

१. 'दि ।' ख. पाठः.

टीका० — देवविद्याधरादीनां कर्णाभरणे मध्यपूर्णे कुण्डलद्वयम्। 'कुडि दाहे'। 'कलस्तृपश्च' (उ० १. १०९) इति बाहुलकः कलः। कुण्डलम्॥

ग्रैवेयकं कण्ठभूषा

क्षीर० — ग्रीवाया अलङ्कारो ग्रैवेयकः। 'कुलकुक्षि—'(४. २. ९६) इति ढकञ्॥

टीका० — कण्ठाभरणमात्रे ग्रैवेयकद्वयम्। 'कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु' (४. २. ९६) इति ढकञ्। ग्रैवेयकः। 'ग्रैवेयस्फुरितत्विषः' (स० ४. श्लो० ७९) इति रघुः॥

लम्बनं स्याल्ललन्तिका।

क्षीर० — ललत्यलङ्कारान्तरे ललन्ती॥

टीका० — लम्बमानग्रीवाभरणे लम्बनद्वयम्। लम्बमाने आभरणमात्रे लम्बिकादावेतद् द्वयमिति केचित्। लम्बतेः ल्युट्। लम्बनम्। ललन्त्येव ललन्तिका। शतृङीप्। कन्। 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम्॥

स्वर्णैः प्रालम्बिका

क्षीर० — सिंहावलोकितेन कृतेत्येव। स्वर्णमयी कण्ठभूषा॥

टीका० — सैव ललन्तिका स्वर्णकृता प्रालम्बिकाख्या। ण्वुल्। अकः। 'प्रत्ययस्थाद्—' (७. ३ ४४) इत्यादिना इत्॥

अथोरस्सूत्रिका मौक्तिकैः कृता॥ १०४॥

क्षीर० — प्रालम्बिकेत्येव॥

टीका० — सैव ललन्तिका मुक्तादिभिः कृता उरस्सूत्रिका॥

---

१. 'न्ते ल' ख. पाठः. २. 'म्बणिका' क. ख. ग. ञ. पाठः.

हारो मुक्तावली

क्षीर० — ह्रियतेऽनेन चित्तं हारः ॥

टीका० — हारद्वयं मुक्ताहारे । ह्रियते मनोऽनेनेति हारः । मुक्तानामावली पङ्क्तिर्मुक्तावली । 'हारा मुक्तावली हारः' इति तु रभसः ॥

देवच्छन्दोऽसौ शतयष्टिकः ।

क्षीर० — देवानां छन्दोऽभिप्रायो यत्र । यष्टिर्लता सरः सरिकेत्येकार्थाः ॥

टीका० — असौ हारः शतयष्टिकः शतसरो देवच्छन्दाख्यः । देवैश्छन्द्यते परिधीयत इति घञ् । एवमजन्तः पुंल्लिङ्गश्च । अष्टोत्तरशतलतिको देवच्छन्द इति संहितायां वराहः । तथाहि —

"शतमष्टयुतं हारो देवच्छन्दो [1] *[3]ट्टगितिरेकयुता" (?)

इति । लतिका दण्डिका यष्टिका सरिका इति समानार्थाः ॥

हारभेदा यष्टिभेदाद् गुच्छगुच्छार्धगोस्तनाः ॥ १०५ ॥

अर्धहारो माणवकः

क्षीर० — यदाहुः—

"चतुष्षष्टिलतो हारोऽथाष्टहीना यथोत्तरम् ।
रश्मिःकलापो माणवकोऽर्धहारोऽर्धगुच्छकः ॥
कलाच्छन्दो मन्दरश्च गुच्छः सप्ततियष्टिकः । "

अन्ये त्वाख्यन्—द्वात्रिंशल्लतो गुच्छः, गुह्यच्छादनात् । चत्वारिंशल्लतो गोस्तनो लम्बमानत्वात् । गोपुच्छोऽपि । चतुःपञ्चाशल्लतोऽर्धहारो देवच्छन्दार्धत्वात् । विंशतिलतो माणवकोऽल्पत्वात् ॥

---

१. 'न्दोगति' ङ. छ. पाठः. २. 'ट' क. ख. पाठः. ३. 'तो ह्या' ण. पाठः.

---

* 'ह्यशीतिरेकयुता' इति वृहदभिधाने ।

टीका० — गुच्छपञ्चकं यष्टिभेदात् सरिकाभेदात् प्रत्येकं **हारभेदे**। स्तबके गुच्छ उक्तः।

"द्वात्रिंशद्भिर्गुत्सो विंशतिभिः कीर्तितोऽर्धगुत्साख्यः।
षोडशभिर्माणवको द्वादशभिश्चार्धमाणवकः॥'

इति। संहितायां वराहः —

"गोस्तनस्तु चतुष्षष्टिहारभेदः प्रकीर्तितः।
चतुष्षष्ट्या तु यष्टीभिरर्धहार उदाहृतः" ॥

एकावल्येकयष्टिका।

क्षीर० — **एका आवलते** ॥

टीका० — एकयष्टिका,

"एकावली नाम यथेष्टसङ्ख्या हस्तप्रमाणा मणिविप्रयुक्ता।
संयोजिता या मणिना तु मध्ये यष्टीति सा भूषणविद्भिरुक्ता॥"

इति वराहः॥

सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिका॥ १०६॥

क्षीर० — **सैवैकावली**॥

टीका० — सैवैकावली सप्तविंशतिसङ्ख्यमौक्तिका नक्षत्रमाला।

"सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम्"

इति मनुः॥

आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम्।

क्षीर० — हस्तसूत्राख्यः। आ उप्यते आवापकः। परिहियते परिहारे भवो वा पारिहार्यः। कटति कटकः। वलते वलयः दोर्भूषा॥

टीका० — आवायकचतुष्कं शङ्खवलयकटकादौ बाहुभूषणे। आङ्-पूर्वाद् वयतेर्घञ्। आवायकः॥

केयूरमङ्गदं तुल्ये

क्षीर०—के बाहुशीर्षे यौति केयूरम्। अङ्गं दयतेऽङ्गदम्॥

टीका०—केयूरद्वयं बाहुखण्डे[1] इति ख्याते॥

अङ्गुलीयकमूर्मिका॥ १०७॥

क्षीर०—अङ्गुल्यां भवमङ्गुलीयकम्। 'जिह्वामूलाङ्गुलेश्छः' (४. ३. ६२)। स्वार्थे कन्। ऊर्मिप्रकृतिरूर्मिका॥

टीका०—अङ्गुलीयद्वयमङ्गुलीयके। 'जिह्वामूलाङ्गुलेश्छः' (४. ३. ६२) अङ्गुलीयः। ततः स्वार्थे कन्।

"अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुलीयकः"। (स० ८. श्लो० ११८) इति भट्टौ पुमान्। 'इदं तदसुलभस्थानभ्रंशि शोचनीयमङ्गुलीयकम्' इत्यभिज्ञानशाकुन्तले क्लीबे। ऊर्मिकेति। इवार्थे कः॥

साक्षराङ्गुलिमुद्रा सा

क्षीर०—अङ्गुल्यां मोदयते मुद्रयति वा अङ्गुलिमुद्रा। सा ऊर्मिका॥

टीका०—सा ऊर्मिका अक्षरवती अङ्गुलिमुद्राख्या॥

कङ्कणं करभूषणम्।

क्षीर०—आहुश्च—'कङ्कणं स्यात् प्रतिसरः'। कं शुभं कणति कङ्कते सरति वा॥

टीका०—मुक्तादिघटितवलयाकृति करभूषणं कङ्कणम्। कणन् कणतीति कङ्कणः। पृषोदरादिः। हस्तमण्डलसूत्रेऽप्ययम्। 'कङ्कणो ना प्रतिसर' इत्यमरमाला।

---

१. 'हु' अ. पाठः. २. 'ण्ड' इ. च. छ. पाठः.

"क्लीबं स्यान्मण्डने सूत्रे कङ्कणं करभूषणम्"

इति रभसः ॥

स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना स्त्रियाम् ॥ १०८ ॥

क्षीर० — मीयते प्रक्षिप्यते मेखला। कञ्चेयते[3] बध्यते काञ्ची। सपति समवैति सप्तकी। रशन्ति तां रशना। 'रश कान्तौ' सौत्रः। शिञ्जिनी च। कलापो नानार्थे ॥

क्लीबे सारसनं च

क्षीर० — सारं सनोति सारसनम्। स्त्रीकट्यां वस्त्राद्यग्रन्थनम्। उच्चयो नीवी च (काञ्ची?) ॥

टीका० — मेखलापञ्चकं स्त्रीकट्याभरणे। तत्र —

"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका।
रशना षोडश ज्ञेया कलापो विंशकस्तथा" ॥

'कचि दीप्तिबन्धनयोः'। पचाद्यिः[3]। पृषोदरादिदीर्घत्वम्। घञ्दीर्घत्वे वा। गौरादिङीष्। काञ्ची। 'काञ्चीदामनिरुद्धघर्घररवम्' इति प्रयोगश्च। 'काञ्चिदाम्नि पिहितैकतरोरु' (स० १०. श्लो० ८३) इति माघः। तदा च 'इन्' इतीन्। रशनेति। 'अशे रश च' (उ० २. ७८) इति युच् रशादेशश्च धातोः। 'व्यथितसिन्धुमनीरशनैः शनैः' (स० ५. श्लो० ११) इति भारविः। आरसनेन शब्देन सह वर्तत इति सारसनम्।

"मेखलायां सारसनमुरस्त्रे च तनुत्रिणाम्"

इति दन्त्यादौ रभसः ॥

अथ पुंस्कट्यां शृङ्खला त्रिषु।

क्षीर० — पुंस्कट्यां या काञ्ची, सा शृङ्खला। शृङ्गैः खलतीति ॥

टीका० — सैव काञ्ची पुंसां श्रोण्याभरणं शृङ्खलम्। तालव्यादि। स्त्रियां शृङ्खला ॥

---

१. 'याम्' ख. घ. पाठः. २. 'च्य' ख. पाठः. ३. 'दिर्दीर्घत्वम्। घञ्' ज. पाठः.

पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरस्तथा ॥ १०९ ॥

हंसकः पादकटकः

क्षीर० — पादे अङ्गदमिव पादाङ्गदम् । तुलाकृतेर्जङ्घायाः कोटिरिव तुलाकोटिः । मञ्जु मधुरमीरयति मञ्जीरः । नुवति नूपुरम् । 'णु स्तवने' । नवनं पूरयति(वा) नूपुरम् । हंसवत् कायति हंसकः । अवान्तरभेदस्त्वेषां भरतोक्तो नादृतः ॥

टीका० — पादाङ्गदषट्कं स्त्रीचरणभूषणे । केचिद् रवशून्यः पादकटकः, हंसाकृतिर्हंसकः । द्वयं पादभूषणमात्रे वदन्ति । न्यूनं पूरयतीति नूपुरः । पृषोदरादिः । 'हंसकं पादनूपुरम्' इति क्लीबकाण्डे अमरमाला ॥

किङ्किणी क्षुद्रघण्टिका ।

क्षीर० — किञ्चित् किणति किङ्किणी । झिञ्झिणीत्येके । क्षुद्रा अल्पा घण्टिका कुरुकाख्या ॥

टीका० — किङ्किणीद्वयं घाँघरीति ख्यातायाम् । '*चङ्क्रणेः किङ्किणश्च' (उ० ४. १८) इति कणेर्यङ्लुगन्तादीकन्प्रत्ययकिङ्किणादेशाभ्यां किङ्किणीकेत्युणादौ । तस्मात् किङ्किणी अव्युत्पत्तिः । कङ्कणी, आदिमध्ययोर्निरिकारापीति गोवर्धनः ॥

त्वक्फलक्रिमिरोमाणि वस्त्रयोनिः

क्षीर० — ग्रहणकवाक्यमिदम् । त्वगादयो वस्त्रस्य योनिरुपादानकारणम् । आविष्टलिङ्गत्वम् ।

टीका० — त्वगादि चत्वारि वस्त्रयोनिः वस्त्रकारणम् । एतस्मादेव परं वस्त्रस्योत्पत्तेः ॥

दश त्रिषु ॥ ११० ॥

---

१. 'नू' ब. पाठः. २. 'ङ्कि' ख. पाठः. ३. 'घुरुघुराख्या' ख. पाठः. ४. 'वा' ब. पाठः., 'घार्घरी' ख. पाठः.

---

* 'शङ्कणः कङ्कणश्च' इति मुद्रितोणादिपाठः ।

क्षीर० — **वाल्कक्षौमफालकार्पासबादरकौशेयराङ्कवानाहतनिष्प्रवाणितन्त्रकाणि वाच्यलिङ्गानि ॥**

टीका० — वाल्कादीनि निष्प्रवाण्यन्तानि दश त्रिषु, चकारादेकादश तन्त्रकमिति केचित् । वाल्कादय उद्गमनीयान्ता दश त्रिष्विति कश्चित् । कृमिकोशोत्थादयोऽपि व्याख्यापरा इति ते न गणिकायां प्रविष्टाः ॥

वाल्कं क्षौमादि

क्षीर० — **वल्कस्य त्वचो विकारो वाल्कम् । क्षुमाया विकारः क्षौमम् । आदिशब्दाद् भाङ्गादि ॥**

टीका० — वल्कभवं वाल्कम् । तद्विशेषाः क्षौमादयः । क्षुमा अतसी तद्भवं क्षौमम् । वृद्धम् । दुकूलवाचि त्ववृद्धम् । आदिना शाणादेर्ग्रहणम् ॥

फालं तु कार्पासं बादरं च तत् ।

क्षीर० — **फलस्य विकारः फालम् ॥**

टीका० — **कार्पासे** वस्त्रे फालत्रयम् । कार्पासबादरे स्वभावात् क्लीबे, पूर्ववज्जातार्थेऽण् । स्त्रियां फालीत्यादि ॥

कौशेयं कृमिकोशोत्थं

क्षीर० — **कोशस्येदं कौशेयं नेत्रपट्टादिः । 'कोशाड्ढञ्' (४. ३. ४२) ॥**

टीका० — कौषेयद्वयं कोषकारकर्पटे । 'कोषाड्ढञ्' (४. ३. ४२) ॥

---

१. 'ट्टा' ख. पाठः.

राङ्कवं मृगरोमजम् ॥ १११ ॥

क्षीर० — रङ्कुर्मृगविशेषः । 'कच्छादिभ्यश्च' (४. २. १३३) इत्यण् ॥

टीका० — राङ्कवद्वयं रङ्कुरोमोद्भवे कम्बलादौ । हरिणविशेषो रङ्कुः । 'रङ्कोरमनुष्येऽण् च' (४. २. १००) । मृगा मेषाद्याः पशवः ॥

अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे ।

क्षीर० — छेदः क्षालनं भोगश्च आहननं, तद्रहितमनाहतम् । प्रोयतेऽस्यां प्रवाणी तन्तुवायशलाका[1] । सा निर्गता अस्मात् । 'निष्प्रवाणिश्च' (५. ४. १६०) इति साधुः । 'तन्त्रादचिरापहृते' (५. २. ७०) इति कनि तन्त्रकम् ॥

टीका० — अनाहतचतुष्कं **नवाम्बरे** । प्रवाणिस्तन्तुवायदण्डिका, ततः प्रवाण्या निर्गतो निष्प्रवाणिः 'निष्प्रवाणिश्च' (५. ४. १६०) इत्यत्र निपात्यते । 'तन्त्रादचिरापहृते' (५. २. ७०) इति कन् । तन्त्रकम् ॥

तत् स्याद्दुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥

क्षीर० — उद्गम्यतेऽभिलष्यते उद्गमनीयम् । युगमविवक्षितम् । यल्लक्ष्यं — 'गृहीतपत्युद्गमनीयवस्त्रा' ॥

टीका० — प्रक्षालितवस्त्रयुगलमुद्गमनीयम् । क्लीबम् ।

"सा मङ्गलस्नानविशुद्धगात्री गृहीतप्रत्युद्गमनीयवस्त्रौ[2]" (स० ७. श्लो० ११)

इति कुमारसम्भवः । अत्र च गृहीतेति तकारस्य[3] प्रशब्दपूर्वस्य गुरुत्वे प्राप्ते लघुत्वमपीष्यते, नच्छन्दोभङ्ग इति कविसम्प्रदायः । तथाच शृङ्गारप्रकाशे —

---

१. 'कानिर्गतं वासः स्यात् ।' क. ग. घ. पाठः. २. 'च', ३. 'स्त्रम् इ' ग. ङ. छ. पाठः. ४. 'स्य गात्रीश' ङ. च. पाठः.

"यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
नच्छन्दोभङ्गमेवाहुस्तदादोषाय सूरयः" ॥

यथा —

"निर्द्रव्यो ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसः"

इति तिशब्दस्य लघुत्वमेव भूतम् । 'प्रातनाभिह्रदमज्जनमाशु' (स० १०. श्लो० ६०) इति माघश्च ॥

पत्रोर्णं धौतकौशेयं

क्षीर० — लकुचवटादिपत्रेषु क्रिमिलालोर्णाकृतं पत्रोर्णम् । पृषोदरादित्वात् ॥

टीका० — कौशेयमेव धौतं पत्रोर्णम् ॥

बहुमूल्यं महाधनम् ।

टीका० — बहुमूल्यं यत् किमपि तन्महाधनं, न तु वस्त्रमेव । तथा च किराते — 'पुराधिरूढः शयनं महाधनम्' (स० १. श्लो० ३८) इति ॥

क्षौमं दुकूलं स्याद्

क्षीर० — क्षुमाया विकारः क्षौमम् । दुह्यते क्षुमाया आकृष्यते दुकूलम् ॥

टीका० — क्षोमद्वयं[२] मल्ल इति ख्याते । 'टुक्षु शब्दे' । सोमवद् मन् । एवमवृद्धः क्षोमः । वृद्धस्त्वतसीभववचन उक्तः ॥

द्वे तु निवीतं प्रावृतं त्रिषु ॥ ११३ ॥

क्षीर० — निवीयते आच्छाद्यते निवीतम् । 'व्येञ् संवरणे' निवृतमिति मुनिः ॥

---

१. 'तृ तः ।' ङ. पाठः. २. 'यम' क. ख. ग. च. ञ. पाठः.

टीका० — निवीतद्वयमवगुण्ठितवस्त्रे । 'व्येञ् संवरणे' । क्तः । यजादि-सम्प्रसारणम् । 'हलः' (६. ४. २) इति दीर्घत्वम् । निवीतम् । वृणातेः क्तः । प्रावृतम् ॥

स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयो द्वयोः ।

क्षीर० — **दश्यन्ते दशाः । पुंसीत्येके । वस्यते याभिस्ता वस्तयः । अच्छिन्नदशस्य वस्त्रस्याच्छादनान्नानात्[1] । वर्तय इत्येके ॥**

टीका० — दशाद्वयं दशतीति ख्यातासु ।

"दशा वर्ताववस्थायां वस्त्रान्ते भूम्नि पुंस्त्रियोः"

इति रभसः । 'वासोदशाश्च दाराश्च' इति पुंस्त्वे वररुचिः । वस्त्रस्येति वचनाद् वर्त्यादावेकत्वे च । वस्तिस्त्वनियतसङ्ख्यः दशासामानाधिकरण्याद् वस्ते-र्बहुवचनं कृतम् ॥

दैर्घ्यमायाम आनाहः

क्षीर० — **आनह्यतेऽनेन आनाहः । सर्वत्रेदम् ॥**

टीका० — दैर्घ्यत्रयं दीर्घत्वे । दीर्घस्य भावो दैर्घ्यम् । यामवदायामः । रोहतेर्घञ् । आरोहः ॥

परिणाहो विशालता ॥ ११४ ॥

क्षीर० — **विस्ताराख्यः ॥**

टीका०— परिणाहद्वयं विस्तारे । वस्त्रविषये त्वयम् **ओरा[3]स इति**' ख्याते । 'णह बन्धने' घञ् । परिणाहः ॥

पटच्चरे जीर्णवस्त्रं

क्षीर० — **पट इवाचरत् पटत्, 'सर्वप्रातिपदिकेभ्यः क्विप्' (३. १. ११) इत्येके । ततः शत्रन्तात् 'भूतपूर्वे चरट्' (५. ३. ५३) ॥**

टीका० — **पुरातनवस्त्रे** पटच्चरद्वयम् । पटदिति चरति स्फुटतीति पटच्चरम् ॥

---

१. 'नात्' ख. पाठः. २. 'मासार इ' ङ. छ. पाठः. ३. 'सारइ' ग. च. छ. पाठः.

समौ नक्तककर्पटौ ।

क्षीर०—नक्तं भवो नक्तकः । नजते वा । 'ओनजी व्रीडने' । द्रव-द्रव्यं येन पूयते तत्र रूढोऽयं तत्तुल्येऽपि वस्त्रे वर्तते । कल्पते कर्पटः ॥

टीका० — नक्तकद्वयं वस्त्रार्धखण्डे । मलिनत्वदुष्ट इति केचित् । 'कृपू सामर्थ्ये' । 'शकादिभ्योऽटन्' (उ० ४. ८२) । कर्पटः । नक्तकाष्टकमेव केचित् वस्त्रे वर्णयन्ति ।

"पटोऽस्त्री कर्पटः शाटसिचयप्रोतनक्तकाः"

इति रभसश्च । तदा च समौ समलिङ्गौ न तु समार्थौ ॥

वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् ॥ ११५ ॥

क्षीर० — वस्यतेऽनेनाङ्गं वस्त्रम् । वासः असन्तं क्लीबे । चि-ल्यते चेलम् । चैलमित्यसत् । ‡'चिल चालने' । अंशूंस्तन्तून् कायत्यंशु-कम् । प्रोतः सिचयश्चीरं च ॥

टीका० — वस्त्रषट्कं वस्त्रे । 'वस आच्छादने' 'सर्वधातुभ्यष्ट्रन्' (उ० ४. १६०) वस्त्रम् । छदेः ल्युट् । छादनम् । 'वसोर्णित्' (उ० ४. २१९) इत्यसुन् । वासः । 'चिल सेचने' पचाद्यच् । चेलम् । 'कृत्यल्युटो बहुलम्' (३. (३. ११३) इति ल्युट् । वसनम् । करणे ल्युट् । अंशुकं तालव्यशम् ॥

सुचेलकः पटोऽस्त्री

क्षीर०— पटति विस्तीर्यते पटः । अस्त्रीति चिन्त्यं, द्वयोर्दर्शनात् ॥

टीका० — सुचेलकद्वयं शोभनपटे । 'अट पट गतौ' । अच् । पटः ॥

ना वराशिः स्थूलशाटकः ।

क्षीर० — वृणोत्यङ्गं वराशिः । ना पुल्लिङ्गः । चत्वार एकार्था इत्येके । एवं सत्यर्थात् पटीति सिध्यति । स्थूलशाटी ॥

---

१. 'विलासने' ख. पाठः. २. 'व', ३. 'ति प', ४. 'ति स्थू' ख. पाठः. ५. 'ति । अ' क. पाठः.

---

‡ 'चिल वसने' इति मुद्रितधातुपाठः ।

टीका० — वराशिद्वयं स्थूलकर्पटे । वराशिस्तालव्यान्तः ॥

अन्तरीयोपसंव्यानपरिधानान्यधोंशुके ॥ ११६ ॥

क्षीर० — अन्तरे भवमन्तरीयम् । गहादित्वाच्छः । उपसंवीयतेऽनेनाङ्गमुपसंव्यानम् ॥

द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ।

क्षीर०— प्रावियतेऽनेनाङ्गं प्रावारः । 'वृणोतेराच्छादने' (३. ३. ५४) । घञ् । उत्तरे ऊर्ध्वाङ्गे आसज्यते उत्तरासङ्गः । 'बृहत्या आच्छादने' (५. ४. ६) । कन् ॥

निचोलः प्रच्छदपटः

क्षीर०— निचोल्यतेऽनेन निचोलः, येन तूलशय्यादि प्रच्छाद्यते । चुलिः सौत्रः । चुदेर्लत्वं वा ॥

समौ रल्लककम्बलौ ॥ ११७ ॥

क्षीर० — रमन्तेऽस्मिन् रल्लकः । काम्यते कम्बलः । कम्बलः कमनीयो भवतीति निर्वचनात् ॥

संव्यानमुत्तरीयं च

क्षीर० — संवीयतेऽनेन संव्यानम् । उत्तरे ऊर्ध्वे भवमुत्तरीयम् ॥

टीका० — येन वस्त्रान्तरमाच्छाद्यते स्यूतेनास्यूतेन वा, तत्र निचोलद्वयम् । 'निचोलो[1] स्यान्निचुल' इति रभसः । 'चुल समुच्छ्राये' । अच् । निचोलः । प्रच्छाद्यतेऽनेनेति प्रच्छदः । ततः पटेन सह कर्मधारयः । रल्लकद्वयं राल्लेति ख्याते कम्बलविशेषे । ‡ 'कम्बलादयश्च' (उ० १. ११२) इति कमेः कलप्रत्ययो बुगागमश्च निपात्यते । अन्तरीयचतुष्कं मधःपरिधानवस्त्रे । अन्तरशब्दस्य गहादित्वाद् 'गर्तोत्तरपदाच्छः (४. २. १३७) इत्यनुवर्तमाने 'गहादिभ्यश्च' (४. २.

---

१. 'लः स्या' ग, 'लं नि' ब. पाठः ·

---

‡ 'कमेर्बुग्' इति मुद्रितोणादिपाठः ।

१३८) इति छप्रत्ययः । अन्तरीयम् । व्येञः कर्मणि ल्युट् । उपसंव्यानम् । धात्रः करणे ल्युट् । परिधानम् । प्रावारपञ्चकमुपरिधाने । 'वृणोतेराच्छादने' (३. ३. ५४) इति घञ् । प्रावारः । उत्तरदेहभाग आसज्यत इत्युत्तरासङ्गः । कर्मणि घञ् । आच्छादनविशेषवृत्तेर्बृहतीशब्दाद् 'बृहत्या आच्छादने' (५. ४. ६) इति स्वार्थे कः । बृहतिका । 'अन च' इत्यस्माद् धातोः संव्यानम् । संपूर्वाद् व्येञो वा । अन्तरीयवदुत्तरीयम् ॥

चोलः कूर्पासकोऽस्त्रियाम् ।

क्षीर० — चोल्यतेऽनेन चोलः आप्रपदीनं कञ्चुकम् । कूर्परे अस्यते कूर्पासः स्त्रीणां कञ्चुलिकाख्यः ॥

टीका० — स्त्रीणां कञ्चुलिकायां चोलद्वयम् । निचोलवच्चोलः । पुरुषचोलेऽप्येतदुपचारात् । कूर्पासको दन्त्यसः ॥

नीशारस्तु प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥

क्षीर० — निशीर्यते शीताद्यनेन नीशारः । 'शॄवायुवर्णनिवृतेषू —' (३. ३. २१) इति घञ् । यल्लक्ष्यं —

"गौरिवाकृतनीशारं प्रायेण शिशिरीकृतम्" ॥

टीका० — हिमकालस्य प्रावरणे कम्बले रुगुपद्यादौ नीशारः । 'शॄ वायुवर्णनिवृतेषूपसंख्यानम्' (३. ३. २१) इति घञ् । 'उपसर्गस्य —' (६. ३. १२२) इत्यादिना दीर्घः ॥

अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम् ।

क्षीर० — ऊर्वोरर्धाच्छादकमंशुकमर्धोरुकम् । चण्डं भगमतात चण्डातकम् । यस्य चल्लनकोऽपभ्रंशः ॥

टीका० — विदग्धस्त्रीणामर्धोरुपिधायके चलणाकारे वस्त्रे चण्डातकम् ।

"अर्धोरुकं वरस्त्रीणां वासश्चण्डातकः पुमान्"

इत्यमरमाला ॥

---

१. 'नेति चो' क. पाठः. २. 'टा' ज. पाठः. ३. 'नमर्धो' ख. पाठः.

स्यात् त्रिष्वाप्रपदीनं तद् प्राप्नोत्याप्रपदं हि यत् ॥ ११९ ॥

क्षीर० — पादाग्रं प्रपदम् । आ प्रपदादाप्रपदम् 'आप्रपदं प्राप्नोति' (५. २. ८) इति खः ॥

टीका० — पादाग्रपर्यन्तं लम्बमाने वस्त्रे आप्रपदीनम् । 'आप्रपदं प्राप्नोति' (५. २. ८) इति खः ॥

अस्त्री वितानमुल्लोचः

क्षीर० — वितन्यते वितानम् । उपरि लोच्यत उल्लोचः । उल्लुच्यते अपनीयतेऽनेनातपादि वा । चन्द्रकाख्यः ॥

टीका० — वितानद्वयं चन्द्रातपे । तनोतेर्घञ् । वितानः । ऊर्ध्वं लोच्यते बध्यत इत्युल्लोचः । कर्मणि घञ् ॥

दूष्याद्यं वस्त्रवेश्मनि ।

क्षीर० — दूष्यतेऽनेनान्यदर्शनम् । आद्यशब्दात् पटकुटी गुणलयनी[1] च ॥

टीका० — वस्त्रवेश्मनि खडेंगहिकेत्यादौ दूष्यम् । आदिना पटवादिग्रहणम् । तथा च शुभाङ्गः —

"स्थूलं पटगृहं दूष्यं पटवां पटकुट्यपि ।
त्रिषु दूष्यं दूषणीये क्लीबे वस्त्रगृहान्तरे ॥"

इति रुद्रः ॥

प्रतिसीरा जवनिका स्यात् तिरस्करणी च सा ॥ १२० ॥

क्षीर० — प्रतिसिनोति बध्नाति प्रतिसीरा । जवन्तेऽस्यां जवनिका । तिरस्करोति छादयति तिरस्करणी काण्डपटाख्या । क्वचित् —

---

१. 'नि स्कुलाश्च ॥' क. पाठः. २. 'ण्ड' ङ. छ, 'बद्ध' ख. पाठः.

"पर्यस्तिका परिकरः पर्यङ्कश्चावसक्थिका ।
अञ्चलं त्वंशुकान्ते नीवी सारसनमुच्चयः" ॥

टीका० — प्रतिसीरात्रयं व्यवधायके पटे । काण्डपटेऽपीति केचित् । प्रतिसिनोति बध्नातीति प्रतिसीरा, दन्त्यवती । 'शु*षिचिमीनां दीर्घश्च' (उ० २. २८) इति सिनोते रग् दीर्घत्वं च । जवनं वेगोऽस्या अस्तीति जवनिका । चवर्गादिः । दृष्टेरुपरतिरनयेति वा यवनिका । अन्तस्थादिः । तिरस्क्रियतेऽनयेति तिरस्करणी । ल्युडन्ता ॥

परिकर्माङ्गसंस्कारः

क्षीर० — मलपरिमार्जनार्थं परिकर्म स्नानोद्वर्तनादि ॥

टीका० — शरीरनिर्मलीकरणमात्रे परिकर्मद्वयम् । क्वचित् प्रतिकर्मेति पाठः । नान्तोऽयं शब्दः ॥

स्यान्मार्ष्टिर्मार्जना मृजा ।

क्षीर० — मार्जनं मार्ष्टिः शुद्धिमात्रे । मृ(तृ?ज)स्तिप् इति बाहुलकात् तिप् । 'व्रश्चभ्रस्ज—' (८. २. ३६) इति षः । 'मृजेर्वृद्धिः' (७. २. ११४)। मृजेः षित्त्वाद् अङ् ॥

टीका० — चन्दनकुङ्कुमादिना निर्मलीकरणे मार्ष्टित्रयम् । 'मृजू शौचालङ्कारयोः' । चुरादिणिच् । बहुलवचनात् क्तिन् । 'मृजेर्वृद्धिः' (७. २. ११४)। मार्ष्टिः । अथवा 'मृजूष् शुद्धौ' । 'वसेस्तिः' (उ० ४. १८१) इति बाहुलकात्तिः । मृजेर्वृद्धिः । 'ण्यासश्रन्थो युच्' (३. ३. १०७) । मार्जना । षिद्भिदादिभ्यङि मृजा ॥

उद्वर्तनोच्छादने द्वे क्लीबे

क्षीर० — उच्छाद्यते मलोऽनेनोच्छादनम् । उत्सादनमिति सभ्याः ॥

---

* 'सि' इति मुद्रितोणादिपाठः ।

टीका० — उद्वर्तनद्वयमुपलणीति ख्यातायाम् । उभयत्र करणे ल्युट् । उद्वर्तनोत्सादने ॥

अथाप्लाव आप्लवः ॥ १२१ ॥

स्नानं

क्षीर०— **'विभाषाङि रुप्लुवोः'** (३. ३. ५०)। **घञ्**। **मज्जनं च** ॥

टीका० — आप्लावत्रयं **स्नाने** । 'विभाषाङि रुप्लुवोः' (३. ३. ५०) इति घञ । आप्लावः । पक्षे 'ऋदोरप्[1]' (३. ३. ५७) । आप्लवः । स्नातेः ल्युट्। स्नानम् ॥

चर्चा तु चार्चिक्यं स्थासकः

क्षीर० — चर्च्यतेऽनयाङ्गं चर्चा । चर्चिकायां चर्चने साधु चार्चिक्यम् । चन्दनादिना पुण्ड्रादि । तिष्ठत्यङ्गे स्थासकः । चर्चिक्यं त्वपभ्रष्टम् ॥

टीका० — चर्चात्रयं **वस्त्राङ्गादौ** विन्यस्तकुङ्कुमादिच्छटायाम् । चर्चेति 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (३. ३. १०५) इत्यङ् । स्थास एव स्थासकः ॥

अथ प्रबोधनम् ।

अनुबोधः[2][3]

क्षीर० — अङ्गस्येति शेषः । यथा कस्तूरिकादेर्मद्यादिना ॥

टीका० — मन्दसौरभे **पुनः सौरभस्य व्यक्तीकरणे** प्रबोधनद्वयम् । कस्तूरिकादिभिर्वेधन इत्यन्ये । ल्युडादिः ॥

पत्रलेखा पत्राङ्गुलिरिमे स्त्रियाम् ॥ १२२ ॥

क्षीर० — पत्राकृतिर्लेखा द्रामिडकालिङ्गादिभेदेन पत्रभङ्गः ॥

टीका० — कपोलादौ **कस्तूरिकारचितपत्रावल्यां** पत्रलेखाद्वयम् ॥

---

१. 'पि' ख. पाठः. २. 'व' क. पाठः. ३. 'धः य' ख. पाठः.

तमालपत्रतिलकचित्रकाणि विशेषकम्।
द्वितीयं च तुरीयं च न स्त्रियाम्

क्षीर०—तमालपत्राकृति[1] कस्तूर्यादिना[2] ललाटे तमालपत्रम्। तिलाकृति तिलकम्। चित्रकं नानावर्णम्। विशिनष्टि विशेषकम्[3]। इत्थं तिलकपर्यायाः[4] एते। पर्यायत्वं त्वदूरविप्रकर्षात्। अत्र द्वितीयचतुर्थौ तिलकविशेषकौ पुन्नपुंसकयोः। पुण्ड्रं च॥

टीका०—तमालपत्रचतुष्कं ललाटन्यस्ते चित्रके। द्वितीयं तिलकं चतुर्थं विशेषकम्। न स्त्रियामिति शेषः (?)। तिलकचित्रकौ प्रागुक्तौ॥

अथ कुङ्कुमम्॥ १२३॥

कश्मीरजन्माग्निशिखं[5] वरं[6] वाह्लीकपीतने।
रक्तसङ्कोचपिशुने[7] वीरलोहितचन्दने॥ १२४॥

क्षीर०—कुं कौति कुङ्कुमम्। अग्नेरिव शिखाः केसराण्यस्याग्निशिखम्। व्रियते वरम्। 'ग्रहवृदृनिश्चि—' (३.३.५८) इत्यप्। वह्लीकदेशजं वाह्लीकम्। यद् रघोरुत्तरदिग्विजये—

"दुधुवुर्वाजिनः स्कन्धाल्लग्नकुङ्कुमकेसरान्"।
(स० ४. श्लो० ६७)

पीतयत्यङ्गं पीतनम्। रञ्जनाद् रक्तम्। अत एवासृक्संज्ञम्। सङ्कोचस्य पिशुनं सूचकम्। वीरं[8] स्थिररागम्। लोहितं चन्दनमिव। घुसृणं देश्यम्॥

टीका०—कुङ्कुमैकादशकं कुङ्कुमे। वरं[9] रक्तं धीरम् इति पदानि। कश्मीरजन्म नान्तं तालव्यशं च। वह्लतेः घञ्, ततः ठन्, इति महान्यासः। औणादिकेञन्ताद् वा कन्। वह्लिका नाम क्षत्रियाः, तेषां जनपदा इति वाह्लिकाः, तत्र भवः। 'अवृद्धादपि—'(४.२.१२९) इति वुञि प्राप्ते 'कच्छादिभ्यश्च' (४.

---

१. 'त्रकाकृ', २. 'र्यकादि', ३. 'कः।' ख. पाठः, ४. 'भेदा ए' ख. ङ. च. पाठः. ५. 'र्थम्।', क. ग. घ. पाठः. ६. 'धीं', ७. 'धीं', ८. 'तराङ्गम्।' ख. पाठः. ९. 'वर रक्त धीर इ' ञ. पाठः.

२. १३३) इत्यण्। कुङ्कुमहयादौ वह्निक इति ।

"आजिघ्रति प्रणतमूर्धनि वह्निदेश्यः"

इतीन्नन्तः । अलीकादित्वाद् वह्नीको दीर्घमध्योऽपि । तथा च—'वह्निकेषु च वह्नीकाः' इति शब्दार्णवः ।

"वह्नीकं वह्निकं धीरहिङ्गुनोर्नाश्वदेशयोः"

इति रुद्रः । तच्च देशे दीर्घत्वं चिन्त्यम् । कुङ्कुमादौ भवार्थेऽण् इति हड्डचन्द्रः

"धैर्यवत्स्वैरविद्वत्सु धीरः क्लीबं तु कुङ्कुमे" ॥

लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः ।

क्षीर०— लक्ष्यते लाक्षा । रक्षति देहं राक्षा । लातिरात्योर्वा । जायते जतु । यौति यावः । न लज्जतेऽस्मादलक्तः, अलति वा । द्रुमस्यामय इव, निर्यासः । धन्वन्तरिस्तु—

"लाक्षा पलङ्कषा राक्षा दीप्तिश्च क्रिमिजं जतु ।
क्षतघ्नाऽङ्गमाता च द्रुमव्याधिरलक्तकः" ॥

टीका०—लाक्षाषट्कं जतुनि । 'रक्षा रक्षणलाक्षयोः' इत्यनेकार्थः । यावकोऽन्तस्थादिः । द्रुमस्यामयो रोगो द्रुमामयः ॥

लवङ्गं देवकुसुमं श्रीसंज्ञम्

क्षीर०— लूयते लवङ्गम् । देवद्युतिमत् कुसुमं देवानां वा । श्रीपर्यायम् ॥

टीका०— लवङ्गत्रयं लवङ्गे । श्रीसंज्ञकं लक्ष्मीपर्यायनामकम् ॥

अथ जापकम् ॥ १२५ ॥

कालेयकं च कालानुसार्यं च

क्षीर०— जापकाख्यपर्वतभवम् । कालवर्णसारम् ॥

---

१. 'वी' क. ख. ग. च. ज. पाठः. २. 'क्षा जा' ख. पाठः. ३. 'ज' क. पाठः. ४. 'यम्।' ख. ङ. पाठः. ५. 'लं वर्ण सा' क. ख. ङ. पाठः.

टीका० — जार्षकत्रयं **कालिआ** इति ख्याते। अयं च पीतवर्णः।

"आबिभ्रती बभ्रु बभौ नतभ्रूः कालीयकीयं तिलकं ललाटे।
निमग्ननिश्शेषमिव स्मरेषुं स्वर्णज्वलत्पुङ्खमुखाङ्कितं च ॥"

इति कप्फिण्णाभ्युदयः। जापकं चवर्गादि मूर्धन्यषं च ॥

अथ समार्थकम्।

वंशकागुरुराजार्हलोहक्रिमिजजोङ्गकम् ॥ १२६ ॥

कालागुरु

क्षीर० — वंशाभं **वंशकम्**। वंशिकेत्येके। **न गुरु अगुरु**। **कालागरु काकतुण्डाख्यम्**। रोहति **लोहम्**। क्रिमिभिर्जन्यते **क्रिमिजम्**। **जोङ्गकं गिरिजम्**। आहुश्च —

"अगुरु प्रवरं लोहं क्रिमिजग्धमनार्यजम्" ॥

टीका० — वंशिकषट्कं **सामान्यागुरुणि**। वंशिकं क्लीबे। लघुमानत्वादगुरु। पुल्लिङ्गोऽप्ययमित्यन्यः। तथा च — 'शीतकृत् तेऽगुरोर्मदः' इति प्रयोगः। केचित् कालागुरुण्यगुरुः पुमान्। अत एव 'कालागुर्वगुरुः स्याद्' इति सविसर्गपाठो युक्तः। 'जुगि बुगि वर्जने'। चवर्गादिः। ण्वुल्। जोङ्गकम्। अथवा 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २. ३५) इति क्वुन्। बाहुलको गुणः। कृष्णागुरुश्चागुरुरुच्यते ॥

अगुरु स्यात् तु मङ्गल्यं मल्लिगन्धि यत्।

क्षीर० — मल्लिकापुष्पगन्ध्यगुरु **मङ्गल्याख्यम्** ॥

टीका० — मल्लिकासमानगन्धेऽगुरुणि **मङ्गल्यम्** ॥

---

१. 'प' ङ. छ. पाठः. २. 'न्विते च' ञ. पाठः. ३. 'शभवं वं' ख. पाठः. ४. 'रु। काक' क. पाठः. ५. 'म्। आ' ख. पाठः ६. 'ल्या ॥' क. ख. पाठः.

यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥
बहुरूपोऽपि

क्षीर० — यक्षं धूपयति यक्षधूपः । सर्जवृक्षस्य रसः सर्जरसः । राति प्रीतिं रालः । रालापि । बहुरूपो नानाकृतिगन्धः ॥

टीका० — यक्षधूपपञ्चकं धूपके । सर्जः सालः, तस्य रसः सर्जरसः । 'अरालः सर्जवक्रयोः' इति ह्रस्वादौ रभसः ।

"लालनः सर्जनिर्यासः सर्जः सर्जरसस्तथा"

इत्यमरमालायां सर्जोऽपि नाम ॥

अथ वृकधूपकृत्रिमधूपकौ ।
तुरुष्कः पिण्डकः सिह्लो यावनोऽपि

क्षीर० — वृकान् धूपयति वृकधूपः । तुरुष्को यवनदेशजः । पिण्डको द्रव्यान्तरैः सह पिण्डितस्वरूपत्वान्न च्यवते । सिह्लाख्यो वृक्षविशेषः । 'सिल उञ्छे' । सुगन्धिप्रस्तावात् पुनरिहोक्तः ॥

टीका० — गन्धशास्त्रोक्ते बहुवस्तुकृते वृकधूपद्वयम् । तुरुष्कचतुष्कं सिह्लके सल्लकीद्वये । तुरुष्को मूर्धन्यषः । यावनोऽन्तस्थादिः ॥

अथ पायसे ॥ १२८ ॥
श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ ।

क्षीर०—पयसो द्रुमक्षीरस्य विकारः स्रुतिः पायसः । श्रियो वासो वेष्टश्च निर्यासः । वेष्टते वेष्टः । सरलस्य देवदारुणो द्रवो निर्यासः ॥

टीका० — पायसपञ्चकं सरलवृक्षरसे । गोरसनामधेयत्वात् पायसः ।

"सरलद्रवः श्रीविष्टो दधिक्षीरघृताह्वयः"

इति रभसः ।

"श्रीवासे परमान्ने च पायसः पुंसि सम्मतः"

इति रुद्रः ॥

मृगनाभिर्मृगमदः कस्तूरी च

क्षीर० — कसति सौगन्ध्यमस्याः[1] कस्तूरी । कस्त्वरते स्तूयते वा ॥

टीका० — मृगनाभित्रयं कस्तूरिकायाम् । गन्धमृगस्य नाभिर्मृगनाभिः ।

"सुराट्क्षत्रिययोर्नाभिः पुंसि प्राण्यङ्गके द्वयोः ।
चक्रमध्ये तु प्रधाने स्त्रियां कस्तूरिकामदे ॥"

इति नाभिशब्दोऽप्यत्र ॥

अथ कोलकम् ॥ १२९ ॥

कर्कोलकं कोशफलम्

क्षीर० — कोलमेव कोलकम् । कर्कन्तेऽत्र कर्कः[3] कोलति संस्त्यायति कर्कोलम्[4] । कोशे फलान्यस्य कोशफलम् ॥

टीका० — कोलकत्रयं कर्पूरगन्धितकोलफले ॥

अथ कर्पूरमस्त्रियाम् ।

घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥ १३० ॥

क्षीर० — कल्पते कर्पूरः । घनस्येव सारोऽस्य शैत्याद् घनसारः, सिताभ्राभत्वाच्च । चन्द्रपर्यायो ह्लादकत्वात् । हिमा शीता चासौ वालुका ॥

टीका० — कर्पूरपञ्चकं कर्पूरे । 'कृपू सामर्थ्ये' । 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४.९१) कर्पूरमस्त्रियाम् । बहुलवचनात् 'कृपो रो लः' (८. २. १८) इति न लत्वम् । चन्द्रसंज्ञश्चन्द्रापत्यनामा । सिता आभा दीप्तिरस्येति सिताभः । सिताभ्र इति केचित् ॥

---

१. 'स्याः । कस्त्व' क. ग. घ. ङ. पाठः. २. 'तकोल' ख. पाठ. ३, ४. 'क' ख. पाठः. ५. 'तकोल' ख. पाठः.

गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।

क्षीर० — भद्रा श्रीरस्य भद्रश्रीः । चन्द्यते ह्लाद्यतेऽनेन चन्दनम् ॥

टीका० — गन्धसारचतुष्कं **चन्दने** । चन्देर्नन्द्यादिल्युः । चन्दनम् ॥

तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ॥ १३१ ॥

क्षीर० — तैलपर्णगोशीर्षौ गिरी आकरावस्य । हरेरिन्द्रस्य चन्दनं हरिचन्दनम् । हरि कपिलं वा । तच्चातिपीतं शीतं चाहुः ॥

टीका० — तैलपर्णिकत्रिकं प्रत्येकं **चन्दनविशेषे** । तत्र धवलं सुशीतं[1] चन्दनं तैलपर्णिकम् । गोशीर्षाकारे मलयैकदेशे जातं गोशीर्षकम् । अतिसुरभितया सर्पैर्वेष्टितं भवतीति सर्पवेष्टितं चास्य नाम भवति । हरिर्मण्डूकः तदाकारे पर्वते जातं हरिचन्दनम् । पक्काम्रगन्धि पीतवर्णम् ॥

तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं च

क्षीर० — तिलस्येव पर्णान्यस्याः । तिलपर्णी नदी आकरोऽस्येत्येके । पत्रेष्वङ्गति पत्राङ्गम् । पत्राङ्गापभ्रंशोऽयम् । कौ चन्दनम् ॥

टीका० — तिलपर्णीपञ्चकं **रक्तचन्दने** । बर्बराख्यं निर्गन्धं रूक्षं **कुचन्दनं** पृथगित्यन्यः । एतदपि रक्तचन्दनस्यैव । तथा च रभसः —

"कुचन्दनं च पत्राङ्गे द्वुभेदे रक्तचन्दने"

इति ॥

अथ जातिकोशजातिफले समे ॥ १३२ ॥

क्षीर० — जातिर्लतायाः[2] कोशं[3] जातिफलाख्यम्[4] ॥

टीका० — जातीकोषद्वयं **जातीफले** । जातेरक्तिघ्नन्तत्वात् पक्षे ङीष् ॥

कर्पूरागरुकस्तूरीकक्कोलैर्यक्षकर्दमः ।

---

१. 'तलं च' ख. ञ. पाठः. २. 'वसनायाः' क. ग. पाठः. ३. 'सस्या' ख. घ. ङ., ४. 'ति' ङ. छ. पाठः.

क्षीर०—एतैः पिण्डीकृतैर्यक्षप्रियः कर्दमः। 'कुङ्कुमैः' इत्यागमः। धन्वन्तरिस्तु—

"कुङ्कुमागरुकस्तूरीकर्पूरं चन्दनं तथा।
महासुगन्धमित्युक्तं नामतो यक्षकर्दमः" ॥

टीका०—कर्पूरादिभिः समभागैर्यक्षकर्दमः। तथा च व्याडिः—

"कर्पूरागरुकस्तूरीकक्कोलघुसृणानि च।
एकीकृतमिदं सर्वं यक्षकर्दम उच्यते"॥

गात्रानुलेपनी वर्तिर्वर्णकं स्याद् विलेपनम् ॥ १३३ ॥

क्षीर०—द्वौ द्वौ भिन्नार्थावित्येके। वर्तिर्हि नटादौ प्रसिद्धा ॥

टीका०—गात्रानुलेपनीचतुष्कमनुलेपनार्थं वर्तिते कुङ्कुमचन्दनादौ।

"गात्रानुलेपनी वर्तिर्विदग्ध्यथ विलेपनम्।
वर्णकं चाथ विच्छित्तिः स्त्री कषायोऽङ्गरागके ॥"

इति रभसः। केचिदनुलेपनयो(गी?ग्यी)कृते वर्तिते विलेपनद्वयम्। अपरद्वयं च समालम्भने वर्णयन्ति। वर्तयतिः शुक्लकरणे। 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति कर्मणि युजपवादः क्तिन्। वर्तिः। अथवा * 'ह्वशिविरुहिवृतिविदिकीर्तिभ्यश्च' (उ० ४. १२०) इतीन्नन्तो वा वर्तिः ॥

चूर्णानि वासयोगाः स्युः

क्षीर०—चूर्णं पटवासादिक्षोदः। वास्यते सुगन्धीक्रियते यैर्युज्यमानैर्मिश्रैस्ते वासयोगाः ॥

टीका०—विलासिनीनां नानासुगन्धिकृतगुडिकायां चूर्णद्वयम्।

"चूर्णौ धूलौ क्षारभेदे चूर्णानि वासयुक्तिषु"

इति रुद्रः ॥

---

१. 'पङ्कः।' ग. घ. ङ. पाठः. २. 'धा' ग, ङ. पाठः ३. 'दैः' ख. पाठः.

---

* 'ह्वपिषिरुहिवृतिविदिच्छिदिकी' इति मुद्रितोणादिपाठः।

भावितं वासितं त्रिषु ।

क्षीर० — भाव्यते मिल्यते भावितम् । 'भुवोऽवकल्कने' । णिच् । वास्यते छाद्यते स्म । 'वस स्नेहच्छादापहारेषु' । गन्धद्रव्यैर्भावितं पुष्पाद्यैर्वासितमित्येके ॥

टीका० — गन्धग्राहिते वस्तुनि भावितद्वयम् ॥

संस्कारो गन्धमाल्याद्यैर्यः स्यात् तदधिवासनम् ॥ १३४ ॥

क्षीर० — संस्कारस्तिलादीनां[1] गुणाधानम् । आद्यशब्दाद् धूपादिभिः ॥

टीका० — गन्धमाल्यधूपादिभिर्वस्त्रताम्बूलादीनां संस्कारोऽधिवासनम् ॥

माल्यं मालास्रजौ मूर्ध्नि

क्षीर० — मालैव माल्यम् । चातुर्वर्ण्यादित्वाद् यञ् । माल्यते धार्यते माला । सृज्यते स्रक् । 'ऋत्विग्दधृक्स्रग्—' (३. २. ५९) इति साधुः ॥

टीका० — माल्यत्रयं ग्रथितपुष्पावल्यां प्रकटायां मूर्ध्नि न्यस्तायाम् । अन्यत्रोपचारात् । 'मल मल्लधारणे' । 'ऋहलोर्ण्यत्' (३. १. १२४) माल्यम् । घञि माला । 'स्वभावाद् घञन्तोऽपि स्त्रीलिङ्गः' इति धातुप्रदीपः । 'सृज विसर्गे' । 'ऋत्विग्—' (३. २. ५९) इत्यादिना क्विन्नमागमौ निपात्येते । स्रक् ॥

केशमध्ये तु गर्भकम् ।

क्षीर० — माल्यमित्येव । गर्भस्थत्वाद् गर्भकम् ॥

टीका० — माल्यमेव केशमध्ये स्थितं गर्भाख्यम् ॥

---

१. 'दिना गु' ग. पाठः.

प्रभ्रष्टकं शिखालम्बि

क्षीर०—माल्यमित्येव। मध्यात् प्रभ्रष्टम्॥

टीका०—चूडातो लम्ब(मा)नं माल्यं प्रभ्रष्टकम्। स्वार्थे कः॥

पुरो न्यस्तं ललामकम्॥ १३५॥

क्षीर०—ललत्यग्रे ललाम मुण्डमालाख्यम्॥

टीका०—पुरोभागे न्यस्तं ललाटपर्यन्तमागतं माल्यं ललामकम्॥

प्रालम्बमृजुलम्बि स्यात् कण्ठाद्

क्षीर०—यत् कण्ठाद् वक्षस्यवलम्बमानं माल्यं, तत् प्रालम्बम्॥

टीका०—ग्रीवान्ताद्दजु लम्बमानं प्रालम्बाख्यम्॥

वैकक्ष्यकं तु तत्।
यत् तिर्यक् क्षिप्तमुरसि

क्षीर०—विकक्ष्यायां भवं वैकक्ष्यम्। यज्ञोपवीतन्यायेन माल्यम्॥

टीका०—उत्तरीयाकारेणोरसि तिर्यगाहितं वैकक्ष्यकम्॥

शिखास्वापीडशेखरौ॥ १३६॥

क्षीर०—माल्यमित्येव। आपीड्यत आपीडः। शेते शिरसि शेखरः। उत्तंसोऽपि[1]॥

टीका०—शिखास्थितमात्रे माल्य आपीडद्वयम्। शिखासु शिखास्थानेषु। मुण्डिवलादाविति केचित्। पीडयतेः अच्। आपीडः। 'श्वित्रश्रोत्रकशेरुशेखर' इति शभेदः॥

---

१. 'अवतंसो' ख. पाठः. २. 'ण्डी' अ. पाठः.

रचना स्यात् परिस्पन्दः

क्षीर० — शिल्पादिना रचना । अन्यत्रापि ॥

टीका० — पत्रावल्यादे रचना परिस्पन्दः । 'स्पदि किञ्चिच्चलने' । दन्त्यादि । घञ् ॥

आभोगः परिपूर्णता ।

क्षीर० — आभुज्यतेऽनेनाभोगः ॥

टीका० — सर्वसम्पूर्णत्वमाभोगः । परिपूर्णता स्फीतता ॥

उपधानं तूपबर्हः

क्षीर० — उपधीयतेऽस्मिञ्छिर उपधानम् । उपबृंह्यतेऽनेनोपबर्हते वोपबर्हः । शिरोनिवेशनं च ॥

टीका० — उपधानद्वयं गण्डके । उपधीयते शिरोऽत्रेत्युपधानम् । बर्हबर्हौ हांसार्थौ पटपुटेत्यादिना दण्डकपठितौ । कर्मणि घञ् । उपबर्हः ।

"मृदूच्चतूलो गर्भोली चातुरोऽपि मचूलकः ।
असिगण्डुः[1] कोलगण्डौ[2] चाबुक्की[3] गल्लँचौतुरी[4] ॥"[5]

इति रभसः ॥

शय्यायां शयनीयवत् ॥ १३७ ॥

शयनं

क्षीर० — शेतेऽत्र । 'संज्ञायां समज—' (३. ३. ९९) इति क्यप् । 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इत्यनीयर्[6] च । तूलिकादिः ॥

टीका० — शय्यात्रयं शय्यायाम् । 'संज्ञायां समज—' (३. ३. ९९) इति क्यपि शय्या । 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इत्यधिकरणेऽनी-

---

१. 'भा' क. ख. ग. च. ज. पाठः. २. 'ण्डु', ३. 'की' ङ. छ. पाठः. ४. 'ध' ज. पाठः. ५. 'वा' च. पाठः. ६ 'की' ङ. छ. पाठः. ७. 'र् ॥' ख. पाठः.

यर्। शयनीयम्। 'करणाधिकरणयोश्च' (३. ३. ११७) इति ल्युट्। शयनम्। यथा शय्यायां शयनीयशब्द उक्तस्तथा शयनशब्दोऽपीति वत्यर्थः ॥

मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः।

क्षीर०—मञ्च्यते धार्यतेऽनेन मञ्चः। पर्यङ्क्यते पर्यङ्कः। 'परेश्च घाङ्कयोः' (८. २. २२) इति वा लत्वम्। खटन्त्येनां श्रान्ताः खट्वा ॥

टीका०—मञ्चचतुष्कं **खट्वायाम्**। 'मचि धारणोच्छ्रायपूजनेषु'। पचाद्यच्। मञ्चः। अञ्चतेः कर्मणि घञ्। 'परेश्च घाङ्कयोः' (८. २. २२) इति लत्वविकल्पः। पर्यङ्कपल्यङ्कौ। 'खट काङ्क्षे'। विश्ववत् कन्। खट्वा ॥

गण्डुकः कन्दुकः

क्षीर०—गाते गाः। गच्छन्नण्डुको गण्डुकः। गन्दुक इत्येके। गगन इन्दुरिव। कन्यतेऽर्थ्यते क्रीडार्थिभिः कन्दुकः। कं शिरो दुनोति वा, नमनोन्नमनेक्षणात्। वीटा भारते। च्युतादानक्रीडायां गुडिका। गिरिकश्चासौ ॥

टीका०—गण्डूकद्वयं गण्डुं इति ख्याते **क्रीडागुडके** ॥

दीपः प्रदीपः

क्षीर०—प्रः स्वार्थे, मेरुसुमेरुवत् ॥

टीका०—दीपद्वयं **प्रदीपे**। इगुपधलक्षणः कः ॥

पीठमासनम् ॥ १३८ ॥

क्षीर०—पीयते उपवेशनेन ग्रस्यते पीठम्। आस्तेऽस्मिन्नासनम्।

टीका०—पीठद्वयमासने। 'आस उपवेशने'। ल्युट् ॥

---

१. 'ण्ड्' ब. पाठः.

समुद्गकः सम्पुटकः

क्षीर० — समुद्गम्यते समुद्गच्छति वा समुद्गः । सम्पुट्यते श्लेष्यते सम्पुटः । भूषणाद्यावपनम् ॥

टीका० — समुद्गद्वयं फरुगादिसम्पुटे । समुद्गच्छतीति डः ॥

प्रतिग्राहः पतद्ग्रहः ।

क्षीर० — प्रतिगृह्णात्यालेपकादि प्रतिग्राहः । 'विभाषा ग्रहः' (३. १. १४३) इति णः । पतद् गृह्णातीति पतद्ग्रहः ॥

टीका० — प्रतिग्राहद्वयं **प्रतिग्रह** इति ख्याते । 'विभाषा ग्रहः' (३. १. १४३) इति कर्तरि णः । प्रतिग्राहः । दूषितरसं ताम्बूलं पतद् गृह्णातीति पतद्ग्रहः । पचादिः ॥

प्रसाधनी कङ्कतिका

क्षीर० — कचाकर्षणाख्या । प्रसाध्यन्तेऽनया केशाः । कङ्कते कङ्कती, कङ्कान् दत्तांस्तनोति वा ॥

टीका० — प्रसाधनीद्वयं गजदन्तादिमयकेशमार्जन्यां **काङ्क** इति ख्यातायाम् । 'कङ्कतमपि केशमार्जनम्' इति नाममालायां क्लीबेऽपि ॥

पिष्टातः पटवासकः ॥ १३९ ॥

क्षीर० — पिष्टेन कुङ्कुमचूर्णादिना अतति पिष्टातः । पटो वास्यतेऽनेन पटवासकः ॥

टीका० — पिष्टातद्वयं **पटवासपिण्ड** इति ख्याते ॥

दर्पणे मुकुरादर्शौ

---

१. 'प' अ. पाठः.

क्षीर०—दृप्यन्तेऽनेन सुवेषा दर्पणः। मङ्क्यते मण्ड्यतेऽनेन मुकुरः। आदृश्यतेऽस्मिन् रूपमादर्शः। आत्मदर्शोऽपि ॥

टीका०—दर्पणत्रयं दर्पणे। दर्पणो नन्द्यादिः। 'दर्पणमृदङ्गजठराः पुंस्युक्ताः' इति वररुचिः। 'मकि मण्डने'। 'मुकुरदर्दुरौ' (उ० १. ४२) इत्युरच् नकारलोपश्च निपात्यते। एवं मुकुरो मकारादिः। अत्यर्थं दृश्यते रूपमत्रेत्यादर्शः। 'हलश्च' (३. ३. १२१) इति घञ् ॥

व्यजनं तालवृन्तकम् ॥ १३९½ ॥

क्षीर०—व्यज्यते वातोऽनेन विक्षिप्यते वा व्यजनम्। तालस्येव वृन्तमस्य तालवृन्तम्। तालस्य वृन्तादुपलभ्यत इत्येके ॥

इति नृवर्गः।

टीका०—व्यजनद्वयं सामान्यव्यजने। 'अज गतिक्षेपणयोः'। करणे ल्युट्। व्यजनम्। 'वा यौ' (२. ४. ५७) इति विकल्पेन वीभावः। तालवृन्तमेव तालवृन्तकम्। तथा च—'तालवृन्तानिलाधिकम्' (कु० स० २. श्लो० ३४) इति कालिदासः। स्वार्थे कः ॥

इति वन्द्यघटीयसर्वानन्दकृतौ टीकासर्वस्वे

मनुष्यवर्गः।